श्रीगणेशाय

अथ फलावर्गनिर्णयः प्रारभ्यते १॥

एषां कमीलिकृतं [illegible] चैव

एतेन तावत्सु समये रक्ताः

लिकांशुमाकार [illegible] तैः सैः

सिद्धये [illegible] स्थितै रिति

[illegible] कर्म [illegible] कते

[illegible] तेषु [illegible]

तदन्ते कुर्वीदिति [illegible]

[illegible] स्य के अर्थ दिन [illegible]

इति तु [illegible] पर [illegible]

[illegible] तिथि [illegible] वापि [illegible] वारे [illegible]

ते तन्मासे [illegible] पांच [illegible]

[illegible] तेर [illegible] वर्ग [illegible]

[illegible] तिथि [illegible] संक्रान्ति [illegible]

[illegible] तं [illegible] कार्यं [illegible]

[illegible] संक्रान्तिर्न [illegible]

[illegible] संक्रान्ति [illegible]

[illegible] वर्ग माव [illegible]

[illegible] कार्यं [illegible] स्यात [illegible]

[illegible] कार्यं॥

रामायण [illegible] नाम [illegible]॥ रामो [illegible]

पत्रं प्राप्ति [illegible]॥ [illegible]॥	[illegible] प्रमाण [illegible]
[illegible]॥	[illegible] विशेष [illegible] १६
॥ [illegible]॥	॥ [illegible]॥ १

॥श्रीगणेशाय नमः॥श्रीसरस्वत्यैनमः॥श्रीरघुनाथायनमः॥श्रीमद्राघवपादपद्मयुगलंप्रस्थाधि
तंपद्मयापद्मस्थेनतुपद्मजेनविनुतंपद्माश्रयस्यापनये॥यद्वेदैश्चनुतंसुखैकनिलयंसर्वाश्रयं
निष्क्रियंशम्बकंकरशंकरंमुकुंदरहोसन्नैमितद्व्ध्यये॥१॥श्रीमद्भूतदेववीजममलंयस्यां
कुरश्चिन्मयः॥कांडैःसप्तभिरन्वितोतिविततोरूप्याल्वालोदितः॥पत्रैस्तत्वसहस्त्रकैःसुकिल
सच्छाखाशतैःपंचभिश्चात्मप्राप्तिफलप्रदोविजयतेरामायणःस्वस्तरुः॥२॥वाल्मीकिगिरिसं
भूतारामांभोनिधिसंगता॥श्रीमद्रामायणीगंगापुनातिभुवनत्रयं॥३॥वेदवेद्येपरेपुंसिजाते
दशरथात्मजे॥वेदःप्राचेतसादासीत्साक्षाद्रामायणात्मना॥४॥रामंरामानुजंसीतांभरतंभरता
नुजं॥सुग्रीवंवायुसूनुंचप्रणमामिपुनःपुनः॥५॥कूजंतंरामरामेतिमधुरंमधुराक्षरं॥आ
रुह्यकविताशाखांवंदेवाल्मीकिकोकिलं॥६॥वाल्मीकेर्मुनिसिंहस्यकवितावनचारिणः
शृण्वन्नामकथानादंकोनयातिपरांगतिं॥७॥यःपिबन्सततंरामचरितामृतसागरं॥अतृप्त
स्तंमुनिंवंदेप्राचेतसमकल्मषं॥८॥गोष्पदीकृतवारीशंमशकीकृतराक्षसं॥रामायण
महामालारत्नंवंदेनिलात्मजं॥९॥अंजनानंदनंवीरंजानकीशोकनाशनं॥कपीशमक्षहं
तारंवंदेलंकाभयंकरं॥१०॥उल्लंघ्यसिंधोःसलिलंसलीलंयःशोकवह्निंजनकात्मजायाः
आदायतेनैवददाहलंकांनमामितंप्रांजलिरांजनेयं॥११॥मनोजवंमारुततुल्यवेगंजितेंद्रि
यंबुद्धिमतांवरिष्ठं॥वातात्मजंवानरयूथमुख्यंश्रीरामदूतंशिरसानमामि॥१२॥रामायरामा

नमनारामचरितमनुस्मृत्य संक्षेपत उपदिश्य यथागतं जगाम॥ ततस्तदनुग्रहलब्धं
रामचरितं सरहस्यं निरवशेषं तत्प्रसादादेव सम्यक्॥ विज्ञाय भूलोकवर्तिनां चतुर्णां
वर्णानां तापत्रयविमोचनाय ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः॥ स्वकृतश
तकोटिरामायणसारभूतं चतुर्विंशत्युत्तरगायत्र्याख्यापरब्रह्मविद्याविलासम्भूतं रामा
यणां चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामग्राहयत्॥ तस्यास्य दिव्यकाव्यस्य
श्चाद्यः॥ सर्गो वाल्मीकेर्नारदस्योपदेशरूपः॥ तत्र नापृष्टः कस्यचिद्ब्रूयादिति न्यायेनापे
क्षितप्रश्नोपक्षेपः॥ तपःस्वाध्यायेत्यादिश्लोकत्वाचेतदित्यतेन संबंधः॥ तपस्त्वेन कृतः स्वा
ध्यायः तपःस्वाध्यायः तपःस्वाध्याय इति ब्राह्मणमितापस्तवोक्तेः॥ स्वाध्यायशब्देनाध्य
यत्यानध्ययनकालदेशपरिहारादिनियमोपेततया फलवदर्थावबोधपर्यन्तं स्व
शास्त्राध्ययनमुच्यते॥ तस्मिन्निरतः॥ तदभ्यासनिरत इति यावत्॥ यच्चु तपश्च स्वाध्याय
श्च तपःस्वाध्यायौ तयोर्निरतः॥ तपःशब्देन चित्तप्रसादहेतुभूतं व्रतनियमादिकर्मोच्य
ते॥ यद्वा यस्य ज्ञानमयं तप इति श्रुतेः॥ तपःशब्देन ब्रह्मविषयज्ञानमुच्यत इति ननु
तपोविशिष्टपुंविशेषप्रसिद्धमुनिपुंगवशब्देनेवक्ततपः॥ संपत्तेः सिद्धत्वादिति कृतक
कृतः॥ एवं हि तपोरतमित्येव सिद्धे स्वाध्यायपदवैयर्थ्यापत्तिस्तस्मात्तपः॥ शब्देन निर्दि
ध्यासनजन्यपरिपाकवत् ब्रह्मज्ञानमुच्यते॥ मुनिपुंगवशब्देन मननजन्यपरिपाकव

मा॰ २

भद्राय रामचं[illegible] वेधसे॥ रघुनाथाय नाथाय सीतायाः पतये नमः॥१३॥ जयति रघुवंशतिल
कः॥ कौसल्याहृदयनंदनो रामः॥ दशवदननिधनकारी दाशरथिः पुंडरीकाक्षः॥१४॥ जितं भग
वता तेन हरिणा लोकधारिणा॥ अजेन विश्वरूपेण निर्गुणेन गुणात्मना॥१५॥ न त्वा रामं शिवं
सांबं रामो रामप्रवर्त्तितः॥ रामायणस्य तिलकं कुरुते रामतुष्टये॥१॥ ननु रामायणस्यैहि
कामुष्मिकफलदत्वे मानाभावात्किं तद्व्याख्यानेनेति चेन्न इदं पवित्रं पापघ्नमित्यादि जनश्च
शूद्रोपि महत्त्वमीयादित्यंतश्लोकै रैहिकार्थसाधकत्वस्य स्पष्टमत्रैव श्रूयमाणत्वात्॥ अ
एवं रामायणं भक्त्या यः पादं पदमेव वा॥ स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदेति स
त्तरामायणवचनेन ब्रह्मलोकावाप्तेः फलस्य स्पष्टमुक्तत्वाच्च॥ अपि च गायत्र्या ब्रह्मानुसं
धानाद्ब्रह्मलोकावाप्तिवत्तत्प्रतिपाद्यस्य लीलावतार रूपतया रामस्य विभववैभवानुसं
धानेन ब्रह्मलोकावाप्तिरुचितैव॥ न च काव्यालापांश्च वर्जयेदिति निषेधप्रसक्तिः॥ तस्य
गायत्रीप्रतिपाद्यार्थप्रतिपादकत्वात्॥ श्रवणे तु स्त्रीशूद्रादीनामप्यधिकारः॥ अथादिकवि
र्वाल्मीकिः सर्वोत्तमवर्णनायकृतसंकल्पादिव्यतत्काव्यकृतिशक्तिलाभाय तादृशवस्तु
ज्ञानाय च कृतकाष्ठसमाधिसाधितपरमपुण्यचयः॥ तत्पुण्यं च यस्सुप्रीतभगवन्नियोग
समुपागतं देवर्षिं नारदं सम्पर्की को न्वस्मिन्नित्यादि प्रपच्छ स च देवर्षिः रामकथामुदि

अथप्रश्नमभिनयति कोन्विति॥ नुशब्दो वितर्के॥ सांप्रतं वर्तमानकाले अस्मिन्लोके भूलत्तो के नु गुणवान् प्रशस्तबहुगुणवानित्यर्थः॥ भूमप्रशंसादौ मतुप्॥ अस्यैव प्रपंचः कश्चवीर्यवानित्यादि॥ दिव्यास्त्रबलादिजशक्तिविशेषेण पराभिभवसामर्थ्यं वीर्यं तद्वान्॥ कश्च श्रौतस्मार्तसकलधर्मरहस्यज्ञः॥ वन्हीमप्यपकृतिमुपेत्यैकामप्युपकृतिं बहुमन्यतेइति कृतज्ञः सत्यवाक्यः॥ सर्वावस्थास्वपि यथार्थतद्दृष्टतत्त्वार्थवक्ता॥ दृढव्रतः आपद्यपि धर्मीयपरिगृहीतव्रतविशेषस्यत्यागरहितः॥ २॥ चारित्रेणेति॥ चरित्रमेव चारित्रं स्वार्थिकोण्॥ वृत्तसंपदने

3

कोन्वस्मिन्सांप्रतं लोके गुणवान्कश्चवीर्यवान्। धर्मज्ञश्चकृतज्ञश्चसत्यवाक्योदृढव्रतः॥ २॥ चारित्रेण च को युक्तः सर्वभूतेषु को हितः॥ विद्वान्कः कः समर्थश्च कश्चैकप्रियदर्शनः॥ ३॥

नोच्यते॥ सर्वभूतेषु सर्वप्राणिषु मध्ये कः पुमान् हितः॥ ऐहिकामुष्मिकहितावहः आशत्रुभ्यः यभुसर्वप्राणिषु सापराधिष्वपि हितकरणशीलइति व्याचक्षते। तत्तु हितयोगे चतुर्थ्यापत्तेरयुक्तं विद्वान् आत्मानात्मसकलपदार्थतत्त्वज्ञः समर्थः लोकिकव्यवहारे प्रजारंजनादौ चातुर्यं सामर्थ्यं तद्वान्। कामाधिकसौंदर्यवत्त्वेन नित्यसुखरूपत्वेन च एकः प्रियं केवलप्रियं दुःखासंभिन्नप्रियत्ववद्दर्शनं यस्य सः। यत्तु एकं प्रतिप्रियंदर्शनं यस्येति तदयुक्तं सर्वप्रियत्वस्याप्रतिपादनात्। एकः अद्वितीयः स चासौ प्रियदर्शनश्चेत्यर्थ इति तीर्थः॥ ३॥ ॥

त्वमेवोच्यत इतिनतेनगतार्थतेत्यन्ये॥ वाग्विदांस्वरूपतोर्थतश्चशब्दब्रह्मतत्त्वविदांपाणिनि
पतंजल्यादीनांमध्येवरंश्रेष्ठंमुनिशब्दश्चकार्थः॥ तेषुपुंगवंश्रेष्ठंएवंविशिष्टंनारदं॥ तपस्वीक
च्छ्रैकादशपुपवासादिलक्षणंमुख्यंतपः॥ तपोनानशनात्परमितिश्रुतेः॥ स्वाध्यायरूपंचतपः॥ स
मनस्केंद्रियाणामैकाग्र्यरूपंचतपः॥ तद्वान्वाल्मीकिः वल्मीकस्यापत्यंवल्मीकप्रभवोयस्मा
त्तस्माद्वाल्मीकिरित्यसावितिब्रह्मवैवर्त्तोक्तेः॥ वल्मीकप्रभवत्वेनगौणपुत्रादिवत्॥ गौण

श्रीरामायनमः॥ ॐ तपःस्वाध्यायनिरतंतपस्वीवा
ग्विदांवरं॥ नारदंपरिपप्रच्छवाल्मीकिर्मुनिपुंगवम्॥१॥

मस्यवल्मीकायत्यत्वंगहीत्वेत्तसाधुरपत्यार्थः॥ यद्वावल्मीकइतिऋषिविशेषस्यसंज्ञेत्याहुः॥ ना
रदं॥ नराणामिदंनारंअज्ञानंतत्द्यतिखंडयतिज्ञानोपदेशेनेतिनारदः॥ गायन्नारायणकथांस
दाणपभयावहां॥ नारदोनाशयन्नेतिनृणामज्ञानजंतमइतिनारदीयोक्तेः॥ तंपप्रच्छेत्यन्वयः॥
अत्रप्रस्तुरुत्कविशेषणेनदिव्यार्थविषयप्रश्नवणाधिकारसंपदुक्तावक्तुरपिउक्तविशेषणैः
सार्वज्ञादिप्रतिपादितंग्रहणधारणहेतुशिष्यानुग्रहशक्तिमत्त्वंचप्रतिपादितं॥१॥

राम·बा·
४

श्रुत्वेति॥ एतत्वचनं प्रश्नजातं· त्रिलोकज्ञः भूर्भुवःस्वर्लोकत्रयं तदवयवलोकांस्तत्रत्यवृत्तांतं जाना
नीत्यर्थः एवं च हृष्टमुत्वा भावान्नङीप्· नारदः वाल्मीकेः एतद्वचः श्रुत्वा श्रूयतामिति च आमंत्र्य एकाग्र
सिद्ध्यै अभिमुखीकृत्य स्वागतस्यार्थस्य चिरं प्रतिपिपादयिषितस्य जिज्ञासुत्वाभेन प्रहृष्टो भूत्वा
वक्ष्यमाणं वाक्यमब्रवीत्॥६॥ बहव इति॥ ये बहवो गुणास्त्वया कीर्तिताः॥ ते एकत्र प्राकृतपुरुषमा
त्रे दुर्लभा एव· चः पादपूरणे· अथापि हे मुने यस्तैर्युक्तः तं बुध्वा स्मृत्वा अहं वक्ष्यामि तादृशो नरः

५

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः॥ श्रूयतामिति चामंत्र्य प्रहृष्टो वाक्यमब्रवी
त्॥६॥ बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः॥ मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः
॥७॥ इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः॥ नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी॥
॥८॥

श्रूयतां· प्राप्तकाले लोट्· तस्य श्रवणे ते प्राप्तकालमित्यर्थः॥७॥ इक्ष्वाकिति॥ इक्ष्वाकुवंशात्प्रभवः
आविर्भावो यस्य स तथा· रामो नाम रामइतिनाम्ना प्रसिद्धः॥ जनैश्च श्रुतः अस्ति तस्मिन्नेव एकत्र
सर्वे त्वत्पृष्टगुणा अन्येच गुणा इति शेषः तत्र इदं यौगिकं नाम· रमन्ते योगिनो ऽस्मिन्· यद्वा रमयति
मयोगस्य प्रदर्शनात्॥ तत्रांत्यनारक पुरुषादिवदन्येषामपि दृश्यत इति दीर्घः तानेव गुणानाह· नि
यतात्मा निगृहीतांतःकरणः· वीर्यं प्राख्यातं· द्युतिः कांतिः॥ आपत्संपदोरविकृतिश्चित्तस्य धृतिः त

राम
४

आत्मवानिति॥ वशीकृतांतःकरण इत्यर्थः॥ जितक्रोधः निंदाहिंसादिजनकचित्तवृत्तिविशेषरहितः॥ क्रोधोत्र कामादीनामप्युपलक्षणं॥ द्युतिः सर्वलोकस्यादृष्टाजनकोदेहकांतिविशेषः तद्वान्॥ अनसूयकः विद्यैश्वर्यादितपःसुपरोत्कर्षासहनमसूया तद्रहितः॥ असूयतेः कंड्वादियगंतात् उपतापार्थात्॥ वुल्॥ संयुगे युद्धकाले जातरोषस्य कस्य रोषात् देवाश्च देवा अपि इंद्रादयोपि॥ अपिना असुराश्च बिभ्यति॥ अतिबलवतोस्मानप्यस्य क्रोधः॥ संहरिष्यतीति भयं प्राप्नुवंतीत्यर्थः॥ कस्येति संबंधसामान्ये षष्ठीत्यन्ये॥ कस्य संयुगे तस्माद्बिभ्यतीति तीर्थः ४

आत्मवान्को जितक्रोधो द्युतिमान्कोऽनसूयकः॥ कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे॥ ४॥ एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे॥ महर्षे त्वं समर्थोसि ज्ञातुमेवंविधं नरम्॥ ५॥

एतदिति॥ उक्तगुणसामान्यापेक्षया नपुंसकं एतद्दिव्यपुरुषगुणजातं कस्यास्तीति श्रोतुमहमिच्छामि उक्तगुणसामग्र्यस्यैकत्र दुर्लभत्वात्तादृशपुरुषविशेषज्ञाने मे परं सर्वस्मादपि कौतुकांतरात् उत्कटकौतुकं वर्तते॥ ननु एवंविधनरो मयापि दुर्ज्ञेय इत्याह हि यतः॥ महर्षे अपरोक्षीकृतशेषार्थस्त्वं एवंविधं उक्तगुणवंतं नरं दिव्यपुरुषं ज्ञातुं समर्थोसि सर्वलोकप्रसिद्धसामर्थ्योसि ततस्मात्त्वत्त एव श्रोतुमिच्छामीति पूर्वेणास्य संबंधः॥ ५॥ ॥

महोरस्क इति। महद्विशालमुरो यस्य सः। उरः शिरो ललाटं चेत्युपक्रम्य विशालास्ते सुखप्रदा इत्युक्तेः। महेष्वासः। महानिष्वासो धनुरस्य। गूढजत्रुः। गूढे मांसलत्वान्निमग्ने जत्रुणी वक्षोंससंधिगते अस्थिनी यस्य। अरिंदमः। निजभक्तानामरीन् कामादीन् निजभक्त्यंतरायकर्तॄन् पापानि वा दमयतीत्यरिंदमः। यद्वा अरिंदम इति राज्ञोन्वर्थसंज्ञा शत्रुंजय इतिवत्। आजानुबाहुः। जानुपर्यंतदीर्घबाहुः। दीर्घभ्रूबाहुमुष्कश्च चिरंजीवी धनी नर इति ब्राह्मे। सुशिराः। समवृत्तशिराश्छत्राकारशिरास्तथा। एकछत्रां महीं भुंक्ते दीर्घमायुश्च विंदतीति नारदः। सुललाटः रेखाधिकललाटः। ललाटे यस्य दृश्यंते चतुस्त्रिद्व्येकरेखिकाः। शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथेति कात्यायनः। सुविक्रमः। गजसिंहादिगतिसदृशगतिः। विक्रमः पादविक्षेपः। स्वरो गतिश्च नाभिश्च गभीरस्सं प्रशस्यत इति ब्राह्मे। १०॥ ॥

महोरस्को महेष्वासो गूढजत्रुररिंदमः। आजानुबाहुः सुशिराः सुललाटः सुविक्रमः॥ १० ॥

बुद्धिमानिति प्रशस्तबुद्धिः बुद्धेः प्राशस्त्यं च सकृद्गृहीताविस्मरणापोहाद्यादिशक्तिमत्त्व
म् सर्वत्र प्रशंसादौ मतुप् नीतिः कामंदकादिप्रसिद्धराजनीतिः तद्वान् तज्ज्ञाता वाग्मी प्रश
स्तवाक् श्रीमान् सर्वातिशायिशोभैश्वर्यादियुक्तः यद्वा कचोयज्ञोपि सामानि साहि श्रीरमृता
सतामित्युक्तश्रोतश्रीमान् शत्रूणां वाह्यांतराणां निबर्हणः नाशकर्त्ता बाहुलकात्कर्तरिल्युट्
विपुलांस इत्यादिना सामुद्रिकलक्षणं कथ्यते विपुलौ मांसलौ उन्नतौ अंसौ भुजशिरसी यस्य सः

बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्छत्रुनिबर्हणः ॥ विपुलांसो महाबाहुः कंबुग्रीवो महाहनुः ॥ ९ ॥

स्कंधो भुजशिरोंसोस्त्री इति कोशः ॥ अस्य सुलक्षणत्वं च वररुचिनोक्तं कदः ॥ कुदिश्च वत्सश्च घ्रा
णस्कंधो ललाटिका ॥ सर्वभूतेषु निर्दिष्टा उन्नतास्ते सुखप्रदा इति ॥ महाबाहुः आजानुहस्त इ
त्यात्वम् ॥ शिरोललाटश्रवणौ ग्रीवा वक्षश्च वक्त्र तथा ॥ उदरं पाणिपादं च पर्यंदशमहत्सुखं इ
ति व्यासे ॥ अस्य सुलक्षणत्वमुक्तं ॥ कंबुग्रीवः कंबुवत् रेखात्रयविशिष्टग्रीवः ॥ महाहनुः मां
सलकपोलापरभागः ॥ पूर्णमांसलहनुस्तु भूपतिः ॥ इति संहिता ॥ ९ ॥ ॥

धर्मज्ञ इति॥ सत्याश्चमोघासंधासकृदेव प्रपन्नायतवास्मीतिचयाचते॥ अभयंसर्वभूतेभ्योददा
म्येतद्व्रतंममेत्यादिरूपिणी प्रतिज्ञायस्य यशस्वी॥ रावणवधादिना दिव्ययशःसंपन्नः॥ ज्ञानसं
पन्नः॥ ब्रह्मज्ञानपरिपूर्णः॥ अतएवजरायुषंप्रति॥ मयात्वंसमनुज्ञातोगच्छलोकाननुत्तमानि
त्युक्तिः॥ संगच्छते ब्रह्मज्ञस्यैवब्रह्मोपदेशेऽधिकारात्॥ विनाब्रह्मोपदेशंअनुत्तमलोकाव

6

धर्मज्ञःसत्यसंधश्चप्रजानांचहितेरतः॥ यशस्वी
ज्ञानसंपन्नःशुचिर्वश्यःसमाधिमान्॥१२॥

प्त्यसंभवात्॥ नविद्यंतेउत्तमायेभ्यस्तेअनुत्तमाः॥ आत्मानंमानुषंमन्येरामंदशरथात्मजं॥
मित्यादिवचस्तुमायामात्रमित्यन्यत्रविस्तरः॥ शुचिःप्रातःस्नानादिनाप्राणायामाभ्यासा
दिनाप्रत्याहारादिजन्यरागद्वेषहानेनचमायिकशरीरत्वाच्चनित्यंवात्यंतरशुद्धः॥ वश्यः
पित्राचार्यदेवेषुविनीतः॥ समाधिमान्॥ निजतत्त्वसमाधिमान्॥२२॥ ५

समइति· समः॥ नातिदीर्घो नातिह्रस्वः षण्णवत्यंगुलोत्सेधो यो नांशः सदैवोक्त सामित्यर्थः॥ समानि अन्यानानधिकपरिमाणानि विभक्तानि पृथग्भूतानि अंगानि अवयवा यस्य सः॥ स्कंधौ नासापुटे नेत्रे कर्णौ च ओष्ठौ च चिबुकौ॥ कूर्परौ मणिबंधौ च जानुनी वृषणौ करौ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयः सम्भूपतिरित्यर्थः॥ स्निग्धवर्णः स्निग्धश्यामलवर्ण इत्यर्थः॥ स्निग्धेंद्रनीलवर्णास्त्

समः समविभक्तांगः स्निग्धवर्णः प्रतापवान्॥ पीन
वक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः॥ ११॥ श्रीराम

भोगं विंदति पुष्कलमित्यर्थः॥ प्रतापः स्मृतिमात्रेण रिपुहृदयविदारणक्षमं पौरुषं तद्वान्॥ प्रतापो पौरुषं तपो वितिकोशः॥ पीनवक्षाः मांसलसमोन्नतवक्षाः विशालाक्षः विस्तृतायतनेत्रः॥ नासिका च चक्षुषी कर्णौ यस्यायतानि स्युरित्यर्थः॥ लक्ष्मीवान् सीतारूपलक्ष्मी शक्तिमान्॥ सर्वावयवसौंदर्यवान् वा मोपध्यत्वाहत्वं एवमुक्तरीत्या शुभानि सामुद्रिकशास्त्रोक्तानि लक्षणानि यस्य सः शुभलक्षणः॥ ११॥

रामा-बा
७

सर्वेति· सांख्ययोगतर्कपूर्वोत्तरमीमांसासूत्राणि सव्याख्यानानि शास्त्राणि· स्मृतय उपस्मृतयश्च तत्त्वा-
र्थशासकत्वाच्छास्त्रं· सर्वमूलशब्दशासकत्वाद्व्याकरणं च शास्त्रं तथैव कामंदकादीन्यपि नीतिशास्त्रा-
णि· सर्वेषामेषामर्थतत्त्वज्ञः स्मृतिमान्· उक्ताधीतवेदशास्त्रार्थविस्मरणरहितः प्रतिभानवान्· व्य-
वहारकालेऽश्रुतस्याऽदृष्टस्यापि वा उचितार्थस्पर्शी यः प्रतिभासः प्रतिभानं तद्वान्· तदुक्तं· प्रज्ञां
नवनवोन्मेषशालिनीं प्रतिभां विदुरिति· सर्वलोकप्रियः इष्टस्मर्तृलोकानामिहामुत्र हिताव-
हः· साधुः मृदुमधुरस्वभावः अदीनात्मा· सहजासाधारणदात्रभावेन अदीनस्वभावः अतिप्रस-

7

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान्। सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः॥
॥१५॥ सर्वदाभिगतः सद्भिः समुद्र इव सिंधुभिः। आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः॥१६॥

न परंपरायामपि अक्रमितान्तः करणो वा· विचक्षणः यथोचितं लौकिकालौकिकसर्वक्रियासु-
कुशलः॥१५॥ सर्वदेति सर्वदा होमदेवपूजासभाधिष्ठानकालेषु तत्तत्कालोचितैः सद्भिः सात्त्वि-
कस्वभावैः पुरोहितद्विजमंत्रिप्रधानादिभिः सिंधुभिः नदीभिः समुद्र इव अभिगतः सेवितः य-
द्वा· सद्भिर्भक्तैः सदा सेवितः भगवत्सेवायां कालनियमाभावात्· दृष्टान्तेन संप्राप्तानां सतां भक्ता-
नामनेन सह ऐक्यं ध्वनयति· आर्यः सर्वपूज्यः सर्वेषु सुखदुःखादर्केषु समः हर्षविषादरहितः
शत्रुमित्रोदासीनेषु वैषम्यरहितस्तत्तत्कर्मानुरूपफलदातेत्यर्थः इत्यन्ये· सदैव सर्वावस्थासु मुद्रु-

राम·
७

प्रजापतीति प्रजापतिसमः यद्यपि रामो ब्रह्मैव तथापि मानुषधर्माणां शोकमोहादीनां मायिकानां तत्र
दर्शनेन औपाधिकभेदमादाय तत्समत्वोक्तिः ॥ भार्गवलोकप्रतिबंधरूपात्· जटायुमोक्षप्रदानरू
पात् ॥ स्वेन सह सर्वायोध्यावासिजनस्य सशरीरस्य ब्रह्मलोकनयनरूपाच्च कारणात्तत्समत्वं।
सर्वथा स्वतंत्रस्यैवेदृशेषु योग्यत्वात्· श्रीमानित्येवमादीनां पौनःपुन्यं सकलैश्वर्यादिमत्त्वबोधना
र्थम्· धाता· पितेव सर्वप्रजाधारणपोषणसामर्थ्ययुक्तः ॥ रिपुनिषूदनः आश्रितजनरिपुनाशकः
कामादिरिपुनाशकश्च· अन्यथा जगद्गुरोर्भगवतो रिपोरेवाभावेनैतद्विशेषणसंगतिः स्यात् ॥ बा

प्रजापतिसमः श्रीमान्धाता रिपुनिषूदनः ॥ रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ १३ ॥
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ॥ वेदवेदांगतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ १४ ॥

हुलकात्कर्तरित्युरः। जीवलोकस्य प्राणिसमूहस्य सकलव्यवहारप्रवर्तकत्वेन रक्षिता· धर्मस्य
ततद्ग्रहणं श्रमधर्मस्य मर्यादापालनद्वारा रक्षिता ॥ १३ ॥ रक्षितेति स्वधर्मस्य यज्ञाध्ययनदानदंडयु
द्धादिरूपस्य रक्षिता सादरमनुष्ठाता: स्वजनस्य स्वभक्तजनस्य अवश्यभाविनोऽप्यनिष्टस्य निरा
सपूर्वकं परमेश्वरमोक्षदानेन रक्षिता· तत्र अंबरीषप्रल्हादध्रुवादीनां रक्षणेन प्रसिद्धमेव· वेदानां ॥ ऋ
ग्यजुःसामाथर्वणां छंदःकल्पव्याकरणज्योतिषनिरुक्तशिक्षारूपवेदांगानां तत्त्वज्ञः पाठतोऽर्थतश्च ज्ञा
ता शस्त्रास्त्रादिप्रतिपादकं शास्त्रं धनुर्वेदः तस्मिन्निष्ठितः सम्यक् [illegible] ॥ १४ ॥

धनदेनत्यागे· धनत्यागे धर्मार्थं धनव्ययविषये अपेक्षितधनसंपत्तौ· धनदेन नवनिधीशेन समः अस्मिन्नेवांशे उपमानं तु त्यागांशे· तस्य धनसंग्रह एव प्रवृत्तेः धनदव्यवहारस्तु कतिपयत्रिदशेभ्यो भगवदाज्ञया कतिपयधनदानमात्रादिति बहवः सत्ये सत्यवचने अपरो धर्म इव धर्मस्य मूर्त्यंतरमिवेत्युत्प्रेक्षा· एतदंतं बालकांडीयार्थसंग्रहः तमेवमित्यादिनाऽयोध्याकांडीयार्थसंग्रह आरभ्यते॥ तत्र इक्ष्वाकुवंशप्रभव इत्यनेन भगवदाविर्भावः सूचितः महावीर्यः शत्रुनिबर्हण इत्यनेन विश्वामित्रानुग्रहजशास्त्रास्त्रसंपत्तिताटकावधादि सूचितम्· लक्ष्मीवा

१

धनदेन समस्त्यागे सत्ये धर्म इवापरः॥ तमेवं गुणसंपन्नं रामं सत्यपराक्रमम्॥१९॥
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम्॥ प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया॥२०॥

नित्यनेन सीतापरिणयः सूचितः सत्यपराक्रममित्यनेन भार्गवलोकप्रतिबंधादि सूचितं· एवंगुणसंपन्नं प्रागुक्तरीत्या सकलकल्याणगुणयुक्तं· सत्यपराक्रमं· अमोघपराक्रमं॥१९॥ ज्येष्ठमिति श्रेष्ठगुणैः यौवराज्याभिषेकार्हगुणैः युक्तं· प्रकृतीनां प्रजानां हितैः इहामुत्रहितावहैः युक्तं ज्येष्ठं सुतं रामं प्रकृतिप्रियकाम्यया प्रकृतीनां प्रियं कर्तुमिच्छया· कोऽदसः कास्याजिति प्राचः प्रकृतिसंबंधेन आत्मनः प्रियं कर्तुमिच्छया· युवराजेन हि प्रजाकृत्यसंपादिते सति व्यवहारादिनिरीक्षणजन्यश्रमनिवृत्तिरूपं प्रियं स्वस्य भवतीति वयम्॥२०॥ ॥

सचेति सरामः सर्वैर्गुणैर्युक्तः उक्तैः वक्ष्यमाणैश्च कौसल्यानंदनवर्द्धनत्वेन महाकुलप्रसूतत्वप्रधानमहिषीपुत्रत्वादिरूपस्याभिषेकोचितधर्मस्य सत्त्वादर्शिता गांभीर्यमगाधाशयत्वं तत्र समुद्र इतुल्यः धैर्यं मनसाप्रधृष्यत्वं दुःखवियोगादौ अनभिभूतचित्तत्वं च रणे अचलतया सहा

सचसर्वगुणोपेतः कौसल्यानंदवर्द्धनः॥ समुद्र इव गांभीर्ये धैर्येण हिमवानिव॥१७॥
विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः
॥१८॥

याभावेपि स्थितिश्च तेन हिमवत्सदृशः॥१७॥ विष्णुनेति यद्यपि रामो विष्णुरेव सर्वरूपश्च तथापि मानुषोपाधिभेदात्सर्वत्र सादृश्यं पद्मस्वयं यद्वा विष्णुना सदृश इति अनन्वयालंकारः चंद्रवत् प्रजाव्यवहारनिरीक्षणकाले सौम्यदर्शनः क्रोधे युद्धकालिके कालाग्निसदृशः परैरधृष्य इति यावत् क्षमा प्रतीकारसामर्थ्येपि अपकारसहिष्णुता तया पृथिवीतुल्यः॥१८॥

द्रुसइति। सत्यवचनान्। धर्मपरनिर्देशेन सत्यप्रतिज्ञत्वादित्यर्थः अतोहेतोः सत्यरूपेणधर्मपाशे
नसंयतः बद्धः सन्दशरथः प्रियंसुतमपि विवासयामास॥२३॥सइतिवीरः। अनेकेरपराङ्मु
खतयायोद्धापिसरामः पितुःप्रतिज्ञांसत्यतयास्वविवासनेनअनुपालयन् यद्वाकैकेयीसं
न्निधौपितृवचनपरिपालनविषयांस्वकृतांप्रतिज्ञांपरिपालयन् पितृवचनकृतान्निर्दे

ससत्यवचनाद्राजाधर्मपाशेनसंयतः॥विवासयामाससुतंरामंदशरथःप्रियम्॥२३॥
सजगामवनंवीरःप्रतिज्ञामनुपालयन्॥पितुर्वचननिर्देशात्कैकेय्याःप्रियकारणात्॥२४॥
तंव्रजंतंप्रियोभ्राता लक्ष्मणोऽनुजगामह॥स्नेहाद्विनयसंपन्नःसुमित्रानंदवर्धनः॥२५॥
भ्रातरंदयितोभ्रातुःसौभ्रात्रमनुदर्शयन्॥रामस्यदयिताभार्यानित्यंप्राणसमाहिता॥२६॥

शात् आज्ञातः मातुश्चकैकेय्याः प्रियकारणात् प्रियसिद्धिनिमित्तंवनंजगाम अनेनपितृत
त्पत्नीसंतोषकरणमेवसर्वात्मनापुत्रस्यधर्मइतिभगवताउपदिष्टम्॥२४॥तमितिव्रजंतं
भ्रातरंप्रियः रामेसहजप्रीतिमान्॥२५॥भ्रातरमितिभ्रातूरामस्यदयितःप्रियःसौभ्रात्रं
सुभ्रातृभावंस्नेहमितियावत् स्नेहादेवजगामनपित्रादिनिर्देशादितिभावः अथरामस्य
दयिताइष्टाप्राणसमानिरतिशयप्रेमास्पदा हितानित्यंहितकरी॥२६॥ ॥

यौवराज्यमिति युवराजस्य भावो यौवराज्यं पितरि राज्यं कुर्वत्येव सर्वराज्यव्यापारेष्वभिषेकपूर्वमधिकृतः पुत्रो युवराजः। संयोक्तुं योजयितुं महीपतिः दशरथः ऐच्छत्। अथ तस्य रामस्य यौवराज्याभिषेके अपेक्षितानां संभारान् औदुंबर्यासंदी तस्ये प्रादेशमात्राः पादाः स्फरित्यादिना बद्धं चर्म ब्राह्मणेनउपदिश्यमानान् दधिमधुसर्पिरादीन् संभृतान् दृष्ट्वा मंथरावचनात् ज्ञात्वा कैकयी राज्ञः कनीयसी भार्या। अत्र कैकेयीत्येव यद्यपि केकयशब्दाद् अभिकेकयमित्रयुरित्यादिना यादेरियादेशो गुणे।

यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः॥ तस्याभिषेकसंभारान्दृष्ट्वा भार्याथ कैकयी
॥२१॥ पूर्वं दत्तवरा देवी वरमेनमयाचत॥ विवासनं च रामस्य भरतस्याभिषेचनम्॥२२॥

आदिवृद्धौ ङीपि यस्येति लोपे साधुः। तथापि आपिमाषं मषं कुर्यात् छंदोभंगं न कारयेदिति न्यायेन कैकयीति प्रयोगः। पुंयोगलक्षणो ङीष् कैकयीति पाठ इत्यन्ये॥२१॥ पूर्वं पूर्वस्मिन्काले इंद्रसहायार्थं प्रवृत्तदशरथस्य दैत्यैर्युद्धकाले दशरथे परप्रयुक्तामासुरीमायां धवलागमुनिदत्तविद्यया निवारयित्र्या कैकेय्या तुष्टेन दशरथेन दत्तौ वरौ यस्यै सा देवी। सैव राज्याभिषेकसमये प्राप्ताभिषेका देवी तद्दृत्प्रियतमा। एवं वक्ष्यमाणलक्षणां वरं प्राप्तकालत्वादयाचत। राजानं याचेर्द्विकर्मकत्वात्। वरद्वयमाह। रामस्य राज्याद् उद्वासनं। भरतस्य स्वपुत्रस्य अभिषेचनम्॥२२

चित्रे तिअनुपश्चात् भरद्वाजस्यशासनात् चित्रकूटं प्राप्यतत्ररम्यं आवसथं पर्णशालां कृत्वातत्रवने रममाणाः त्रयः देवगंधर्वसदृशाः सुखंन्यवसन्नित्यन्वयः तथा पुत्रशोकातुरः अनिर्वाच्यपुत्रवियोगजन्यशोकरूपी इतिः ॥३१॥३२॥ राजेतिनस्मिन्दशरथेगतेलोकांतरं गतेमृतेवसिष्ठादिद्विः

चित्रकूटमनुप्राप्यभरद्वाजस्यशासनात्॥ रम्यमावसथंकृत्वारममाणावनेत्रयः ॥३१॥
देवगंधर्वसंकाशास्तत्रतेन्यवसन्सुखम्॥ चित्रकूटंगतेरामे पुत्रशोकातुरस्तथा ॥३२॥
राजादशरथः स्वर्गंजगामविलपन्सुतं॥ गतेतुतस्मिन् भरतोवसिष्ठप्रमुखैर्द्विजैः॥३३॥
नियुज्यमानोराज्यायनैच्छद्राज्यंमहाबलः॥ सजगामवनंवीरोरामपादप्रसादकः॥३४॥
गत्वातुसमहात्मानंरामंसत्यपराक्रमं॥ अयाचद्भ्रातरंराममार्यभावपुरस्कृतः॥३५॥

जैस्त्रैवर्णिकैः इदमुपलक्षणं तत्सहितैर्मंत्रिवृद्धैरित्यपिबोध्यं॥३३॥ राज्यायराज्यंकर्तुंतैर्नियुज्यमानः प्रेर्यमाणः महाबलः समर्थोपिसोभ्रात्रात्राज्यंनैच्छत् ततः रामपादप्रसादकः पूज्यं रामंप्रसादयितुंवनंजगामपादशब्दः पूज्यवाची॥३४॥ गत्वेतिसभरतः महात्मानंसत्यप्रतिज्ञत्वादिधर्मैः महावैभवं भ्रातरंरामंगत्वाआर्यभावपुरस्कृतः विनीतवेषः तंरामंराज्यायप्रतिनिवृत्तिं अयाचत् याचिर्द्विकर्मकः॥३५॥

10

जनकस्यकुले अन्वये जाता यद्यप्येषा अयोनिजा तथापि सीरध्वजस्य देवयजनस्थलं गत्वा पद्मतो वा विर्भूतत्वादेव मुक्तिः अतएवाह· देवमायेवेति सैव· अचिंत्यो दयस्थितिलया· देवैरेव स्वकार्यसिद्ध्यार्थं कौदिभिः निर्मिता आविर्भाविता· यद्वा· इवशब्द एवार्थे· देवेन भगवता आविर्भाविता स्वमायेव भगवतोऽनाद्यंता सर्वकार्यसहायभूता सहजशक्तिरेव हि माया· यत्तु तिलोत्तमादिवत् देवमायेव स्थितेति·

जनकस्य कुले जाता देवमायेव निर्मिता॥ सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः॥२७॥
सीताप्यनुगता रामं शशिनं रोहिणी यथा॥ पौरैरनुगतो दूरं पित्रा दशरथेन च ॥२८॥
शृंगवेरपुरे सूतं गंगाकूले व्यसर्जयत्॥ गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम्॥२९॥
गुहेन सहितो रामो लक्ष्मणेन च सीतया॥ ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः॥३०॥

तत्र निर्मितपदद्वैयर्थ्यापत्तेः सर्वैः स्त्रीलक्षणैः संपन्ना युक्ता॥२७॥ सीतेति· सीतात्मा गत्वा पद्मत्तिः तदुत्यत्वात्सीता· शशिनं रोहिणीव रामम् अनुगता॥२८॥ शृंगेति· गंगाकूले वर्तमाने शृंगवेरपुरे स्थिते निषादाधिपतिं प्रियं इष्टं गुहं आसाद्य तत्सहितो लक्ष्मणादिसहितश्च रामः सूतं रथेन स्वप्रापणार्थं समागतं गंगाकूले व्यसर्जयत्· परावर्तितवान्॥२९॥ गुहेनेति पूर्वार्धे पूर्वश्लोकान्वयि· अथ ते सीतारामलक्ष्मणाः वनेन पुरोवर्ति प्राप्तवनद्वारेण परं अपरं वनं गत्वा· ते वनं पादचारस्तेन स्ववनं गत्वे

सभरतः रामप्रतिनिवृत्तिरूपं काममनवाप्यैव रामपादौ नमस्कुर्वन्प्रतिनिवृत्त इति शेषः ॥३५॥ ततो नमस्कृत्य प्रतिनिवृत्तः नंदिग्रामे स्थित्वा रामश्चतुर्दशसमारूपप्रतिज्ञातसमयानंतरं राज्याय आगमिष्यतीति रामागमनकांक्षया पादुके पुरस्कृत्य राज्यमकरोत् उत्तरार्धस्पष्टं ॥३६॥ राम इति ॥ उक्तगुणविशिष्टो रामस्तु भूयः सन्नतया नागरस्य मं त्रिरहादि पौरजनस्य भरतस्य

निवर्तयामास ततो भरतं भरताग्रजः ॥ स काममनवाप्यैव रामपादावुपस्पृशन् ॥३८॥
नंदिग्रामेकरोद्राज्यं रामागमनकांक्षया ॥ गते तु भरते श्रीमान्सत्यसंधो जितेंद्रियः ॥३९॥
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ॥ तत्रागमनमेकाग्रो दंडकान्प्रविवेश ह ॥४०॥
प्रविश्य तु महारण्यं रामो राजीवलोचनः ॥ विराधं राक्षसं हत्वा शरभंगं ददर्श ह ॥४१॥

च तत्र चित्रकूटे आगमनमालक्ष्य संभाव्य तेषां निवर्तनप्रयासाद्वरमितोपि दूरगमनमिति संचिंत्य दंडकान्दंडकारण्यानि अवांतरबहुवनत्वाद्बहुवचनं तेषां रक्षश्चोरादिभूयिष्ठत्वा देकाग्रः सज्जो भूत्वा प्रविवेश ह इति प्रसिद्धौ ॥४०॥ प्रविश्येति महारण्यमिति आरण्यकांड कथासंग्रहः राजीवपद्म अनेन राक्षसयुद्धारंभ कृत हर्षोद्धतिः शरभंगाद्याश्रमप्रयः ॥४१

नतु पितृमातृराज्यं तवैव योग्यमिति मम प्रतिनिवृत्तिरनुचिताइत्यत्राह· त्वमेवेति· सर्वगुणश्रेष्ठे ज्येष्ठे
सति कनिष्ठोनराज्यार्हइति धर्मंत्वमेवजानासिइति त्वमेवराजाइतिवचोराममब्रवीत्॥ रामोपिपर
मयनीतिव्युत्पत्त्या आश्रितचित्तरंजकोपि· पितुरादेशात् राज्यंनैच्छदित्युत्तरेणान्वयः॥ अत्रहेतुग
र्भंविशेषणं परमोदारः स्वसुखसाधनस्य परस्मैदानमौदार्यं तद्युतः सुसुखः राज्यादपिवने
अम्लानाभ्यधिकमुखप्रसादयुक्तः सुमहायशाः प्रतिज्ञापालनरूपयशोभंगभियानैच्छदितिक

त्वमेवराजाधर्मज्ञइति रामंवचोब्रवीत्॥ रामोपिपरमोदारः सुसुखः सुमहायशाः॥३६॥
नचैच्छत्पितुरादेशाद्राज्यंरामोमहाबलः॥ पादुकेचास्यराज्यायन्यासंदत्वापुनःपुनः॥३७॥

तककृतः॥ तीर्थास्तु· परमोदारः याचकाभीष्टप्रदाननिरतः अर्थिलाभेनप्रसन्नमुखः सुमहायशाः
अर्थवैमुख्येनप्रसिद्धकीर्तिरपिपित्राज्ञयैव भरतवाक्यंनैच्छदित्याहुः॥३६॥ ततः अस्यभरतस्यरा
ज्यायराज्यरक्षणसामर्थ्याल्लब्धुं अहल्यादौदृष्टशक्तिकाचिंत्यवैभवस्वपदस्पृष्टपादुकेन्यास
रूपेण दत्वापुनःपुनः प्रतिनिवृत्तिंयाचमानेभरते चतुर्दशसमानंतरं सर्वथाप्रतिनिवर्तितव्य
मित्यभ्युपेत्य पुनर्निवर्तयामास· अस्येति· राज्यापेक्षयाषष्ठी दत्वेत्यत्र अस्मैइत्यपर्यंतलभ्यं· दत्वेत्यन्व
येपिसंप्रदानस्यशेषत्वविवक्षयाषष्ठीत्यन्येषुतुनिक्षेपसुखदानाभावान्नचतुर्थीदत्वेत्यन्वयेपी
ति· तत्र खंडिकोपाध्यायः नस्मैचपेटांददातीति
महाभाष्यप्रयोगविरोधात्॥३७॥

प्रतिज्ञातइति अग्निकल्पानां अग्निसदृशानां ऋषीणां सन्निधावितिशेषः अपेक्षितइतिवाशेषः संयति युद्धे अचिंत्यामितनिजशक्तिवैभवात् रक्षसांवधः प्रतिज्ञातश्चेति संबंधः ॥४५॥ तेनेनितेनरामेणतत्रैवदंडकारण्ये दक्षिणप्रदेशावर्त्ति पंचवट्याश्रमे जनस्थानंनामदंडकारण्ये रावणस्यबलनिवेशस्थानं कामरूपिणी इच्छयानानारूपधारिणी· यद्वा· पुंसांकाम्यमानरूपवती·

प्रतिज्ञातश्चरामेणवधः संयतिरक्षसाम् ॥ ऋषीणामग्निकल्पानांदंडकारण्यवासिनाम् ॥
॥४५॥ तेनतत्रैववसताजनस्थाननिवासिनी ॥ विरूपिताशूर्पणखाराक्षसीकामरूपिणी ॥४६॥
ततःशूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान् ॥ खरंत्रिशिरसंचैवदूषणंचैवराक्षसम् ॥४७
निजघानरणेरामस्तेषांचैवपदानुगान् ॥ वनेतस्मिन्निवसताजनस्थाननिवासिनाम् ॥४८॥

विरूपिताकर्णनासच्छेदेनवैरूप्यंप्रापिता· शूर्पणखेत्यत्रनखमुखात्संज्ञायामिति ङीष्प्रतिषेधः पूर्वपदात्संज्ञायामितिणत्वं· विरुद्धंरूपंविरूपंतत्तज्जातमस्याइतितारकादित्वादितच् ॥४६॥ ततःइति ॥ ततःनष्टरूपकरणानंतरंसर्वराक्षसान् जनस्थाननिवासिनइतिशेषः ॥ उद्युक्तान्युद्धार्थंसन्नद्धान् ॥४७॥ पदानुगान्अनुचरान्· निवसतारामेणेतिशेषः उक्तनरमस्तोकान्वयि ॥४८॥

चापीति निपातसमुच्चयः पद्यपूरकः॥ अगस्त्यभ्राताऽध्मवाहननामेति केचित्तते मुनेरगस्त्यस्य भ्राताऽगस्त्यइतिश्रुतः॥ सचिन्त्यकानने वन्यं स स्वीभिः कोपितोशपदिति मार्कंडेयपुराणे श्रूयते। दिव्यंधनुरादि कं कार्यायप्रतिगृह्यणोत्यैव रूपादगस्त्य वचनात्। रामइंद्रादगस्त्यस्यागतंशरासनंधनुः जग्राह पूर्वं भार्गवं जित्वाततः प्राप्तयदैतस्मर्वं धनुर्भगवन्तारामेणावरुणान्नस्त

सुतीक्ष्णं चाप्यगस्त्यंच अगस्त्यभ्रातरंतथा॥ अगस्त्यवचनाच्चैव जग्राहैंद्रंशरासनं॥४२॥
खड्गंच परमप्रीतस्तूणीचाक्षयसायकौ॥ वसतस्तस्य रामस्य वने वनचरैः सह॥४३॥
ऋषयोभ्यागमन्सर्वे वधायासुररक्षसां॥ स तेषां प्रतिशुश्राव राक्षसानां तदा वने॥४४॥

वरुणाद्दानीयागस्त्ये स्थापितमित्यरण्ये आरण्यकांडे स्फुटं। यद्वाइंद्रो विरूक्तः॥४२॥ खड्गं चेति अनुरूपनिजायुधलाभात्परमप्रीतः॥ अक्षयाः सायकाः बाणाः ययोः तौ तूणौ इषुधी। वनचरैः वानप्रस्थैः॥४३॥ ऋषयइति। तदनेव सतोरामस्यांतिकं असुराः कवंधादयः रक्षांसि खरादयः तेषां वधाय। वधं प्रार्थयितुं सर्वे ऋषयः अभ्यागमन्। स रामः तेषां राक्षसानां वधं तस्मिन्वने। तेभ्यो ऋषिभ्यः प्रतिशुश्राव। प्राप्तकालमसुररक्षोयोधयिष्येऽहमित्यङ्गीकृतवानित्यर्थः॥४४॥

जहारेति हत्वा हतप्राणं कंठगतप्राणं कृत्वा रामस्य भार्यां जहारेति संबंधः निहतं निहतप्रायं श्रु
त्वा गृध्रमुखादिति शेषः ॥५३॥ विललाप पर्यदेवयत् आकुलेंद्रियः शोकपरवशेंद्रियः ॥ तेनै
व शोकेन निवर्त्तितुमप्राप्तेन अभिभूयमान एव सन् गृध्रं रावणेन सीता अपहृतेति नि
वेद्य मृतं दग्ध्वा विधिना संस्कृत्य ॥५४॥ सीतां वने मार्गमाणः मार्गयमाण इत्यर्थः ॥ रूपेण वि

जहार भार्यां रामस्य गृध्रं हत्वा जटायुषं ॥ गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम्
॥५३॥ राघवः शोकसंतप्तो विललापाकुलेंद्रियः ॥ ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायु
षम् ॥५४॥ मार्गमाणो वने सीतां राक्षसं संददर्श ह ॥ कबंधं नाम रूपेण विकृतं घोरदर्शन
म् ॥५५॥ तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः ॥ स चास्य कथयामास शबरीं धर्मचारि
णीं ॥५६॥ श्रमणीं धर्मनिपुणामभिगच्छेति राघव ॥ सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसू
दनः ॥५७॥

कृतं कबंधं राक्षसं संददर्शेति संबंधः ॥५५॥ तमिति तं कबंधं निहत्य ददाह महाबाहुः रामः स
च कबंधः स्वर्गतः स्वर्गगमनयोग्यं स्वीयं गांधर्वं रूपं प्राप्तवान् ततः तेन रूपेण अस्य रामस्य
॥५६॥ श्रमणीं तापसीं धर्मनिपुणां सकलधर्मज्ञां धर्मचारिणीमित्यस्य तु सकलधर्मानुष्ठा
त्रीमित्यर्थः श्रमणीमित्यत्र कर्त्तरि ल्युट् ॥ तपसा श्राम्यतीत्यर्थात् तामभिगच्छेति कथयामासेत्यान्वयः ॥५७

13

रक्तसामिति॥ चतुर्दशसहस्राणि नंसंख्यासंख्यातानि सैन्यानीति शेषः ज्ञातयः खरादयः खरादयो हि रावणस्य वैमात्रेयाः॥ श्रुत्वाग्रपणाखयासुखवादिति शेषः मूर्च्छितः व्याप्तचितः॥ ४९॥ क्रोधेन व्याप्तः स रावणः मारीचेन बहुशः बहुवारं परदाराहरणस्य परमाधर्मत्वं बलवद्विरोधस्य निजनाशांतत्वं च नस्तेन रामेण बलवता विश्वामित्राश्रमे मदत्तुभूतबलेन तेन तव विरोधो न क्षमो युक्तः॥ न हित

रक्षसां निहतान्याशन्सहस्राणि चतुर्दश॥ ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः॥ ४९
सहायं वरयामास मारीचं नाम राक्षसम्॥ वार्यमाणः सुबहुशो मारीचेन स रावणः॥ ५०॥
न विरोधो बलवता क्षमो रावण तेन ते॥ अनादृत्य तु तद्वाक्यं रावणः कालचोदितः॥ ५१॥
जगाम सह मारीचस्तस्याश्रमपदं तदा॥ तेन मायाविना दूरमपवाह्य नृपात्मजौ॥ ५२॥

अ॰ इति वार्यमाणोपि मारीचं नाम प्रसिद्धं राक्षसं सीताहरणे सहायं वरयामास वव्रे वरणं इति स्वार्थे णिच् अपि तोपि॥ ५०॥ नेति पूर्वार्धे पूर्वान्वयि कालचोदितः मृत्युप्रेरितः रावणः तद्वाक्यं मारीचवाक्यं तु अनादृत्य॥ ५१॥ सह मारीचः मारीचसहितः वोपसर्जनस्येति विकल्पात् सहस्य सादेशाभावः॥ तस्य खरादिहंतृत्वेन प्रसिद्धस्य रामस्य आश्रमपदं आश्रमस्थानं जगाम ततः तेन मायाविना मारीचेन नृपात्मजौ रामलक्ष्मणौ दूरं अपवाह्य अपसार्य॥ ५२॥

रामायप्रत्युत्तरमावेदितव्यंतत्सर्वंरामवनदारापहारांतकष्टैःसंजातदुःखेनसुग्रीवेणप्रणयात्
आवेदितम्·तदातदुत्तांतश्रवणकालेरामेणवालिवधंप्रतिवालिवधमुद्दिश्यअवश्यंवालिनंव
धिष्यामीतिप्रतिज्ञातम्॥६२॥वालिनश्चेति॥तत्रऋष्यमूकपर्वतेवानरःसुग्रीवःवालिनोबलं
अरुणोदयानंतरंसूर्योदयात्प्रागेवरावणंगृहीत्वाचतुःसमुद्रलंघनादिरूपंकथयामास·

रामायावेदितंसर्वंप्रणयाद्दुःखितेनच॥प्रतिज्ञातंचरामेणतदावालिवधंप्रति॥६२॥
वालिनश्चबलंतत्रकथयामासवानरः॥सुग्रीवःशंकितश्चासीन्नित्यंवीर्येणराघवे॥६३॥
राघवप्रत्ययार्थंतुदुंदुभेःकायमुत्तमम्॥दर्शयामाससुग्रीवोमहापर्वतसन्निभम्॥६४॥
उत्स्मयित्वामहाबाहुःप्रेक्ष्यचास्थिमहाबलः॥पादांगुष्ठेनचिक्षेपसंपूर्णंदशयोजनम्॥६५॥

किंच·सुग्रीवःरामतुल्योनवेतिशंकितःसंजातशंकआसीत्॥६३॥राघवेति॥राघवस्यवालि
महाबलत्वेविश्वासार्थमुत्तमंबलप्रत्यायनोत्तमसाधनंमहापर्वतसदृशंदुंदुभेर्दैत्यस्यशरीरं
दर्शयामास·यस्यकायः॥इदानीमेतादृशःतादृशोदुंदुभिर्वालिनाहत्वारातावत्दूरंप्रक्षिप्तइ
त्यस्मादर्शयामासेत्यर्थः॥६४॥उत्स्मयित्वेति·बाहुल्यकात्स्वार्थेणिच्·ईषत्स्मितंकृत्वा॥६५॥

शबर्य्येति॥सम्यक्पूजितः यथाविधिअर्घ्याद्युपचारैः पूजितः पंपेत्यादिना किष्किंधाकांडकथासंग्रहः संगतः मिलितः॥५५॥हनुमद्वचनात्सुग्रीवोऽयमनेनमैत्रीमपेक्षतेइत्यादिरूपात् समागतः मैत्रीकृतवान् हनुशब्दोह्रस्वांतोदीर्घांतश्च सुग्रीवायेति संगतायेतिशेषः।शंसत्कथयन् छांदसोऽडभावः महाबलः सुग्रीवेणस्वकार्यसाधकमहाबलत्वेनावगतः॥५६॥

शबर्यापूजितः सम्यग्रामोदशरथात्मजः॥पंपातीरेहनुमतासंगतोवानरेणह॥५८॥
हनुमद्वचनाच्चैवसुग्रीवेणसमागतः॥सुग्रीवायचतत्सर्वंशंसद्रामोमहाबलः॥५९॥
आदितस्तद्यथावृत्तंसीतायाश्चविशेषतः॥सुग्रीवश्चापितत्सर्वंश्रुत्वारामस्यवानरः॥६०॥
चकारसख्यंरामेणप्रीतश्चैवाग्निसाक्षिकम्॥ततोवानरराजेनवैरानुकथनंप्रति॥६१॥

आदितइतिजन्मारभ्येत्यर्थः॥तत्प्रसिद्धवृत्तंस्वीयंसीतायाश्चवृत्तंविशिष्यरावणापहारांतंअशंसत् यद्यपिमहाबलत्वाद्धिनापिसहायंसर्वनिर्वाहकः तथापिलोकरीतिमनुसृत्यसुग्रीवमैत्रीमुद्दिश्यसर्वमकथयदितिबोद्धव्यं॥वानरः सुग्रीवोपिरामस्यसंबंधितत्सर्वंश्रुत्वा ६०॥स्वसमानदुःखमहासंबंधलाभात्प्रीतः सुग्रीवः अग्निसाक्षिकं अग्निरेवसाक्षात्द्रष्टायस्यतादृशंसख्यंचकार ततोवैरानुकथनंवालिनस्तवचवैरेकिंकारणमितिरामकृतप्रश्नंप्रति प्रश्नोत्तरमितियावत्

॥६१॥

ततइति। सुग्रीववचनात्· वालिनंजघ्निकाकुत्स्थमयावद्धोयमंजल्लिरित्येवंरूपात्सुग्रीववचनात्। श्राहवेरणेप्रत्यपादयत्प्रतिष्ठापितवान्· सुग्रीववचनादित्यनेनश्चनपकारिवालिवधस्यायुक्तत्वेपिमित्रापकारित्वेननदुक्त्याहननमितिध्वनितम्॥७०॥सचेति ससुग्रीवः दि

ततःसुग्रीववचनाद्धत्वावालिनमाहवे॥सुग्रीवमेवतद्राज्येराघवः प्रत्यपादयत्॥७०॥
सचसर्वान्समानीयवानरान्वानरर्षभः॥दिशःप्रस्थापयामासदिदृक्षुर्जनकात्मजाम्॥७१॥
ततोगृध्रस्यवचनात्संपातेर्हनुमान्बली॥शतयोजनविस्तीर्णंपुप्लुवेलवणार्णवम्॥७२॥
तत्रलंकांसमासाद्यपुरींरावणपालिताम्॥ददर्शसीतांध्यायंतीमशोकवनिकांगताम्॥
॥७३॥

दृक्षुः अन्वेषिषिषुःसर्वान्वानरान्समानीयसर्वादिशःप्रस्थापयामास॥७१॥ततइति गृध्रस्यसंपातेर्वचनात्॥तस्यांवसतिवैदेहीदीनाकोशयवासिनीत्येवंरूपात्· पुप्लुवेउल्लंघितवान्· इतःसुंदरकांडकथासंग्रहः॥७२॥तत्रेति॥अशोकवनिकागतां· प्रमदावनस्थितां· ध्यायंतींराममितिशेषः॥७३॥

15

विभेदेति. पुनश्च प्रत्ययं जनयन् स्वबलविश्वासमुत्पादयन् हेतोः शतापत्त्रमपि हेतुः तदा रक्तेनैव महेषुणा सकल्पयोगेनैव सप्तशालान् सप्तशालवृक्षान् तत्समीपस्थो गिरिं पर्वतं रसातलं च सप्तम
धोलोकं च विभेद। अतल वितल सुतल तलातल महातल रसातल पाताला इति सप्ताधोलोकाः
एकशालमात्रभेदेन अस्य वालिसो[illegible]स्पर्शंका जायेत न तु विरत्यर्थमनुक्ता नाम पञ्चशाल गिरिमस्था

विभेद च पुनः शालान् सप्तैकेन महेषुणा॥ गिरिं रसातलं चैव जनयन्प्रत्ययं तदा॥६६॥ ततः
प्रीतमनास्तेन विश्वस्तः स महाकपिः॥ किष्किंधां रामसहितो जगाम च गुहां तदा॥६७॥
ततो गर्जद्धरिवरः सुग्रीवो हेमपिंगलः॥ तेन नादेन महता निर्जगाम हरीश्वरः॥६८॥ अनु
मान्य तदा तारां सुग्रीवेण समागतः॥ निजघान च तत्रैनं शरेणैकेन राघवः॥६९॥

दीनां भेदनमिति निमित्तव्यं॥६६॥ तत इति. ततः तालभेदानंतरं तेन अतिदुष्करेण कर्मणा वालिवधे विश्वा
संप्राप्तः प्रीतमनाः कपिराजपत्नाभोऽ चिरादेवेति. संतुष्टमनाः किष्किंधाख्यां गुहां रामसहितो जगा
म॥६७॥ तत इति. हरिवरः कपिश्रेष्ठः अगर्जत् सिंहनादं कृतवान् हरीश्वरः वाली॥६८॥ अनु इति.
तदा अंगदसुरवादवगत सुग्रीव राममित्रत्वेन संयुगनिर्गमनं वारयंतीं तारां स्त्रियं मया अकृतापका
रो धर्मज्ञो रामो मत्यं नापकरिष्यति. इत्यादिवचनैरनुमान्य अनुमनिप्राप प्रकृतानुमतिकां कृत्वा इति

यावत् सुग्रीवेण सह वाली युद्धाय समागतोऽभवत्. तत्र संयुगे. एनं वालिनं॥६९॥

रामा·बा·
१६

ततइति ततः रावणादर्शनादिव्यापारानंतरं सीतामृते सीतावस्थानप्रदेशं विना· लंकांदग्ध्वा रामायप्रियंसीतादर्शनरूपप्रियवार्त्तामाख्यातुंपुनः रामंतिकंकपिः हनुमान् आयात् आगतः ७७॥ सोभीति॥ प्रदक्षिणां प्रदक्षिणारव्यमुपचारं· महात्मानं परमात्मानं· अमेयात्मा अपरिच्छेद्यबुद्धिधैर्यादिवैभवः तत्वतः सर्वविभक्तिकस्तसिः दृष्टासीतेति· तत्वं निवेदयदित्यर्थः॥ अत्रदृष्टे

ततोदग्ध्वापुरींलंकामृतेसीतांचमैथिलीं॥ रामायप्रियमाख्यातुंपुनरायान्महाकपिः॥७७॥
सोभिगम्यमहात्मानंकृत्वारामंप्रदक्षिणां॥ न्यवेदयदमेयात्मादृष्टासीतेतितत्वतः॥७८॥
ततःसुग्रीवसहितोगत्वातीरंमहोदधेः॥ समुद्रंक्षोभयामासशरैरादित्यसन्निभैः॥७९॥
दर्शयामासचात्मानंसमुद्रःसरितांपतिः॥ समुद्रवचनाच्चैवनलंसेतुमकारयत्॥८०॥

16

तिपदस्यप्रथमप्रयोगः रामस्यसीतेतिश्रवणेन हि विषयक्रियापदसंशयोमाभूदित्यर्थः॥७८
ततइति ततो सुग्रीवकोडकृथासग्रहः क्षोभयामास· लंकागमनमार्गदानेऽौदासिन्यात्समुद्रमापातालमाकुलीचकारेत्यर्थः॥७९॥ दर्शयेति॥ समुद्रः शरक्षोभितइतिशेषः समुद्रवचनात् एषसेतुं महोत्साहः करोतुमयिवानरः तमहंधारयिष्यामीत्येवंरूपात्· नलंसेतुंअकारयत्· नलेनसेतुंकारितवानित्यर्थः॥८०॥

रामः
१६

निवेदयित्वेति अभिज्ञानं अंगुलीयकरूपं प्रवृत्तिं रामसुग्रीवसख्यादिसर्ववृत्तांतं समाश्वास्य राघवस्य सर्वोपि व्यापारः त्वत्प्रत्यायनैकफलकः॥ इत्यादितत्त्वकथनेन वैदेहीं समाश्वास्य गृहीत्वा प्रत्यभिज्ञानमिति पाठे प्रत्यभिज्ञानं सीतालकस्थित चूडामणीरूपं तोरणं अशोकवनिकागतप्रासादबहिर्द्वारसन्निवेशं चकारादशोकवनं च मर्दयामास॥७४॥ पंचेति॥ सेनाग्रगाः सैन्यपतयः

निवेदयित्वाभिज्ञानं प्रवृत्तिं च निवेद्य च॥ समाश्वास्य च वैदेहीं मर्दयामास तोरणम्॥७४॥
पंच सेनाग्रगान् हत्वा सप्त मंत्रिसुतानपि॥ शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत्॥७५॥
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्॥ मर्षयन्राक्षसान्वीरो यंत्रिणस्तान्यदृच्छया॥७६॥

पिंगलनेत्रप्रभृतयः॥ मंत्रिसुताः जंबुमाल्यादयः अक्षं रावणसुतं॥ निष्पिष्य चूर्णीकृत्य ग्रहणं इंद्रजित्॥ प्रयुक्तब्रह्मास्त्रकृतबंधनं समुपागमत्॥ प्राप्तः॥७५॥ अस्त्रेणेति॥ मदस्त्रस्यामोघत्वात्तेन बंधनमात्रं चतुःपंचघटिकानंतरं पुनर्मोक्ष्यतेति ब्रह्मदत्तवरात्तावता कालेन ब्रह्मास्त्रमुक्तमात्मानं ज्ञात्वापि यदृच्छया कार्यांतरप्रसंगेन रावणदर्शनापेक्षयायंत्रिणः बध्नानेत्वन् तान्राक्षसान्प्रति वीरः हंतुं समर्थोपि मर्षयन्क्षमां कुर्वन् रावणसमीपं प्राप्तवानिति शेषः मम मर्षेति चापाठः॥७६॥

ततइति॥ अग्निवचनात्॰ विशुद्धभावान्निष्पापां प्रतिगृह्णीष्व राघवेत्येवं रूपात्॰ विगतकल्मषां नि
ष्पापां॰ स्वयंज्ञात्वा लोकस्य च तथात्वं प्रत्याय्य सीतामंगीचकारेति शेषः क्वचित्तु॰ अग्रहीदमलां
रामो वचनाद्गुरोस्तदेति पठ्यते॰ तत्रामलामिति पुनरुक्तमापद्यते॥ ८३॥ तेन कर्मणा॰ सीताप्रत्या
यनेन कर्मणा॰ ऋषिदेवगणसहितं चराचरप्रजासहितं त्रैलोक्यं तु तुष्टं तु तोष॰ तत्संतोषेण
च प्रहृष्टः संतोषवशादेव सर्वदेवैः पूजितश्च रामो बभौ॰ अत्र केचित्॰ अचराणां वृक्षादीनां रा

17

ततोग्निवचनात्सीतां ज्ञात्वा विगतकल्मषां॥ अग्रहीदमलां रामो वचनाद्गुरोस्तदा॥ कर्म
णा तेन महता त्रैलोक्यं सचराचरम्॥ ८३॥ सदेवर्षिगणं तुष्टं राघवस्य महात्मनः॥ ब
भौ रामः संप्रहृष्टः पूजितः सर्वदेवतैः॥ ८४॥

वणकृतपीडापरिज्ञानाभावेन रावणवध
जन्यसंतोषाभावात्॰ एवं व्याचक्षते॰। ऋषिदेवगणमिति पाठः॥ ऋत्यक इति प्रकृतिभावः तत्र
देवगणा इन्द्रादयः॥ ऋषिगणाः विश्वामित्रादयः एतद्रूपं त्रैलोक्यं सचराचरम्॰॥ अत्र चरप्रजाः
गतिभक्षणमात्रप्रधानाः॥ तिर्यक्स्रोतसः पश्वपक्ष्यादयः ऐरावतादयः॥ अचरप्रजाः चरप्रजाभि
न्नाज्ञानयुक्तप्रजाश्चार्वाक्स्रोतसो मनुष्याः एवं च स्वस्ववशे प्रति तिर्यक्स्रोतोयुतं देवर्षिगणरू
पं त्रैलोक्यं तु तुष्टं॰ रावणस्य मर्त्योपेतत्वान्प्राधान्येन देवऋषिग्रहणमित्याहुः॥ ८४॥

तेनेतितेनसेतुना· आहवे युद्धे· ॥ अत्र केचिन्मध्येऽभ्यषिंचदित्यादिश्लोकद्वयं· अभ्यषिंचत्सलंकायां
राक्षसेंद्रं विभीषणं कर्मणा तेन महता देवाइंद्रपुरोगमाः ॥१॥ सदेवर्षिगणास्तुष्टा राघवं तेभ्यपूजयन्
॥ तथा परमसंतुष्टैः पूजितः सर्वदैवतैः इति ॥ लंकायां लंकाराज्ये· राक्षसेंद्रं· तत्तद्व्यवहारविष
यो भवति ॥ यथा तथाभ्यषिंचत्· तेन कर्मणा रावणहननादिरूपेण· सदेवर्षिगणाः देवर्षिसहि
तागणाः अर्थादृषिगणास्तत्सहिता देवाइत्यर्थः ॥ न दिदं श्लोकद्वयम्· पूजितः सर्वदैवतैः ॥ अभिषिच्य

तेनगत्वा पुरीं लंकां हत्वा रावणमाहवे ॥ रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥८१॥
तामुवाच ततो रामः परुषं जनसंसदि ॥ अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥८२॥

चेत्यनेन पुरुक्तमिति प्रदीप्तमेव बोध्यम्· सीतां प्राप्य अनुपश्चात्परां व्रीडां· रक्षोगृहे चिरोषितां पु
नर्गृहीतवानिति लोकापवाददर्शंकया· अतिशयितं लज्जामुपागमत् ॥८१॥ तामिति ॥ जनसंसदि·
वानरराक्षससभायां· परुषं· दीपोनेत्रातुरस्येव प्रतिकूलासि मे दृढमित्यादिवचनमुवाच· लो
कस्य ना स्यां रामस्य कामादिदोषतः पुनर्जिघृक्षा स्त्री निमित्तायनार्थं· अमृष्यमाणा· पातिव्रत्यसं
शयजनितमुक्तवचनं सती स्वनेन पातिव्रत्यबलान्निजेच्छया अग्निप्रादुर्भावनशक्तिमत्त्वद्यो
तनमिति केचित्· लक्ष्मणप्रादुर्भावितो ज्वलन इत्यन्ये ॥८२॥

नंदिग्रामेइतिनंदिग्रामेभ्रातृभिः सहस्वस्यापिव्रतप्रयुक्तां जटां हित्वात्यक्त्वारामः सीतांअनुप्राप्य।
मनवेषत्यागेनसीतानुरूपंरूपंप्राप्य॰ यद्वा॰ मुनिवेषत्यागेनदृष्टांसीतांप्राप्यप्राप्तविस्रष्टंराज्यंपु
नरवाप्तवान्॥८९॥एतदंतंचरितंवृत्तत्वेनोपदिश्यदेवऋषिरतः परमुत्तरकांडविषयंभविष्यत्वे
नोपदिशतिः प्रहृष्टेति॰ अनेनचरावणवधानंतरंरामेराज्यंप्रशासतिसतिवाल्मीकेर्नारदं
प्रतिप्रश्नइतिज्ञायते॰ प्रहृष्टः प्रतिस्विकपुत्रपश्वादिसंपत्त्यामुदितःतामदोभराहित्येनमुदि

नंदिग्रामेजटांहित्वाभ्रातृभिःसहितोनघः॥रामःसीतामनुप्राप्यराज्यंपुनरवाप्तवान्॥८९
प्रहृष्टमुदितोलोकःतुष्टःपुष्टःसुधार्मिकः॥निरामयोह्यरोगश्चदुर्भिक्षभयवर्जितः॥९०॥
नपुत्रमरणंकेचिद्द्रक्ष्यंतिपुरुषाःक्वचित्॥नार्यश्चाविधवानित्यंभविष्यंतिपतिव्रताः॥९१॥
नचाग्निजंभयंकिंचिन्नाप्सुमज्जंतिजंतवः॥नवातजंभयंकिंचिन्नापिज्वरकृतंतथा॥९२॥

तांतःकरणःलोकःसर्वप्रजाःतुष्टःबहुप्रदाह्नगावतः सांसारिकपारमार्थिकार्थलाभात्तुष्टःअतए
वपुष्टःदारिद्र्यकार्श्यपरहितः आमयोमनःपीडारोगोदेहजोव्याधिः दुर्भिक्षेणचोरादिभयेनचरहि
तःभविष्यतीतिशेषः यद्वा रामविरहेणदुःखितःराममिलनेनतुष्टः॥तथातद्विरहेणकृशःतन्मि
मिलनादेवपुष्टः॥९०॥नेति स्वपितृषुस्वेषुजीवत्स्वितिशेषः अविधवाभर्त्रनुगमनाद्वैधव्यासम्भ
वादितिशेषः॥९१॥नचाग्निजमिति॥पादत्रयेणआधिदैविकदुःखनिवृत्तिरुच्यते॰ चतुर्थेनाध्यात्मिकनिवृत्तिः॥९

अभिषिच्येति राक्षसेंद्रं भावितत्वव्यवहारविषयं कृतकृत्यः प्राक् प्रतिज्ञातविभीषणाभिषेकलक्ष णकृतस्यापि कृतत्वात् कृतकृत्यः अत एव विज्वरः विगतावश्यकर्तव्यविषयचिंतातापः प्रमुमो देति छांदसं परस्मैपदं ॥८५॥ देवताभ्य इति सुप्तोत्थितवत् गतिरंतुर्वनराडित्येवं रूपं वरं राव णवधजनितहर्षवशात् स्वदिदृक्षया समागताभ्यो देवताभ्यः प्राप्य सुहृद्भिः सुग्रीवविभीषणा दिभिः संवृतः पुष्पकेणायोध्यामुद्दिश्य प्रस्थितः जगाम ॥८६॥ भरद्वाजेति चतुर्दशे तु संपूर्णे

अभिषिच्य च लंकायां राक्षसेंद्रं विभीषणं ॥ कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥८५॥ देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ॥ अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥८६॥ भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ॥ भरतस्यांतिके रामो हनूमंतं व्यसर्जयत् ॥८७॥ पुनराख्यायिकां जल्पन् सुग्रीवसहितस्तदा ॥ पुष्पकं तत्समारुह्य नंदिग्रामं ययौ तदा ॥८८॥

वर्षे हनिरघत्तम नइत्यामियदित्वां तु प्रवेक्ष्यामि हुताशनमिति भरतेन प्रतिज्ञातत्वात् भरद्वा जाश्रमे चतुर्दशसमाप्त्यनंतरं सुनिवचनेन एकदिनविलंबस्य प्राप्तत्वात्स्वागमनप्रबोधना य हनुमद्विसर्जनं यद्वा महत्या वानरसेनया सहाकस्मात् गमने भरतादेः शंका माभूदिति त द्विसर्जनं ॥८७॥ पुनरिति पुष्पकादवतीर्णत्वात् पुनस्तत्पुष्पकं समारुह्य आख्यायिकां पूर्व वृत्तविषयां कथां भरद्वाजाश्रमावरोहात् पूर्वमिव जल्पन् कथयन् सुग्रीवेति विभीषणादे

अवतारत्यागकालमाह॥ दशेति॥ उपासित्वा॥ नित्यवदनुष्ठायेत्यर्थः॥ ब्रह्मलोकं मायिकं वैकुंठादिलो
कं॥ अनेन निजनित्यकर्मयोगोपेतस्यैव साक्षात्परंपरया वा ब्रह्मलोकप्राप्तिरिति ध्वनिः॥ ९६॥ अथ ना
रदः स्वोपदिष्टसंक्षिप्तरामायणपाठफलमुपदिशति॥ इदमिति॥ पवित्रं चित्तशोधनं॥ पुण्यं सक
लपुण्यसाधनं॥ वेदैः संमितं सकलरहस्यवेदार्थप्रतिपादकत्वात्वेदतुल्यम्॥ ९७॥ सर्वपाप

राजवंशाञ्छतगुणान्स्थापयिष्यति राघवः॥ चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्य
ति॥ ९६॥ दशवर्षसहस्राणि दशवर्षशतानि च॥ रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्य
ति॥ ९७॥ इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम्॥ यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते॥ ९८॥
एतदाख्यानमायुष्यं पठन्रामायणं नरः॥ सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते॥ ९९॥

मोक्षफलकत्वमुपपादितं॥ पुण्यस्यापि त्रिगुणात्मकत्वेन पापतुल्यतया हेयत्वात्॥ इति मुमुक्षु
फलमुद्दिश्य मुमुक्षूणामपि प्रवृत्तये आह॥ एतदिति॥ आयुष्यं आयुःकारणम्॥ आख्यानमा
ख्यायिका॥ रामोऽयनं प्रतिपाद्यो यस्य तद्रामायणम्॥ संज्ञात्वाण्णत्वं गणो दासीदासादयः तैः
सह॥ इह ऐहिकान्भोगान्भुक्त्वा प्रेत्य मृत्वा स्वर्गे महीयते॥ स्वर्गिभिः सत्कृतो मोदते इत्यर्थः॥
पठन्निति हेतौ शता॥ ९९॥

मौतिकदुःखाभावमाह नचापीतिक्रूरयंत्रदुपशमोपायाभावज्ञं नच नैव भविष्यतीत्यनुषंगः ९३ नित्यमिति कृतयुगेस्वाभाविकादधर्मासंबंधान्नित्यप्रजामोदः त्रेतायां अधर्मस्यपादांशेन संबंधेपिरामपालनवैभवात्तदनाक्रमणान्नित्यप्रमोदत्वं अथरामस्यभाविवृत्तांतरमाह अश्वेति शतनशब्दोनंतवाची इष्ट्वा दत्वेत्यादिस्वरूपकथनं ननुनेषांस्वर्लोकप्राप्तिंप्रतिहेतुत्वेत्तिवोध्यं

नचापिक्रूरयंत्रनतस्करभयंतथा॥ नगराणिचराष्ट्राणिधनधान्ययुतानिच॥ ९३॥
नित्यंप्रमुदिताः सर्वेयथाकृतयुगेतथा॥ अश्वमेधशतैरिष्ट्वातथाबहुसुवर्णकैः॥ ९४॥
गवांकोट्ययुतंदत्वाविद्वद्भ्योविधिपूर्वकम्॥ असंख्येयंधनंदत्वाब्राह्मणेभ्योमहायशाः॥
॥ ९५॥

यत्तुकतक कृताश्वमेधाद्यनुष्ठानस्यमानुषोपाधिप्रयुक्तावर्ज्याद्यशमनद्वाराब्रह्मलोकप्राप्तेर्हेतुत्वमित्युक्तंतन्न भगवदवताराणां पुण्यपापसंबंधस्यसर्वतंत्रविरुद्धत्वात् अश्वमेधाद्यनुष्ठानं तुलीलामात्रेलोकोपदेशायेत्यन्यत्रविस्तरः॥ ९४॥ राजवंशानितिकामरूपकान्यकुब्जादित्तत्तद्राज्यपदस्थान्राजवंशान्शतगुणान् अनेकगुणान्वृद्धियंथाभवतितथास्थापयिष्यति शाश्वततत्तद्राज्यप्रदानेनेतिशेषः चातुर्वर्ण्यंचत्वारोवर्णाः स्वार्थेष्यञ् नियोक्ष्यतिशंकितस्वधर्मेत्रेशमपीतिशेषः॥ ९५

यथावदिति॥आपृच्छैवसाधयामीत्युक्त्वैव॥अभ्यनुज्ञातःयथासुखंविहरतामितिवाल्मीकिनाऽनुगमनपूर्वंअभ्यनुज्ञातः॥अनेनगुरुशिष्ययोःस्नेहभक्तिप्रकाशनं।विहायसमितिपुल्लिंगं॥२॥स इतिसवाल्मीकिः॥तस्मिन्नारदेदेवलोकंगतेसतिमुहूर्त्तंस्वाश्रमेस्थित्वापश्चान्माध्यान्हिकार्थंजान्हव्याअविदूरतः॥समीपेवर्त्तमानंतमसातीरंजगाम।यत्तुमुहूर्त्तमात्रेणदेवलोकंगतेइ

यथावत्पूजितस्तेनदेवर्षिर्नारदस्तथा॥आपृच्छैवाभ्यनुज्ञातःसजगामविहायसम्॥२॥
समुहूर्त्तंगतेतस्मिन्देवलोकंमुनिस्तदा॥जगामतमसातीरंजान्हव्यास्त्वविदूरतः॥३॥
सतुतीरंसमासाद्यतमसायामुनिस्तदा॥शिष्यमाहस्थितंपार्श्वेदृष्ट्वातीर्थमकर्दमम्॥४॥
अकर्दममिदंतीर्थंभरद्वाजनिशामय॥रमणीयंप्रसन्नांबुसन्मनुष्यमनोयथा॥५॥

त्यन्वयइति॥तन्न॥छांदसत्वकल्पनेमानाभावात्।अव्ययत्वकल्पनस्याप्यगतिकगतित्वाच्च।मुहूर्त्तादितिपाठस्तुकल्पितः॥३।४॥अकर्दममिति अवतरणप्रदेशस्यपंकराहित्यमनेनोच्यते।तीर्थंऋषिजुष्टजलं।निशामय॥पश्य।अतएवशमोदर्शनइतिमित्वाभावादह्रस्वत्वंरमणीयत्वेहेतुः॥प्रसन्नांबुइति।सन्मनुष्यचित्तस्यकामादिदोषराहित्येननित्यप्रसन्नत्वात्सादृश्यं॥५॥

पठन्निति। द्विजः मुख्यद्विजो ब्राह्मणः पठन् वागृषभत्वं शास्त्रब्रह्मपारगत्वं प्राप्नुयात्। स्यादिति यद्यर्थे। यदि क्षत्रियः तदा रामायणं पठन् भूपतित्वं प्राप्नुयात्। पण्यैः क्रय्यद्रव्यैः साध्यं मूल्याद्द्विगुणत्रिगुणवृध्यादिरूपं फलं यस्य तत्त्वं प्राप्नुयात्। धनसमृद्धिं प्राप्नुयादिति फलितार्थः। शूद्रोऽपि जनः त्रैवर्णिकदासः अत्र श्रवणे इत्यध्याहारः। महत्त्वं द्विजेतरसर्वप्रजाभ्यः श्रैष्ठ्यं। देहान्ते स्वोपरितनवर्णप्राप्तिल

पठन् द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात्। वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोऽपि महत्त्वमीयात्॥१००॥ हरिः ॐ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये बालकाण्डे प्रथमः सर्गः॥१॥ नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः। पूजयामास धर्मात्मा सहशिष्यो महामुनिः॥१॥

क्षणं च महत्त्वं प्राप्नुयात्॥१००॥ अस्य गायत्र्यर्थप्रतिपादकत्वध्वननाय गायत्र्या आदिमाक्षरेणोपक्रम्य यादिति गायत्र्यन्तिमाक्षरेण समापितवान्। इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके श्रीमद्बालकाण्डे प्रथमः सर्गः॥१॥ हरिः ॐ॥ नारदस्येति। विशारदः विशिष्टा व्याकरणसंस्कारादिविशेषवती विचित्रार्था च शारदा वाणी यस्य सः। सहशिष्य इत्यत्र वोपसर्जनस्येति वैकल्पिकत्वात् सभावः। प्रश्नानुरूपं वाक्यगुणसमृद्धं च यदुत्तरं सम्यक् दत्तमिति पूजयामास। अतिविचित्रं भगवद्वचनमित्यादिशब्दैः॥१॥

तमिति॥ चेष्टमानं लुठंतं निहतं दृष्ट्वा निषादेनेति शेषः॥ करुणां गिरं दीनं शब्दं रुरावः अकरोदि
त्यर्थः पाठांतरे खे परिभ्रमा· खे आकाशे परिभ्रमणं करोतीति सेत्यर्थः॥ ११॥ वियुक्तेति सहचारि
णा· अहोरात्रमिति शेषः ताम्रशीर्षेण· कुक्कुटादिवत् ताम्रवर्णशीर्षगतचूडायुक्तेन· मत्ते
न· कामसंभोगवशादिति शेषः अत एव पत्रिणा संभोगकालत्वादिततपक्षवता· सहितेन

तं शोणितपरीतांगं चेष्टमानं महीतले॥ भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम्॥
॥ ११॥ वियुक्ता पतिना तेन द्विजेन सहचारिणा॥ ताम्रशीर्षेण मत्तेन पत्रिणा सहितेन वै॥ १२॥
तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम्॥ ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत॥ १३॥
ततः करुणवेदित्वादधर्मोऽयमिति द्विजः॥ निशाम्य रुदतीं क्रौंचीमिदं वचनमब्रवीत्॥ १४॥
मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः॥ यत्क्रौंचमिथुनादेकमवधीः काममोहितं॥ १५॥

स्वसंगतेन· तेनापूर्णीरिति त्वादत्पतं शोकः इत्थंभूतेन पतिना वियुक्ता रुरावेति पूर्वेणान्वयः॥
१२॥ तथाविधं काममभोगवशं धर्मात्मनः दयादाक्षिण्याहिंसादिधर्मप्रवणचित्तस्य· कारुण्यं दया
समपद्यत समजायत॥ १३॥ तत इति करुणावेदित्वात्· संजातकरुणत्वात्· इस्वः छांदसः· विदेः
सत्तार्थात् लाभार्थाद्वा णिनिः रुदतीं क्रौंचीं निशाम्य दृष्ट्वा· अयं काममोहितपक्षिवधरूपः अ
धर्म एवेति निश्चित्य क्रौंचीविषयकरुणावत्त्वेन· अर्थात्पापकारिणि निषादे आविर्भूतरोषत

2)

न्यस्यतामिति ॥ वल्कलामितिपाठे छांदसं स्त्रीत्वं ॥ वल्कलमस्त्रियामितिनिघंटुः ॥ इदमेव अव्यासन्न
मपि गंगातीर्थं मध्यान्हकालातिक्रमादगत्वेतिशेषः ॥६॥ एवमिति वाल्मीकेनेतितस्येदमित्यण्
प्रायछतेति छांदसं ॥ नियतः सेवापरः ॥७॥ सइति ॥ नियतेंद्रियः जितेंद्रियः ॥ विचचार अनुध्या
नयोग्यैकांतदेशनिरीक्षणायेतिशेषः ॥८॥ तस्येति ॥ तस्य वनस्य अभ्याशे समीपेचरन् ॥ भग

न्यस्यतां कलशस्तात दीयतां वल्कलं मम ॥ इदमेवावगाहिष्ये तमसातीर्थमुत्तमं ॥६॥
एवमुक्तो भरद्वाजो वाल्मीकेन महात्मना ॥ प्रायछत मुनेस्तस्य वल्कलं नियतो गुरोः ॥७॥
स शिष्यहस्तादादाय वल्कलं नियतेंद्रियः ॥ विचचार ह पश्यंस्तत्सर्वतो विपुलं वनं ॥८॥
तस्याभ्याशे तु मिथुनं चरंतमनपायिनं ॥ ददर्श भगवांस्तत्र क्रौंचयोश्चारुनिःस्वनं ॥९॥
तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ॥ जघान वैरनिलयो निषादस्तस्य पश्यतः ॥१०॥

वान् ॥ तद्वना अभ्याशएवचरंतं ॥ अनपायिनं आधिव्याधिरहितं ॥ अतएव चारुनिस्वनं क्रौंच
योर्मिथुनंददर्श ॥ अनपायिनमित्यार्षं ॥९॥ तस्मादिति ॥ मिथुनात् विभक्तं एकं पुमांसं ॥ पापनि
श्चयः तद्धननरूपपापनिश्चयः अतएव वैरनिलयः निजानयकारिष्वपिप्राणिषु अकारण
वैराश्रयः स इव निषादः तस्यपश्यतः तं पश्यंतं अनादृत्य जघान ॥ पश्यत इति षष्ठी चानादरे ॥१०॥

रामा॰बा॰
२२

निर्दिशेदिति॥ तीर्थव्याख्यानेपि॥ इदं काव्यार्थसूचनं कविना कार्यमिति तदुक्तसंमतिश्लो
कार्थाङ्गम्यते॥ तत्रवाल्मीकेस्तथातात्पर्येकिमिदंव्याहृतंमयाइत्युक्तेरसंगतेः॥ नचकि
मिदमित्यस्यपद्यंगद्यंवेत्यर्थः॥ तदयंश्लोकोभवति॥ मरुतः॥ परिवेष्टारोमरुत्तस्यावसे
गृहेइत्यादिबहुशःश्रुतिषूपलंभेनेहशास्त्ररसन्निवेशस्यश्लोकत्वेनमुनेरज्ञानमित्य
स्यात्पंतमनुचितत्वात्॥ प्राक्तननारदऋषिसंवादस्यापिश्लोकरूपतयातत्रैवसंदेह
कारणौचित्याच्च॥ तत्प्रश्नानंतरंसर्वकेवलसंस्कृतेरेव॥ एतत्श्लोकोत्तरमेवश्लोकेस्त
स्यापिनिबंधनकल्पनात्तुनयुक्तो॥ मानाभावात् अन्यथोपपत्तेश्च॥ अधर्मत्वबुद्धिपूर्व
कथितवचनस्येदृशेर्थेतात्पर्यसंभवस्याप्यभावाच्च॥ माङोयोगाभावेऽगमइत्येतावन्मा
त्रेणलुङाभूतत्वस्येवप्रतीत्याआशिषोऽप्रतीतेश्च॥ एतत्श्लोकनिर्गमकालेकवेः का
व्यंकरिष्यामीतिबुद्धेरप्यभावाच्च॥ ब्रह्मोपदेशानंतरमेवहितथाबुद्धिर्वाल्मीकेः॥ ममतु
प्रतिभाति॥ नारदात्स्वगुणश्रवणानंतरंमुनेः॥ स्ववर्णनेच्छांज्ञात्वास्वचरित्रस्यचकरु
णरसमयत्वेनतत्प्रधानकाव्यगतिकरुणाचित्तस्यैवाधिकारात्तऋषेःकरुणाचित्तत्वजि
ज्ञासयैवपूर्वंभगुरदत्तशायस्यपुनरुक्तत्वकरणेनदार्ढ्यसंपादनायचमुनेरीक्षणंयच
भगवान्रामएवनिषादरूपेणपश्यतोमुनेः॥ पुरतस्तमनादृत्यक्रौंचस्तोविशेषरूपंजघा
नः॥ ततस्तदिच्छावशादंतर्यामितयातथाप्रेरणाच्चमहानधर्मोयमनेनकृतइतिरुषापा

४२

राम
२२

मानिषादेति ॥ क्रौंचहंतत्प्रत्यक्षदृश्यमाननिषादशापरूपोऽर्थः स्तस्य स्पष्टएव ॥ किंच मा लक्ष्मीः नि
षीदत्यस्मिन् ॥ तत्संबोधनं मानिषाद । यद्यस्माद्धेतोः ॥ क्रौंचमिथुनात् मंदोदरीरावणरूपात्
एकं काममोहितं रावणं ॥ अवधीः हतवानसि ॥ तस्मात्त्वं शाश्वतीः समाः अनेकान् संवत्सरा
न् ॥ अद्वितीयां प्रतिष्ठां ॥ अखंडैश्वर्यानंदावाप्तिं अगमः प्राप्नुहि ॥ तेनार्थतः शब्दतोपि मना
क्काव्यार्थसूचनं ॥ इत्युक्ते ॥ श्रीरामकृतरावणवधरूपकाव्यार्थः ॥ काव्यादौ अवश्यकर्त्तव्या
शीर्वादश्च सूचित इति तीर्थाः ॥ कतककृतस्तु प्रत्यक्षंदृष्ट निषादशापरूपोर्थः स्तस्य स्पष्ट एव ॥
किंच नितरां सदेवर्षिगणां त्रैलोक्यं अवसादयति पीडयतीति निषादः ॥ तस्य संबुद्धिः ॥ हे नि
षाद रावण ॥ यद्यस्मात् । क्रौंचमिथुनात् ॥ अल्पीभावार्थात् क्रुंचेः ॥ पचाद्यच् ॥ क्रुंच ततः स्वा
र्थिको अण् ॥ क्रौंचं ॥ राज्यच्युतवनवासादिदुःखेन अत्यल्पीभूतं परमकार्श्यं गतं यत् मि
थुनं सीतारामरूपं ॥ तस्मात् एकं सीतारूपम् ॥ यस्मादवधीः ॥ वधाभ्यधिकपीडां प्रापितवान
सि ॥ ततस्मात्त्वं प्रतिष्ठां ॥ यात्लंकापुरे पुत्रपौत्रभृत्यगणावेशिष्ट्येन ब्रह्मणा प्रतिष्ठापितां तां
अतः परं मागम इति काव्यार्थसूचनं ॥ त्रैलोक्यस्य परममंगलरूपं चेदं सत्यसरस्वत्याः पुर
स्तादाविर्भावितमित्याहुः ॥ अत्रेदमवधेयम् ॥ एवं रावणवधे जाते अयोध्याराज्यप्राप्त्यनंतरं
नारदं प्रति प्रश्न इति स्वयमेव व्याख्यातत्वात्तदुत्तरकालिकैतत् ॥ श्लोकस्य एवं विधिघटि
तस्योक्तार्थस्य कतकमते कथं संगतिः ॥ कथं वा सर्वज्ञा सत्यसरस्वतीभूतमर्थमाशास्यत्वेन

देविचारेभ्यो भीतो लोकापवादतः॥ आहूय लक्ष्मणं प्राह रामो राजीवलोचनः॥ शृणु मे वचनं गु
त्यसीतासंत्यागकारणम्॥ वाल्मीकिनाथ भृगुणा शप्तोस्मि किल लक्ष्मण॥ न स्मादेनां त्यजाम्य
द्य जनो नैवात्र कारणमिति॥ ॥ तथा स्कांदे पातालखंडे अयोध्यामाहात्म्ये तत्र त्यतीर्थ
श्रमवर्णनप्रस्तावे॥ शापोक्त्या न्हदि संतप्तप्राचेतसमकल्मषं॥ प्रोवाच वचनं ब्रह्मा तत्राग
त्य सुसत्कृतः॥ न निषादः स वै रामो मृगयां चर्तुमागतः॥ तस्य संवर्णनेनैव सुश्लोकास्त्वं
भविष्यसि॥ इत्युक्त्वांतर्जगामाशु ब्रह्मलोकं सनातनः॥ ततः संवर्णयामास राघवं ग्रंथ
कोटिभिरिति॥ कोटिभिः शतकोटिभिः॥ चरितं रघुनाथस्य शतकोटिप्रविस्तरमित्यन्यत्रो
क्तेः॥ तच्च संपूर्णं ब्रह्मलोके इत्येतित्यं इह तु कुशलवोपदिष्टा चतुर्विंशति सहस्रीत्य
लम्॥ योगवासिष्ठे तु शापांतराण्यप्युक्तानि॥ तथा हि॥ सनत्कुमारो निष्कामश्चावसत्
ब्रह्मसद्मनि॥ वैकुंठादागतो विष्णुस्त्रैलोक्याधिपतिः प्रभुः॥ ब्रह्मणा पूजितस्तत्र सत्य
लोकनिवासिभिः॥ विना कुमारं तं दृष्ट्वा त्युवाच प्रभुरीश्वरः॥ सनत्कुमारस्तब्धोसि निः
कामो गर्वचेष्टया॥ अतस्त्वं भव कामार्तः शरजन्मेति नामतः॥ तेनापि शापितो विष्णुः सर्व
ज्ञत्वं तवास्ति यत्॥ किंचित्कालं हि तत्त्यक्त्वा त्वमज्ञानी भविष्यसि॥ शापितः शप्तः किंचि
त्कालमवतारांतरेऽत्यल्पकालं तत्त्यक्त्वा तद्रूपं त्यक्त्वा॥ अज्ञानी सद्भवः॥ तथा भृगुर्भार्यां हृ
तां दृष्ट्वा प्रोवाच क्रोधमूर्छितः॥ विष्णो त्वं वापि भार्यावियोगी हि भविष्यति॥ तथा॥ वेद

23

पमनेनिषादयत्॥त्वंकाममोहितंक्रौंचमिथुनात् मिथुनीभूतात्क्रौंचयुगात् विभक्तमेकम
वधीः॥तत्त्वमपिशाश्वतीःसमाः आयुःशेषभूतानिबहूनिवर्षाणि प्रतिष्ठांस्वस्त्रीसाहित्येन
स्थितिंइहमागमः॥माप्राप्नुहि॥किंत्वत्यल्पकालमेवतथावासएकमिथुनीभावपर्यंतंइति
यावत्॥इतिशप्तवान्मुनिः॥एकमवधीरित्युक्तेयथास्त्वयास्त्रीविरहितःकृतःसाचनायक
हीनाकृतातथात्वमपिप्रिययास्वभार्ययाहीनोभव॥साचत्वयाहीनाभवत्वितिपर्यवसानं
अगमइत्यडागमस्तत्त्वमाङ्योगेप्यार्षत्वात्॥तस्यरहोरूपत्वंतुएतदुत्तरंब्रह्मणः॥सकाशा
त्सकलरामवृत्तांतज्ञानवरलाभोत्तरकालंकृतेतस्माच्चमिथुनादेकमितिस्मृतोकेवैर
निलयइतिविशेषणेनसूचितं॥रत्नःस्वव्रतस्यत्नोकदृष्ट्या वैरनिलयत्वप्रसिद्धेः॥
निषादस्यापिप्राणिषुनवैरंकिंत्वाहाराद्यर्थमेवतद्धननमितिप्रसिद्धेश्च॥अतएवारण्ये
क्रीडेमृगयाव्यसनमुपक्रम्यविनावैरंचरौद्रइतितृतीयंयदिदंरौद्रंपरप्राणाभिद्रोहंसंननि
वैरंक्रियतेमोहात्तच्चतेसमुपस्थितमितिचवक्ष्यति॥त्रीण्येवव्यसनान्यत्रकामजानिभ
वंत्युतेतिचोपक्रमेउक्तं॥नन्वीदृशोर्थस्त्वयाकेनमानेननिर्णीतइतिचेत् शृणु॥अस्य
त्तरस्यारस्यात्॥तच्चाग्रेस्फुटम्॥तत्रसंदेहश्चेत्स्वांतर्यामिणंपृच्छ॥तदुक्तंपाद्मे॥शिवशि
वासंवादेरामवैभववर्णनेचतुर्विंशेध्याये ततोजानपदःकश्चित्पामरःकाष्ठविक्रयी॥
स्ववधूगर्हणाहारावणस्यगृहोषितां॥गर्हयामासवैदेहींदुर्वृत्तोलोकनिंदकः॥तच्छ्रुत्वा

तस्येति॥ मया मुनिना शांतेन तपस्विना शकुनिशोकपीडितेनेदमीदृशं क्रूरं तपोनाशकरं किं
व्याहृतमिति वीक्षतों तयोर्मिथ्येरणाया निषादे सर्वतो महत्त्वसंभावनया दृश्यमानक्रौंचे
तद्वैपरीत्यसंभावनयाऽतिनिंद्यमयशस्करं महापातकेभ्योऽप्यधिकं पापं वृत्तमिति चिं
ताबभूव॰ यद्यप्येतत्सर्वं वाल्मीकिकृतमेव॥ तथापि कुशलवगेयतयास्य काव्यस्य कर

२५

तस्येत्थं ब्रुवतश्चिंताबभूव हृदि वीक्षतः॥ शोकार्तेनास्य शकुनेः किमिदं व्याहृत
म्मया॥१६॥ चिंतयन्स महाप्राज्ञश्चकार मतिमान्मतिं॥ शिष्यं चैवाब्रवीद्वाक्यमि
दं स मुनिपुंगवः॥१७॥

॥ तदुक्तितयैवमुक्तिः अन्यथास्वचिंतायाः स्वापरोक्षत्वात् बभूवेति लिडसंगतिः स्यात्॰
यद्वा॰ सर्गचतुष्टयमाद्यमुपोद्घातरूपं कस्यचिच्छिष्यस्य॰ वाल्मीकीयोपोद्घातत्वाच्च वा
ल्मीकेर्योक्तिः॥ पारोक्ष्यमारोप्यस्वयमपि तथोक्तिरूपोद्घातत्वद्योतनायेत्यन्ये॥१६॥ चिंतयन्नि
ति॥ महदयशस्करमिदं कर्मवृत्तमिति चिंतयन्॰ सत्यसंकल्पतयाऽत्थं मतिं संकल्पं चा
कार॰ तदभिलापकं वाक्यं शिष्यमब्रवीदिति संबंधः॥१७॥ ॥

याशापितो विप्रः कलत्रं न यत्त्वया कृतम्। अतस्त्वं स्त्रीवियोगं हि वचनान्मम यास्यसि॥ शापि
तः शप्तः कलत्रप्रतिवेषेण संभोगरूपं तया। भार्या हि देवदत्तस्य पयोष्णीतीरसंस्थिता
न सिंहवेषधृग्विप्रं दृष्ट्वा पंचत्वमागता॥ तेन शप्तो हि न हरिर्दुःखार्त्तः स्त्रीवियोगतः
न त्वापि भार्यया सार्धं वियोगो हि भविष्यतीति॥ दुःखार्त्तः तृतीयार्थे आर्षी प्रथमा दुःखा
र्त्तेनेत्यर्थः॥ ताराशापोपि किष्किंधाकांडे तत्रैव वक्ष्यत इत्यलं विस्तरेण॥ प्राचेतसेन मु
निना रामो राजीवलोचनः॥ नमसोपवने शप्तो वेषधृक् जानकीपतिः॥१॥ श्रीरामः प्राकृ
तां लीलां स्वीयां वर्णयितुं तदा। मंदोदरीपतेर्मित्रं क्रौंचं पद्मनवान्प्रभुः॥२॥ अंडजनि
हतं दृष्ट्वा मुनिः शापमधाद्दृढं॥ चिरं मा तिष्ठ मर्त्यो त्वं निषाद मुवि हिंसक॥३॥ शापं
कृत्वैव स वाल्मा तत्रैवांतरधीयत॥ शोकाक्रांतस्ततो वाल्मीकिर्ब्रह्मणा प्रसुबोधितइ
ति॥४॥ त्यक्त्वा जीर्णदुकूलवद्वसुमतीवद्धो बुधिर्विंदुवद्वाणाग्रेण जरत्कपोतकद्व
व्यापादितो रावणः॥ लंका चापि विभीषणाय सहसा मुद्वेव हस्तेर्पिता कृत्वैवं रघुना
यकस्य चरितं कौ वानरानाचनि॥॥५॥ ॥१५॥ ॥

सइति॥सुखतोन्याः कथाश्चकार॥मनसातुशापार्थकश्लोकविषयंध्यानमास्थितः यत्तुध्यानमेवायं
गायत्र्याश्चतुर्मुखहृद्गाधान्येनध्यानमास्थितइत्यर्थइतितन्न तदास्थितेनान्याः कथाश्चकारेत्य
स्यासंगतेरित्यलंध्यानपदार्थानभिज्ञदूषणाभिनिवेशेन॥२२॥अथतच्चिंतांनिवर्तयितुंब्रह्मागम

सप्रविश्याश्रमपदंशिष्येणसहधर्मवित् उपविष्टःकथाश्चान्याश्चकारध्यानमास्थितः॥२२
आजगामततोब्रह्मालोककर्तास्वयंप्रभुः॥चतुर्मुखोमहातेजाद्रष्टुंतंमुनिपुंगवम्॥२३॥
वाल्मीकिरथतंदृष्ट्वासहसोत्थायवाग्यतः॥प्रांजलिःप्रयतोभूत्वातस्थौपरमविस्मितः॥२४
पूजयामासतंदेवंपाद्यार्घ्यासनवंदनैः॥प्रणम्यविधिवच्चैनंपृष्ट्वाचैवनिरामयम्॥२५॥

नमाह॥आजगामेति॥स्वयंप्रभुः अनन्यमुखनिरीक्षकतयासर्वलोकसृष्ट्युपयोगिज्ञानै
श्वर्यादिशक्तिमान्॥अतएवभूरादिलोकनिर्मिता तंशापवाक्योच्चारणवशादतिचिंताक्रांतं
२३॥वाग्यतः॥अतिसंभ्रमवशाद्यतवाक्॥प्रयतोऽञ्जलिनम्रः॥२४॥पूजयामासेति॥वंदनैःस्तुतिभिः
प्रणम्येतिपृथग्युक्तेः॥एनमित्याद्युत्तरान्वयि॥२५॥ ॥॥॥

पादेतिअक्षराक्षरानुष्टुप्पादैर्वद्धः अक्षरसमः छंदः शास्त्रोक्त गुरुलघ्वक्षरवैषम्यरहितः तथातंत्रीवी
णा लयस्तालस्तदंगवेणहस्ताभिनयानांसमकालविरामस्ताभ्यांयुक्तः तंत्र्यामारोप्यवाद्यैः सह
गातुंयोग्यइतियावत् अतः शोकार्तस्यमशापरूपनयानौचित्येनप्रवृत्तोपिमेममश्लोकोयशोरू
पोभवतु॥ अन्यथायशोरूपोतःमाभूदित्यर्थः अत्रभवत्वितिपाठएवबहुपुस्तकसंमतस्तीर्थसं

पादबद्धोक्षरसमस्तंत्रीलयसमन्वितः॥ शोकार्त्तस्यप्रवृत्तोमेश्लोकोभवतुनान्यथा॥१८॥
शिष्यस्तुतस्यब्रुवतोमुनेर्वाक्यमनुत्तमं॥ प्रतिजग्राहसंतुष्टस्तस्यतुष्टोभवन्मुनिः॥१९॥
सोभिषेकंततः कृत्वातीर्थेतस्मिन्यथाविधि॥ तमेवचिंतयन्नर्थमुपावर्ततवैमुनिः॥२०॥
भरद्वाजस्ततःशिष्योविनीतःश्रुतवान्गुरोः॥ कलशंपूर्णमादायपृष्ठतोनुजगामह॥२१॥

मतश्चश्लोकोयशसिपद्येचेतिनिघंटुः॥१८॥ शिष्यइतिएवंब्रुवतस्तस्यऋषेर्वाक्यंयशोभव
त्वित्येवंरूपंतुष्टः सन् तथैवेदंयशोरूपमेवेदमित्यनुमोदनेनप्रतिजग्राह अंगीचकार अ
यशोरूपेपियशस्त्वानुमोदनेनगुरुस्तस्यतुष्टोभवदित्यर्थः॥१९॥ सइति॥ अभिषेकमितिमध्या
न्हकर्त्तव्यानुष्ठानोपलक्षणं तमेवार्थं अवशात् शापार्थकश्लोकोत्पत्तिरूपं उपावर्ततन्यवर्त
त॥२०॥ श्रुतवान् बहुश्रुतः पृष्ठतः पृष्ठभागेनप्रसारितकरसरोपरिपूर्णंकलशमादायअनु

शोकपरायणः॥ क्रौंचवधकृतक्रौंचीदुःखदर्शनजेनस्वस्यमुखतस्तपोहानिकरशापार्थश्लोकस्यावशतो निःसरणजेनचशोकेनव्याप्तः॥ अतएवांतर्गतमना अंतर्गतश्लोकार्थएवदत्त

पुनरंतर्गतमनाभूत्वाशोकपरायणः॥ तमुवाचततोब्रह्माप्रहसन्मुनिपुंगवम्॥ ३०॥

चित्तः॥ श्लोकंजगावितिसंबंधः॥ तंतथाशोकग्रस्तंप्रहसन् मदिच्छयावतीर्णांसरस्वतींनजानातीतिहासंकुर्वन्॥ ३०॥

एनंमुनिं॰ ब्रह्मा अनामयं॰। आमयः पीडा तद्रहितं व्यय हीन मिति यावत्॰। नपद्ग तिशेषः। तत्र स्थित्वा अनं
तरं स्वयमासने उपविश्य॥ ऋषये आसनं दिदेश। आसने उपवेष्टुमनुमेन इत्यर्थः॥ वाल्मीकये चर्क्ष
षयइतिपाठः एतेन ब्राह्मणां कुशलं पृष्ट्वा त्वत्र बंधुमनामयमित्युक्तेर्ब्राह्मणां प्रत्ययंप्रश्नः स्मार्त्ताचार विरु
द्धः। तंदेव मित्यनेनैव सिद्धे एन मित्यस्य पवैय्यर्थ्यापत्तेश्चेत्यपास्तं॥ २५॥ लोक पितामहे॥ उपविष्टे सति

अथोपविश्य भगवानासने परमार्चिते॥ वाल्मीकये च ऋषये संदिदेशासनं ततः॥ २६॥
ब्रह्मणा समनुज्ञातः सोप्युपाविशदासने॥ उपविष्टे तदा तस्मिन् साक्षाल्लोक पितामहे॥ २७॥
तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः॥ पापात्मना कृतं कष्टं वैर ग्रहण बुद्धिना॥ २८॥
यस्तादृशं चारुरवं क्रौंचं हन्यादकारणात्॥ शोचन्नेव पुनः क्रौंचीमुपश्लोक मिमं जगौ॥ २९॥

तदनुज्ञयास्वयमुपाविशदितिसंबंधः॥ २७॥ तद्गतेन क्रौंचगतेन॰ वैरं ग्रहणाति सा चासौ बुद्धिस्त
द्वता॰ कर्त्तरिल्युट् बाहुलकात्॰। निषादेनेति शेषः॥ कष्टं कृतं क्रौंच वधरूपम्॰। तपोनाशसंपा
दकशापनिः॥ सारत्वेन कष्टं कृतं ममेति शेषः॥ २८॥ कष्टमेवाह॥ यइति॥ हन्यात्॰ हतवानित्यर्थः
क्रंदसम्॥ अकारणात्॰ दृश्यमानकारणं विना॥ उपसमीपे ब्रह्मणः समीपे॥ २९॥

एवंपरवशप्रवृत्तस्यापि शापस्य भगवद्भिः षयतयेतरस कलमन्वाद्युक्तप्रायश्चित्तानिवर्त्यस्ययंप्रत्य
सोशापस्तच्चरित्तवर्णनरूपंप्रायश्चित्तमुपदिशतिरामस्यचरित्तमितिलोकेरामस्यपरमतेइतिरामः
बाहुल्यकात्कर्तरिघ्यजतेनलोकाधिष्ठातुर्लोकांतर्यामिणश्चेत्यर्थः कुरु॰ वर्णय स्वधर्मात्मनइत्य
नेनरावणादिवधवत्क्रौंचवधोपिधर्मफलएवलोकव्यवहारेण॰ लोकहितत्वात्वइत्तकत्वाच्च

रामस्यचरितंकृत्स्नंकुरु त्वमृषिसत्तम॥ धर्मात्मनोगुणवतोलोकेरामस्यधीमतः॥३२॥
वृत्तंकथयरामस्ययथातेनारदाच्छ्रुतं॥ रहस्यंचप्रकाशंचयद्वृत्तंतस्यधीमतः॥३३॥
रामस्यसहसौमित्रेराक्षसानांचसर्वशः॥ वैदेह्याश्चैवयद्वृत्तंप्रकाशंयदिवारहः॥३४॥
तच्चाप्यविदितंसर्वंविदितंतेभविष्यति॥ नतेवागनृताकाव्येकाचिदत्रभविष्यति॥३५॥

तिसश्चितं॥३२॥ वृत्तमिति॥ अस्यनारदोक्तविशेषपरत्वादपौनरुक्त्यं॰ धियमीरयतीतिधीरः॥ ते
नबुद्धिप्रेरकस्येत्यर्थः॥ तेनगायत्र्यर्थभूतस्येत्यक्तं॥ रामलक्ष्मणयोराक्षसानांसीतायाश्च॰ यत्प्र
काशंतदीयानामप्रकाशंतवाविदितं॰ यदिवायदपितदीयानामपिरहः॥ अविदितंतवतुसुनरा
मविदितंतदपिसर्वंतेविदितंभविष्यति॰ अनेनतत्करणयोग्यतादानं॰ यद्वमानिषादेतिवदप
र्यालोच्यापिवाक्त्वत्तोनिःसरिष्यतिसापिनान्यथाभविष्यति॰ तेनास्याअपिसत्यत्वंभावीतिध्वनितम्॥३३॥
॥३४॥३५

तद्वचनमेवाह श्लोकएवास्त्वयमिति ॥ अयं त्वया बद्धः श्लोके यशोरूपएवास्तु श्लोकशब्दस्य यश
परतया योजनेऽस्त्विति पाठस्यासंगत्यापत्तेः अस्तीत्युक्ते रेवं ब्रह्मण औचित्यात् मम तु अयं यशोरू
पस्य यशोरूपताशीर्दानमिति तिनासंगतिः श्लोकएवत्वयेपि पाठे पियशोरूपएवायं त्वया बद्धोऽत्र
तव विचारः संदेहो मास्तु मद्वचनात्त्वत्संकल्पाच्चास्य तथाभावप्राप्तेरित्याशयः ननु भवतु त्वदाशि
षा तथात्वमस्याः परंतु शांतस्वभावस्य ऋषेर्ममेदृशी वाग् गत्यंतमनुचितेत्यपि मा विषादं कुर्वित्याह
मच्छंदादिति ॥ मत्संकल्पादित्यर्थः ॥ विष्णोरवतारभूतस्य रामस्य संकल्पोपि स्वसंकल्पत्वेनोक्तः

श्लोकएवास्त्वयंबद्धोनात्रकार्याविचारणा ॥ मच्छंदादेवतेब्रह्मन्प्रवृत्तेयंसरस्वती ॥ ३१ ॥

एकमूर्त्तिस्त्रयो देवा रुद्रविष्णुपितामहा इति हरिवंशोक्तेः ॥ नन्वीदृशसंकल्पो ब्रह्मणोपि किमर्थ
इति चेत् श‍ृणु येषां परस्य दारवियोगादिजनकं कर्म स्वस्य दारवियोगादिकं जनयितुं नालं ते
षामपि ब्रह्मशापस्तज्जननेऽलमिति लोके ब्राह्मणमाहात्म्यं सूचयितुं एवं राज्यादिसत्त्वेपि कामज
यएवोत्तमो न तु तद्भोगचापल्यमिति च स्वव्यवहारेण शिक्षयितुं तत्प्रायश्चित्तं विधया स्वकीर्त्तिवर्ण
नेन मुनेर्यशोवर्ध्यर्थं भगवद्विषयमहापापप्रायश्चित्तत्वात् कैमुतिकन्यायेनेतरजनानां सर्वपा
पप्रायश्चित्तं रामायणश्रवणादीत्यर्थं बोधयितुं चेति गृहाण एतदृषात्तरस्यारस्य बलेन मयायो

तदेवाह॥समेति सार्द्धं गुरुल्लघ्वक्षररहितं॥यः॥ऋषिणा गीतः सः अनुव्यतिशयितशोकोत्पत्त्यनंतरंव्याहरणात् भूयः शोकः विपुलः शोक एव श्लोकत्वं प्राप्त इति वयं मन्यामहे इति प्राहुरिति संबंधः उक्तेनाचेयं तेनास्य श्लोकस्य करुणरसमयत्वं ध्वनितं अत्र नष्टक्रौंचालंबनकः क्रौंचीविरावानुदीपितो निषाद विषयक्रोधव्यभिचारिको मानिषादेत्यादि वाक्यानुभावकः करुणरस इति बोध्यं यत्तु पूर्वं श्लोके प्राहुरित्यस्य परंतीत्यर्थकरणं पुनः पुनः पाठेनानंदवंतोऽभवन्निति फलितार्थकथनं अत्र च श्लोके भूयः

मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः॥समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा
सोनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः॥४०॥तस्य बुद्धिरियं जाता महर्षेर्भावितात्मनः॥कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहं॥४१॥उदारवृत्तार्थपदैर्मनोरमैस्तदास्य रामस्य चकार कीर्तिमान्॥समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदार
दर्शनः॥४२॥

योनुव्याहरणात् मुहुर्मुहुः शिष्यैः पुनः पाठात् लोके शोकः श्लोकत्वेन प्रतिबद्धोऽभवत् श्लोकत्वं प्राप्त इत्यर्थ इति तीर्थादिव्याख्याने तदतिनिःसारमिति स्पष्टमेव॥४०॥तस्येति ईदृशैर्मानिषादेतिवत्करुणरसप्रधानैरित्यर्थः अनेनान्येरसा अत्र गुणीभूता इति ध्वनितम्॥४१॥उदारेति॥उदारस्य यद्वृत्तं चरितं उदारं वा यच्चरितं तद्रूपार्थबोधकैः पदैः मनोरमैः श्रुतिकटुत्वादिदोषरहितैः अस्य यशस्विनो रामस्य दाशरथे रामस्य नारदोपदिष्टस्य श्लोकशतैरिति शतशब्दोऽनंतवाची॥४२॥

एवंसामर्थ्यं दत्वोपसंहरति॥ कुर्विति॥ यावदित्यादिश्लोकद्वयम्॥ ३६॥ ३७॥ तावदिति यावत्त्वत्कृतकथाप्रचारस्तावदधश्चत्वं दयापूर्वमपि क्रोधकराणाम्॥ अधोगमनयोग्योपि ऊर्ध्वं वर्तमानेषु मल्लोकेषु निवासं प्राप्स्यसि॥ ततो मया सह मोदिष्यस इत्यर्थः॥ लोकेष्विति तदवयवाभिप्रायं बहुवचनं॥ ऊर्ध्वम

कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमां॥ यावत्स्थास्यंति गिरयः सरितश्च महीतले॥ ३६॥
तावद्रामायणकथा लोकेषु प्रचरिष्यति॥ यावद्रामस्य च कथा त्वत्कृता प्रचरिष्यति॥ ३७॥
तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि॥ इत्युक्त्वा भगवान्ब्रह्मा तत्रैवांतरधीयत॥ ३८॥
ततः सशिष्यो भगवान्मुनिर्विस्मयमाययौ॥ तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः॥ ३९॥

धश्च विद्यमानेषु मत्॥ लोकेषु मन्निर्मितलोकेषु निवत्स्यसि॥ सर्वत्राप्रतिहतगतिः संचरिष्यसि॥ ततः परं मुक्तिं प्राप्स्यसीति तात्पर्यार्थः॥ तत्र मल्लोकेष्वित्यस्य चारितार्थ्यं चिंत्यं॥ इतीति॥ तत्रैवांतरधानेनास्याप्यंतर्यामिरूपतोक्ता॥ ३८॥ तत इति॥ विस्मयं आश्चर्यं॥ तस्येति॥ प्रीयमाणः आश्चर्यमिदमस्मद्गुरोः॥ पद्यं यद्ब्रह्मणा अनुमोदितं प्रादुश्च वक्ष्यमाणमित्यर्थः॥ ३९॥

श्रुत्वेति॥ नारदात्काव्यविषयं रामचरितरूपं वस्तु श्रुत्वा समग्रप्रकाशरहस्यसहितं कुर्विति च ब्रह्ममुखाच्छ्रुत्वा तस्य धीमतो रामस्य यद्वृत्तं चरितं सरहस्यप्रकाशं तत् भूयः पुनः व्यक्तं साक्षात्कारविषयो यथा भवति तथा कर्तुम्॥ अन्वेषते उद्युक्तोऽस्मै इति शेषः॥ धर्मार्थेति त्रिवर्गोपलक्षणं॰ फलत्वेन तत्सहितं॰ हितं मोक्षफलकं॥१॥ उद्योगमेवाह॥ उपेति॥ आचम्येत्यर्थः सम्यक् स्मृत्युक्ताचमनरीत्या॥२॥

श्रुत्वा वस्तु समग्रं तद्धर्मार्थसहितं हितम्॥ व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः॥१॥
उपस्पृश्योदकं सम्यङ्मुनिः स्थित्वा कृताञ्जलिः॥ प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषते गतिम्॥२॥
रामलक्ष्मणसीताभी राज्ञा दशरथेन च॥ सभार्येण सराष्ट्रेण यत्प्राप्तं तत्र तत्त्वतः॥३॥ हसितं भाषितं चैव गतिर्या यच्च चेष्टितम्॥ तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति॥४॥ राम

दमन्येषामपि प्रायत्यसंपादकानामुपलक्षणं॥ प्रागग्रेषु दर्भेषु स्थित्वा॰ धर्मेण योगजेन ब्रह्मप्रसादरूपेण च गतिं रामादीनां चरितरूपां अन्वेषते अतियत्नेन पश्यति॥२॥ रामेत्यादिश्लोकद्वयमेकं वाक्यं॰ भार्याः कौसल्याद्याः॥ तत्सहितेन दशरथेन रामादिभिश्च यत्प्राप्तं संवृत्तं चरितं॰ राज्यपालनादिरूपं हसितादिरूपं च तत्सर्वं तत्र समाधौ तत्त्वतः धर्मवीर्येण योगजबलेन पश्यति स्म॥३।४॥

२९

एवंकाव्यनिर्माणमुक्त्वातत्रश्रोतॄनभिमुखीकरोति ॥ तदिति ॥ समासः तत्पुरुषादिः संधिरेकादेशादिः
योगः प्रकृतिप्रत्यययोः एतैरुपगता यथाव्याकरणालंकारशास्त्रमर्यादं यस्मिन् ॥ काव्ये तादृशं काव्यं
रघुवरचरितं तद्वर्णनरूपं । समः पतत्प्रकर्षादिदोषरहितो मधुरः करणरसयुक्तत्वेन माधुर्यगुणप्र
धानः ॥ उपनतः ॥ प्रसन्नतयोपलभ्यमानो योऽर्थस्तद्बोधकवाक्यैर्निबद्धं ॥ उपनतत्वेन प्रसादगुण
वत्ता दर्शिता । समुदायेन वैदर्भीरीतिमत्त्वं ध्वनितं ॥ रघोर्गत्यर्थान्निष्पन्नरघुवरशब्देन तस्य सर्वोत्तर

तदुपगतसमाससंधियोगं सममधुरोपनतार्थवाक्यबद्धं ॥ रघुवरचरितं मुनिप्रणीतं दशशि
रसश्च वधं निशामयध्वम् ॥४३॥ इत्यार्षे रामायणे वाल्मीकीये बालकांडे द्वितीयः सर्गः ॥२॥

र्यौमित्त्वं ध्वनितं । ईदृशस्यापि मिथ्यार्थकत्वेऽनुपादेयत्वं स्यादत आह मुनिप्रणीतं । ब्रह्मानुग्रहप्राप्तस
त्यवाग्ऋषिप्रणीतं । पुरुषार्थस्वर्गमोक्षादिसाधनत्वं तु रघुवरचरितमित्यनेनोक्तमेव । दशशिरसश्च
मित्यनेनांतमिदं श्रोतव्यमिति सूचितं । तेनैव सूचितफललाभात् ॥ उत्तरकांडं त्वस्य खिलं भार
तस्य हरिवंशवत् ॥ अत एवाग्रिमसर्गे वनसंचरणपर्यंतवृत्तान्वेक्षणमेव समाधिना ऋषेर्वक्ष्य
तीति प्रांचः ॥ परे तु दशशिरसो वधं चेत्यन्वयः ॥ चेन सीतात्यागादिरूपोत्तरकांडीयवृत्तांतसंग्रह
इत्याहुः ॥४३॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे द्वितीयः सर्गः ॥२॥

सइतिरघुवंशस्यतद्वंशावनीएरामस्य-नारदकथनक्रमेणैवतच्चरितंतत्प्रतिपादकंकाव्यंचकारेत्यर्थः
॥ विस्तरेएवर्णनीयानर्थान्-इत्थंहिविदुषांलोकेसमासव्यासधारणमित्युक्तेः समासेनसंक्षेपेण
ह-जन्मेत्यादिनावीर्यस्यचयमंत्रतस्यपराभिभवसामर्थ्यंसर्वानुकूलतांसर्वेषामनुवर्त्तनरूपांप्रिय
तां-विश्लेषासहत्वपर्यवसायिनीवस्तुसौंदर्यबलाद्विषयलाभेप्यनिवर्त्याविद्यमानानामपिदोषा
णामदर्शनकरीव्यसनसहस्रसंपातेप्यनिवर्त्यायाञ्चनुपस्कृतवस्तुमात्रालंबिनीइच्छाप्रेमपद

सयथाकथितंपूर्वंनारदेनमहात्मना॥रघुवंशस्यचरितंचकारभगवान्मुनिः॥९॥
जन्मरामस्यसुमहद्वीर्यंसर्वानुकूलताम्॥लोकस्यप्रियतांक्षांतिंसौम्यतांसत्यशीलतां॥१०॥
नानाचित्राःकथाश्चान्याविश्वामित्रसहायने॥जानक्याश्चविवाहंचधनुषश्चविभेदनम्॥११॥

वाच्यातद्विषयतां-एवंभगवतिरामेमायाशबलेजातंप्रेमचित्तशुद्धिद्वाराशुद्धविषयंप्रेमोत्पादयति
दिध्यासनद्वारामुक्तिजनकज्ञानपर्यवसायीतिबोध्यम्-क्षांतिंक्षममानोपिपरुषंनोत्तरंप्रतिपद्य
तेइत्युक्तरूपांसौम्यतांअक्रुरदर्शनतां॥१०॥नानेतिविश्वामित्रसहायनेविश्वामित्रेणसहगम
ने-तदुपस्थितिकालेसभार्यांमार्गगमनेकालेचित्रानानाकथाअन्याश्चकथायोगवासिष्ठोक्ता
ब्रह्मप्रतिपादिकाःकथाअत्रग्रंथेउक्तागंगादिकथाश्चेत्यर्थः-एतेनात्रश्लोकेनानेतिअन्याइतिचव्य

अयोध्यावासकालिकं वृत्तं निरीक्ष्य तदनंतरं वनकालिकं च निरीक्षितमित्याह · स्त्रीत्तृतीयेनेति · द्वितीयोल्लक्ष्मणः तत्सर्वं चेति · च स्य तदुत्तरकालिकमुत्तरकांडस्थं चेत्यर्थः इत्यपरे ॥ ५ ॥ नेदं दर्शनं स्वप्नवदित्याह ॥ ततइति ॥ पूर्वाचरितयोग्याभ्यासादित्यर्थः योगं समाधिं तत्र समाधौ पुरा पश्यति अपश्यदित्यर्थः ॥ यन्निवृत्तं जातं इदमुपलक्षणं ॥ यच्च भावि तच्चरित्रं पश्यति स्मेति यावत् · ६ ॥ तदिति · धर्मेण योगजेन

स्त्रीत्तृतीयेन च तथा यत्प्राप्तं चरता वने ॥ सत्यसंधेन रामेण तत्सर्वं चान्ववैक्षत ॥ ५ ॥
ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः ॥ पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥ ६ ॥
तत्सर्वं तत्त्वतो दृष्ट्वा धर्मेण स महामतिः ॥ अभिरामस्य रामस्य तत्सर्वं कर्तुमुद्यतः ॥ ७ ॥
कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् ॥ समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ ८ ॥

अतएव महामतिः ॥ तत्सर्वमतीतमनागतं च तद्विषयं काव्यम् · अभिरामस्येत्यनेन तादृशकाव्यकरणस्य रागप्राप्ततोक्ता ॥ ७ ॥ कामेति · कमरूपो योर्थः पुरुषार्थस्तद्रूपेण गुणेन फलेन युक्तं · धर्मार्थरूपपुरुषार्थफलेन विस्तरवत् · विस्तरेण तदुभयप्रतिपादकं न द्वात्र चेत्यर्थः · रत्नैः काव्यगुणालंकाररूपैराढ्यं पूर्णं · सर्वश्रुतीनां मनोभूताः सारभूताः उपनिषदस्तासां हरं तदर्थप्रतिपादकं · तेन मोक्षफलकत्वं · व्याख्यानांतरं त्वचमत्कारीत्युपेक्षितम् ॥ ८ ॥ ॥

दर्शनमिति ॥ अनसूयासमास्यां अनसूयया सह सीतायाः समास्या सहासनं· यद्यप्येतत् विराधवधात्पू
र्वमेव· तथापि क्रमे तात्पर्याभावाद्व्युत्पर्ययेनाभिधानं ॥ अंगरागः चंदनादिः ॥१८॥ दर्शनमिति अगस्त्य
सकाशात् धनुषो ग्रहणं ॥१९॥ वधमिति ॥ उत्थानं जानकीहरणोद्योगं ॥२०॥२१॥२२॥ ऋष्येति प्रत्य

दर्शनं शरभंगस्य सुतीक्ष्णेन समागमं ॥ अनसूयासमास्यां च अंगरागस्य चार्पणं ॥१८॥
दर्शनं चाप्यगस्त्यस्य धनुषो ग्रहणं तथा ॥ शूर्पणख्याश्च संवादं विरूपकरणं तथा ॥१९॥
वधं खरत्रिशिरसो रुत्थानं रावणस्य च ॥ मारीचस्य वधं चैव वैदेह्या हरणं तथा ॥२०॥
राघवस्य विलापं च गृध्रराजनिबर्हणं ॥ कबंधदर्शनं चैव पंपायाश्चापि दर्शनं ॥२१॥
शबरीदर्शनं चैव फलमूलाशनं तथा ॥ प्रलापं चैव पंपायां हनूमद्दर्शनं तथा ॥२२॥
ऋष्यमूकस्य गमनं सुग्रीवेण समागमं ॥ प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहं ॥२३॥
वालिप्रमथनं चैव सुग्रीवप्रतिपादनं ॥ ताराविलापं समयं वर्षरात्रनिवासनं ॥२४॥

योत्पादनं· शालभेदादिभिः सुग्रीवस्य विश्वासजननं· विग्रहं युद्धं ॥२३॥ वालीति ॥ सग्रीवप्रतिपा
दनम्· सुग्रीवस्य राज्ये स्थापनम्· समयं शरदि यात्रा कर्त्तव्येति ॥ रामसुग्रीवयोः संकेतः· वर्षे
ति· वर्षाकालिकवासांगीकरणम् ॥२४॥

रामेति॥ द्वितीयः परसुरामः गुणान्न विनयजयस्तुपात्र॥१२॥ विद्यातं चेति विवासनं वनं प्रतिप्रस्थापनं परलोकस्य चाश्रयं परलोकगमनं मरणमितियावत्॥१३॥ प्रकृतीनामिति॥ प्रकृतीनां वचना पूर्वक विसर्जनमयोध्यां प्रतिपरावर्त्तनं निषादाधिपो गुहः सूतः सुमंत्रः॥१४॥ गंगायाइति॥ अभ्यनुज्ञानं

राम रामचिवादं च गुणान्दाशरथेस्तथा॥ तथाभिषेकं रामस्य कैकेय्या दुष्टभावतां॥१२॥
विद्यातं चाभिषेकस्य रामस्य च विवासनं॥ राज्ञः शोकं विलापं च परलोकस्य चाश्रयं॥१३॥
प्रकृतीनां विषादं च प्रकृतीनां विसर्जनं॥ निषादाधिपसंवादं सूतोपावर्त्तनं तथा॥१४॥
गंगायाश्चापि संतारं भरद्वाजस्य दर्शनं॥ भरद्वाजाभ्यनुज्ञाना च्चित्रकूटस्य दर्शनं॥१५॥
वास्तुकर्म निवेशं च भरतागमनं तथा॥ प्रसादनं च रामस्य पितुश्च सलिलक्रियां॥१६॥
पादुकाग्र्याभिषेकं च नंदिग्राम निवासनम्॥ दंडकारण्यगमनं विराधस्य वधं तथा॥१७॥

संमतिः॥१५॥ वास्त्विति॥ वास्तुकर्म चित्रकूटे गृहनिर्माणं निवेशं तत्र गृहे अवस्थानं प्रसादनं भरतकर्तृकं॥१६॥ पादुकेति श्रेष्ठपादुकयोः भरतकृतं अभिषेकं नंदिग्रामस्य निरंतरां अतिशयेन वासनं भरतेन तत्र गते सर्वप्रजाः तत्रैव वासं कृतवत्य इत्यर्थः॥१७॥ ॥

३२ग्रहणमिति·लंकायादाहेनतत्रत्यानामाक्रंदनं·लंकादाहेहनुमद्गर्जनमित्यर्थोवा·अभिमर्दनमिति
पाठेलंकाया·दाहेनअभितोमर्दनमित्यर्थः॥प्रतिप्लवनंपुनःसागरोत्तरणं॥३३॥मणिनिर्यातनं·सीतया

मणिप्रदानंसीतायाःवनभंगंतथैवच॥राक्षसीविद्रवंचैवकिंकराणांनिबर्हणं॥३२॥
ग्रहणंवायुसूनोश्चलंकादाहाभिगर्जनं॥प्रतिप्लवनमेवाथमधूनांहरणंतथा॥३३॥
राघवाश्वासनंचैवमणिनिर्यातनंतथा॥संगमंचसमुद्रेणनलसेतोश्चबंधनम्॥३४॥
प्रतारंचसमुद्रस्यरात्रौलंकावरोधनम्॥विभीषणेनसंसर्गंवधोपायनिवेदनम्॥३५॥
कुंभकर्णस्यनिधनंमेघनादनिबर्हणं॥रावणस्यविनाशंचसीतावाप्तिमरेःपुरे॥३६॥
विभीषणाभिषेकंचपुष्पकस्यचदर्शनम्॥अयोध्यायाश्चगमनंभरद्वाजसमागमं॥३७॥
प्रेषणंवायुपुत्रस्यभरतेनसमागमं॥रामाभिषेकाभ्युदयंसर्वसैन्यविसर्जनम्॥स्वरा
ष्ट्ररंजनंचैववैदेह्याश्चविसर्जनम्॥३८॥

दत्तस्यस्वशिरोरत्नस्यराघवेदानं·नलसेतोःनलनिर्मितसेतोः॥३४॥प्रतारंसेनायाइतिशेषः॥३५॥
निबर्हणंमारणं॥अरेःरावणस्य॥३६॥अयोध्यायाश्चगमनं·तदुद्देशपर्कंगमनं॥३७॥रामाभिषेकाभ्यु
दयंरामाभिषेकोत्सवं·सर्वंअचकारेत्यनुकृष्यते॥३८॥

32

कोपमिति। उपसंग्रहं वानराणां मेलनं· पृथिव्याश्च निवेदनं· सुग्रीवेण वानरान्प्रति पृथ्वीसंस्थानकथनं ॥ २५ ॥ अंगुलीयकदानं रामकर्तृकं हनूमति· प्रायोपवेशनं· प्रायेण अनशनेन वानराणामुप

कोपं राघवसिंहस्य बलानामुपसंग्रहं ॥ दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनं ॥ २५ ॥
अंगुलीयकदानं च ऋक्षस्य बिलदर्शनं ॥ प्रायोपवेशनं चैव संपातेश्चापि दर्शनं ॥ २६ ॥
पर्वतारोहणं चापि सागरस्यापि लंघनं ॥ समुद्रदर्शनाच्चैव मैनाकस्य च दर्शनं ॥ २७ ॥
राक्षसीतर्जनं चैव छायाग्राहस्य दर्शनं ॥ सिंहिकायाश्च निधनं लंकामलयदर्शनं ॥ २८ ॥
रात्रौ लंकाप्रवेशं च एकस्यापि विचिंतनं ॥ आपानभूमिगमनमवरोधस्य दर्शनं ॥ २९ ॥
दर्शनं रावणस्यापि पुष्पकस्य च दर्शनं ॥ अशोकवनिकायानं सीतायाश्चापि दर्शनं ॥ ३० ॥
अभिज्ञानप्रदानं च सीतायाश्चापि भाषणम् ॥ राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनं ॥ ३१ ॥

वेशनं समुद्रसमीपे वासः ॥ २६ ॥ २७ ॥ २८ ॥ एकस्यापि विचिंतनं ॥ असहायस्य कर्त्तव्यार्थविचारं चेत्यर्थः ॥ अवरोधोंऽतःपुरं ॥ २९ ॥ यानं गमनं ॥ ३० ॥ अभिज्ञानं रामदत्तांगुलीयकं ॥ ३१ ॥

कृत्वाऽपीति॰ सहशब्दः सहितपरः॥ भविष्यं॥ सह सहितं विशिष्टं यदुत्तरं तेन सहितमिदं काव्यं ब्रह्म
नियोगात्तत्प्रसादाच्च कृत्वा कोनु प्रभुः समर्थः॥ तत्प्रयुंजीयात् सभासु पठन् श्रावयेत्सभ्यानिति
चिंतयामास॰ सहोत्तरमित्यत्रोत्तरपदार्थस्य सभविष्यमिति सविशेषणं॥ त्वेप्यार्षः समासः भ
विष्यं च सीताविसर्जनमारभ्येत्येके॰ तस्याभूप्रवेशोत्तरकालिकमितिपरे॰ प्रयुंजीयादिति छं

कृत्वा तु तन्महाप्राज्ञः सभविष्यं सहोत्तरं॥ चिंतयामास को न्वेतत्प्रयुंजीयादिति प्रभुः ३॥
तस्य चिंतयमानस्य महर्षेर्भावितात्मनः॥ अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ॥ ४॥
कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ॥ भ्रातरौ स्वरसंपन्नौ ददर्शाश्रमवासिनौ॥ ५॥
स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ॥ वेदोपबृंहणार्थाय तावग्राहयत प्रभुः॥ ६॥

दसम्॥ ३॥ तस्येति॰ भावितात्मनः रामचरितबंधनेन शुद्धचित्तस्य॰ अगृह्णीतामिति छांदसं॰ आवां
गातारौ विसृज्यतामिति काव्यादग्रहणं कृतवंतौ॰ मुनिवेषौ राजकुमारावप्याश्रमस्थितिवशात्तथाभूतौ
कुशीलवौ कुशलवौ॰ कुशशब्दस्य कुशीभावः पृषोदरादित्वात्॥ ४॥ कुशीति॰ ददर्श काव्यग्रहणे
योग्यतयाऽपश्यदित्यर्थः॥ ५॥ स त्विति॰ धीर्धारणावती मेधा॰ परिनिष्ठितौ॰ जातवेदाध्ययनौ॰
उपबृंहणं वेदस्य तत्तदर्थतात्पर्यग्रहणं॰ तद्रूपायार्थाय प्रयोजनाय॰ अनेन श्रुतितात्पर्यविष
यीभूतार्थप्रतिपादकतया रामायणमस्याः पादे यत्तच्च सूचितम्॥ ६॥ ॥

अनागतंचेति· यत्किंचिदित्यनेनसीताविसर्जनापूर्वकालिकस्यभयस्त्वंअनंतरका·नस्यअल्पतायोत
ते·॥तत्सर्वमुत्तरेसर्वतोविशिष्टेकाव्येचकारनिबबंधेत्यर्थः॥३४॥इतिश्रीरामाभिरामेश्रीरामीयेरा
मायणतिलकेबलकांडेतृतीयःसर्गः॥३॥प्राप्तेति·अनेनरावणवधोत्तरमेतत्काव्यकरणमितिसू
चितं·वाल्मीकिः॥तद्विषयवासीऋषिरित्यर्थादवगंतव्यं॥चरित्तंतत्प्रतिपादककाव्यं·अर्थवत्ब

अनागतंचयत्किंचिद्रामस्यवसुधातले॥तच्चकारोत्तरेकाव्येवाल्मीकिर्भगवानृषिः॥३४॥
इत्यार्षेराश्रीरामायणेबालकांडेतृतीयःसर्गः॥३॥प्राप्तराज्यस्यरामस्यवाल्मीकिर्भ
गवानृषिः॥चकारचरितंकृत्स्नंविचित्रपदमर्थवत्॥१॥चतुर्विंशत्सहस्राणिश्लो
कानामुक्तवानृषिः॥तथासर्गशतान्पंचषट्कांडानितथोत्तरम्॥२॥श्रीराम।

न्यलंकारादिप्रशस्त्यार्थं॥आत्मवानितिपाठे अवहितांतःकरणः प्राशस्त्येमतुप्·आत्मशब्दश्चां
तःकरणवाची॥१॥चतुर्विंशदिति·चतुर्विंशतिरित्यर्थःकश्कांदसःशतानितिपुल्लिंगोप्येवं·तत्र
पंचशतरूपसर्गसंख्याषट्कांडानामेव·श्लोकसंख्यानुसोत्तराणामित्याहःकतककृतस्तत्र
संख्यापेक्षयाषट्त्रिंशत्सर्गसंख्याधिकादर्शनात्·चतुर्विंशत्सहस्रापेक्षयाश्लोकसंख्याया।
अपि·आधिक्यदर्शनाच्चउत्तरकांडीयसर्गसंख्याउक्तेश्च·प्रक्षिप्तोयंश्लोकोनत्वार्षइत्याहुः॥२

रूपेति·अत्र रूपमवयवस्थानं उक्तौ स्वरसंपन्नावित्यस्यैव विवरणं· मधुरस्वरेति· बिंबात्सूर्यादेरुत्थितौ बिंबाविव प्रतिबिंबाविवतया· रामदेहात्· उत्थितौ परौ रामदेहावित्यर्थः॥११॥ नाविति· धर्म्यं धर्मादनपेतम्· वाचो विधेयं· विनाविपुस्तकं पाठ्योग्यं॥१२॥ ऋषीणां द्विजातीनामिति गोबलीवर्दन्यायेन· साधूनां द्विजेतराणामपि· यथोपदेशं जगतुः॥ तत्वज्ञौ काव्यस्य गानादेश्च

रूपलक्षणसंपन्नौ मधुरस्वरभाषिणौ॥ बिंबादिवोत्थितौ बिंबौ रामदेहात्तथापरौ॥११॥
तौ राजपुत्रौ कार्त्स्न्येन धर्म्यमाख्यानमुत्तमम्॥ वाचो विधेयं तत्सर्वं कृत्वा काव्यमनिंदितौ॥१२॥
ऋषीणां च द्विजातीनां साधूनां च समागमे॥ यथोपदेशं तत्वज्ञौ जगतुस्तौ समाहितौ॥१३॥
महात्मानौ महाभागौ सर्वलक्षणलक्षितौ॥ तौ कदाचित्समेतानामृषीणां भावितात्मनां॥१४॥
मध्ये सभं समीपस्थाविदं काव्यमगायतां॥ तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः॥१५॥

तत्वज्ञौ· सुसमाहितौ सुतरां स्थिरचित्तौ॥१३॥ लक्ष्यलक्षणेति पाठे सामुद्रिकविद्भिर्लक्ष्यं परीक्ष्यं लक्षणं सुलक्षणं ताभ्यां लक्षितौ युतौ अत एव महात्मानौ· महाभागौ च· भागो भाग्यं॥ अत्र गीयतामिदमाख्यानं भवद्भ्यामृषिसंसदि· राजर्षीणां पुण्यकृतां साधूनां च समागमे· गुरुणैवमनुज्ञातौ प्रकृत्या मधुरस्वरावित्ति क्वचित्पठ्यते· तदनन्वयीति स्पष्टमेव· भावितात्मनां शुद्धचित्तानां॥१४॥ मध्ये सभं अव्ययीभावः समीपस्थौ सहितावित्यर्थः तद्गानम्॥१५॥

काव्यमिति· रामस्यायनं चरितं तत्प्रतिपादकं च महत्काव्यं· पौलस्त्यवधमित्येवं नामकं चकार· तत्तावद्गा
स्यत इति पूर्वेण संबंधः यथा कृत्स्नचरितवर्णनरूपमाद्यकाव्यस्य शिशुपालवध इति नाम ॥७॥ पाठ्ये
इति· इतः श्लोकचतुष्टयमेकान्वयं· पाठ्यगेययोर्भावे ल्यप्· यतो· तेन पाठे गाने चेत्यर्थः गानं तंत्री
नाडीसमुत्थश्रुतिभेदोपेतं· उभयत्रापि मधुरं श्रोत्रसुखजनकं· प्रमाणानि· द्रुतमध्यविलंबितानि·
सप्त जातयः षड्जादयः सप्तस्वराः सप्तस्वरविशिष्टगानानुरोधीतियावत्·॥८॥ रसैरिति· वीरादी

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्॥ पौलस्त्यवधमित्येवं चकार चरितव्रतः॥७॥
पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्॥ जातिभिः सप्तभिर्युक्तं तंत्रीलयसमन्वितम्॥८॥
रसैः शृंगारकरुणहास्यरौद्रभयानकैः॥ वीरादिभी रसैर्युक्तं काव्यमेतदगायताम्॥९॥
तौ तु गांधर्वतत्त्वज्ञौ स्थानमूर्छनकोविदौ॥ भ्रातरौ स्वरसंपन्नौ गंधर्वाविव रूपिणौ॥१०॥

त्यादिना वीभत्साद्भुतशांतसंग्रहः शृंगारादिरसैर्वीरादिरसैश्च युक्तं· नवरसयोगीतियावत्· ईदृशं
काव्यं तावगायताम् ९ तौ विशेषयति· तौ त्विति· गांधर्वस्य सममग्रनाद्यस्य तत्त्वज्ञौ· स्थानं च मूर्छना
च तयोः समाहारः स्थानमूर्छनं· तत्र कोविदौ तत्तत्त्वज्ञौ· यदूर्ध्वं हृदयग्रंथेः कपोलफलकादधः ॥ प्रा
णसंचारणं स्थानं स्थानमित्यभिधीयते· उरः कंठः शिरश्चेति तत्पुनस्त्रिविधं भवेत्· मंद्रं मध्यं च तारं
चेति शांडिल्यः तथा [illegible] गीतिविशेष इत्यर्थः ॥

२४ स्वस्तीत्याद्याशीः॥२५॥ आश्चर्यमित्यादिमनोहरमित्यंतमेकं वाक्यं॥२६॥ परमिति· कवीनामाधारं वर्णनीयार्थस्यप्रकारभेमलाभट्टारा· सर्वगीतेषु कोविदौ कुशीलवौ· इदंगीतंगानयोग्यपवस्त·अभिगीतंसुष्ठुगीतं·यथाक्रमंसमाप्तंसमापितंच· अवगीतमितिपाठे अनवद्यं यथात

जटाबंधनमन्यस्तु काष्ठरज्जुं मुदान्वितः॥ यज्ञभांडमृषिः कश्चित्काष्ठभारं तथापरः॥२४॥
औदुंबरीं वृसीमन्यः स्वस्ति केचित्तदावदन्॥ आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः॥२५॥
ददुश्चैवं वरान्सर्वे मुनयः सत्यवादिनः॥ आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्तितम्॥२६॥
परं कवीनामाधारं समाप्तं च यथाक्रमं॥ अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ॥२७॥
आयुष्यं पुष्टिजननं सर्वश्रुतिमनोहरं॥ प्रशस्यमानौ सर्वत्र कदाचित्तत्र गायकौ॥२८॥
रथ्यासु राजमार्गेषु ददर्श भरताग्रजः॥ स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ॥२९॥
पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः॥ आसीनः कांचने दिव्ये स च सिंहासने प्रभुः॥३०॥

यागीतमित्यर्थः॥२७॥ आयुष्यं आयुर्जनकं· पुष्टिरभ्युदयः सर्वश्रुतिमनोहरम्· सर्वश्रुतीनांमनां सि उपनिषदस्तदर्थहरमित्यनेनमोक्षदं गीतमित्येवं सर्वत्र प्रशस्यमानौ· तत्रायोध्यायां· रथ्यासु स्वल्पवीथिषु· राजमार्गेषु च गायमानौ तौ कदाचिद्भरताग्रजो रामो ददर्शेत्यन्वयः ॥२८॥२९॥३०॥

35

१६ प्रशस्तव्याविति उभाववलोपौ छांदसौ अहो आश्चर्यं ॥१७॥ चिरेति रातद्गाव एव वृत्तं चरितं एवं ऋषिप्रशंसोत्तरं पुनस्तयोर्गानमाह भावं काव्याभिप्रायं तत्तद्रसरूपं प्रविश्य तन्मयीभूय सुष्ठु यथा श्रोतॄणां रसाविर्भावो भवति तथा गायतामित्यर्थः ॥१८॥ सहिताविति मधुरं पाठतो गानत

साधुसाध्विति ताव्चुः परं विस्मयमागताः ॥ ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ॥१६॥
प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ ॥ अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ॥१७॥
चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितं ॥ प्रविश्य तावुभौ सुष्ठु तदा भावमगायतां ॥१८॥
सहितौ मधुरं रक्तं संपन्नं स्वरसंपदा ॥ एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महर्षिभिः ॥१९॥
संरक्ततरमत्यर्थं मधुरं तावगायतां ॥ प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ ॥२०॥
प्रसन्नो वल्कलं कश्चिद्ददौ ताभ्यां महायशाः ॥ अन्यः कृष्णाजिनमदाद्यज्ञसूत्रं तथापरः ॥२१॥
कश्चित्कमंडलुं प्रादान्मौंजीमन्यो महामुनिः ॥ बृसीमन्यस्तदा प्रादात्कौपीनमपरो मुनिः ॥२२॥
ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः ॥ काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः ॥२३॥

श्च रक्तं रञ्जकं स्वरसंपदा षड्जादिस्वरसंपदा संपन्नं यथा भवति तथा अगायतामिति पूर्वेण संबंधः एवं अहो गीतस्येत्याद्युक्तरीत्या ॥१९॥ संरक्ततरमत्युच्चतरं तथाप्यत्यर्थं मधुरं ततो रामायणगानश्रवणानंदपरवशानां मुनीनां चेष्टामाह प्रीत इति संस्थितः सभायामिति शेषः ॥२०॥२१॥ बृसी ऋषी

रामायणम् २३

श्रोत्रेंद्रकर्णशष्कुलीतदाश्रयंश्रोत्रेंद्रियंतस्यसुखं. अथाख्यानस्यश्रवणेप्रयोजनमुपदिशन्पु
नरपिलक्ष्मणादीनत्यादरेणश्रवणार्थंप्रेरयति. इमाविति. यत्ततस्मात्महातपस्विनौआश्रम
वासात्तपोयुक्तौ. स्वरूपतस्तु॥आजानुबाहुत्वादिपार्थिवलक्षणान्वितौ. मुनिशिष्यत्वाच्चमु
निवेषौ. तथापिराजलक्षणविशिष्टौ इमौप्रबंधस्यगायकौ. चरितंगेयं. काव्यंचमहानुभावंशब्दार्थालंकारललितसंदर्भत्वा
दिवैभवेनसार्वभौमविषयत्वेनचमहावैभवं. अतःनिबोधतआदरेणशृणुत. किंच. य
तःतत्काव्यंतत्कूवणंचममापिभूतिकरं. इहामुत्राभ्युदयकरंप्रवर्त्तते. अनेकाकल्पजी

आत्राश्रयसुखंगेयंतद्बभौजनसंसदि॥इमौमुनीपार्थिवलक्षणान्वितौकुशील
वौचैवमहातपस्विनौ॥ममापितद्भूतिकरंप्रवर्त्ततेमहानुभावंचरितंनिबोधत॥३५॥

विनोवृद्धाः पूर्वपूर्वरामायणस्यतैस्तत्फलत्वोक्त्या अस्यापितत्फलकत्वमितिभावइति
प्रांचः। वस्तुतोममचरितंमत्संबंधितच्चरितंमच्चरितार्थंप्रतिपादकंतत्. लोकेत्तरंकाव्यं
निबोधत। यतस्तत्श्रोतृणांभूतिकरमपिभुक्तिमुक्तिदं. ममपिप्रवर्त्ततेपूर्ववत्अव
णमात्रेणसर्वगात्राल्हादाद्यपिशब्दग्राह्यं।अतएवमहानुभावंमहाप्रभावं. अस्यश्लो
कस्यलक्ष्मणादीनामेतच्छ्रवणप्रवर्त्तकार्थकत्वेनैवमेवास्यव्याख्योचितेतिइत्यवम्॥३५॥

36

उपोपविष्टस्सचिवइतिपाठेउपविष्टसमीपेउपविष्टाः सचिवायस्येत्यर्थः उपोपविष्टैः सचिवैरितिपाठे
समीपस्थैर्मंत्रिभिर्भ्रातृभिश्चसमन्वितइत्यर्थः आत्मरूपसंपन्नावितिपाठेआत्मसदृशावित्यर्थः॥
दृष्ट्वातुरूपसंपन्नावितिप्रचुरःपाठः॥३१॥ अनयोःसकाशादेतदाख्यानंश्रूयतामितिलक्ष्मणादी
नुवाच॥३२॥ विचित्रार्थपदमितिपूर्वान्वयि ततोगायकौगातुंप्रेरयत् स्वचित्तायतनिस्वनं स्व
स्यश्रोतृचित्तस्यच अनुरूपआयतःतारः निस्वनोनादोयत्र तथास्वबलानुरूपंश्रोतृचित्ता॰

उपोपविष्टैः सचिवैर्भ्रातृभिश्चसमन्वितः॥ दृष्ट्वातुरूपसंपन्नौविनीतौभ्रातरावुभौ॥३१॥
उवाचलक्ष्मणंरामःशत्रुघ्नंभरतंतथा॥ श्रूयतामेतदाख्यानमनयोर्देववर्चसोः॥३२॥
विचित्रार्थपदंसम्यक् गायकौसमचोदयत्॥ तौचापिमधुरंरक्तंस्वचित्तायतनिस्वनम्॥३३॥
तंत्रीलयवदत्यर्थंविश्रुतार्थमगायताम्॥ ल्हादयत्सर्वगात्राणिमनांसिहृदयानिच॥३४॥

ल्हादकंचयथाभवति तावदुच्चस्वरमितिफलितं॥३३॥ तंत्रीलयवत्तंत्रीशब्दसदृशं विश्रु
तार्थविशेषतःश्रुतमात्रेणअर्थबोधजनकंयथाभवतितथाअतिशयेनागायतामित्यन्व
यःसर्वगात्राणिश्रोतृणांसर्वगात्राणिल्हादयत्रोमांचादिप्रादुर्भावेनआनंदानुभाववत्सम
र्थानिकुर्वत् मनसआल्हादोनाममनिद्रायामिव विस्मृतान्यव्यापारता हृदयानिहृद्यमितिहृ
दयंइत्युपनिषन्निर्वचनात् हृदयंपत्तगाउपाधिभेदाद्बहुवचनं तत्र ल्हादोनामतत्सुखभोग॥३४॥

रामा·बा·
३१

एवंसर्गचतुष्टयेनउपोद्घातंकृत्वा·वस्तुनिर्दिशति·सर्वेति·कृत्स्नाइयंवसुंधराप्रजापतिंवै
वस्वतंमनुंउपादायउपक्रम्यजयशालिनांजयेनशोभावतांयेषांनृपाणांसर्वापूर्वाहिकामु
ष्मिकसर्वापूर्वसाधनंयथाभवतितथाआसीत्·सर्वापूर्वशब्दोत्रुपादेयपरोनियतनपुं
सकलिंगइतिकेचित्॥१॥किंच·येषांवंशेससगरोनामअभूत्·सागरइत्यादिनासमुद्रे
सागरशब्दप्रवृत्तिस्तदधीनेतिसूचितम्·षष्टियुतानिसहस्राणिषष्टिसहस्राणि·

३७

सर्वापूर्वमियंयेषामासीत्कृत्स्नावसुंधरा॥प्रजापतिमुपादायनृपाणांजयशालि
नां॥१॥येषांससगरोनामसागरोयेनखानितः॥षष्टिपुत्रसहस्राणियंयांतंपर्यवा
रयन्॥२॥इक्ष्वाकूणामिदंतेषांराज्ञांवंशेमहात्मनाम्॥महदुत्पन्नमाख्यानंरामाय
णमितिश्रुतम्॥३॥

क्वचित्तुषष्टिरितिपृथक्पदपाठः·अनेनतदुद्धारार्थंतद्देशेनजगत्पवित्रीकरणसमर्था
गंगायद्देशेवतारितेतिव्यज्यते·तेनचातिशायितंतद्देशमाहात्म्यंसूचितं·तद्देशस्यगंगा
परनामकभगवदवतारयोग्यताचतेनसूचिता॥२॥तेषांइक्ष्वाकुणांवंशेवंशविषयेरा
मायणमितिनाम्नाप्रसिद्धंमहदाख्यानमुत्पन्नमितियोजना·इक्ष्वाकुपत्येषुइक्ष्वाकुत्वा
रोपादिक्ष्वाकूणामित्युक्तिः॥३॥

राम
३१

ततइति॰ अगायतामिति॰ अगायेतामित्यर्थः॰ रामवचः प्रेरितौ तौ मार्गविधानसंपदा॰ गानं हि द्विविधं मा
र्गो देशी चेति॰ तत्र प्राकृतावलंबि गानं देशी॰ संस्कृतावलंबी तु मार्गः॥ तयोर्मध्ये मार्गाख्यगान
मार्गावलंबनसामग्र्या अगायतां॰ परिषद्गतः सभागतः स रामोऽपि बुभूषया स्वचरितस्य चिर
कालं स्थितौ कृतया प्रबंधस्य गीतश्रवणे आसक्तमना बभूव॰ शनैः पदेन उत्तमपुरुषत्वात्स्व

ततस्तु तौ रामवचः प्रचोदितावगायतां मार्गविधानसंपदा॥ स चापि रामः परिष
द्गतः शनैर्बुभूषयासक्तमना बभूव ह॥३६॥ इत्यार्षे श्री रामायणे बालकांडे चतुर्थः सर्गः
॥४॥

प्रशंसार्थके अत्र काव्ये शनैः प्रवृत्तिरिति ध्वन्यते॰ स्वयं श्रवणे चोत्तरोत्तरं लोकानामुपादेय
त्वबुध्या श्रवणे प्रवृत्तौ तस्य स्थिरत्वं भवतीति तदाशयः स्वप्रवर्त्तितकविकृतत्वाच्चैव मिच्छा
भगवत इति बोध्यं॰ इहामुत्र स्वाभ्युदये कृये ति व्याख्यानं त्वयुक्तं॥ भगवतः स्वाभ्युदये
कृयाबाधात्॰ एतेन राज्ञां कविकृतस्वकाव्यश्रवणमावश्यकमिति सूचितं॰॥३६॥ इति
श्री रामाभिरामे श्री रामीये रामायण तिलके बालकांडे चतुर्थः सर्गः॥४॥

राजेति·राजमार्गः सर्वपण्यशोभितो राजद्वारात्पुरः प्रवृत्तः मुक्तपुष्पाणि विकसितपुष्पाणि ॥८॥ तां त्विति· दिवि देवपतिरिंद्रः पुरीं अमरावतीं यथा आवासयामास· एवं राजा दशरथस्तां पुरीं आवासयामास· पूर्वाधिकलोकवसतिमतीं चकार· धर्मन्यायबलेन पोषणात्· महतो राष्ट्रस्य विशेषेण वर्द्धनकर्ता॥९॥ कपाटेति· तोरणं बहिर्द्वारालंकारदारुबंधः॥ सुविभक्तं अंतरं येषां· तादृ

राजमार्गेण महता सुविभक्तेन शोभिता॥ मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः॥८॥
तां तु राजा दशरथो महाराष्ट्रविवर्धनः॥ पुरीमावासयामास दिवि देवपतिर्यथा॥९॥
कपाटतोरणवतीं सुविभक्तांतरापणां॥ सर्वयंत्रायुधवतीमुषितां सर्वशिल्पिभिः॥१०॥
सूतमागधसंबाधां श्रीमतीमतुलप्रभां॥ उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलां॥११॥
वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीं॥ उद्यानाम्रवणोपेतां महतीं सालमेखलाम्॥१२॥

शा आपण्यस्यां सा· सर्वयंत्रायुधवती· प्राकारोपरीति शेषः उषितां कृतवासां॥१०॥ सूतेति· सूताः स्तुतिपाठकाः मागधाः वंशावलीकथकाः॥ अट्टालाः उपरिगृहाः शतघ्नो नाम प्राकारसंरक्षणार्थमयोभारनिर्मिताः प्राकारोपरिस्थापिताः आयुधविशेषाः॥११॥ वध्विति· वधूनां नाटकशालासमुदायैः सर्वतो युक्तां· उद्यानानि क्रीडार्थपुष्पवाटिकाः सालः प्राकारः सालवनं वा॥१२

38

तदिति-तदिदंवृद्धिस्थं-आदितः आदिमारभ्य-निखिलं उत्तरकांडांतं-सर्वं सर्वशब्दोऽवयवका
र्त्स्न्येनसर्वावयवकं-वर्णपदच्युतिरहितमितियावत्-धर्मकामार्थाःसहितायस्मात्तत्स
हिताइत्यत्रकेनेत्याकांक्षायांमोक्षेणेतिगम्यते-तेनपुरुषार्थचतुष्टयसाधनमितिफलितं-व
र्तयिष्यावःगास्यावःतत्-अनसूयताअसूयामकुर्वताश्रोतव्यं-अनेनअसूयारहित्यमेवए
तच्छ्रवणाधिकारिविशेषणमित्युक्तं-सर्वपुरुषार्थसाधनत्वाच्चश्रवणेअत्यादरःसूचितः।

तदिदंवर्तयिष्यावःसर्वंनिखिलमादितः॥धर्मकामार्थसहितंश्रोतव्यमनसूयता॥४॥
कोसलोनाममुदितःस्फीतोजनपदोमहान्॥निविष्टःसरयूतीरेप्रभूतधनधान्य
वान्॥५॥अयोध्यानामनगरीतत्रासीत्लोकविश्रुता॥मनुनामानवेंद्रेणयापुरीनि
र्मितास्वयम्॥६॥आयतादशचद्वेचयोजनानिमहापुरी॥श्रीमतीत्रीणिविस्तीर्णासुवि

४कोसलइति-मुदितःराजभिर्धर्मतःपरिपालनात्-स्फीतःउत्तरोत्तरंवृद्धिंप्राप्तःसरयूतीरे
तदुपलक्षितदेशेनिविष्टःस्थितःजनपदोअस्तीतिशेषः॥५॥अयोध्येति-तत्रकोसलजन
पदेअयोध्यानामलोकविश्रुतानगरीअस्ति-यामानवेंद्रेणमनुनास्वयंनिर्मिताआसीत्-
पुरीसप्तपुर्यंतर्गता॥६॥आयतेति-सरयूतीरोपलक्षितेणद्वादशयोजनदीर्घात्रीणियोज
नानीतिशेषःविस्तीर्णातिर्यग्विस्तारवती-महापथोबहिर्मार्गः॥७॥ ॥

रा॰टी॰बा॰ ७

तपसाप्राप्तंदिविसिद्धानांविमानमिवपृथिव्यामनुत्तमामितिसंबंधः सुष्ठुनिवेशितःवेश्मनामंतःवात्यप्रदेशोयस्यांताम्·॥१९॥येचेति·विविक्तंस्वसमरहाद्भिन्नं·सहायरहितं·अपरापरं·परेपित्रादयः अपरेपुत्रादयःतेहीनं·वंशस्यैकतंतुमित्यके·परकीयस्वकीयभिन्नंकेवलमेत्तकमित्यन्ये·तथाशब्दमात्रानुमितसत्तयावेध्ययोग्यं·प्रच्छन्नमितियावत्॥तथाविततंचवि

विमानमिवसिद्धानांतपसाधिगतंदिवि॥सुनिवेशितवेश्मांतांनरोत्तमसमावृतां॥१९
येचवाणैर्नविध्यंतिविविक्तमपरापरम्॥शब्दवेध्यंचविततंलघुहस्ताविशारदाः॥२०॥
सिंहव्याघ्रवराहाणांमत्तानांनदतांवने॥हंतारोनिशितैःशस्त्रैर्बलाद्बाहुबलैरपि॥२१॥
तादृशानांसहस्रैस्तामभिपूर्णांमहारथैः॥पुरीमावासयामाससराजादशरथस्तदा॥२२॥

हृध्ययुद्धंकृत्वापश्चात्ततंपलायितं·।ईदृशान्शक्यवेधानपियेवाणैर्नविध्यंति·येचलघुहस्ताःशीघ्रवेधिनःविशारदाःअस्त्रशास्त्रप्रयोगसमर्थाःतेषांसहस्रैःपूर्णामित्युत्तरेणसंबंधः२०॥सिंहेति·बाहुबलैरपिमल्लयुद्धैरपि॥२१॥महारथैः॥आत्मानंसारथिंचाश्वान्रक्षन्युद्धेतयोनरः॥समहारथसंज्ञःस्यात्·एकोदशसहस्रैर्योधाच आवासयामासतेषामावासेनतैःपूर्णांचकारेत्यर्थः॥२२॥

दुर्गेति॰ जलदुर्गेण गंभीरा अगाधा परिखा यस्यां तां॰ अतएव दुर्गां मित्रैरपि दुःखगम्यां॰ अन्यैः शत्रु
भिः दुरासदां अशक्यसमीपगमनामपि॰ वारणाः गजाः ॥१३॥ सामंतेति॰ समंतात्भवैः राजसमूहैः ब
लिः करः तद्दानरूपं कर्म येषां तादृशैः ॥१४॥ रत्नविकृतैः रत्ननिर्मितैः पर्वतसदृशैः प्रासादैः शो
भितां॰ कूटागारैः गृहैः स्त्रीणां क्रीडागृहैरिति यावत् कूटाः शाला॰ अगारं गृहं इत्यन्ये ॥१५॥ चित्रामि

दुर्गां गंभीरपरिखां दुर्गामन्यैर्दुरासदां ॥ वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥१३॥
सामंतराजसंघैश्च बलिकर्मभिरावृतां ॥ नानादेशनिवासैश्च वणिग्भिरुपशोभितां ॥१४॥
प्रासादै रत्नविकृतैः पर्वतैरिव शोभितां ॥ कूटागारैश्च संपूर्णामिंद्रस्येवामरावतीं ॥१५॥
चित्रामष्टापदाकारां वरनारीगणायुतां ॥ सर्वरत्नसमाकीर्णां विमानगृहशोभितां ॥१६॥
गृहगाढामविच्छिद्रां समभूमौ निवेशितां ॥ शालितंडुलसंपूर्णां मिक्षुकांडरसोदकां ॥१७॥
दुंदुभीभिर्मृदंगैश्च वीणाभिः पणवैस्तथा ॥ नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥१८॥

ति॰ अष्टापदं सुवर्णं तत्तुल्येन कृतः प्राकारः अलंकारो यस्याः इत्येके॰ द्यूतफलकाकारामित्य
न्ये॰ विमानगृहं सप्तभूमिगृहं॰ विमानोस्त्री देवयाने सप्तभूमौ च सद्मनीति निघंटुः ॥१६॥ गृहेति॰ गृहैः पौरकुटुंबिगृहैः गाढां निबिडां अतएव अविच्छिद्रां॰ इक्षुकांडरससमानस्वादूदक
वतीं ॥१७॥ भृशं नादितां पृथिव्यां अत्यर्थं अत्यंतं॰ अनुत्तमामिति बहुव्रीहिः ॥१८॥

तेनेति· सत्याभिसंधः सत्यप्रतिज्ञः। धर्मकामार्थास्त्रिवर्गः तत्संपादककर्मानुष्ठानप्राधान्येनपालि
ता· अभवदितियोजना॥५॥धर्मात्मानः धर्मैवासनावच्छित्ताः बहुश्रुताइतिबहुव्रीहिः॥६॥ताले
ति· संतोषात्स्वस्वस्वत्वानांनिचयः सन्निचयः अल्पः सन्निचयोयस्य सनास्ति· अभावमुखेन
सर्वेषांबहुधनवत्तासूच्यते। योपिअगवादिमान् अर्थाभावेव्ययीभावेननञ्तत्पुरुषे·वा·

तेनसत्याभिसंधेनत्रिवर्गमनुतिष्ठता॥पालितासापुरीश्रेष्ठाइंद्रेणेवामरावती॥५॥
तस्मिन्पुरवरेहृष्टाधर्मात्मानोबहुश्रुताः॥नरास्तुष्टाधनैःस्वैःस्वैरलुब्धाःसत्यवादि
नः॥६॥नाल्पसन्निचयःकश्चिदासीत्तस्मिन्पुरोत्तमे॥कुटुंबीयोह्यसिद्धार्थोगवाश्व
धनधान्यवान्॥७॥कामीवानकदर्योवानृशंसःपुरुषःक्वचित्॥द्रष्टुंशक्यमयोध्या
यांनाविद्वान्नचनास्तिकः॥८॥

ततोमतुप्· अतएवासिद्धार्थः असिद्धैहिकामुष्मिकप्रयोजनः ईदृशः कुटुंबीनकश्चिदा॰
सीदितियोजना· एवमग्रेपि॥७॥कामीकामैकतत्परः कदर्यः आत्मानंधर्मकृत्यंचपुत्रदारांश्च
अपीडयेत्· लोभाद्यः पितरौभ्रातॄन्सकदर्य· इतिस्मृतः शक्यमितिसामान्येनपुंसकं·
अत्रनञ्आवृत्त्याकाम्यादिषुसंबध्यतेतेनैकगुणवतासमुदितगुणवत्तांचतत्रसत्तानिषिध्यते॥८॥

तामिति अग्निमद्भिः आहिताग्निभिः गुणाः शमदमादयः वेदानां षडंगानां च पारगैः महर्षिकल्पैः महर्षिसदृशैः केवलैः मुख्यैः ऋषिभिर्मंत्रदृष्टृभिश्च आवृत्तां व्याप्तां ॥ २३ ॥ इति पंचमः सर्गः ५
तस्यामिति वेदवित् त्रैवर्णिकमात्रस्य आद्यो यं गुणाः ॥ सर्वसंग्रहः सर्वेषाम परिमितत्व

तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडंगपारगैः ॥ सहस्रदैः सत्यरतैर्महात्मभिर्महर्षिकल्पैर्ऋषिभिश्च केवलैः ॥ २३ ॥ इत्यार्षे श्रीरा० बा० पंचमः सर्गः ॥ ५ ॥ तस्यां पुर्यामयोध्यायां वेदवित्सर्वसंग्रहः ॥ दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ १ ॥ इक्ष्वाकूणामतिरथो यज्वा धर्मपरो वशी ॥ महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥ २ ॥ बलवान्निहतामित्रो मित्रवान्विजितेंद्रियः ॥ धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः ॥ ३ ॥ यथा मनुर्महातेजा लोकस्य परिरक्षिता ॥ तथा दशरथो राजा लोकस्य परिरक्षिता ॥ ४ ॥

तुरंगबलराष्ट्रदुर्गादीनां संग्राहकः ॥ एवं सामादिप्रयोगे एवं फलं भविष्यतीत्यादि दीर्घदर्शनशीलः ॥ तेजः प्रतापः ॥ १ ॥ अतिरथः ॥ दशसहस्रमहारथैर्योद्धा ॥ वशी स्वाधिनः ॥ २ ॥ धनं हिरण्यादि अन्यैः संचयैः ॥ धान्यादिसंचयैः ॥ ३ ॥ ४ ॥

रामा॰बा॰
४१

नास्तिकः नास्तिपरलोकइतिबुद्धिमान् अनृती असत्यवचनः अन्नतइतिपरेपि अर्थ आद्यचास
एवार्थः अशक्तः स्वीयैर्हितकामुष्मिककार्यसाधनासमर्थः १४ नेति॰ व्रतमेकादश्यादिव्रतं क्षिप्त
चित्तइतिउन्मादादिनेतिशेषः व्यथितः आधिव्याधिपीडितः १५ कश्चिदिति॰ नार्यो नाश्रीमती

नास्तिकोनानृतोवापिनकश्चिदबहुश्रुतः नासूयकोनचाशक्तोनाविद्वान्विद्यतेक्वचि
त् १४ नाषडंगविदत्रास्तिनाव्रतोनाबहुश्रुतः नदीनः क्षिप्तचित्तोवाव्यथितोवापिकश्चन १५
कश्चिन्नरोवानारीवानाश्रीमान्नाप्यरूपवान् द्रष्टुं शक्यमयोध्यायांनापिराजन्यभक्तिमान्
१६ वर्णेष्वग्र्यचतुर्थेषुदेवतातिथिपूजकाः कृतज्ञाश्चवदान्याश्चशूराविक्रमसंयुताः १७
दीर्घायुषोनराः सर्वेधर्मंसत्यंचसंश्रिताः सहिताः पुत्रपौत्रैश्चनित्यंस्त्रीभिः पुरोत्तमे १८ का॰

त्याद्यत्वंश्रीः शोभाकांतिः रूपंगौरवादि॰ राजादशरथः तस्मिन्भक्तिः स्नेहः तदभाववान्
भरत् १६ प्रथमंराजानेस्तत्वात्तस्मिन्पुरवरेइत्यादिभिर्ब्राह्मणप्रशंसाकृताइदानींक्षत्रि
यादिसाधारण्येनवर्णान्प्रशंसयते॰ वर्णेष्विति त्रिभिः अग्र्यचतुर्थेषुअग्र्योब्राह्मणः सचतु
र्थोयेषांतेषु॰ सर्वेवर्णाइतिशेषः वदान्योदानशौंडः स्यादितिविश्वः सर्वत्रासन्नितिशेषः १७।१८

रामा॰
४१

सर्वेति-सुसंयता-सुष्ठुनिगृहीतेंद्रियाः॥९॥भोगोधर्माविरुद्धः कामभोगः अमत्सरोऽनिर्मलः॥नलि
प्तांगइतिपाठः नलिप्तांगइतिसुप्सुपेतिसमासः लेपश्चंदनादिना नदाहनासुगंधइति॥१०
निष्कः उरोभूषणं अनात्मवान्॥अजितांतःकरणः॥११॥अयज्वासोमयागरहितः॥क्रुद्धः अ

सर्वेनराश्चनार्यश्चस्वधर्मेशीलाःसुसंयताः॥मुदिताःशीलवृत्ताभ्यांमहर्षयइवामलाः॥९॥
नाकुंडलीनामुकुटीनास्रग्वीनाल्पभोगवान्॥नामृष्टोननलिप्तांगोनासुगंधश्चविद्यते॥१०
नामृष्टभोजीनादातानाप्यनंगदनिष्कधृक्॥नाहस्ताभरणोवापिदृश्यतेनाप्यनात्मवान्॥११
नानाहिताग्निर्नायज्वानक्षुद्रोवानतस्करः॥कश्चिदासीदयोध्यायांनचावृत्तोनसंकरः॥१२
स्वकर्मनिरतानित्यंब्राह्मणाविजितेंद्रियाः॥दानाध्ययनशीलाश्चसंयताश्चप्रतिग्रहे॥१३

ल्पविदेश्वर्यादिमान्-अवृत्तःसदाचाररहितः॥नसंकरः कुंडगोलकादिः॥नचनिर्वृत्तसंकर
इतिपाठे निर्वृत्तं अनुष्ठितंसांकर्यंपरस्त्रीबीजावापादिरूपंयेनतसइत्यर्थः॥संकरशब्दो
भावप्रधानः॥१२॥स्वेति-दानंनित्यमात्तंयथाशक्तिविधानापरदत्तस्यस्वीकारःप्रतिग्रहः
तत्रसंयताः॥संकुचिताः॥निषिद्धप्रतिग्रहरहिताइत्यर्थः॥१३॥ ॥

नित्येति· द्वेयोजने द्वयोर्योजनयोः॥ अत्यंतसंयोगे द्वितीया भूयो अभ्यधिकं· सत्यनामायोद्धुमशक्यत्वन्वर्थनामा· राज्ञो मूलधाम एतावत् ॥२६॥ तामिति· शमिताः नाशिता अमित्रा येन· ॥ नक्षत्राणि नत्र लोकान् ॥२७॥ तामिति· अर्गलनाम पाटावष्टंकतिर्यक्स्थापितदारु विशेषः॥२८

नित्यमत्तैः सदापूर्णा नागैरचलसन्निभैः॥ सायोजने द्वे च भूयः सत्यनामा प्रकाशते ॥२६॥ तां पुरीं स महातेजा राजा दशरथो महान्॥ शशास शमितामित्रो नक्षत्राणीव चंद्रमाः॥२७॥ तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शिवां॥ पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः॥२८॥ इत्यार्षे श्रीरामायणे वाल्मीकिये वालकांडे षष्ठः सर्गः॥६॥ तस्यामात्या गुणैरासन्निक्ष्वाकोः सुमहात्मनः॥ मंत्रज्ञाश्चेंगितज्ञाश्च नित्यं प्रियहितेरताः॥१॥

इतिश्रीरामाभिरामे श्रीरामीये रामायणतिलके वालकांडे षष्ठः सर्गः॥६॥ अथ तस्यमंत्रिसंपदुच्यते· तस्येति· गुणैः अमात्यापेक्षितैर्गुणैर्युक्ताः इक्ष्वाकोः तद्वंशजस्य दशरथस्य गुणानाह· मंत्रज्ञाः मंत्रः कार्यविचारः इंगितं पराभिप्रायं· प्रियस्य राज्ञः हिततत्पराः॥१॥

ब्रह्ममुखं ब्राह्मणप्रधानं तदा आवर्तीत्यर्थः शूद्राणां स्वकर्मेह त्रीनिति उपचारः सेवा ॥ १९ ॥ २० ॥ योधानामिति शौर्यातिशयात् अग्नितुल्यानां पेशलानां अकुटिलानां अमर्षिणां कृताभिभवासहिष्णूनां कृतविद्यानां अभ्यस्तास्त्रशस्त्रादिविद्यानां योधानां संघैः संपूर्णेति योजना ॥ २१ ॥ कांबो

तत्र ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः ॥ शूद्राः स्वकर्मनिरतास्त्रीन्वर्णानुपचारिणः ॥ १९ ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ॥ यथा पुरस्तान्मनुना मानवेंद्रेण धीमता ॥ २० ॥ योधानामग्निकल्पानां पेशलानाममर्षिणाम् ॥ संपूर्णा कृतविद्यानां गुहा केसरिणामिव ॥ २१ ॥
कांबोजविषये जातैर्बाल्हीकैश्च हयोत्तमैः ॥ वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥ २२ ॥
विंध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि मदान्वितैरतिबलैर्मातंगैः पर्वतोपमैः ॥ २३ ॥ ऐरावतकुलीनैश्च महापद्मकुलैस्तथा अंजनादपि निष्क्रांतैर्वामनादपि च द्विपैः ॥ २४ ॥ भद्रैर्मंद्रैर्मृगैश्चैव भद्रमंद्रमृगैस्तथा ॥ भद्रमंद्रैर्भद्रमृगैर्मृगमंद्रैश्च सा पुरी ॥ २५ ॥ ॥

जविषयो कांबोजदेशो बाल्हीकैः तद्देशजैः बाल्हीजैरिति क्वचित्पाठः वनायुर्देशविशेषः हरिंद्रः तस्य हयः उच्चैःश्रवाः तद्वदुत्तमैः नदीजैः सिंधुनदसमीपोद्भवैः ॥ २२ ॥ हैमवतैर्हिमवत्पर्वतजातैः मातंगैर्गजैः ॥ २३ ॥ ऐरावतादयो दिग्गजाः ॥ २४ ॥ भद्रैरिति भद्रा मंद्रा मृगाश्चेति विज्ञेयास्त्रिविधा गजाः क्रमेण हिमवद्विंध्यसह्यजाः भद्रमंद्रमृगाः त्रिस्वभावाः संकीर्णगजाः भद्रमंद्रादयो द्विस्व

२५

एतैर्ब्रह्मर्षिभिर्नित्यं सहितास्तस्य ऋत्विज इत्यनेन सर्वथा कर्मसाद्गुण्यं दर्शितं॰ पौर्विकाः परंपरागता
इत्यर्थः क्रमप्राप्तमर्त्त्विजो विशेषणं॰ विद्येति विद्यया सह विनीताः॥ विद्याविनयोभयसंपन्ना इ
त्यर्थः यथायोगं वक्ष्यमाणा निशेषणा निश्च मात्येषु मंत्रिषु च योजनीयानि॥६॥ शस्त्रज्ञाः शस्त्र
प्रतिपादक धनुर्वेदविदः प्रणिहिताः सर्वराजकार्येषु सावधानाः यथावचनकारिणः राज्ञ

एतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्विकाः॥ विद्याविनीता ह्रीमंतः कुशला नियतें द्रि
याः॥६॥ श्रीमंतश्च महात्मानः शस्त्रज्ञा दृढविक्रमाः॥ कीर्तिमंतः प्रणिहिता यथावच
नकारिणः॥७॥ तेजः क्षमायशः प्राप्ताः स्मितपूर्वाभिभाषिणः॥ कामात्क्रोधार्थहेतोर्वा
न ब्रूयुरनृतं वचः॥८॥ तेषामविदितं किंचित्स्वेषु नास्ति परेषु वा॥ क्रियमाणं कृतं वा
पि चारेणापि चिकीर्षितं॥९॥ कुशला व्यवहारेषु सौहृदेषु परीक्षिताः॥ प्राप्तकालं य
थादंडं धारयेयुः सुतेष्वपि॥१०॥

इति शेषः॥७॥ कामादर्थहेतोरिति द्वंद्वगर्भः कर्मधारयः
॥८॥ स्वेषु मित्रेषु॰ परेषु शत्रुषु चारेण करणेन कृतं क्रियमाणमपि वा अपि चिकीर्षितं च तेषां
न किंचिद विदितमभूदिति शेषः॥९॥ सौहृदं विषयविशेषगतदोषान् दोषत्वेनागृह्णन् चि
त्तवृत्तिविशेषस्तत्र परीक्षिताः राज्ञेति शेषः प्राप्तः सापराधत्वलक्षणः कालो यस्य तं॰ धारये
युः कुर्युरित्यर्थः॥१०॥

अष्टाविति। शुचयः असत्यस्वामिद्रोहादिरूपवाङ्मनसाशुचित्वरहिताः नित्यशः आत्मप्रयोजनसमयेऽपि राजकृत्येषु तदनुष्ठानेषु अनुरक्ताः तत्पराः ॥२॥ तान्नामत आह धृष्टिरित्यादि ॥३॥ अभिमतौ ऋत्विजौ मुख्यर्त्विजौ। अपरे उक्ताष्टप्रधानमन्त्रिव्यतिरिक्ता इत्येके। परे मन्त्रिण इ

अष्टावभवन्वीरस्य तस्यामात्या यशस्विनः ॥ शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥२॥ धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः ॥ अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ॥३॥ ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ ॥ वसिष्ठो वामदेवश्च मन्त्रिणश्च तथापरे ॥४॥ सुयज्ञोऽप्यथ जाबालिः काश्यपोऽप्यथ गौतमः ॥ मार्कण्डेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ॥५॥

त्युक्त्या वसिष्ठवामदेवयोर्मन्त्रित्वमपि सूच्यत इति तीर्थः। तन्न। मन्त्रिणश्च तथेति पाठे परेषामृत्विक्त्वलाभेऽपि वसिष्ठवामदेवयोर्मन्त्रित्वस्य शब्दमर्यादया व्यंग्यमर्यादया वा चालाभात्। वस्तुतस्तु तथापरे इत्यस्य ऋत्विज इत्यर्थः। मन्त्रिणश्चेत्यस्य वसिष्ठाद्या इति शेषः। अमात्याः देशादिकार्यनिर्वाहकाः। मन्त्रिणो व्यवहारद्रष्टार इति भेदः ॥४॥ परानेवाह। सुयज्ञ इत्यादि। सुयज्ञऋषिविशेषः ॥५॥

गुरोः संबंधसामान्येषष्ठी गुरुणास्वस्वाचार्येणराज्ञाचग्रहणं आद्यजेनगुणशब्देनगुणवत्तयागृही
ताइत्यर्थः तेनगुर्वनुग्रहप्राप्तसर्वैश्वर्यत्वंचसूचितं गुणागुणगृहीताइतिपाठेगुणदोषगृहीता
इत्यर्थः बहुव्रीहावाहिताग्न्यादित्वात्परनिपातोनियंतास्य विदेशेष्वपिसर्वतोविज्ञातत्वेहेतुः
बुद्धिनिश्चयाः बुद्धिसंपन्नाः॥१७॥अभितोगुणवंतः सर्वदेशेसर्वकालेचगुणवंतः संधीति
संध्यादिविषयकशास्त्रतत्वज्ञाः प्रकृत्यात्रिगुणयासंपदान्विताः तत्रसात्विक्यासंपदाशिष्ट

गुरोर्गुणगृहीताश्चप्रख्याताश्चपराक्रमैः॥ विदेशेष्वपिविज्ञाताः सर्वतोबुद्धिनिश्चयाः॥१७
अभितोगुणवंतश्चनचासन्गुणवर्जिताः॥ संधिविग्रहतत्वज्ञाः प्रकृत्यासंपदान्विताः॥१८
मंत्रसंवरणेशक्ताः सक्ताः सूक्ष्मासुबुद्धिषु॥ नीतिशास्त्रविशेषज्ञाः सततंप्रियवादिनः॥१९
ईदृशैस्तैरमात्यैश्चराजादशरथोनघः॥ उपपन्नोगुणोपेतैरन्वशासद्वसुंधरां॥२०॥
अवेक्षमाणश्चारेणप्रजाधर्मेणरक्षयन्॥ प्रजानांपालनंकुर्वन्नधर्मंपरिवर्जयन्॥२१॥

पालने तामस्यासंपदादुष्टनिग्रहकाले भोगकालेराजस्यासंपदा धनधान्यदासीदासशि
बिकाद्यश्वगजादिरूपया॥१८॥संवरणंरक्षणम् बुद्धिषुविचारेषु॥१९॥ईदृशैः प्रागुक्तरूपैः
अमात्यैश्च चादृत्विग्भिः अन्यैरेवगुणोपेतैः उपपन्नइतियोजना॥२०॥चारेणस्वपर
देशवृत्तांतं प्रजाधर्मेणयुक्तायथाभवतितथापुरुषैरक्षयन् सर्वत्रहेतोःशता॥२१॥

44

कोशसंग्रहणं चतुरंगबलपरिग्रहे हेतुः॥ अहितं स्वहिताचरणरहितं शत्रुमपि अविदूषकं अनपराधिनं न हिंस्युः॥११॥ राजशास्त्रं नीतिशास्त्रं अनुष्ठिताः अनुसारिणः शुचीनामिति स्तेयान्तररहिताः शुचयः विषयो देशः॥१२॥ ब्रह्मेति अभिपूरयन्निति पाठे अडभाव आर्षः सुतीक्ष्णेति बलाबलं अपराधतारतम्यं पुरुषस्येत्युपलक्षणम् देशादीनां च बलाबलं संप्रेक्ष्येत्यर्थः देशकाल

कोशसंग्रहणे युक्ता बलस्य च परिग्रहे॥ अहितं चापि पुरुषं न हिंस्युरविदूषकम्॥११॥
वीरैश्च नियतोत्साहा राजशास्त्रमनुष्ठिताः॥ शुचीनां रक्षितारश्च नित्यं विषयवासिनाम्॥१२॥
ब्रह्मक्षत्रमहिंसन्तस्ते कोशं समपूरयन्॥ सुतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषस्य बलाबलम्॥१३॥
शुचीनामेकबुद्धीनां सर्वेषां संप्रजानताम्॥ नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित्॥१४॥
कश्चिन्न दुष्टस्तत्रासीत्परदाररतिर्नरः॥ प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत्॥१५॥
सुवाससः सुवेषाश्च ते च सर्वे शुचिव्रताः॥ हितार्थाश्च नरेन्द्रस्य जाग्रतो नयचक्षुषा॥१६॥

स्प

वयःशक्तीः संचिंत्य दंडकर्मणीति वचनात् अयं कोशपूरणहेतुः॥१३॥ एकबुद्धीनां परस्परमेकबुद्धीनां संप्रजानतां पुरराष्ट्रवृत्तान्तं विचारयताम् तेषां विचारविषयेषु पुराणादौ मृषावादित्वगुणविशिष्टः कोपि नासीत्॥१४॥ प्रेति मंत्रिणा नीत्या सर्वं प्रशान्तं निर्बाधमासीदित्यर्थः॥१५॥ नरेंद्रस्य हितार्थाः हितप्रयोजनाः सर्वत्रासन्निति शेषः॥१६॥

सन्नीति· यष्टव्यमिति मंत्रिभिः सह निश्चितां मतिं कृत्वेत्यन्वयः सुमंत्रमानयामासेति शेषः ॥३॥४॥ तत
इति· विक्रमो गमनं· सर्वान्तान्गुरून्समस्तान्वेदपारगान् ॥ अगुरूंश्च ।५॥ सुयज्ञादयो वि
द्यागुरवः ॥ वसिष्ठस्यैव पुरोहितत्वेनोपनेतृतयोपनेतुरेवाध्यापकतया गुरुत्वेपि स्वसमा
शिष्याणांस्वतयोध्यापेयभियातेनैवाध्यापनेनियोगान्नेसुतार्थं सुतमुद्दिश्य लाल्प्यमानस्य

स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान् ॥ मंत्रिभिः सह धर्मात्मा सर्वैरपि
कृतात्मभिः ॥३॥ ततोब्रवीन्महातेजाः सुमंत्रं मंत्रिसत्तमं ॥ शीघ्रमानय मे सर्वान्
गुरूंस्तान्सपुरोहितान् ॥४॥ ततः सुमंत्रस्त्वरितं गत्वा त्वरितविक्रमः ॥ समानयत्स
तान्सर्वान्समस्तान्वेदपारगान् ॥५॥ सुयज्ञं वामदेवं च जाबालिमथ काश्यपं ॥ पुरो
हितं वसिष्ठं च ये चाप्यन्ये द्विजोत्तमाः ॥६॥ तान्पूजयित्वा धर्मात्मा राजा दशरथ
स्तदा ॥ इदं धर्मार्थसहितं श्लक्ष्णं वचनमब्रवीत् ॥७॥ मम लालप्यमानस्य सुता
र्थं नास्ति वै सुखम् ॥ तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ॥८॥ रामराम:

पुनः पुनः ॥ षामपि विद्यागुरुत्वमत्तते· अन्ये अश्वमेधार्त्विज्याद्युपयुक्ताः ॥६॥ धर्मेणार्थेन च स
हितं श्लक्ष्णां मधुरं ॥७॥ ममेति ॥ भृशं च विलपतो राज्यादिनापि सुखं न भवति· लालप्यमानस्ये
तिपाठे पुनः पुनर्भृशं च तपः कुर्वत इत्यर्थः अयमेव पाठो युक्तः एवं सुतार्थं लप्यमानस्य तु

अतोहेतोर्विश्रुतः सत्यसंगरः रणोसत्यप्रतिज्ञः तत्र अयोध्यायां ॥२२॥ अधिगमः प्राप्तिः नताः सामंता यस्य कंटकाः शत्रवश्चोराश्च ॥२३॥ तैरिति मंत्रो विचारस्तत्साध्यं हितं उभयत्र निविष्टैः कुशलैः स्वत्कार्यदर्शननिपुणैः समर्थैः तत्साधनशक्तैः तेजोमयैः प्रचुरतेजोवद्भिः तेजः पराभिभवसामर्थ्यं गोभिः किरणैर्युक्त उदितोर्क इव गवामपि तेजोमयैरित्यत्यंतस्वार्थिकमयडंतं

विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसंगरः ॥ स तत्र पुरुषव्याघ्रः शशास पृथिवीमिमां ॥२२॥ नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः ॥ मित्रवान्नतसामंतः प्रतापहतकंटकः ॥ स शशास जगद्राजा दिवि देवपतिर्यथा ॥२३॥ तैर्मंत्रिभिर्मंत्रहिते निविष्टैर्वृतोनुरक्तैः कुशलैः समर्थैः ॥ स पार्थिवो दीप्तिमवाप्य युक्तस्तेजोमयैर्गोभिरिवोदितोर्कः ॥२४॥ इत्यार्षे श्रीरामायणे बाल्मीकीये बालकांडे सप्तमः सर्गः ॥७॥ तस्य चैवं प्रभावस्य धर्मज्ञस्य महात्मनः ॥ सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥१॥ चिंतयानस्य तस्यैवं बुद्धिरासीन्महात्मनः ॥ सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहम् ॥२॥

विशेषणमित्येके तदपुष्टं ॥२४॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे सप्तमः सर्गः ॥७॥ एवं समग्रगुणस्याप्यपुत्रत्वेनाजितपितृलोकत्वात्पुत्रार्थमश्वमेधप्रस्तावः तस्येत्यादि तप्यमानस्य तपः कुर्वतः ॥१॥ चिंतयानस्य मुगभावश्चक्रादसः तपसाप्यसाध्यपुत्रोत्पत्तुपा

रामा. बा.
४६

समर्थेति। चतुःशतारत्नीतिक्रतेः॥ रक्षणसमर्थैश्चतुःशतराजपुत्रै रक्षितः सोपाध्यायः उपाध्यायपदेन प्रधानर्त्विजः॥ अश्वमेधस्य पदे पदे जुहोतीत्युक्तहोमनिर्वाहायेत्यत्साहित्यं॥१५॥ शांतयः। विघ्ननिवारककर्माणि। वर्धतां कोदसोणिलोपः॥ यथाकल्पं यथाक्रमं। क्रमस्तु कथ्यते कल्प इति भागुरिः॥ यथाविधिशास्त्रोक्तविधानतिक्रमेण शाक्य इति काकुरत्र। सर्वेण सर्वगुणयुक्तेनापि राज्ञा अयं यज्ञः प्राप्तुं शक्यो ऽपि तु नेत्यर्थः॥१६॥ तदेवाह नेति। यद्यत्रय

46

समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम्॥ सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्॥१५॥ शांतयश्चापि वर्धंतां यथाकल्पं यथाविधि॥ शक्यः प्राप्तुमयं यज्ञः सर्वेणापि महीक्षिता॥१६॥ नापराधो भवेत्कष्टो यद्यस्मिन् क्रतुसत्तमे॥ छिद्रं हि मृगयंतेत्र विद्वांसो ब्रह्मराक्षसाः॥१७॥

ज्ञे कष्टो महाप्रायश्चित्तनाश्योऽपराधो विध्यपराधः॥ क्रियालोपादिरूपो न स्यात्। स्यादपि चेदल्पः शाप्यः सत्वरातियत्नसाध्यो तो न सर्वसुलभः हि यतः यज्ञादिषु मंत्रक्रियालोपादिना राक्षसत्वं प्राप्ता ब्राह्मणा ब्रह्मराक्षसा विद्वांसो यज्ञं तत्रतः छिद्रमपचारं मृगयंते तेते चेषदपचारं दृष्ट्वा स्वयं तेषु प्रविश्यापचारधारां संपादयंते अतो न सर्वप्राप्यः॥१७॥

राम
४६

तदिति॰ शास्त्रप्रोक्तेन कर्मणा विधिना॰ केन प्रकारेणाचरणेन अहं कामं पुत्ररूपं प्राप्स्यामीत्य
त्र बुद्धिरूपाय विषया विचार्यतां क्रियतां॥९॥ तत इति॰ प्रतिपूजास्तुतिः पार्थिवस्य मुखेरि

तदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा॥ कथं प्राप्स्याम्यहं कामं बुद्धिरत्र विचिंत्यता
म्॥९॥ ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन्॥ वसिष्ठप्रमुखाः सर्वे पार्थिवस्य
मुखेरितम्॥१०॥ ऊचुश्च परमप्रीताः सर्वे दशरथं वचः॥ संभाराः संभ्रियंतां ते तुरग
श्च विमुच्यताम्॥११॥ शरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्॥ सर्वथा प्राप्स्यसे पु
त्रानभिप्रेतांश्च पार्थिव॥१२॥ यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता॥ ततस्तुष्टोभ
वद्राजा श्रुत्वैतद्द्विजभाषितम्॥१३॥ अमात्यानब्रवीद्राजा हर्षव्याकुललोचनः॥ सं
भाराः संभ्रियंतां मे गुरूणां वचनादिह॥१४॥

तेसा ब्राह्मणास्स्वयमेवोक्तम्॥१०॥ संभाराः अश्वमेधप्रसिद्धाः एकविंशतियूपादिरूपाः सं
भ्रियंतां संपाद्यंताम्॥११॥ सरेति॰ चोत्वर्थे अभिप्रेतान् मनोभिप्रेतगुणयुक्तान्॥१२॥ धार्मिकी
धर्मप्रयोजना॰ सर्वथा प्राप्स्यसे इति प्रतिज्ञानात् संतोषः॥१३॥ हर्षजनितानंदाश्रुपारिप्लवनेत्रः॥१४॥

दीप्तांदीप्ताविषयदृढनिश्चयं॰ विशातकुहतवर्चः कांतिः ॥२४॥ मुखपद्मानीतिरूपकं॰ वसंतकाल्ला
वच्छिन्नपद्मोपमाच ॥२५॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेबालकांडेऽष्टमः सर्गः
एतदितिः हयमेधं सुतार्थं करिष्यामीतिराजवाक्यं॰ स्तःसुमंत्रः सहिराजउभयधर्मीसूतो
मंत्रीच॰ पुरावृत्तमितिहासः पुराणेच॰ चेनऋषिकथ्यमानकथासंगहः मयाश्रुतः सश्रु

उवाचदीप्तांविशतयत्पेहंसुतकारणात् ॥ तासांतेनातिकांतेनवचनेनसुवर्चसाम्
॥२४॥ मुखपद्मान्यशोभंतपद्मानीवहिमात्यये ॥२५॥ इत्यार्षेश्रीरामायणेवाल्मीकिये
बालकांडेऽष्टमः सर्गः ॥८॥ एतच्छुत्वारहःसूतोराजानमिदमब्रवीत् ॥ श्रूयतांयत्पुरा
वृत्तंपुराणेचमयाश्रुतं ॥१॥ ऋत्विग्भिरुपदिष्टोयंपुरावृत्तोमयाश्रुतः ॥ सनत्कुमा
रोभगवान्पूर्वंकथितवान्कथां ॥२॥ ऋषीणांसन्निधौराजंस्तवपुत्रागमंप्रति ॥ का॰
श्यपस्यचपुत्रोस्तिविभांडकइतिश्रुतः ॥३॥ ऋष्यश्रृंगइतिख्यातस्तस्यपुत्रोभवि
ष्यति ॥ सवनेनित्यसंवृद्धोमुनिर्वनचरःसदा ॥४॥

यतां ॥१॥ ऋत्विगिति॰ ऋत्विग्भिरय
मश्वमेधरूपः पुत्रोपायउपदिष्टः मयात्वितिहासविषयः किंचिद्विशेषविशिष्टः श्रुत
इत्यर्थः तमाह॰ सनदित्यादिना॰ कथांसर्वज्ञत्वाद्भविष्यद्विषयां ॥२॥३॥ ख्यातोभविष्यतीति
ऋष्यश्रृंगइतिख्यास्यमानः धातुसंबंधेइतिसाधुत्वं॰ नित्यसंवृद्धः पित्रावनेनित्यंवर्धितइ
त्यर्थः सर्वथापौरादिव्यवहारानभिज्ञत्वेनित्यपदेनसूचितम्॰ अतएवपितुर्नेक्षापित्वयागंत

किंच विधिहीनस्य यज्ञस्य कर्ता यजमान ऋत्विक् सद्यश्च सद्यो विनश्यति तत्ततो हेतोर्यथा मे एष यज्ञः विधिपूर्वं शास्त्रोक्त प्रकारेण न तु तदपचारेण यथा समाप्यते तथा विधानं यत्नः क्रियतां ॥१८॥ नन्वेवं चेदशक्यमेतत्तत्राह यूयं तथा करणे षु समर्था शक्ता इति इत्येवं प्र

विधिहीनस्य यज्ञस्य सद्यः कर्ता विनश्यति ॥ तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते ॥१८॥
तथा विधानं क्रियतां समर्थाः करणेष्विति ॥ तथेति चाब्रुवन्सर्वे मंत्रिणः प्रतिपूजिताः ॥१९॥
पार्थिवेंद्रस्य तद्वाक्यं यथापूर्वं निशम्यते ॥ तथा द्विजास्ते धर्मज्ञा वर्धयंतो नृपोत्तमं ॥२०॥
अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतं ॥ विसर्जयित्वा तान्विप्रान्सचिवानिदमब्रवीत् ॥२१॥
ऋत्विग्भिरुपसंदिष्टो यथावत्क्रतुराप्यतां ॥ इत्युक्त्वा नृपशार्दूलः सचिवान्समुपस्थितान् ॥२२॥ विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः ॥ ततः स गत्वा ताः पत्नीर्नरेंद्रो हृदयंगमाः ॥२३॥

कारोत्साहना निराजाच ऋ इत्यर्थः ॥ ते प्रतिपूजिताः मंत्रिणः स्थित्यवदन् प्रत्यपूजयन्निति पाठे नेति शेषः ॥१९॥ पार्थिवेत्यर्धे पूर्वान्वयि वर्धयंत इत्यस्य आशीर्भिरिति शेषः ॥२०॥२१॥ उपसंदिष्ट इति त्रिपदं समित्यस्य आप्ततामित्यनेतान्वयः व्यवहितप्रयोगश्चार्षः ॥२२॥ ताः पत्नीः यज्ञार्हीः ॥२३॥

समेति॰ तस्य मत्या पापस्य प्रायश्चित्तं यथा भवति तथा नियमं अनुष्ठेयांशं समादिशं त्वित्यन्वयः ७ त्ताः प स्थः॥११ ते च भुइ ब्रह्मचारिणोः कन्यादानं प्रायश्चित्तम् ऊचुरित्याह॰ वक्ष्यंतीति॥१२॥ आनाय्य त्विति पाठः मही पाल ऋष्य ति प्रकृति भावः॥१३॥१४॥ राज्ञश्चिंतामभिनयति॰ वीर्य

समादिशंतु नियमं प्रायश्चित्तं यथा भवेत्॥ इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः॥११॥ वक्ष्यंति ते महीपालं ब्राह्मणा वेदपारगाः॥ विभांडकसुतं राजन्सर्वोपायैरिहानय॥१२॥ आनाय्य तु महीपाल ऋष्यशृंगं सुसत्कृतं॥ विभांडकसुतं राजन्ब्राह्मणं वेदपारगं॥१३॥ प्रयच्छ कन्यां शांतां वै विधिना सुसमाहितः॥ तेषां तु वचनं श्रुत्वा राजा चिंतां प्रपत्स्यते॥१४॥ केनोपायेन वै शक्यमिहानेतुं स वीर्यवान्॥१५॥ ततो राजा विनिश्चित्य सह मंत्रिभिरात्मवान्॥ पुरोहितममात्यांश्च प्रेषयिष्यति सत्कृतान्॥१६॥ ते तु राज्ञो वचः श्रुत्वा व्यथिता वनताननाः॥ न गच्छेम ऋषेर्भीता अनुनेष्यंति तं नृपं॥१७॥

जितेंद्रियत्वं॰ विद्यावत्त्वं तपो वीर्यं च॰॥१५॥१६॥ ते त्विति॰ व्यथिता अशक्यार्थ नियोगतः खिन्नाः वनताननाः नम्रमुखाः अवस्यादेर्लोपः ऋषेः विभांडकात् भीताः न गच्छेमेत्युक्त्वाऽशक्यार्थत्वादेतन्नियोगाकरणं तत्तव्यमित्यनुनेष्यंति॥१७॥ ॥

48

नान्यमिति· जानातीतिभविष्यति वर्तमानसामीप्यात्· पित्रनुवर्तनात्पित्रासहवासात्· ब्रह्मच
र्यस्यद्वैविध्यंमेखलाजिनादिधारणरूपंमुख्यंब्रह्मचर्यं· दारेषु ऋतुगमनरूपंपरंगौणं· तत्प्र
कारद्वयमपिअस्यभविष्यति· द्विविधशब्दाद्द्वद्व्रीहेः ष्यञ्॥५॥ लोकेष्वित्यर्थं पूर्वान्वयि· एवं

नान्यंजानातिविप्रेंद्रोनित्यंपित्रनुवर्तनात्॥ द्वैविध्यंब्रह्मचर्यस्यभविष्यतिमहात्मनः
॥५॥ लोकेषुप्रथितंराजन्विप्रैश्चकथितंसदा॥ तस्यैववर्तमानस्यकालःसमभिवर्तत
॥६॥ अग्निशुश्रूषमाणस्यपितरंचयशस्विनं॥ए॥ तस्मिन्नेवकालेतुरोमपादःप्रताप
वान्॥७॥ अंगेषुप्रथितोराजाभविष्यतिमहाबलः॥ तस्यव्यतिक्रमाद्राज्ञोभविष्य
तिसुदारुणा॥८॥ अनावृष्टिःसुघोरावैसर्वलोकभयावहा॥ अनावृष्ट्यांतुवृत्तायां
राजादुःखसमन्वितः॥९॥ ब्राह्मणान्श्रुतसंवृद्धान्समानीयप्रवक्ष्यति॥ भवंतःश्रुत
कर्माणोलोकचारित्रवेदिनः॥१०॥

पित्रग्न्यादिसेवयासमभिवर्त्ततेतिभविष्यतिलङ्· ङ्भावश्चार्षः॥६।७॥ व्यतिक्रमात्तद्राजो
चितधर्मविलोपात्· दारुणत्वंबहुकालव्यापित्वात्॥८॥ घोरत्वंसर्वराष्ट्रव्यापनात्· वृत्ता
यांजातायां॥९॥ श्रुतेनवेदाध्ययनेनसंवृद्धान्· श्रुतकर्माणः अनावृष्टिकरश्रुतमत्कर्माणः
यतोभवंतोलोकव्यवहारज्ञाः॥१०॥

अथेति तत्र नियतपुत्रप्राप्त्युपायलाभात्तस्य निहितत्वश्रवणाच्चतुष्टः॥ येतु पूर्वोत्तरश्लोके आ
नयनादिसर्वं भविष्यत्वेनैव व्याचख्युस्ते तेषां कथमानीत इति राजप्रश्नानुपपत्तिरित्याहुः॥ सोच्य
तां स उच्यतामित्यर्थः॥ संधिरार्षः यद्वा तद्धिषया कथोच्यतामित्यर्थः॥२१॥ इति श्रीरामाभिरामे श्री
रामीये रामायणतिलके बालकांडे नवमः सर्गः॥९॥ सुमंत्र इति चोदितः तादृश तपस्विनाग

अथ हृष्टो दशरथः सुमंत्रं प्रत्यभाषत॥ यथर्ष्यशृंगस्त्वानीतो येनोपायेन सो
च्यताम्॥२१॥ इत्यार्षे श्रीरामायणे वाल्मीकीये बालकांडे नवमः सर्गः॥९॥ सुमंत्र
श्चोदितो राज्ञा प्रोवाचेदं वचस्तदा॥ यथर्ष्यशृंगस्त्वानीतो येनोपायेन मंत्रिभिः
तन्मे निगदितं सर्वं शृणु मे मंत्रिभिः सह॥१॥ रोमपादमुवाचेदं सहामात्यः पु
रोहितः॥ उपायो निरपायोयमस्माभिरभिचिंतितः॥२॥ ऋष्यशृंगो वनचरस्त
पःस्वाध्यायसंयुतः॥ अनभिज्ञस्तु नारीणां विषयाणां सुखस्य च॥३॥ ॥

णिकाभिरानयनमत्याश्चर्यमिति विस्तरेण कथताय प्रेरितः॥ मंत्रिभिः सह संमंत्र्य रोमपादे
न यथर्ष्यशृंग आनीतो येन चोपायेनानीतस्तन्मया निगदितं सर्वं प्रकारं मे मत्तो मंत्रिभिः स
ह शृणु इति योजना॥१॥ रोमेति सहामात्य पुरोहितः तमुवाच निरपायोऽव्यभिचारिफ
लः॥२॥ नारीणां नारीसंबंधिविषयाणां शब्दादीनां तत्संबंधिसुखस्य चेत्यर्थः॥३॥

४९

रावमनुनीय॰ अथयत्नमानुचितान्॥ गणिकाप्रेषणादिरूपानुपायान् विचार्य राजानं वसुपतिः यद्यस्मदुक्तं श्रोष्यसि तदा तमानेष्यामः दोषोस्मात्कंशापादिरूपस्तस्यनपोवैकल्यादिरूपो वा सर्वथा न भविष्यति॥१८॥ एवममात्यपुरोहितवचनात् गणिकाभिः तद्द्वारा ऋषिसुत आनीतः देवइंद्रः पर्जन्यमवर्षयत् तद्देशे॰ शांता चास्मै प्रदीयते॰ प्रदत्ता वर्तमानसमीपेलट्॥

वसुपति चिंतयित्वा तेतस्योपायांश्चतात्तमान्॥ आनेष्यामो वयं विप्रं न च दोषो भविष्यति॥१८॥ एवमंगाधिपेनैव गणिकाभिर्ऋषेः सुतः॥ आनीतोवर्षयद्देवः शांता चास्मै प्रदीयते॥१९॥ ऋष्यशृंगस्तु जामाता पुत्रांस्तव विधास्यति॥ सनत्कुमारकथितमेतावद्व्याहृतं मया॥२०॥ ॥ ॥

यद्यपि सनत्कुमारोक्तानुवादेन भविष्यन्निर्देशा उचितस्तथापि राज्ञः संतोषाधिक्याय स्वप्रोच्यमानकाले वृत्तमेव तदिति भूतनिर्देशाः॥१९॥ ऋष्यशृंगेति॰ अंगराज मित्रत्वस्य राज्ञि वत्सप्रमाणत्वेन मित्रजामातास्वस्यापि जामातेवेत्यतो जामातेत्युक्तिः॥ बीजांतरमप्यग्रेवक्ष्यते एतदर्थः॥ एवं सनत्कुमारकथितं पुत्रोत्पत्युपायरूपं वस्तु मयानुभूयव्याहृतं॰ अग्रेदेवः प्रमाणमिति शेषः॥२०॥

नेति॰स्त्र्यादिकः जन्मप्रभृतिदृष्टपूर्वेन भवतियथातथाव्यवह्रियत इतिशेषः नगरजंसत्वं॰अश्वग
जादि॰राष्ट्रजंसकरकुक्कुरादि॥९॥तत इति॰तंदेशंवारस्त्रीसंचारदेशं॰यदृच्छयादेववशात्॥
१०॥११॥क इति॰कस्त्वं किंजातिः कस्य पुत्र इतिच॰किन्नामाचकिं वर्तसे किंकर्मा॥ ॥अपिचएकः
सन् त्वंविजनेदूरेजनवासरूपग्रामादिभ्योदूरेवने किमर्थंचरसीतिप्रश्नत्रयम्॥१२॥अदृष्टे

नतेनजन्मप्रभृतिदृष्टपूर्वेतपस्विना॥स्त्रीवापुमान्वायच्चान्यत्सत्वंनगरराष्ट्रजम्॥९॥
ततः कदाचित्तंदेशमाजगामयदृच्छया॥विभांडकसुतस्तत्रताश्चापश्यद्वरांगनाः॥१०॥ता
श्चित्रवेषाः प्रमदागायंत्योमधुरस्वरम्॥ऋषिपुत्रमुपागम्यसर्वावचनमब्रुवन्॥११॥कस्त्वं
किंवर्त्तसेब्रह्मन्ज्ञातुमिच्छामहेवयं॥एकस्त्वंविजनेदूरेवनेचरसिशंस नः॥१२॥अदृ
ष्टरूपास्तास्तेनकाम्यरूपावनेस्त्रियः॥हार्दात्तस्यमतिर्जाताआख्यातुंपितरंस्वकं॥१३॥

त्ति॰स्त्रिय इत्यस्यदृष्टा इतिशेषः अनेनहार्दमूलभूता॰चलस्यचेतसोयास्यावुदासीनेष्ववस्तुषु॰अवारणीयावृत्तिः साहृच्छिशब्देनकथ्यत इत्युक्तलक्षण॥ ॥हृच्छिरुक्तात्ततः सर्वांशेनुपेतात्मकज्ञानरूपः परिचयोपिमध्येज्ञेयः॥अतस्तासुहार्दात् दर्शनजस्नेहात्॰दोषानालोकिनीप्रीत्याख्याचित्तवृत्तिर्हार्दमित्यर्थः॥ स्वकं स्वीयं॰अदृष्टरूपाः प्रागदृष्टैवरूपा॰काम्यरूपाः कमनीयरूपाः एतन्नद्वयंचस्नेहकारणं॥१३॥ ॥ राम ॥ श्री ॥

50

अभिमतैः प्राणिमात्रस्येति शेषः ॥ इंद्रियार्थैस्तद्विषयैर्दिव्यगीत्यादिभिः अध्यवसीयतां · अस्मदुक्त
करणाय यत्यतां ॥४॥ तदाह गणिका इति · सत्कृताः विचित्रांबराभरणान्नपानादिभिः ॥५॥ श्रुत्वेति रा
जा पुरोहितं तथेति · त्वयैव तथा कर्तव्यमिति प्रत्युवाच अत्यल्पविषयत्वाद्राज्ञ एवं वादः अथ
पुरोहितस्य विप्रत्वात् · गणिकाभिः संवादोनुचित इति सोपि मंत्रिणः प्रत्युवाच · मंत्रिणश्चेत्

इंद्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः ॥ पुरमानाययिष्यामः क्षिप्रं चाध्यवसीयतां ॥४॥
गणिकास्तत्र गच्छंतु रूपवत्यः स्वलंकृताः ॥ प्रलोभ्य विविधोपायैरानेष्यंतीह सत्कृताः ॥५॥
श्रुत्वा तथेति राजा च प्रत्युवाच पुरोहितं ॥ पुरोहितो मंत्रिणश्च तदा चक्रुश्च ते तथा ॥६॥
वारमुख्यास्ततच्छ्रुत्वा वनं प्रविविशुर्महत् ॥ आश्रमस्याविदूरेस्मिन् यत्नं कुर्वंति दर्शने ॥७॥
ऋषेः पुत्रस्य धीरस्य नित्यमाश्रमवासिनः ॥ पितुः स नित्यसंतुष्टो नातिचक्राम चाश्रमात् ॥८॥

तथा चक्रुः तास्ता गणिकाः प्रेरयन् ॥६॥ वारेति · तन्मंत्रिवचः अस्मिन्वने युष्मज्जनपदप्रां
तवर्तिनि शृंगवेरवने · आश्रमस्य विभांडकाश्रमस्य अविदूरे निकटे स्थित्वा ऋषिपुत्र
स्य धीरत्वादिगुणविशिष्टस्य दर्शने यत्नं कुर्वंति स्म चक्रुः ॥ पितुरुपलालनादिभिः नित्यसं
तुष्टः स आश्रमान्नातिचक्राम आश्रमात् ॥ दूरं न निरगात् ॥७॥८॥ ११

ततइति समालिंग्यस्पर्शेनापिवा। शीकर्तुमालिंगनम्। हर्षसमन्विताः बालब्रह्मचारितोगाउतरालिं
गनप्राप्यास्वकार्यानुकूलस्पर्शप्राप्याच॥२०॥तानीति तामिः प्रीत्यादत्तानि तेजस्वी वारवनितास्प
र्शाप्यूर्ध्वरेतस्त्वाद्ब्रह्मतत्वाच्चाहीनतेजाः मन्यतेयोमन्यतेसइवव्यवहरतीत्यर्थः॥पूर्वमनास्वादि
तानित्रनास्वादितपूर्वाणि नित्यनिवासिनामितिकर्तरिशेषेषष्ठी॥२१॥व्रतचर्यामित्येवकिं

ततस्तास्तंसमालिंग्यसर्वाहर्षसमन्विताः॥मोदकान्प्रददुस्तस्मैभक्ष्यांश्चविविधान्शुभा
न्॥२०॥तानिचास्वाद्यतेजस्वीफलानीतिस्ममन्यते॥अनास्वादितपूर्वाणिवनेनित्यनि
वासिनां॥२१॥आपृच्छ्यचतदाविप्रंव्रतचर्यांनिवेद्यच॥गच्छंतिस्मापदेशात्ताभीतास्तस्य
पितुःस्त्रियः॥२२॥गतासुतासुसर्वासुकाश्यपस्यात्मजोद्विजः॥अस्वस्थहृदयश्चासीद
दुःखाच्चपरिवर्तते॥२३॥ततोपरेद्युस्तंदेशमाजगामसवीर्यवान्॥विभांडकसुतःश्री
मान्मनसाचिंतयन्मुहुः॥२४॥

चित व्रतमनुष्ठेयमस्माकमिति निवेद्यतत्रापयित्वातस्मा
दपदेशात्स्वाज्ञानात्तस्यपितुः विभांडकाद्भीताः स्त्रियःगच्छंतिस्मगताः॥२२॥अस्वस्थहृदयःअ
प्रसन्नचित्तःआसीत् दुःखात्तादृशचाक्षुषादिविषयसुखविश्लेषजात् परिवर्तनंएकदे
शानवस्थितिः॥२३॥ततइति उक्ताद्धेतोः मनसाचिंतयत् तासांदर्शनस्पर्शनगमनादिप्रकारान्
स्मरन्नित्यर्थः तत्रगमनंनतत्द्वारकमवश्यंभावीतिचिंतयन्नित्यर्थश्च॥२४॥ ॥

पितेति· नामेत्यंतमाद्यप्रश्नोत्तरं· द्वितीयप्रश्नोत्तरमाह· कर्मचमदीयंभुविप्रसिद्धंतपोरूपमित्यर्थः
१४ तृतीयप्रश्नोत्तरमाह· इहेति· इहवने आश्रमपदः आर्षे पुंस्त्वं वर्तनइतिशेषः॥सर्वेषामिति
निर्देशोवस्तुमात्राभिप्रायेण· अनेनस्त्रीस्वरूपापरिज्ञानंसूचितम्॥१५॥ऋषीति· आसेत्यार्षे

पिताविभांडकोस्माकंतस्याहंसुतऔरसः॥ऋष्यशृंगइतिख्यातंनामकर्मचमेभुवि॥१४॥
इहाश्रमपदोस्माकंसमीपेशुभदर्शनाः॥करिष्येवोत्रपूजांवैसर्वेषांविधिपूर्वकम्॥१५॥
ऋषिपुत्रवचःश्रुत्वासर्वासांमतिरासवै॥तदाश्रमपदंद्रष्टुंजग्मुःसर्वास्ततोंगनाः॥१६॥
गतानांतुततःपूजामृषिपुत्रश्चकारह॥इदमर्घ्यमिदंपाद्यमिदंमूलंफलंचनः॥१७॥प्रति
गृह्यतुतांपूजांसर्वारावसमुत्सुकाः॥ऋषेर्भीताश्चशीघ्रंतुगमनायमतिंदधुः॥१८॥
अस्माकमपिमुख्यानिफलानीमानिहेद्विज॥गृहाणविप्रभद्रंतेभक्षयस्वचमाचिरं॥१९॥

बभूवेत्यर्थः॥तत्रद्रष्टुंमतिर्बभूवेत्यन्वयः॥१६॥नोस्माकंभवदर्थमितिशेषः॥१७॥प्रतीति· समु
त्सुकाः॥ऋष्यशृंगस्यतदाश्रमतोनयने॥ऋषेः विभांडकात्·॥१८॥मुख्यानिप्रशस्तास्वादवं
ति· प्रतारणार्थमोदका एवमुच्यंते· प्रतिगृहाण· तेभद्रंकल्याणं·॥भक्षयस्वचफलानीतिशेषः
माचिरंऋषेरागमनात्पूर्वमेवभक्षणीयमित्याशयः॥१९॥ ॥ ॥

अर्घ्यंचेति॰ अर्घ्यादि पूजितात् विप्रेंद्रात् ऋष्यशृंगात्॰ प्रसादं मयि सापराधेपि भवन्नित्यं प्रसन्नो स्त्वित्येवं सौमुख्यं वव्रे॰ किमर्थमित्यत आह॰ मेति॰ अतिजुगुप्सितगणिकाभिः स्वानयनं॰ अ

अर्घ्यंचप्रददौतस्मैन्पायतः सुसमाहितः॥ वव्रेप्रसादं विप्रेंद्रात् माविप्रंमन्युराविशेत्॥३१॥ अंतःपुरं प्रवेश्यास्मैकन्यांदत्वायथा विधि॥ शांतांशांतेनमनसाराजाहर्षमवापसः॥३२॥ श्री

वहारकालेज्ञात्वातंविप्रंऋष्यशृंगतत्पितरं विभांडकं च मन्युः क्रोधः आविशेत्॰ सभाप्रविश त्वित्यर्थमितिभावः॥३१॥ अंतरिति॰ प्रसन्नत्वादेवतदनुज्ञया अंतःपुरंप्रवेश्य॰ हर्षंदृष्ट्वा द्विजंऋ षिसंबंधजंच॥३२॥

तेकं तत्राह· मनोज्ञा इति॥२५ उपसृत्य प्रत्युद्गम्य ॥२६॥ चित्राणीति· यद्यत्रैव चित्राणि मूलानि
भवेयुः संभावनायां लिङ्· अतः तत्र गमनं व्यर्थमिति चेत् तत्रापि एष विधिः विचित्रमूलफललभ
नए विधिः विशेषेण इतोप्याधिक्येन भविष्यति ॥२७॥ श्रुत्वा त्विति· गंगायां पूर्वं स्थापितां नावमा

मनोज्ञायत्र ता दृष्ट्वा वारमुख्याः स्वलंकृताः । दृष्ट्वैव च ततो विप्रमायान्तं हृष्टमानसाः ॥२५॥
उपसृत्य ततः सर्वास्तास्तमूचुरिदं वचः । एत्याश्रमपदं सौम्य अस्माकमिति चाब्रुवन् ॥२६॥
चित्राण्यत्र बहूनि स्युर्मूलानि च फलानि च । तत्राप्येष विशेषेण विधिर्हि भविता ध्रुवम् ॥२७॥
श्रुत्वा तु वचनं तासां सर्वासां हृदयंगमम् । गमनाय मतिं चक्रे तं च निन्युस्तथा स्त्रियः ॥२८॥
तत्र चानीयमाने तु विप्रे तस्मिन्महात्मनि । ववर्ष सहसा देवो जगत्प्रह्लादयंस्तदा ॥२९॥
वर्षेणैवागतं विप्रं तापसं स नराधिपः । प्रत्युद्गम्य मुनिं प्रह्वः शिरसा च महीं गतः ॥३०॥

रोप्य प्रवाहेणैव अंगदेशं निन्युरिति महाभारते ॥२८॥२९॥ तत्रेति· अंगदेशे· वर्षेणेति· वर्षेण
सहैव· विषयं स्वदेशं· आगतं विप्रं प्रत्युद्गम्य प्रह्वः सन्· प्रह्वः । अंजल्यादि पूर्वं नम्रो जात
इति शेषः· शिरसा महीं गतश्च· साष्टांगनमस्कारं चकृतवानित्यर्थः ॥३०॥ ॥

एवं सनत्कुमारोक्तकथां तत्प्रसंगेन ऋष्यशृंगानयनकथां च सांप्रतिकीमुक्त्वा तदानयनार्थं महाराजेनैव गंतव्यमिति बोधयितुमनेकयुगदृष्टः सुमंत्रः पुनरपि तदर्थगर्भां सनत्कुमारोक्तां कथामाह॥ भूय एवेति॥ देवप्रवरः सनत्कुमारः यथेतियदित्यर्थे॥१॥ सत्यप्रतिश्रवाः सत्य

भूय एव हि राजेंद्र शृणु मे वचनं हितम्॥ यथा स देवप्रवरः कथयामास बुद्धिमान्॥१॥
इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः॥ नाम्ना दशरथो राजा श्रीमान् सत्यप्रतिश्रवाः॥२॥
अंगराजेन सख्यं च तस्य राज्ञो भविष्यति॥ कन्या चास्य महाभागा शांता नाम भविष्यति॥३॥
पुत्रस्त्वंगस्य राज्ञस्तु रोमपाद इति श्रुतः॥ तं स राजा दशरथो गमिष्यति महायशाः॥४॥
अनपत्योऽस्मि धर्मात्मन् शांताभर्त्ता मम क्रतुं॥ आहरेत त्वयाज्ञप्तः संतानार्थं कुलस्य च॥५॥

प्रतिज्ञः॥२॥ अंगेति॥ अंगराजो रोमपादः तस्य दशरथस्य॥ अस्य रोमपादस्य॥३॥ कोसावंगराज इत्यत्राह॥ पुत्र इति॥ अंगस्य अंगनामकस्य॥ तं रोमपादं गमिष्यति॥ ऋष्यशृंगानयनार्थमिति शेषः तमित्यस्य प्रतीति शेषः॥४॥ गमनप्रयोजनमाह॥ अनपत्य इति॥ आहरेत निर्वहेत॥ चकारेणाधर्मार्थं च॥५॥

एवमिति॰ ननु गणिकास्पर्शनतस्य छ फलभक्षणादिभिरस्य तपोहानौ कथं तन्मननमात्रेणावृष्टिः न
च स्त्रीत्वाद्यज्ञानान्न तथा तपोहानिः ईषद्दोषस्य तपसैव दग्ध इति वाच्यं निर्मलब्रह्मचर्येणावि
दितनिखिलवेदशास्त्रतत्वस्य शास्त्रतः स्त्रीस्वरूपज्ञानेस्य ब्रह्मचर्ये तत्परिहारज्ञानस्य च दु
र्निवारत्वात्॰ वने वनचरस्त्रीणामनुभवाच्च॰ सर्वथा अज्ञत्वे अनुग्रहशक्त्यभावापत्तेश्चेति चे
न्न॰ निर्मलब्रह्मचर्येण ब्रह्मज्ञतया सर्वत्र ब्रह्मदृष्ट्या च दोषलेशस्याप्यस्पर्शात्॥ प्रारब्धव
शात्स्त्रियस्त्रीसंबंधभाविनं तद्धारकं जानन्नेव गणिकाभिस्तथा व्यवजह्रे॰ तासां भयानुत्प

एवं स न्यवसत्तत्र सर्वकामैः सुपूजितः॥ ऋष्यशृंगो महातेजाः शांतया सह
भार्यया॥ ३३॥ इत्यार्षे श्री रामायणे वाल्मीकिये बालकांडे दशमः सर्गः॥ १०॥

त्तये अत एव नन्तेने तिनवमश्लोके तथा व्यवहितो यत इतिशेषः पूरितोस्माभिः प्राक्॰ एतत्सर्वं जा
नन पिता पि न तमनुयायनशप्तवान्॰ राजानमित्येवान्न तत्वं॰ अनेनन तत्त्वज्ञस्य सर्वदोषासंबं
धोध्वनितः ब्रह्मज्ञे दानसंकल्पमात्रेण फलसिद्धिरित्यादि च सूचितम्॰ यत्तु क्वचित्॰ विभां
डकस्य पुत्रान्वेषणं क्रोधेन ततो मार्गे ऋष्यशृंगाय शांतादानादि वृत्तांतलाभेन पुनराश्रमं प्रति
परावृत्यागमनवर्णनं॰ तदपि तत्वज्ञस्य चोपपद्यते॰ अन्यथास्व पुत्रस्य गणिकाहारक ब्रह्मचर्य
विलोपकर्तो रोषो [illegible] ॥ ३३॥ इति श्री रामाभिरामे

एतत्कथाकथनस्य विवक्षितमर्थमाह· स इति· स्वयमेवेति· नतु पुरोहितादिद्वारा॥१२॥ अनुमान्य कृतानुमतिं कृत्वा· अन्यथा मयि पुरोहिते स्थिते यज्ञार्थं कथमन्यानयनमिति तस्य क्रोधः स्यात्· अनुमत्तौ हेतुः सूतवाक्यं निशाम्येति· श्रावयित्वेत्यर्थः॥१३॥ यत्र रोमपादराज्ञे

स त्वं पुरुषशार्दूल समानय सुसत्कृतम्॥ स्वयमेव महाराज गत्वा सबलवाहनः॥१२॥ सुमंत्रस्य वचः श्रुत्वा हृष्टो दशरथो ऽभवत्॥ अनुमान्य वसिष्ठं च सूतवाक्यं निशाम्य च॥१३॥ सांतःपुरः सहामात्यः प्रययौ यत्र स द्विजः॥ वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः॥१४॥ अभिचक्राम तं देशं यत्र वै मुनिपुंगवः॥ आसाद्य तं द्विजश्रेष्ठं रोमपादसमीपगम्॥१५॥ ऋषिपुत्रं ददर्शाथो दीप्यमानमिवानलम्॥ ततो राजा यथान्यायं पूजां चक्रे विशेषतः॥१६॥ सखित्वात्तस्य वै राज्ञः प्रहृष्टेनांतरात्मना॥ रोमपादेन चाख्यातमृषिपुत्राय धीमते॥१७॥ ॥ ॥

५९

२४। अभिचक्राम जगाम· तद्देशं आसाद्य प्राप्य अथो अनंतरं रोमपादसमीपे द्विजश्रेष्ठं ऋषिपुत्रं ददर्श· ततः तदागमनानंतरं राजा रोमपादः तस्य राज्ञः दशरथस्य यथान्यायं यथाविधिः विशेषतः अत्यादरेण पूजां चक्रे इत्यन्वयः· आदरे हेतुः सखित्वम्॥१५॥१६॥
॥१७॥

श्रुत्वेति॰ अस्य राज्ञो दशरथस्यैतद्वाक्यं श्रुत्वा मनसा च तस्य अवश्यं कर्त्तव्यतां विचिंत्य निश्चित्य पुत्रवं
तं शांता भर्त्तारं प्रदास्यते इत्यन्वयः पुत्रवंतमित्यनेन जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति विध्युक्त
मग्न्याधानाधिकारित्वं सूचितं॰ तेनाहिताग्नित्वेनार्त्विज्याधिकारस्तस्योक्तः शांतासहितभर्तारमि
त्यर्थीकेन शांतासाहित्यमपि सूचितं॥६॥ तं यज्ञं पुत्रकामेष्टिरूपं॥७॥ वरयिष्यति॰ वरणं करि

श्रुत्वा राज्ञोऽथ तद्वाक्यं मनसा च विचिंत्य च॥ प्रदास्यते पुत्रवंतं शांताभर्तारमात्मवान्॥६॥
प्रतिगन्त्यं च तं विप्रं स राजा विगतज्वरः॥ आहरिष्यति तं यज्ञं प्रहृष्टेनांतरात्मना॥७॥ तं च
राजा दशरथो यशस्कामः कृतांजलिः॥ ऋष्यशृंगं द्विजश्रेष्ठं वरयिष्यति धर्मवित्॥८॥
यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः॥ लभते च स तं कामं द्विजमुख्याद्विशांपतिः॥९॥
पुत्राश्चास्य भविष्यंति चत्वारोऽमितविक्रमाः॥ वंशप्रतिष्ठानकराः सर्वभूतेषु विश्रुताः॥
॥१०॥ एवं स देवप्रवरः पूर्वं कथितवान्कथां॥ सनत्कुमारो भगवान्पुरा देवयुगे प्रभुः॥११॥

ष्यति॰ तत्करोतीति णिच्॥८॥ वरणविषयमाह॰ यज्ञेति॰ यज्ञप्रसवकारणं॰ प्रसवः स्वर्ग॰
कारणमिति बोध्यं॰ लभते लप्स्यते॰ तं कामं प्रार्थितकाम्ययज्ञं॥९॥ पुत्रा इति॰ वंशप्रतिष्ठानं
वंशाविच्छेदस्तत्कराः॥१०॥ एवमिति॰ पूर्वं पूर्वस्मिन्काले॰ कस्मिन्पूर्वकाले तत्राह॰ पुरा
देवयुगे तच्चतुर्युगीपाकेन चतुर्युगादौ सत्ययुगे इत्यर्थः॥११॥ ॥

२४ स्वलंकृतत्वप्रकारमाह · धूपितमित्यादि · आदौ सिक्तं तोयैः पश्चात्संमृष्टं ॥२५॥ प्रेषितमित्यस्य उत्तरेत्यादिः ॥२६॥ द्विजं ऋष्यशृंगं ॥२७॥ इंद्रकर्मणा इंद्रसाहाय्यार्थं कर्म यस्य तादृशेन राज्ञा सत्कृत्य प्रवेश्यमानं द्विजं दृष्ट्वा देवेंद्रेण स्वनगरं प्रवेश्यमानं काश्यपं वामनं दृष्ट्वा यथा स्वर्गि

पौरेषु प्रेषयामास दूतान्वेश्मनिगामिनः ॥ क्रियतां नगरं सर्वं क्षिप्रमेव स्वलंकृतं ॥२४॥ धूपितं सिक्तसंमृष्टं पताकाभिरलंकृतम् ॥ ततः प्रहृष्टाः पौरास्ते श्रुत्वा राजानमागतं ॥२५॥ तथा चक्रुश्च तत्सर्वं राज्ञा यत्प्रेषितं तदा ॥ ततः स्वलंकृतं राजा नगरं प्रविवेश ह ॥२६॥ शंखदुंदुभिनिर्ह्रादैः पुरस्कृत्वा द्विजर्षभम् ॥ ततः प्रमुदिताः सर्वे दृष्ट्वा वै नागरा द्विजं ॥२७॥ प्रवेश्यमानं सत्कृत्य नरेंद्रेणेंद्रकर्मणा ॥ यथा दिवि सुरेंद्रेण सहस्राक्षेण काश्यपं ॥२८॥ अंतःपुरं प्रवेश्यैनं पूजां कृत्वा च शास्त्रतः ॥ कृतकृत्यं तदात्मानं मेने तस्योपवाहनात् ॥२९॥ अंतःपुराणि सर्वाणि शांतां दृष्ट्वा तथागतां ॥ सह भर्त्रा विशालाक्षी प्रीत्यानंदमुपागमन् ॥३०॥

वासिनो मुदिताः तथैव नागरा मुदिता इति पूर्वेणान्वयः इंद्रकर्मणा उत्पन्नेन राज्ञः समग्रो महिमाशयो ध्वनितः ॥२८॥ उपवाहनात् · स्वसमीपानयनात् ॥२९॥ तथागमनमेव व्याचष्टे · ॥ सह भर्त्रेति · प्रीत्या · शांतामांप्रीत्या · बहुकालविश्लेषोत्तरम् मिलिता चानंदाप्तिरंतःपुरस्य ॥३०॥

सख्यमिति· सख्यंमैत्रीसंबंधकं· यो नादिसंबंधं· ऋषिपुत्रायरोमपादेनआख्यातंकथितं· तदात
ऊर्ध्वाणानंतरकाले· तं दशरथं प्रत्यपूजयत्‌ऋष्यशृंगइतिशेषः तेन सहरोमपादेन सह संबंध
श्चायंतादृशाः येन दशरथस्यापि जामातृत्वव्यवहारयोग्यः ऋष्यशृंगः एतदेवाभिप्रेत्योक्तंत्र
ऋवजामातेति· क्वचिद्वेवं पठ्यतेपि॥ अनेनमेनपत्यायदत्तेयंवरवर्णिनी· याचते पुत्रतुल्येषु

सख्यंसंबंधकंचैवतदातंप्रत्यपूजयत्॥ एवंसुसत्कृतस्तेनसहोषित्वानरर्षभः॥१८॥
सप्ताष्टदिवसान्‌राजा राजानमिदमब्रवीत्॥ शांतातवसुताराजन्‌सहभर्त्रा विशांपते॥१९॥
मदीयं नगरं यातुकार्यंहिमहदुद्यतम्॥ तथेतिराजासंश्रुत्यगमनंतस्यधीमतः॥२०॥
उवाचवचनंविप्रगच्छत्वंसहभार्यया॥ ऋषिपुत्रः प्रतिश्रुत्यतथेत्याहनृपंतदा॥२१॥
सनृपेणाभ्यनुज्ञातः प्रययौसहभार्यया॥ तावन्योन्यांजलिंकृत्वास्नेहात्संश्लिष्यचोरः
सा॥२२॥ ननंदतुर्दशरथोरोमपादश्चवीर्यवान्॥ ततः सुहृदमापृच्छ्यप्रस्थितोरघुनंदनः॥२३॥

शांताप्रियतरात्मजाः सोयंतेश्वशुरोब्रह्मन्पश्चैवाहंतथानृपइति· अत्रयाचतइतिचतुर्थ्यं
तं· अतएवप्राक्‌संतः पुरस्यांगदेशगमनेउक्तं कन्यास्नेहाद्धितासांगमनमितिभाति॥१८॥१९॥
उद्यतंउपक्रांतं· संश्रुत्यप्रतिज्ञाय॥२०॥ प्रतिश्रुत्यआकार्यैः॥२१॥ सः ऋष्यशृंगः नौरोमपा
दृदशरथौ॥२२॥ सुहृदंरोमपादम्॥२३॥

७॥८॥पुत्रार्थंहयमेधेनकर्मणा॥तदाख्येनकर्मणा॥९॥अनुष्ठानारंभायच पुनरूपन्यासः ऋषिपुत्रो

समानयत्सतान्सर्वान्समस्तान्वेदपारगान्॥तान्पूजयित्वाधर्मात्माराजादशरथस्त
दा॥७॥धर्मार्थसहितंयुक्तं श्लक्ष्णंवचनमब्रवीत्॥ममतातप्यमानस्यपुत्रार्थंनास्तिवै
सुखं॥८॥पुत्रार्थंहयमेधेनयक्ष्यामीतिमतिर्मम॥तदहंयष्टुमिच्छामिहयमेधेनक
र्मणा॥९॥ऋषिपुत्रप्रभावेनकामान्प्राप्स्यामिचाप्यहं॥ततःसाध्वितितद्वाक्यंब्राह्मणाः
प्रत्यपूजयन्॥१०॥वसिष्ठप्रमुखाःसर्वेपार्थिवस्यमुखाच्छ्रुतं॥ऋष्यशृंगपुरोगाश्चप्र
त्यूचुर्नृपतिंतदा॥११॥संभाराःसंभ्रियंतांतेतुरगश्चविमुच्यतां॥सरय्वाश्चोत्तरेतीरेय
ज्ञभूमिर्विधीयतां॥१२॥सर्वथाप्राप्स्यसेपुत्रांश्चतुरोमितविक्रमान्॥यस्यतेधार्मि
कीबुद्धिरियंपुत्रार्थमागता॥१३॥ततःप्रीतोभवद्राजाश्रुत्वातुद्विजभाषितं॥अमात्या
नब्रवीद्राजाहर्षेणेदंशुभाक्षरं॥१४॥गुरूणांवचनाच्छीघ्रंसंभाराःसंभ्रियंतुमे॥स
मर्थाधिष्ठितश्चाश्वःसोपाध्यायोविमुच्यतां॥१५॥सरय्वाश्चोत्तरेतीरेयज्ञभूमिर्वि
धीयतां॥शांतयश्चाभिवर्धंतांयथाकल्पंयथाविधि॥१६॥शक्यःकर्तुमयंयज्ञःसर्वे
णापिमहीक्षिता॥नापराधोभवेत्कष्टोयद्यस्मिन्क्रतुसत्तमे॥१७॥

ऋष्यशृंगः॥१०॥
११॥१२॥धार्मिकीप्रजासंरक्षणरूपधर्मप्रयोजना॥१३॥१४॥संभ्रियंतांसंपाद्यंतां॰गुरूणामि

सहद्विजाः सपुत्रभर्तृकेति याज्ञः ॥३१॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे एकादशः सर्गः ॥११॥ एवं निश्चितमवगतं पुत्रदातृत्वं यस्य तादृशे ऋष्यशृंगे आनीते सकलपापक्षयकारितया पूर्वसंकल्पितत्वेन च अश्वमेधं प्रस्तौतीति तत इति वह्वृति येत्यनल्पका

पूज्यमानानुताभिः सारा ज्ञाचैव विशेषतः उवास तत्र सुखितः कंचित्कालं सह द्विजः ॥३१॥
इत्यार्षे श्रीरामायणे बालकांडे एकादशः सर्गः ॥११॥ ततः काले बहुतिथे कस्मिंश्चित्सुमनोहरे ॥ वसंते समनुप्राप्ते राज्ञो यष्टुं मनो भवत् ॥१॥ ततः प्रणम्य शिरसा तं विप्रं देववर्णिनं ॥ यज्ञाय वरयामास संतानार्थं कुलस्य च ॥२॥ तथेति च स राजानमुवाच च वसुधाधिपं ॥ संभाराः संभ्रियंतां ते तुरगश्च विमुच्यतां ॥३॥ सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयतां ॥ ततोब्रवीन्नृपो वाक्यं ब्राह्मणान्वेदपारगान् ॥४॥ सुमंत्रावाहय क्षिप्रमृत्विजो ब्रह्मवादिनः ॥ सुयज्ञं वामदेवं च जाबालिमथ काश्यपम् ॥५॥ पुरोहितं वसिष्ठं च ये चान्ये द्विजसत्तमाः ॥ ततः सुमंत्रस्त्वरितं गत्वा त्वरितविक्रमः ॥६॥ ॥

लेगतइति शेषः सुमनोहरे शास्त्रोक्तदोषरहिते मनः अभवत् प्रावर्तत ॥१॥ तत इति देववर्णिनं देववर्चसं कुलस्य संतानार्थं कुलाविच्छेदरूपप्रयोजनमुद्दिश्य पत्नेः स्वर्गार्थं च यज्ञाय यज्ञार्थं विप्रं ऋष्यशृंगं ॥२॥३॥४॥ आवाहय मत्समीपं प्रापय ॥५॥ ततइत्यादि व्याख्यातप्रायं ॥६॥

यथोक्तं शास्त्रोक्तप्रकारानतिक्रमेण· यज्ञांगेषु अश्वादिषु· यथा ब्रह्मराक्षसादिभिर्विघ्नान्क्रियं तेन त
थाविधीयतां क्रियतामित्यर्थः॥३॥ भवानिति· सुहृदः स्निग्धत्वाव्यभिचारादतिशयपत्तये पुनः स्नि
ग्धेति विशेषणं· मन्यमिति षष्ठ्यर्थे· परमो महानित्यपि स्निग्धपदवत्· विसस्य पुनः प्राप्ताश्वकर्त
दुच्यतः आरब्धो यज्ञसंबंधं गानुष्ठानरूपो भारः॥ भवतैव सर्ववेदशास्त्रज्ञेन वोढव्यः वोढुमर्हः॥४

यज्ञो मे क्रियतां ब्रह्मन्यथोक्तं मुनिपुंगव॥ यथा न विघ्नाः क्रियंते यज्ञांगेषु विधीयता
म्॥३॥ भवान्स्निग्धः सुहृन्मह्यं गुरुश्च परमो महान्॥ वोढव्यो भवता चैव भारो यज्ञ·
स्य चोद्यतः॥४॥ तथेति च स राजानमब्रवीद्द्विजसत्तमः॥ करिष्ये सर्वमेवैतद्भवता य
त्समर्थितम्॥५॥ ततोऽब्रवीद्द्विजान्वृद्धान्यज्ञकर्मसु निष्ठितान्॥ स्थापत्ये नि
ष्ठितांश्चैव वृद्धान्परमधार्मिकान्॥६॥ कर्मांतिकान्शिल्पकारान्वर्द्धकीन्
खनकानपि॥ गणकान्शिल्पिनश्चैव नथैव नटनर्तकान्॥७॥ राम ॥

समर्थितं सम्यक्प्रार्थितं॥५॥ अब्रवीदिति· वसिष्ठोत्र कर्ता· स्थापत्यं स्थपतेरथकारस्य
कर्म तत्र निष्ठितान्प्रवीणान्॥६॥ कर्मांतिकान्· आसमाप्तिकर्मनिर्वाहकान्भृत्यान्शि
ल्पकारान्· शिल्पं चित्रादि· वर्धकीन्तक्षणः खनकाः॥ कूपवापीनिर्मातारः॥ गणकान्
ज्योतिर्विदः॥ शिल्पिनश्चर्मकाराद्याः॥ नटाः सूत्रधाराः नर्तकाः नृत्यकारिणः॥७॥

१८॥१९॥२०॥२१॥गतानामिति॥गतेषुद्विजादिष्वित्यर्थः॥सप्तम्यर्थे षष्ठी॥विसर्जयित्वा॥संवत्सरांते॥यागा
र्थमितिशेषः॥२२॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेबालकांडेद्वादशः सर्गः॥१२॥अथ

छिद्रं हि मृगयंत्येते विद्वांसो ब्रह्मराक्षसाः॥ विधिहीनस्य यज्ञस्य सद्यः कर्ता विनश्यति॥१८॥
तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते॥ तथा विधानं क्रियतां समर्थाः करणेष्विह॥१९॥ तथे
ति च ततः सर्वे मंत्रिणः प्रत्यपूजयन्॥ पार्थिवेंद्रस्य तद्वाक्यं यथाज्ञप्तमकुर्वत॥२०॥ ततो
द्विजास्ते धर्मज्ञमस्तुवन्पार्थिवर्षभं॥ अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतं॥२१॥ गता
नां तेषु विप्रेषु मंत्रिणस्तान्नराधिपः॥ विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः॥२२॥ इत्या
र्षे श्रीरामायणे वाल्मीकिये बालकांडे द्वादशः सर्गः॥१२॥ पुनः प्राप्ते वसंते तु पूर्णः संव
त्सरोभवत्॥ प्रसवार्थं ततो यष्टुं हयमेधेन वीर्यवान्॥१॥ अभिवाद्य वसिष्ठं च न्याय
तः प्रतिपूज्य च॥ अब्रवी[त्] त्प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम्॥२॥ श्रीरघुनाथाय॥

संवत्सरां तेदीक्षेते तिसत्रात॥ पूर्ववसंतं विसर्जनस्य पुनः संवत्सरांनेवसंते प्राप्ते दीक्षाप्र
वृत्तिरूपदिश्यते॥ पुनरिति॥ प्रसवरूपफलं हयमेधेन भावयितुं॥ गतो वसिष्ठांतिकमितिशेषः॥
१॥ वसिष्ठं च॥ चादरुंधतीं॥ प्रश्रितं विनययुक्तम्॥२॥ ॥ ॥ ॥ ॥

दातव्यमिति॰ सत्कृत्य परलोकप्रयोजनबुध्या॰ शास्त्रोक्तसत्कारपूर्वकं देयमित्यर्थः॥ नतुलीलयात्
त्सवमात्रबुध्याश्रनादरेण॰ यथाप्रजा प्राप्नुवंति प्रजाप्राप्नुयुस्तमन्नंतेन तथासत्कृता॰ कार्याइत्यर्थः
१४॥१५ तेषामपीति॰ अपिस्त्वर्थे॰ यथाक्रमं ज्येष्ठानुक्रमेण॰ तत्रउपपत्तिमाह॰ येव सुभिर्धनैर्भो
जनादिभिश्चपूजिताः सेवकाः तेषां सर्वकार्यंसुविहितंभवति॰ किंचिदपिकार्यंनपरिहीयते॰

दातव्यमन्नंविधिवत्सत्कृत्यनतुलीलया॥ सर्वेवर्णायथापूजांप्राप्नुवंतिसुसत्कृताः॥१४॥
नचावज्ञाप्रयोक्तव्याकामक्रोधवशादपि॥ यज्ञकर्मसुयेव्यग्राः पुरुषाः शिल्पिनस्तथा॥१५
तेषामपिविशेषेणपूजाकार्यायथाक्रमं॥ येस्युः संपूजिताः सर्वेवसुभिर्भोजनेनच॥१६॥
यथासर्वंसुविहितंनकिंचित्परिहीयते॥ तथाभवंतः कुर्वंतुप्रीतियुक्तेनचेतसा॥१७॥
ततः सर्वेसमागम्यवसिष्ठमिदमब्रुवन्॥ यथेष्टंतत्सुविहितंनकिंचित्परिहीयते॥१८॥
यथोक्तंतत्करिष्यामोनकिंचित्परिहास्यते॥ ततः सुमंत्रमाहूयवसिष्ठोवाक्यमब्रवीत्॥१९॥

नहीनंभवति॰ तस्मात्मयिप्रीतियुक्तेनचित्तेनभवंतः तथाकुर्वंतुयथा सर्वेसुहृदः तेचशि
ल्पादयश्चवस्त्रादिभिः पूजिताः स्युरिति॥१६॥१७॥१८॥ यथोक्तमिति॰ यत्त्वयाउक्तंतद्यथोक्तं॰
त्वदुक्तानतिक्रमेण सुविहितंनकिंचित्तत्रलुप्यतेइतिशेषः किंचोक्तंभाविकृतः वचनंयथाक
थयिष्यसितच्चतथैवकरिष्यामः तत्रापिनकिंचिद्धीनंभविष्यति॰ ततः नियोजनानंतरं॥१९॥

समीहंतां कर्म कुर्वीत्यब्रवीदिति पूर्वेणान्वयः यज्ञकर्मैतत्स्य निर्वर्तयितुमिति शेषः ॥८॥ इक्ष्वाकाइ
ति बहुसाहस्त्री बहुसहस्रसंख्येया इत्यर्थः जातावेकवचनं राज्ञो योग्याः ॥ औपकार्याः राजस
द्मानि गृहाणि अन्नपानाद्युपकरणानि सर्वत्र अब्रवीदित्यनुकर्षः ॥९॥ सुनिष्ठिताः महावर्षवात

तथा प्राचीनशास्त्रविदः पुरुषान्सुबहुश्रुतान् ॥ यज्ञकर्म समीहंतां भवंतो राजशासनात् ॥८॥ इक्ष्वाका बहुसाहस्त्री शीघ्रमानीयतामिति ॥ औपकार्याः क्रियंतां च राज्ञो बहुगुणान्विताः ॥९॥ ब्राह्मणावसथाश्चैव कर्तव्याः शतशः शुभाः ॥ भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः ॥१०॥ तथा पौरजनस्यापि कर्त्तव्याश्च सुविस्तराः ॥ आगतानां सुदूराच्च पार्थिवानां पृथक्पृथक् ॥११॥ वाजिवारणशालाश्च तथा शय्यागृहाणि च ॥ भटानां महदावासा वैदेशिकनिवासिनाम् ॥१२॥ आवासा बहुभक्ष्या वै सर्वकामैरुपस्थिताः तथा पौरजनस्यापि जनस्य बहुशोभनम् ॥१३॥

दिनिवारणक्षमाः ॥१०॥ कर्तव्या इत्यस्या
वासा इति शेषः पार्थिवानामल्पमांडलिकानां ॥११॥ वैदेशिकनिवासिनां वैदेशिकानां स्वदे
शवासिनां चेत्यर्थः महदावासा इत्यत्रात्वाभाव आर्षः ॥१२॥ सर्वकामैरुपस्थिताः काम्यमानैः स
र्वपदार्थैर्युक्ताः जनस्य इतरस्य इ जनस्यापि बहुशोभनं यथा भवति तथा आवासाः कार्या इत्यर्थः
॥१३॥

प्राचीनान् प्रागग्रदेशवर्तिनः सुराष्ट्रे भवानित्यर्थे ह गार्धः॥२८॥२९॥३०॥३१॥ स्वयमेवेति॰ वसिष्ठेन

प्राचीनान्सिंधुसौवीरान्सौराष्ट्रेयांश्च पार्थिवान्॥२७॥ दाक्षिणात्यान्नरेंद्रांश्च समस्तानानयस्व ह॥२८॥ संति स्निग्धाश्च ये चान्ये राजानः पृथिवीतले॥२९॥ तानानय यथा क्षिप्रं ससानुगान्सह बांधवान्॥ एतान्दूतैर्महाभागैरानयस्व नृपाज्ञया॥३०॥ वसिष्ठवाक्यं तच्छ्रुत्वा सुमंत्रस्त्वरितं तदा॥ व्यादिशत्पुरुषांस्तत्र राज्ञामानयने शुभान्॥३१॥ स्वयमेव हि धर्मात्मा प्रयातो मुनिशासनात्॥ सुमंत्रस्त्वरितो भूत्वा समानेतुं महामतिः॥३२॥ ते च कर्मांतिकाः सर्वे वसिष्ठाय महर्षये॥ सर्वं निवेदयंति स्म यज्ञे यदुपकल्पितं॥३३॥ ततः प्रीतो द्विजश्रेष्ठस्तान्सर्वान्मुनिरब्रवीत्॥ अवज्ञया न दातव्यं कस्यचिल्लीलयापि वा॥३४॥ अवज्ञया कृतं हन्याद्दातारं नात्र संशयः॥ ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः॥३५॥ बहूनि रत्नान्यादाय राज्ञो दशरथस्य ह॥ ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत्॥३६॥ उपयाता नरव्याघ्र राजानस्तव शासनात्॥ मयापि सत्कृताः सर्वे यथार्हं राजसत्तम॥३७॥

विशिष्योक्तानीति शेषः॥३२॥ ते चेति॰ पूर्वं नियुक्ता इत्यर्थः॥ वसिष्ठाय महर्षय इति पाठः॥३३॥ अवज्ञया अनादरेण॰ लीलया अश्रद्धया॰ आवश्यकत्वादेतन्मुनः शिक्षितं॥३४॥ तदेवाह॰ अवज्ञयेति॥३५॥ रत्नानि उत्तमवस्तूनि॥३६॥३७॥

२० मानवाः चतुर्वर्णातिरिक्ताः संकरादयः ॥ २१ नमिति · मिथिलाधिपंस्वयमेवआनयेतिसंबंधः न तु दूतमात्रप्रेषणेन · कुतएवंविशेषः कुतश्चतदानयनस्यप्रथममुपदेशः तत्राह · पूर्वसंबंधिनं ·

निमंत्रयस्वनृपतीन्पृथिव्यांयेचधार्मिकाः ॥ ब्राह्मणान्क्षत्रियान्वैश्यांछूद्रांश्चैवसहस्रशः ॥ २० समानयस्वसत्कृत्यसर्वदेशेषुमानवान् ॥ मिथिलाधिपतिंशूरंजनकंसत्यवादिनम् ॥ २१ ॥ तमानयमहाभागंस्वयमेवसुसत्कृतं ॥ पूर्वसंबंधिनंज्ञात्वाततः पूर्वंब्रवीमिते ॥ २२ ॥ तथाकाशीपतिंस्निग्धंसततंप्रियवादिनम् ॥ सद्वृत्तंदेवसंकाशंस्वयमेवानयस्वह ॥ २३ ॥ तथाकेकयराजानंवृद्धंपरमधार्मिकम् ॥ श्वशुरंराजसिंहस्यसपुत्रंतमिहानय ॥ २४ अंगेश्वरंमहेष्वासंरोमपादंसुसत्कृतं ॥ वयस्यंराजसिंहस्यसपुत्रंतमिहानय ॥ २५ तथाकोसलराजानंभानुमंतंसुसत्कृतं ॥ मगधाधिपतिंशूरंसर्वशास्त्रविशारदम् ॥ २६ ॥ प्राप्तिज्ञं परमोदारंसत्कृतंपुरुषर्षभम् ॥ राज्ञःशासनमादायचोदयस्वनृपर्षभान् ॥ २७ ॥

पूर्व ॥ स्मिन्नेवकालेभाविनंसंबंधिनं · समस्तपाठेमयूरव्यंसकादित्वात्समासः तंयोगबलेनज्ञात्वा · ततोहेतोः भाविसंबंधित्वाद्धेतोः सर्वेभ्यः पूर्वंपूर्वकालेतदानयनंब्रवीमीत्यर्थः ॥ २२ २३ ॥ केकयराजानमिति अनित्यत्वात्समासांताभावः ॥ २४ ॥ २५ ॥ २६ ॥ सत्कृतंयथाभवतितथानयस्वेतिशेषः

अथेति। अश्वोत्सर्गानंतरं वर्षे पूर्णे तस्मिन् अश्वे सदः प्राप्ते सति कर्म प्रावर्ततेत्यर्थः। अत्र त्रिंशद्दि-
नात्मकसावनमासपरिच्छिन्नो वत्सरः॥१॥ ऋष्यशृंगमिति। अनेन प्राधानार्त्विज्यं ब्रह्मत्वं तस्यागम्य-
ते इति कतकः॥ अग्रे पुत्रेष्टिविधिं तेहं करिष्यामीति ऋष्यशृंगोक्तेर्जुहावाग्नौ च तेजस्वीति ऋष्य-
शृंगं प्रक्रम्य वाल्मीक्युक्तेश्चाध्वर्यवमस्येति युक्तम्॥२॥ कर्मेति। वेदपारगाः। अधीतवेदस्य फ-

अथ संवत्सरे पूर्णे तस्मिन्प्राप्ते तुरंगमे॥ सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोभ्यवर्तत॥१॥
ऋष्यशृंगं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः॥ अश्वमेधे महायज्ञे राज्ञोस्य सुमहात्मनः॥२॥
कर्म कुर्वंति विधिवद्याजका वेदपारगाः॥ यथाविधि यथान्यायं परिक्रामंति शास्त्रतः॥३॥
प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः॥ चक्रुश्च विधिवत्सर्वमधिकं कर्म शास्त्रतः॥४॥
अभिपूज्य तदा हृष्टाः सर्वे चक्रुर्यथाविधि। प्रातःसवनपूर्वाणि कर्माणि मुनिपुंगवाः॥५॥

लवदर्थाववोधं गच्छंतिप्राप्नुवंति। ते याजकाः ऋत्विजः यथाविधि कल्पसूत्रार्थकथनानति-
क्रमेण। न्यायो वृत्तान्तो वाहिका पूर्वमीमांसा। तं चानतिक्रम्य परिक्रामंति शास्त्रोक्तस्वस्वक्रिया-
क्रमकालमविस्मृत्य प्रवर्तंते॥३॥ प्रवर्ग्यं आराद् उपकारकं कर्म विशेषं। उपसदं द्रुष्टि विशेषं।
अधिकं प्रकृतसुपदिष्टं गातिदेशात् तत्तद्विकृत्यपेक्षितो विशेषोऽधिकं कर्म॥४॥ अभिपू-
ज्येति। तत्तत्कर्मपूज्यां देवतामिति शेषः। यथा। यथाविधि प्रातःसवनादिकमविशेषः॥५॥

60

यज्ञियं यज्ञोपयोगि· स्रुक्स्रुवादि संभाररूपम्· अंतिकांतसमीपे वर्तमानमित्यर्थः॥३८॥ मनसे
वेति· क्षिप्रसिद्धत्वोपकरणसौख्यव ज्ञापनायोत्प्रेक्षेयम्॥३९॥ वसिष्ठवचनादित्यत्र वसिष्ठेति

यज्ञियं च कृतं सर्वं पुरुषैः सुसमाहितैः॥ निर्यातु च भवान्यष्टुं यज्ञायतनमंतिकात्
३८ सर्वकामैरुपस्तैरुपेतं वै समंततः॥ इष्टुमर्हसि राजेंद्र मनसेव विनिर्मितम्॥३९॥
तथा वसिष्ठवचनादृष्यश्रृंगस्य चोभयोः॥ दिवसे शुभनक्षत्रे निर्यातो जगतीपतिः॥४०॥
ततो वसिष्ठप्रमुखाः सर्व एव द्विजोत्तमाः॥ ऋष्यश्रृंगं पुरस्कृत्य यज्ञकर्मारभंस्तदा॥४१॥
यज्ञवाटं गताः सर्वे यथाशास्त्रं यथाविधि॥ श्रीमांश्च सह पत्नीभी राजा दीक्षामुपाविश
त्॥४२॥ इत्यार्षे श्रीरामायणे वाल्मीकिये बालकांडे त्रयोदशः सर्गः॥१३॥ श्री

लुप्तविभक्तिकं पृथक्पदं· वसिष्ठस्य ऋष्यश्रृंगस्य च प्रत्येकं उभयोश्च मिलितयोर्वचनात्
४०॥ आरभंत्रिति छांदसम्॥४१॥ यज्ञवाटमित्यर्धं पूर्वान्वयि· शास्त्रं कल्पसूत्रादि· विधिस्त
दुक्तप्रकारः॥४२॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे त्रयोदशः सर्गः
॥१३॥

रामा॰बा॰
६१

61

ब्राह्मणा इति त्रैवर्णिकोपलक्षणं द्विजत्वात् । नाथवंतः दासाः शूद्रा इति यावत् । तापसाः शैवादि
मार्गमाश्रिताः शूद्राः श्रमणाः बौधसंन्यासिनः यद्वा श्रमणपदं संन्यास्युपलक्षणं ॥ १२ ॥ न तृप्तिरु
पलभ्यते भोज्यसौष्ठवात् उदरपूर्तावपि सातिशयलोभेन मानसी तृप्तिर्नोपलभ्यते इत्य

ब्राह्मणा भुंजते नित्यं नाथवंतश्च भुंजते । तापसा भुंजते चापि श्रमणाश्चैव भुंजते ॥ १२ ॥
वृद्धाश्च व्याधिताश्चैव स्त्री बालाश्च तथैव च । अनिशं भुंजमानानां न तृप्तिरुपलभ्यते ॥ १३ ॥
दीयतां दीयतामन्नं वासांसि विविधानि च । इति संचोदितास्तत्र तथा चक्रुरनेकशः ॥ १४ ॥
अन्नकूटाश्च दृश्यंते बहवः पर्वतोपमाः । दिवसे दिवसे तत्र सिद्धस्य विधिवत्तदा ॥ १५ ॥
नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्तथा । अन्नपानैः सुविहितास्तस्मिन्यज्ञे महात्मनः ॥
१६ ॥ अन्नं हि विधिवत्स्वादु प्रशंसंति द्विजर्षभाः । अहो तृप्ताः स्म भद्रं त इति शुश्राव राघवः
॥ १७ ॥

र्थः । यद्वा अनिशं भुंजानेष्वपि जनेषु यजमानस्य तृप्तिरलं बुद्धिर्नासीदित्यर्थः ॥ १३ ॥ १४ ॥ अन्नेति
लुप्तषष्ठीकं पृथक् पदं तस्य सिद्धस्येति पक्वस्येत्यर्थः विशेषणं । विधिवत् सूदशास्त्रो
क्तप्रकारेण सिद्धस्येत्यन्वयः ॥ १५ ॥ सुविहिताः सुविहिततृप्तिकाः ॥ १६ ॥ अन्नमिति । स्वादु अन्नं भुक्ते
ति शेषः प्रशंसाकारमाह । अहो तृप्ताः स्म भद्रं त इति । इति प्रशंसां राघवः शुश्रावेत्यन्वयः यद्वा विधि

राम
६१

रोंड्रः इंद्रदेवताको हविर्भागः दत्तः राजा सोमलता च अभिषुतः ग्रावभिः संक्रद्यनिः सारिसारः ६
तृतीयेति यथेत्यस्य यथाविधीत्यर्थः ॥७॥ शिक्षाक्षरसमन्विते ॥ शिक्षा अभ्यासकालः तत्र गृहीतानि अक्षराणि शिक्षाक्षराणि तत्समन्विते स्वरतो वर्णतश्च अहीने रितियावत् । ऋष्यशृंगा

रोंद्रश्च विधिवद्दत्तो राजा चाभिषुतोनघः ॥ मध्यंदिनंच सवनं प्रावर्तत यथाक्रमम् ॥६॥
तृतीयसवनं चैव राज्ञोस्य सुमहात्मनः ॥ चक्रुस्ते शास्त्रतो दृष्ट्वा यथा ब्राह्मणपुंगवाः ॥७॥
आह्वयांचक्रिरे तत्र शक्रादीन् विबुधोत्तमान् ॥ ऋष्यशृंगादयो मंत्रैः शिक्षाक्षरसमन्विते ॥८॥
गीतिभिर्मधुरैः स्निग्धैर्मंत्राह्वानैर्यथार्हतः ॥ होतारो ददुरावाह्य हविर्भागान् दिवौकसाम् ॥९॥
न चाहुतमभूत्तत्र स्खलितं वा न किंचन ॥ दृश्यते ब्रह्मवत्सर्वं क्षेमयुक्तं हि चक्रिरे ॥१०॥ न
तेष्वहःसु श्रांतो वा क्षुधितो वा न दृश्यते ॥ नाविद्वान् ब्राह्मणः कश्चिन्नाशतानुचरस्तथा ॥११॥

दय इत्यत्रादिशब्दः ॥ प्रधानवची भीष्मादिश्च सुयोधन इतिवत् ॥८॥ गीतिभिः सामभिः ॥९॥
नचेति । अहुतं अन्यथाहुतं स्खलितं अज्ञानतो न किमपि कर्मन्यक्तं ॥ ब्रह्मवत् मंत्रवत्
क्षेमयुक्तं क्षेमो विघ्नपराधराहित्यं यद्वा क्षेमो विघ्नराहित्यं ॥१०॥ नेति श्रांतः स्वस्वार्थिज्या
शक्तः ॥ अशतानुचरः शतसेवकरहितः ॥११॥

श्लेष्मातकौ रज्जुदालस्तन्मयावाकीयूपः॥ अश्वमेधे दिघ्न उपदिघ्न इत्यर्थः श्लेष्मातकमयो गृध्नइ
तिपाठे अग्निष्ठः अग्न्यभिमुखः॥ तथा देवदारुमयोप्यस्ति यूपः सचनैको नापिषट् किंतु द्वौतौ
व्यस्तबाहुर्भातावदायामेनपरिग्रहः स्वीकारोययोस्तौ॰ एवंचैकविंशतिरश्वमेधेयूपाइत्यु

श्लेष्मातकमयोदिष्टो देवदारुमयस्तथा॥ द्वावेवतत्रविहितौ बाहुव्यस्तपरिग्रहौ॥२३॥
कारिताः सर्वएवैते शास्त्रज्ञैर्यज्ञकोविदैः॥ शोभार्थंतस्ययज्ञस्य कांचनालंकृताभवन्॥२४॥
एकविंशतियूपास्ते एकविंशत्यरत्नयः॥ वासोभिरेकविंशद्भिरेकैकंसमलंकृताः॥२५॥
विन्यस्ताविधिवत्सर्वे शिल्पिभिः सुकृतादृढाः॥ अष्टाश्रयः सर्वएवश्लक्ष्णरूपसमन्विताः
॥२६॥

कं॰ तेचतत्सूत्रकृत्योः प्रसिद्धाइत्यन्यत्रविस्तरः॥२३॥ कांचनालंकृताभवन्नित्यत्रअडभावश्छांद
सः॥ शास्त्रज्ञैः शास्त्रे शिल्पशास्त्रे शुल्वशास्त्रेच॥२४॥ महोछ्रायपरीणाहोयूपोन्यः सर्वकांचनः
यज्ञेसमभवत्तन्नशोभार्थमुपकल्पितइतिकचित्पाठः॥ एकेति॰ अरत्नि र्नामचतुर्विंशत्यङ्गु
लयः॥२५॥ अष्टाश्रयः अष्टिः कोणाः तत्त्वणविशेषेणश्लक्ष्णास्पर्शवतास्वरूपेणयुक्ताः॥२६॥

स्वलंकृता इति॰ अनेनराजकृतोयज्ञपरिचारकसत्कारोध्वनितः तान्परिवेषयित्वन्॰ अन्येतत्सहाय
भूताः भोक्तृबाहुल्येनपरिवेषणस्य अनल्पायाससाध्यत्वात्॰ पाकशालानोन्नप्रापकास्तत्सहायाः अत
एवतस्यस्वसाध्यत्वात्पुरुषकर्तृकत्वं ॥१८॥ कर्मांतरेइति॰ एकसवनंसमाप्यपुनः सवनांतरारंभ

स्वलंकृताश्चपुरुषाब्राह्मणान्पर्यवेषयन् ॥ उपासंतेचतानन्येसुमृष्टमणिकुंडलाः ॥१८॥
कर्मांतरेतदाविप्राहेतुवादान्बहूनपि ॥ प्राहुः सुवाग्मिनोधीराः परस्परजिगीषया ॥१९॥
दिवसेदिवसेतत्रसंस्तरेकुशलाद्विजाः ॥ सर्वकर्माणिचक्रुस्तेयथाशास्त्रंप्रचोदिताः ॥२०॥
नाषडंगविदत्रासीन्नाव्रतोनाबहुश्रुतः ॥ सदस्यास्तस्यवैराज्ञोनावादकुशलाद्विजः ॥२१॥
प्राप्तेयूपोच्छ्रयेतस्मिन्षड्बैल्वाः खादिरास्तथा ॥ तावंतोबिल्वसहिताः पर्णिनश्चतथापरे ॥२२॥

कालागमात्॰ पूर्वस्मिन्नंतरालकालेहेतुवादान् हेतूपन्यासपूर्वकान्वादान् चक्रुः ॥१९॥ संस्तरे
यज्ञेप्रचोदिताः शास्त्रीयैः ब्रह्मिप्रैष्यादिशब्दैः प्रेरिताइत्यर्थः ॥२०॥ सदस्याविधिदर्शिनः ॥२१॥ यूपो
च्छ्रयेयूपोत्क्षेपणप्रैषकाले॰ तथाखादिरास्तावंतः षट्संख्याकाः बिल्वसहिताः एकैकबिल्वयूप
समीपेस्थिताः परेअन्ये॰ पर्णिनः ॥ पालाशाः यूपास्तेपिषडितितथाशब्दार्थः ॥२२॥ ॥

शामित्रेमारणविशसनादिकर्मणि॥३१॥नियतंवद्धं॰अश्वरत्नेषुउत्तमंश्रेष्ठं नियतमित्यनुकर्षः॥३२॥
कौसल्येति॰ परिचर्यप्रोक्षणादिनासंस्कृत्य॰ त्रिभिःकृपाणैः असिभिःएनंअश्वंविशशासः अस्यवि

शामित्रेतुहयस्तत्रतथाजलचराश्चये॥ऋषिभिःसर्वमेवैतन्नियुक्तंशास्त्रतस्तदा॥३१॥
पशूनांत्रिशतंतत्रयूपेषुनियतंतदा॥अश्वरत्नोत्तमंतत्रराज्ञोदशरथस्यह॥३२॥कौ
सल्यातंहयंतत्रपरिचर्यसमंततः॥कृपाणैर्विशशासैनंत्रिभिःपरमयामुदा॥३३॥
पतत्रिणातदासार्धंसुस्थितेनचचेतसा॥अवसद्रजनीमेकांकौसल्याधर्मकाम्यया॥३४॥

शसनंकृतवतीमहिष्यश्वास्याक्षिनाकल्पयंतीतिसूत्रात्॥३३॥पतत्रिणेति॰ पुराअश्वानांप
क्षाःसंतीतिप्रसिद्धाएवंवादः॥पतत्रिणागरुडवेगेनेत्यर्थइत्यन्ये॰सुस्थितेनस्थिरेणचेतसा
उपलक्षितासतीकौसल्याधर्मेच्छयाएकांरजनींअश्वेनसहअवसत्॥३४॥ ॥

·63

यथा सप्तर्षयो विराजंते तथा यूपा विराजंते इत्यर्थः ॥२७॥ इष्टका इति यथान्यायं यथासूत्रं अर्धेष्ट
कामंडलेष्टकादयश्च कारिताः शुल्वविद्भिरिति शेषः । अग्निः अग्न्याधारभूतो देशः सब्राह्मणैः इष्ट
काभिश्चितो बद्ध इत्यर्थः शुल्वकर्माणीति पाठे शुल्वसूत्रोक्तकर्माणीत्यर्थः केचित्तु तत्र इष्टकाब
द्धदेशो अग्निः चितः स्थापित इत्यर्थं इत्याहुः ॥२८॥ स चित्यः अग्निः संचितः स्थापितः कथं संचित

आच्छादितास्ते वासोभिः पुष्पैर्गंधैश्च पूजिताः ॥ सप्तर्षयो दीप्तिमंतो विराजंते यथा दिवि
॥२७॥ इष्टकाश्च यथान्यायं कारिताश्च प्रमाणतः ॥ चितोग्निर्ब्राह्मणैस्तत्र कुशलैः शिल्पकर्मणि
॥२८॥ स चित्यो राजसिंहस्य संचितः कुशलैर्द्विजैः ॥ गरुडो रुक्मपक्षो वै त्रिगुणोष्टा
दशात्मकः ॥२९॥ नियुक्तास्तत्र पशवस्तत्तदुद्दिश्य दैवतम् ॥ उरगाः पक्षिणश्चैव यथा
शास्त्रप्रचोदिताः ॥३०॥

इत्यत्राह । गरुडः गरुडसंस्थानः रुक्मपक्षः सह स्वं हिरण्यशकलैः प्रतिदिशमग्निं प्रोक्षतीति सू
त्राद्रुक्मपक्षत्वमिति केचित् । अत्र पक्षो त्रिगुणोष्टादशात्मक इत्यस्य असामंजस्यं मत्वा चितदे
शविशेषणानीमानि स्वर्णेष्टकाभिः । पक्षनिर्माणाद्रुक्मपक्षत्वमित्यन्ये । त्रिगुणः त्रिगुणप्रस्तारः
तदेवाह । अष्टादशात्मक इति । षट्चितयो भवंतीति प्रकृतो उक्तेरिति भावः ॥२९॥ यथाशास्त्रं
इंद्राय राज्ञे इत्याद्यनुवाकैः प्रतिपादिताः ॥३०॥

ल्देति· अन्येषां· अश्वमेधातिरिक्तयज्ञानां पाशुकं हविः स्वदशाखासु निधाय अवदीयते· अश्व
मेधे प्रधानस्य पशोरश्वस्य हविर्भागवेतसे कटे निधाय अवदातव्य इष्यते ॥३९॥ अहइति· अश्वमे
धस्य त्रीणि सवनीयान्यहानि· इति कल्पसूत्रेण तन्मूलब्राह्मणैश्च अश्वमेधः अह संख्यातः उ

प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः ॥ अश्वमेधस्य यज्ञस्य वैतसो भाग इष्यते ॥३९॥
त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः ॥ चतुष्टोममहस्तस्य प्रथमं परिकल्पितम् ॥४०॥
उक्थ्यं द्वितीयं संख्यातमतिरात्रं तथोत्तरं । कारितास्तत्र बहवो विहिताः शास्त्रदर्शनात् ॥४१॥
ज्योतिष्टोमायुषी चैवमतिरात्रौ च निर्मितौ ॥ अभिजिद्विश्वजितौ चैवमप्तोर्यामो महाक्रतुः ॥४२॥
प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्धनः ॥ अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशम् ॥४३॥
उद्गात्रे तु तथोदीचीं दक्षिणैषा विनिर्मिता ॥ अश्वमेधे महायज्ञे स्वयंभूविहिते पुरा ॥४४॥

क्तः सवनीयान्याह· प्राधान्यात्तानि अहोरात्राणि गणयति· चतुष्टोमशब्देन अग्निष्टोमः ॥४०॥
उत्तरं तृतीयं· शास्त्रदर्शनाद्विहिताः बहवः प्रधानाः क्रतवः तत्र कारिताः ॥४१॥ तानाह· ज्योति
रित्यादि· आयुरायुष्टोमः अतिरात्राविति द्विर्वचनात्· अतिरात्रस्य द्विः प्रयोगः तथा अप्तोर्या
माविति· महाक्रतुरिति जातावेकवचनं· एते महाक्रतव इत्यर्थः ॥४२॥ प्राचीमिति ॥४३॥ विनिर्मि

69

अथहोत्रादयःमहिष्याकृताभिषेकया·परिवृत्याराज्ञोभोगाद्बहिष्कृतया·।दास्याचसहवावातांराज्ञो
वल्लभांभुजिष्यांअश्वेनसमयोजयन्नितिसंबंधइतिकेचित्·।अपरेतुवावाताशब्दोराज्ञःमध्यम
जातीयद्वितीयभार्यावाची।।तदुक्तमैतरेयब्राह्मणभाष्येतृतीयपंचिकास्थद्वाविंशतिखंडस्थ
वावातेतिप्रतीकव्याख्यानावसरे·राज्ञांहित्रिविधास्त्रियःउत्तममध्यमाधमजातीयास्तासांमध्ये

होताध्वर्युस्तथोद्गाताहयेनसमयोजयन्।।महिष्यापरिवृत्याथवावातामपरांतथा।।३५।।
पतत्रिणस्तस्यवपामुद्धृत्यनियतेंद्रियः।।ऋत्विक्परमसंपन्नःश्रपयामासशास्त्रतः।।३६।।
धूमगंधंवपायास्तुजिघ्रतिस्मनराधिपः।।यथाकालंयथान्यायंनिर्णुदन्पापमात्मनः।।३७।।
हयस्ययानिचांगानितानिसर्वाणिब्राह्मणाः।।अग्नौप्रास्यंतिविधिवत्समस्ताःषोडशर्त्विजः।।३८।।

उत्तमजातेःक्षत्रियायामहिषीतिनाम·मध्यमजातेर्वैश्यायाःवावातेति·।अधमजातेःशूद्रायाःपरिवृ
त्तिरिति·अतएवाश्वलायनसूत्रेदशमाध्यायेऽष्टमखंडस्थवावातेतिप्रतीकंगृहीत्वाद्वितीया
भार्येतिव्याख्यानंनारायणवृत्तिकृता।।३५।।वपांचंद्राख्यंमेदः·चंद्रनाममेदोस्तितदुद्धृत्येतिनास्य
विद्यतइतिसूत्रात्·परमेणश्रौतप्रयोगचातुर्येणसंपन्नःयुक्तः।।३६।।नराधिपोदशरथः।।३७।।हय
स्येति·सर्वाणिब्राह्मणइत्यत्रगुरोरपिलघूच्चारणतयालघुकार्यकरत्वस्यछंदःशास्त्रेउक्तत्वात्·नछंदो

सुवर्णं षोडशमाषकं चतुर्गुणं चत्वारिंशत्कोटिः ततः सर्वऋत्विजः सहिताः दक्षिणाप्राप्तं वसुधनं
स्वीकृत्य विभागाय ऋष्यशृंग वसिष्ठाभ्यां प्रददुः॥५१॥ तदाह ऋषीति प्रविभागं कृत्वा वासिष्ठा
दि द्वारा विभज्य गृह्णीत्वेत्यर्थः॥५२॥ सुप्रीतेति संतुष्टाः संतः अत्यंतं मुदिताः स्म इत्यूचुः राजा

दशकोटीः सुवर्णस्य रजतस्य चतुर्गुणं॥ ऋत्विजस्तु ततः सर्वे प्रददुः सहिता वसु॥५१॥
ऋष्यशृंगाय मुनये वसिष्ठाय च धीमते॥ ततस्ते न्यायतः कृत्वा प्रविभागं द्विजोत्तमाः॥५२॥
सुप्रीतमनसः सर्वे प्रत्यूचुर्मुदिता भृशम्॥ ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः॥५३॥
जांबूनदं कोटिसंख्यं ब्राह्मणेभ्यो ददौ तदा॥ दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम्॥५४॥
कस्मैचिद्याचमानाय ददौ राघवनंदनः॥ ततः प्रीतेषु विधिवद्द्विजेषु द्विजवत्सलः॥५५॥
प्रणाममकरोत्तेषां हर्षव्याकुलितेंद्रियः॥ तस्याशिषोऽथ विविधा ब्राह्मणैः समुदाहृताः॥५६॥
उदारस्य नृवीरस्य धरण्यां पतितस्य च॥ ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम्॥५७॥

नमिति शेषः प्रसर्पकेभ्यः अभ्यागतेभ्यः॥५३॥ जांबूनदं जंबूप्रभवं सुवर्णम् कोटिशब्दोऽनंत
वाची अथ सर्वदक्षिणादानानंतरं याचमानाय दरिद्राय कस्मैचित् दातव्यवस्त्वंतराभावा
त् हस्ताभरणमेव ददौ॥५४॥ ततस्तेन हस्ताभरणदानेनेत्यर्थः॥५५॥ विविधा आशिषः आब्रह्म

65

क्रतुमिति· धरांचतुर्दिगवच्छिन्नां॥४५॥४६॥भवानिति· भोगैकप्रयोजान त्वाद्भूमेः तयास्माकंनकिंचित्प्र
योजनं· नापिचोरादिभ्योरक्षणेवयंशक्ताः॥४७॥तत्रहेतुमाह· रताइति· स्वाध्यायो वेदाध्ययनं· तेन
दंड|दावस्माकमधिकारोपिनेतिध्वनितम्॥भूमिपेत्यनेननतवैवैषायोग्येति· त्वमेवनिष्क्रयेणपुन

क्रतुंसमाप्यतुतदाम्नायतः पुरुषर्षभः॥ऋत्विग्भ्योहिददौराजाधरांतांकुलवर्धनः॥४५॥
एवंदत्वाप्रहृष्टेभ्यःश्रीमान्नित्त्वाकुनन्दनः॥ऋत्विजस्त्वब्रुवन्सर्वेराजानंगतकिल्बिषं॥४६॥
भवानेवमहींकृत्स्नामेकोरक्षितुमर्हति॥नभूम्याकार्यमस्माकंनहिशक्ताःस्मपालने॥४७॥
रताःस्वाध्यायकरणेवयंनित्यंहिभूमिप॥निष्क्रयंकिंचिदेवेहप्रयच्छतुभवानिति॥४८॥
मणिरत्नंसुवर्णंवागावोयद्वासमुद्यतं॥तत्प्रयच्छनरश्रेष्ठधरण्यानप्रयोजनं॥४९॥
एवमुक्तोनरपतिर्ब्राह्मणैर्वेदपारगैः॥गवांशतसहस्राणिदशतेभ्योददौनृपः॥५०॥

रिमांगृह्णाणेतिसूचितम्· तदाहनिष्क्रयमिति· मूल्यमित्यर्थः ननुभुवोमूल्यंदातुमशक्तोऽह
तः किंचिदेवेति·॥४८॥किंचित्पदार्थानाह· मणिरत्नंअनर्घ्यरत्नं· तस्यापिराजार्हत्वादाह· सुवर्ण
मिति· यद्वासमुद्यतंउपस्थितंयत्किंचिदेवभवच्छक्तमित्यर्थः॥४९॥शतसहस्राणि· दशल
क्षमितियावत्॥५०॥

किमब्रवीत्तदाह॰ इष्टिमिति ॥ पुत्रीयां पुत्रप्राप्तिकारणभूतां॰ पुत्रकारणात्पुत्रप्राप्तिहेतोः ॥ आथर्वेवेदप्रोक्तैर्मंत्रैः विधानतः कल्पसूत्रतः सिद्धां नियतफलत्वेन प्रसिद्धां॰ इष्टिं करिष्यामीत्युक्तेति

इष्टिंतेहंकरिष्यामिपुत्रीयांपुत्रकारणात् ॥ अथर्वशिरसिप्रोक्तैर्मंत्रैः सिद्धांविधानतः ॥२॥ ततःप्राक्रमदिष्टिंतांपुत्रीयांपुत्रकारणात् ॥ जुहावाग्नौचतेजस्वीमंत्रदृष्टेनकर्मणा ॥३॥ ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः ॥ भागप्रतिग्रहार्थंवैसमवेतायथाविधि ॥४॥ ताःसमेत्ययथान्यायंतस्मिन्सदसिदेवताः ॥ अब्रुवंल्लोककर्त्तारंब्रह्माणंवचनंततः ॥५॥ भगवंस्त्वत्प्रसादेनरावणोनामराक्षसः ॥ सर्वान्नोबाधतेवीर्याच्छासितुंतंनशक्नुमः ॥६॥ त्वयातस्मैवरोदत्तःप्रीतेनभगवंस्तदा ॥ मानयंतश्चतन्नित्तं सर्वंतस्यक्षमामहे ॥७॥

शेषः ॥२॥ नतइति॰ मंत्रदृष्टेन॰ मंत्रपूर्वकतया कल्पसूत्रे दृष्टेन ॥३॥ ततइति॰ तत्रैत्यर्थः ॥४॥ ताइति॰ समेत्य अंतर्धानशक्त्याइतरानवलोकमितिशेषः ॥५॥ ६ कुतस्तस्ययुष्मद्बाधनक्षमवीर्यलाभइत्यतआह॰ त्वयेति॰ मानयंतः सर्वदेवतावध्यत्वरूपंत्वद्दत्तवरंपरिपालयंतइत्यर्थः ॥७॥

स्वर्नयनं स्वर्गप्रापकं दुस्तरं प्राकृतैराजभिरप्राप्तसमाप्तिकं ॥ ५८ ॥ कुलस्य वर्धनं तादृशं कर्म ॥ ५९ ॥ पुनर
प्युवाच पुत्रजनककर्मणो पुनरपि प्रेरयामासेत्यर्थः ॥ ६० ॥ यद्यपि पुत्रकामेष्ट्यैव पुत्रप्राप्तिः संभ
वति तथापि तपोरतस्य वैश्यस्य श्रमणस्य वधे नहि वियोगातुरतपोरततन्माता पित्रमरणेन च ब्रह्म

पापापहं स्वर्नयनं दुस्तरं पार्थिवर्षभैः ॥ ततोऽब्रवीदृश्यशृंगं राजा दशरथस्तदा ॥ ५८ ॥ कुल
स्य वर्धनं तत्तु कर्तुमर्हसि सुव्रत ॥ तथेति च स राजानमुवाच द्विजसत्तमः ॥ ५९ ॥ भविष्यंति
सुता राजंश्चत्वारस्ते कुलोद्वहाः ॥ ६० ॥ स तस्य वाक्यं मधुरं निशम्य प्रणिपत्य तस्मै प्रयतो न
पेंद्रः ॥ जगाम हर्षं परमं महात्मा तमृष्यशृंगं पुनरप्युवाच ॥ ६१ ॥ इत्यार्षे श्रीरामायणे वाल्मी
किये बालकांडे चतुर्दशः सर्गः ॥ १४ ॥ मेधावी तु ततो ध्यात्वा स किंचिदिदमुत्तरं ॥ लब्धसं
ज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत् ॥ १ ॥

वधसमपापोत्पत्तिस्तत्प्रायश्चित्तत्वेनाश्वमेधानुष्ठा
नं बोध्यं ॥ ६१ ॥ इति श्रीरामाभिरामे चतुर्दशः सर्गः ॥ १४ ॥ मेधावीति मेधावी अशेषवेदशाखाधा
रणायोग्यबुद्धिमान् वेदज्ञः स्वरूपतोऽर्थश्च वेदतत्त्ववित् सऋष्यशृंगः प्रतिश्रुतार्थनिर्वा
हाय किं कर्तव्यमिति निश्चेतुं किंचित्कालं ध्यात्वा समाधिं कृत्वा इदमुत्तरं इदमिह उत्तरानु
ष्ठेयं कृत्यमिति निश्चित्य पश्चात् लब्धसंज्ञः समाध्युत्थितः तं नृपमब्रवीत् ॥ १ ॥ ॥

१५॥तस्मिन्नंतरे सर्वदेवतासंतोषकाले विष्णुः सदाभूभारोद्धारादिकर्त्ता॥१६॥ वैनतेयो गरुडः केयूरं बाहुभूषणं॥१७॥ ब्रह्मणा चेति॰ वंद्यमान इत्यनुकृष्यते॰ समागत्येति॰ सब्रह्मभिर्देवैर्मिलि

एतच्छ्रुत्वाप्रियंवाक्यंब्रह्मणासमुदाहृतं॥देवामहर्षयःसर्वेप्रहृष्टास्तेभवंस्तदा॥१५॥
एतस्मिन्नंतरेविष्णुरुपयातोमहाद्युतिः॥शंखचक्रगदापाणिःपीतवासाजगत्पतिः॥१६॥
वैनतेयंसमारुह्यभास्करस्तोयदंयथा॥तप्तहाटककेयूरोवंद्यमानःसुरोत्तमैः॥१७॥
ब्रह्मणाचसमागम्यतत्रतस्थौसमाहितः॥तमब्रुवन्सुराःसर्वेतमभिष्टूयसन्नताः॥१८॥
त्वांनियोक्ष्यामहेविष्णोलोकानांहितकाम्यया॥राज्ञोदशरथस्यत्वमयोध्याधिपतेर्विभो॥१९॥
धर्मज्ञस्यवदान्यस्यमहर्षिसमतेजसः॥अस्यभार्यासुतिसृषुह्रीश्रीकीर्त्युपमासुच॥२०॥

त्वासमाहितः देवकार्यतत्परः समभिष्टूय सम्यक्स्तुत्वा सन्नताः प्रणताः॥१८॥ त्वामिति॰ अस्मद्दुःखहरणस्य त्वदेकसाध्यत्वात्॰ अवतंतुं नियोक्ष्यामहे॰ तदेवाह॰ राज्ञ इत्यादिना॥१९॥ धर्मज्ञस्येत्यादिराजविशेषणानि ह्रीः श्रीरित्यादिराजपत्नीविशेषणांच॰ अवतारयोग्यताध्वननाय॥२०॥

उच्छ्रितान् संपत्त्यादिभिरधिकान्. त्रिदशराजानमिति समासांतो ऽनित्यत्वान्न कृतः॥ प्रधर्षयितुमिच्छतीत्यु
क्ते रेतदुत्तरकालमिंद्रजित्कृतबंधइतिजायते॥८॥ असुरान् राहुप्रमुखान्॥९॥ प्रतपति प्रतापयतीति॥

उच्छ्रितान् द्वेष्टि दुर्मतिः॥ शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति॥८॥
ऋषीन् यक्षान् सगंधर्वान् ब्राह्मणान् असुरांस्तथा॥ अतिक्रामति दुर्धर्षो वरदानेन मोहितः॥९॥
नैनं सूर्यः प्रतपति पार्श्वे वाति न मारुतः॥ चलोर्मिमाली तं दृष्ट्वा समुद्रोऽपि न कंपते॥१०॥ तन्म
हन्नो भयं तस्माद्राक्षसाद्घोरदर्शनात्॥ वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि॥११॥
एवमुक्तः सुरैः सर्वैश्चिंतयित्वा ततोऽब्रवीत्॥ हंतायं विदितस्तस्य वधोपायो दुरात्मनः॥१२॥
तेन गंधर्वयक्षाणां देवतानां च रक्षसां॥ अवध्योऽस्मीति वागुक्ता तथेत्युक्तं च तन्मया॥१३॥
नाकीर्तयदवज्ञानात्तद्रक्षो मानुषांस्तदा॥ तस्मात्स मानुषाद्वध्यो मृत्युर्नान्योऽस्य विद्यते॥१४॥

त्यर्थः॥ क्रौर्यातिशयद्योतकमेतज्ज्ञानीयं॥ न वाति नाधिकं वाति॥ चंचलोर्मिमालास्वभावोऽपि न
कंपते॥ इति विरोधालंकारः॥१०॥ न तस्मात्कारणात्॥ तस्मादुक्तगुणविशिष्टात्॥११॥ एवमिति
भगवान् ब्रह्मेति शेषः॥ हंतेत्यनुकंपायाम्॥१२॥ तेनेति॥ तत्तथास्त्वित्युक्तमिति योजना॥१३॥ नेति॥ त
दा वरणसमये मृत्युर्मृत्युजनकः॥१४॥

धर्मसंहितान्॰ धर्मसहितानित्यर्थः धर्मसंहितमिति पाठः ।२७।२८। हत्वेति॰ हत्वा वत्स्यामीति योजना
२९।३०। मानुष्यमिति॰ मनुष्यलोके यथा देवे राज्ञस्तथा आत्मनः जन्मभूमिं चिंतयामास॰ योग्य
त्वेन विचारयामास॰ ततः विचारानंतरं ।३१। रोचयामास ऐक्षत॰ स्तुतिभिस्तुष्टुवुः ।३२। स्तुत्वा

पितामहपुरोगांस्तान्सर्वलोकनमस्कृतः ॥ अब्रवीत्त्रिदशान्सर्वान्समेतान्धर्मसंहितान् ।२७
भयं त्यजत भद्रं वो हितार्थं युधि रावणं ॥ सपुत्रपौत्रं सामात्यं समंत्रिज्ञातिबांधवं ॥२८॥
हत्वा क्रूरं दुराधर्षं देवर्षीणां भयावहं ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥२९॥ व
त्स्यामि मानुषे लोके पालयन्पृथिवीमिमां ॥ एवं दत्वा वरं देवो देवानां विष्णुरात्मवान्
।३०। मानुष्ये चिंतयामास जन्मभूमिमथात्मनः ॥ ततः पद्मपलाशाक्षः कृत्वात्मानं चतुः
र्विधं ।३१। पितरं रोचयामास तदा दशरथं नृपं ॥ ततो देवर्षिगंधर्वाः सरुद्राः साप्सरोगणाः
स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनं ।३२। तमुद्धतं रावणमुग्रतेजसं प्रवृद्धदर्पं त्रि
दशेश्वरद्विषं ॥ विरावणं साधुतपस्विकंटकं तपस्विनामुद्धर तं भयावहम् ।३३।

च॰ यदूचुस्तदाह॰ तमिति॰ रावणं उद्धर समूलमुन्मूलय विरावणं॰ विशेषेण त्रिलोकीक्रंदनं॰
तपस्विनां भयावहमित्यन्वयः रावणस्मरणेनातिभीतचित्तानां देवानामुक्तौ तमित्यस्य पुनरुक्ति
र्न दोषाय॰ ।अत्र इंद्रादिदेवानां स पितामहानां नियोजकत्वं विभोश्च नियोज्यत्वं न दोषः लीलात्वा दि

दिपस्वालिख्यः।३६

आत्मानं सोपकरणात्मानं। अन्येषु: पांचजन्यात्मा केकेयां भरतो भवेत्॥ तदन्येषु: सुमित्रायामनंतात्मा च लक्ष्मण: सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत्प्रियेइति पाद्मोक्तेः॥ अत्रात्मानमित्युक्त्याशंखचक्रानंतानामपि भगवद्रूपतासूचिता॥ हुंकारेण भगवानिव पांचजन्यः शब्दमात्रेण सकलभु

विष्णोः पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधं॥ तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककंटकम्॥२१॥
अवध्यं देवतैर्विष्णो समरे जहि रावणम्॥ स हि देवान्सगंधर्वान्सिद्धांश्च ऋषिसत्तमान्॥२२॥
राक्षसो रावणो मूर्खो वीर्योद्रेकेण बाधते॥ ऋषयश्च ततस्तेन गंधर्वाप्सरसस्तथा॥२३॥
क्रीडंतो नंदनवने रौद्रेण विनिपातिताः॥ वधार्थं वयमायातास्तस्य वै मुनिभिः सह॥२४॥
सिद्धगंधर्वयक्षाश्च ततस्त्वां शरणं गताः॥ त्वं गतिः परमा देव सर्वेषां नः परंतप॥२५॥ वधाय देवशत्रूणां नृणां लोके मनः कुरु॥ एवं स्तुतस्तु देवेशो विष्णुस्त्रिदशपुंगवः॥२६॥

वनक्षोभकत्वाद्धि मूलत्वात्प्रवृत्तत्वादेवेति बोध्यं चतुर्विधमिति। चातुर्विध्यविधानं रावणे इंद्रजित्त्ववणगंधर्ववधादीनां प्रत्येकं देवकार्यरूपाणां सद्भावात्॥२१॥ कुतो ममैव नियोगस्तत्राह। अवध्यमिति॥२२॥२३॥ रौद्रेण क्रूरेण कृत्यविचारशून्येन। वधार्थं वधप्रार्थनार्थम्॥२४॥२५॥ वधायेति। नृणां लोके इत्यस्य अवनरित्विति शेषः॥२६॥

संतुष्ट इति· मानुषभिन्नेभ्यः प्राणिमात्रेभ्योभयंनभवेदितिवरं ददावित्यन्वयः॥५॥६॥दृष्टः निश्चितः॥७॥८॥सचापीति· दशरथोपीत्यर्थः तस्मिन्काले भगवदवतीर्णकाले· पुत्रियामितिह स्वच्छंदसः॥९॥स इति· निश्चयंअवतारविषयं आमंत्र्य साधयामीत्युक्त्वेत्यर्थः॥अंतर्धानंगत इति· तस्मादे

संतुष्टः प्रददौ तस्मै राक्षसाय वरं प्रभुः॥ नानाविधेभ्यो भूतेभ्यो भयं नान्यत्र मानुषात्॥५॥
अवज्ञाताः पुरा तेन वरदाने हि मानवाः॥ एवं पितामहात्तस्माद्वरदानेन गर्वितः॥६॥ उत्सा
दयति लोकांस्त्रीन् स्त्रियश्चाप्यपकर्षति॥ तस्मात्तस्य वधो दृष्टो मानुषेभ्यः परंतप॥७॥
इत्येतद्वचनं श्रुत्वा सुराणां विष्णुरात्मवान्॥ पितरं रोचयामास तदा दशरथं नृपं॥८॥
सचाप्यपुत्रो नृपतिस्तस्मिन्काले महाद्युतिः॥ अयजत्पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः॥९॥
स कृत्वा निश्चयं विष्णुरामंत्र्य च पितामहं॥ अंतर्धानं गतो देवैः पूज्यमानो महर्षिभिः॥१०॥ त
तो वै यजमानस्य पावकादतुलप्रभं॥ प्रादुर्भूतं महद्भूतं महावीर्यं महाबलम्॥११॥

वसमाजादितिशेषः॥१०॥तत इति· अंतर्धानानंतरमित्यर्थः॥अंतर्धाय भगवानेव स्वतेजः
संभृत पायसमादाय हुताग्नेः॥ सकाशात्प्रादुर्भवतिस्मः न त्वन्यस्य भगवत्तेजोधारणशक्ति
रस्ति·॥ तदेवाह·॥ महद्भूतमिति·॥ एको विष्णुर्महद्भूतमित्युक्तेः॥ अतुलप्रभं विद्युदादिव
त॥ दृष्टिप्रतिघातकतेजोवत्·भूतं प्राणी॥११॥

69

तमिति। तं हत्वैवेत्यन्वयः सबांधवमित्यनेन लवणादिवधसूचनं हे सुरेंद्र उपेंद्रगुप्तं अर्थात्त्वयेति शेषः। ग
तदोषकल्मषं दोषा रागादयः तद्रूपकल्मषहीनं स्वर्लोकं चैकुंठाख्यं गतज्वरः स्वभावतो निवृत्ताशे
षतापः॥ ३४॥ इति बालकांडे टीकायां पंचदशः सर्गः॥ १५॥ ततइति। नियुक्तः प्रार्थितः यद्वा आज्ञप्त इत्य

तमेव हत्वा सबलं सबांधवं विरावणं रावणमुग्रपौरुषं॥ स्वर्लोकमागच्छ गतज्वरश्चिरं
सुरेंद्रगुप्तं गतदोषकल्मषं॥ ३४॥ इत्यार्षे श्रीरामायणे बालकांडे पंचदशः सर्गः॥ १५॥ ॥
ततो नारायणो विष्णुर्नियुक्तः सुरसत्तमैः॥ जानन्नपि सुरानेवं श्लक्ष्णं वचनमब्रवीत्॥ १॥
उपायः को वधे तस्य राक्षसाधिपतेः सुराः॥ यमहं तं समास्थाय निहन्यामृषिकंटकं॥ २॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्विष्णुमव्ययं॥ मानुषं रूपमास्थाय रावणं जहि संयुगे॥ ३॥
स हि तेपे तपस्तीव्रं दीर्घकालमरिंदम॥ येन तुष्टोऽभवद्ब्रह्मा लोककृल्लोकपूर्वजः॥ ४॥

र्थः अत एव जानन्नपि वधोपायमज्ञ इव नेषामविनीतत्वत्त्वज्ञापरिहाराय तान्पप्रच्छेत्यर्थः। जा
नन्वधोपायमिति शेषः॥ १॥ उपाय इति। यमुपायमास्थाय तमहं निहन्यां स तस्य वधे उपायः क
इत्यन्वयः॥ २॥ ३॥ स हीति। लोकपूर्वजः सर्वलोकसमष्टित्वात्। हिरण्यगर्भः समवर्त्तताग्रे इति
श्रुतेश्च। यद्वा। ब्रह्मा चतुर्मुखः लोकपूर्वजत्वं च हिरण्यगर्भतादात्म्याध्यासेन॥ ४॥

देवानर्चयताहयमेधेनेतिशेषः॥१८॥देवनिर्मितंदेवेनप्रजापतिनानिर्मितं-धन्यंप्रशस्तं॥भार्याणांसंबंधसामान्येषष्ठी-भार्याभ्यइत्यर्थः॥अनुरूपमहिषीत्वयशःशीलगुणादिना॥२०॥हिरण्मयीहिरण्यविकारा॥२१॥मुदेति-अभिप्रदक्षिणांपुनःपुनःप्रदक्षिणां॥२२॥वित्तंधनं॥२३॥अ

अथोपुनरिदंवाक्यंप्राजापत्योनरोब्रवीत्॥राजन्नर्चयतादेवानद्यप्राप्तमिदंत्वया॥१८॥
इदंतुनृपशार्दूलपायसंदेवनिर्मितं॥प्रजाकरंगृहाणत्वंधन्यमारोग्यवर्धनम्॥१९॥
भार्याणामनुरूपाणामश्नीतेतिप्रयच्छवै॥तासुत्वंलप्स्यसेपुत्रान्यदर्थंयजसेनृप॥२०॥
तथेतिनृपतिःप्रीतःशिरसाप्रतिगृह्यतां॥पात्रींदेवान्नसंपूर्णांदेवदत्तांहिरण्मयीं॥
२१॥अभिवाद्यचतद्भूतमद्भुतंप्रियदर्शनं॥मुदापरमयायुक्तश्चकाराभिप्रदक्षिणां॥२२॥
ततोदशरथःप्राप्यपायसंदेवनिर्मितं॥बभूवपरमप्रीतःप्राप्यवित्तमिवाधनः॥२३॥तत
स्तदद्भुतप्रख्यंभूतंपरमभास्वरं॥संवर्तयित्वातत्कर्मतत्रैवांतरधीयत॥२४॥हर्षर
श्मिभिरुद्योतंतस्यांतःपुरमाबभौ॥शारदस्याभिरामस्यचंद्रस्येवनभोंशुभिः॥२५॥

द्भुतप्रख्यंअद्भुताकारं॥संवर्तयित्वासमाप्यकर्मपायसदानरूपं॥तत्रैवअग्निकुंडएव॥२४॥हर्षरश्मिभिःहर्षोद्भूतमुखकांतिभिःउद्योतंद्योतमानं-अंतःपुरंतद्वर्त्तिस्त्रीजातंशारदचंद्रस्यअंशुभिर्नभइवेत्यन्वयः॥२५॥

कृष्णं कृष्णवर्णं स्निग्धाः चिक्कणाः हर्यक्षस्य सिंहस्येव· तनुजाः लोमानि· श्मश्रुप्रवरः मूर्धजाः केशाश्च
यस्य तत्· मुखस्थरोमाणि श्मश्रुप्रवरो मुखस्थं वा घ्राणरोम ॥१२॥ समुत्सेधवत् उच्छ्रायः दृप्तशार्दू
लवत् विक्रमः पादविन्यासो यस्य तत् ॥१३॥ दिवाकरेति· तद्वत्प्रभामंडलव्याप्तं· तैलोपदृष्टांतो

कृष्णांबरधरं रक्तास्यं दुंदुभिस्वनं । स्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्धजं ॥१२॥
शुभलक्षणसंपन्नं दिव्याभरणभूषितं । शैलशृंगसमुत्सेधं दृप्तशार्दूलविक्रमं ॥१३॥
दिवाकरसमाकारं दीप्तानलशिखोपमं । तप्तजांबूनदमयीं राजतांतपरिच्छदां ॥१४॥
दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियां । प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव ॥१५॥
समवेक्ष्याब्रवीद्वाक्यमिदं दशरथं नृपं । प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ॥१६॥
ततः परं तदा राजा प्रत्युवाच कृतांजलिः । भगवन्स्वागतं तेऽस्तु किमहं करवाणि ते ॥१७॥

दीप्तानलेत्यादि· तप्तेति· राजतो रजतविकारः अंतपरिच्छदः पिधानपात्रं यस्याः तां ॥१४॥ पा
त्रीति· लिंगसामान्यादुक्तेत तेन पत्नीमिवेति· प्रगृह्येति· स्वयं दोर्भ्यां प्रगृह्य प्रादुर्भूतमित्यन्व
यः ॥ मायामयीमिव· इवशब्द एवार्थे· भगवतो मायैवेत्यर्थः ॥१५॥ दशरथं समवेक्ष्येत्यन्वयः·
प्राजापत्यं प्रजापतिना प्रेषितं· प्रजापतेः प्रजापालकाद्विष्णोः संभूतं तद्रूपमित्यर्थः ॥१६॥ ततः प
रं प्राजापत्यं मां विद्धीति तद्वचनानंतरं· पूर्वं कृतात इव भीतः प्राप्त इति वचनश्रवणोत्तरं निर्भयत्वाचेत्यर्थ

भेजेचरुसंज्ञितं॥ द्यावापृथिव्यौः प्रत्यग्रमहर्षिनिरिवातपं॥ अर्चितातस्यकौसल्याप्रियाकेक
यवंशजा॥ अतःसंभावितांताभ्यांसुमित्रामैक्षदीश्वरः॥ नेवकुरुस्यचित्तज्ञेपत्न्योपुत्रमुमेहीः
क्षितः॥ चरोरर्धार्धभागाभ्यांतामयोजयतांशुभे॥ सा हिप्रणायवत्यासीत्सपत्न्योरुभयोरपीति।
अर्धार्धभागाभ्यामित्यस्यस्वस्वत्वअंशसंवंधप्रर्धार्धभागाभ्यामित्यर्थःपृथगितिविभज्येति
शेषः॥ कतकस्याप्येवंरीतिरेवसंमतेत्याहुः॥ क्वचित्तु·इत्युक्त्वाप्रददौतस्यैरहविषोर्धंनराधि
पः॥ स्वयमेवसमंकृत्वाभागंभागवतांवरः॥ अर्धादर्धंददौचापिकैकेय्यैसनराधिपः॥ चतु
र्भागंद्विधाकृत्वासुमित्रायैददौतदेति॥ दृश्यमानपाठःसत्वसांप्रदायिकएव॥ तत्तद्दत्तभा
गजन्यस्यतत्तत्पुत्रैकवाक्यतोचित्येन॥ अपरेतुव्याख्येवात्रज्यायसीपाठांतरेव्याख्यांतरेच
लक्ष्मणरामयोरेव॥ भरतशत्रुघ्नयोरेवैकवाक्यतायांवीजलाभः॥ उक्तंचपाद्मे॥ युगंबभूवतु
स्तत्रसुस्निग्धौरामलक्ष्मणौ॥ तथाभरतशत्रुघ्नौपायसांशवशात्स्वतइतीतिदिक्॥ २९॥

२६ कौसल्यायै इति ॥ अर्धशब्दोऽत्र समप्रविभागवाची · अर्धादर्धं तुरीयांशमित्यर्थः ॥ २७ ॥ अवशि
ष्टार्धं अवशिष्टस्य चतुर्थांशस्य अर्धं अष्टमांशमित्यर्थः ॥ पुनरवशिष्टार्धं अष्टमांशं ॥ २८ ॥ अ
नुचिंत्येति · कैकेय्यपेक्षया ज्येष्ठत्वं कौसल्यापेक्षया कनिष्ठत्वं च ॥ सुमित्राया विचार्य पादो
नांशार्धदानं · तस्यैक कनिष्ठत्वाच्च कैकेय्यै अष्टमांशदानं · वस्त्रभार्यासंभोगकर्मणि पक्षपातेन

सोऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् ॥ पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमात्मनः ॥ २६ ॥
कौसल्यायै नरपतिः पायसार्धं ददौ तदा ॥ अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥ २७ ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ॥ प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥ २८ ॥
अनुचिंत्य सुमित्रायै पुनरेव महामतिः ॥ एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥ २९ ॥

धर्मविभागकर्मणि · एवं च भरतशत्रुघ्नौ पादस्यार्धमित्याहुः ॥ अपरे तु · रामभरतौ प्रत्येकं त्र्यंशौ ·
लक्ष्मणशत्रुघ्नौ च अष्टमांशौ ॥ तथाहि · कौसल्यायै दत्तार्धस्य अर्धादर्धं चतुर्थांशरूपं सुमि
त्रायै दत्तवान् · कौसल्यया दापितवानित्यर्थः ॥ एवं कैकेय्यै कौसल्यादत्तार्धावशिष्टमर्धं ददौ
ततः कौसल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य यदर्धं तदर्धं विचार्य पुनरपि सुमित्रायै ददौ
तया दापयामासेत्यर्थः ॥ अत्रार्धपरावृत्तिर्बोध्या · तदुक्तं कालिदासेन ॥ स तेजो वैष्णवं पत्न्योर्वि

मायाविदः। असुरादिमायासंहारसमर्थदेवमायाशक्तिमतः। जवे वेगविषये। ३। असंहार्यानिति प
रैरिति शेषः संहननं शरीरं सर्वास्त्रगुणसंपन्नान् सर्वास्त्रनिवारणसामर्थ्यरूपगुणयुक्तान्· यद्वा·
प्रयोगोपसंहारादयस्तद्गुणाः। अमृतप्राशना देवाः। ४। गंधर्वी गंधर्वपत्न्यः। ५। वानरीणां तनू
षु वानरीशरीरसदृशशरीरासु· अप्सरःप्रभृतिष्वित्यर्थः· हरिरूपेणेति· तस्मान्मद्रूपसंयुक्ता

मायाविदश्च शूरांश्च वायुवेगसमाञ्जवे। नयज्ञान्बुद्धिसंपन्नान्विष्णुतुल्यपराक्रमान्। ३।
असंहार्यानुपायज्ञान्दिव्यसंहननान्वितान्। सर्वास्त्रगुणसंपन्नानमृतप्राशनानिव। ४।
अप्सरःसु च मुख्यासु गंधर्वीणां तनूषु च। यक्षपन्नगकन्यासु ऋक्षविद्याधरीषु च। ५। कि
न्नरीणां च गात्रेषु वानरीणां तनूषु च। सृजध्वं हरिरूपेण पुत्रांस्तत्तुल्यपराक्रमान्। ६।
पूर्वमेव मया सृष्टो जांबवानृक्षपुंगवः। जृंभमाणस्य सहसा मम वक्त्रादजायत। ७।
ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनं। जनयामासुरेवं ते पुत्रान्वानररूपिणः। ८।

मद्वीर्यसमतेजसः। उत्पत्स्यंतीति वधार्थं तु कुलस्य तव वानरा इति रावणविषये नंदिकेश्वरशा
पादेवमुक्तं· तुल्यपराक्रमान् स्वस्वतुल्यपराक्रमानित्यर्थः। ६। ननु तयापि स्वांशाः स्रष्टव्या इति
चेत्तत्राह· पूर्वमेवेति· पूर्वयुगे इत्यर्थः तदुत्पत्तिप्रकारमाह· जृंभमाणस्येति· सहसा तत्क्ष
णे। ७। एवं वक्ष्यमाणप्रकारेण। ८।

नाश्चेति· प्राप्य प्रहर्षेणोद्दितं विकसितं चेतो यासां तास्त्रियः नरेंद्रस्य संमानं· अपत्यपातेनयथोचितव्यव
हारं मेनिरे इत्यन्वयः॥३०॥ ततइति· महीपतेस्त्रियइत्यन्वयः उत्तमपायसं· उत्तमत्वंचतस्यविष्णुते
जः संभृतत्वात्· हुताशनादित्यसमाततेजसइतिगर्भाणां स्त्रीणां चतंत्रेण विशेषणं॥३१॥ प्रतिल

ताश्चैवं पायसं प्राप्य नरेंद्रस्योत्तमस्त्रियः॥ संमानं मेनिरे सर्वाः प्रहर्षोदितचेतसः॥३०॥
ततस्तु ताः प्राशयत मुत्तमस्त्रियो महीपते रुत्तमपायसं पृथक्॥ हुताशनादित्यसमान
तेजसोचिरेण गर्भान्प्रतिपेदिरे तदा॥३१॥ ततस्तु राजा प्रतिवीक्ष्य ताः स्त्रियः प्ररूढगर्भाः
प्रतिलब्धमानसः॥ बभूव हृष्टस्त्रिदिवे यथा हरिः सुरेंद्रसिद्धर्षिगणाभिपूजितः॥३२॥ इ
त्यार्षे श्रीरामायणे वालकांडे षोडशः सर्गः॥१६॥ पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः।
उवाच देवताः सर्वाः स्वयंभूर्भगवानिदं॥१॥ सत्यसंधस्य वीरस्य सर्वेषां नो हितैषिणः।
विष्णोः सहायान्बलिनः सृजध्वं कामरूपिणः॥२॥

ब्धमानसः· प्रतिलब्धशब्दः प्रतिलब्धस्वास्थ्यपरः तादृशं मानसं यस्येत्यर्थः। यद्वा पूर्णमनोरथ
इत्यर्थः· यथाशब्दश्चार्थे त्रिदिवे हरिरिंद्रश्च तद्वद्धृष्ट इत्यर्थः॥ सुरेंद्रेत्यादिना राजविशेषणं· भगवदं
शगर्भसंभवेन नैः पूजितो मनसा स्तुतः॥३२॥ इति षोडशोध्यायः॥१६॥ पुत्रत्वमिति· गतेगंतुमुपक्रांते
१ सहायान् सहायकरणसमर्थान्· ननु कदाचिद्भगवान्प्रतिज्ञायापि नावतरेदत उक्तं सत्यसंधे

टी· रामायणटीका ॥ ८ ॥

वज्रसंहननं वज्रवदभेद्यं शरीरं तेनोपेतो युक्तः ॥१६॥ दशग्रीववधोद्यता इत्यस्य ये भविष्यंतीति शे
षः ॥१७॥ गजाचलसंकाशाः गजसदृशाः पर्वतसदृशाश्चेत्यर्थः ॥१८॥ गोपुच्छा वानरविशेषाः क्षि
प्रमेव तत्क्षणो नौ देवानां रत्यव्यवहितोत्तरकालमेव रूपं वर्णः वेषः संस्थानविशेषः ॥१९॥ त

मारुतस्यौरसः श्रीमान्हनूमान्नाम वानरः ॥ वज्रसंहननोपेतो वैनतेयसमो जवे ॥१६॥
सर्ववानरमुख्येषु बुद्धिमान्बलवानपि ॥ ते सृष्टा बहुसाहस्रा दशग्रीववधोद्यताः ॥१७॥
अप्रमेयबला वीरा विक्रांताः कामरूपिणः ॥ ते गजाचलसंकाशा वपुष्मंतो महाबलाः ॥१८॥
ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे ॥ यस्य देवस्य यद्रूपं वेषो यश्च पराक्रमः ॥१९॥
अजायत समं तेन तस्य तस्य पृथक्पृथक् ॥ गोलांगूलेषु चोत्पन्नाः किंचिदुन्नतविक्रमाः ॥२०॥
ऋक्षीषु च तथा जाता वानराः किंनरीषु च ॥ देवा महर्षिगंधर्वास्तार्क्ष्या यक्षा यशस्विनः ॥२१॥
नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः ॥ बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ॥२२॥

स्य तत्पुत्रस्य तेन तदीयरूपवेषादिना समं रूपवेषादिकं पृथक्पृथग् संकार्यं ॥ अजायत किं
चिदुन्नतविक्रमाः देवावस्थातोपि किंचिदधिकपराक्रमा इत्यर्थः ॥२०॥ ऋक्षीषु ऋक्षश
रीरासु च स्वर्थे किंनरीष्वित्यर्थः ॥ एवमग्रेपि तार्क्ष्याः तार्क्ष्यावंशजाः ॥२१॥ नागाः सर्पाः ॥२२॥

73

वानरेंद्रमिति· ननुराघवसहायार्थं तत्तत्स्वावतारकरणप्रेरणात्·। वालिनोवतारस्यतदसहायत्वात्कि
मर्थोयमवतारइतिचेत्· दुंदुभ्यादिवधार्थोयमवतारइत्तिचेत् दुंदुभ्यादिवधार्थंतदवतारस्याव
शपकत्वात्· पुत्रद्वारातस्यापिराघवसहायत्वाच्च· दुंदुभ्यादिवधेनापितत्सहायकरणाच्च· अस्या

ऋषयश्चमहात्मानः सिद्धविद्याधरोरगाः। चारणाश्चसुतान्वीरान्ससृजुर्वनचारिणः ॥९॥
वानरेंद्रंमहेंद्राभमिंद्रोवालिनमात्मजं। सुग्रीवंजनयामासतपनस्तपतांवरः ॥१०॥ बृह
स्पतिस्त्वजनयत्तारंनाममहाकपिं। सर्ववानरमुख्यानांबुद्धिमंतमनुत्तमं ॥११॥
धनदस्यसुतः श्रीमान्वानरोगंधमादनः। विश्वकर्मात्वजनयन्नलंनाममहाकपिं ॥१२॥
पावकस्यसुतः श्रीमान्नीलोग्निसदृशप्रभः। तेजसायशसावीर्यादत्यरिच्यतवीर्यवान् ॥१३॥
रूपद्रविणसंपन्नावश्विनौरूपसंमतौ। मैंदंचद्विविदंचैवजनयामासतुःस्वयं ॥१४॥
वरुणोजनयामाससुषेणंनामवानरं। शरभंजनयामासपर्जन्यस्तुमहाबलः ॥१५॥

पिभगवदवतारात्पूर्वमुत्पत्तिर्ज्ञेया· तपनःसूर्यः॥१०॥११॥१२॥पावकस्यअग्नेःअत्यरिच्यत· ततो
धिकोभवदित्यर्थः॥१३॥रूपेति· रूपलक्षणेनद्रविणेनयुक्तौ· रूपसंमतौरूपवत्त्वेनसर्वलोका-
संमतावित्यर्थः॥१४॥पर्जन्यः तदभिमानिनीदेवताधर्मपुत्रोऽपरः सुषेणइतियुद्धकांडेवक्ष्यति·
अत्रतुवरुणपुत्रउक्तः॥१५॥

तेप्रागुक्ताः हरीणां प्रधानेषु यूथेषु मध्ये हरियूथपा बभूवुः॥ यूथपश्रेष्ठान् वीरांश्च हरीन् अजनयन्नित्यर्थः॥ ऋक्षवतः पर्वतविशेषस्य प्रस्थान् सानून् उपतस्थुः आसेवंतेस्म॥३१॥३२॥भ्रातरौ सुग्रीववालिनौ॥ सर्वे च सर्वे पि उपतस्थुः केचित्सादात्केचिन्नत्वादिद्वारेत्याह॥ नलमि

बभूवुर्यूथपश्रेष्ठान्वीरांश्चाजनयन्हरीन्॥ अन्ये ऋक्षवतः प्रस्थानुपतस्थुः सहस्रशः॥३१॥ अन्ये नानाविधांश्शैलान्काननानि च भेजिरे॥ सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनं॥३२॥ भ्रातरावुपतस्थुस्ते सर्वे च हरियूथपाः॥ नलं नीलं हनूमंतमन्यांश्च हरियूथपान्॥३३॥ ते तार्क्ष्यबलसंपन्नाः सर्वे युद्धविशारदाः॥ विचरंतो र्दयन्सर्वान्सिंहव्याघ्रमहोरगान्॥३४॥ महाबलो महाबाहुर्वाली विपुलविक्रमः॥ जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरान्॥३५॥ तैरियं पृथिवी शूरैः सपर्वतवनार्णवा॥ कीर्णा विविधसंस्थानैर्नानाव्यंजनलक्षणैः॥३६॥

त्यादि॥३३॥ अर्दयन् आर्दयन्नित्यर्थः॥ अडभावश्चार्षः॥३४॥ वाली जुगोपेत्यन्वयः॥ देवराजोवतारत्वादितिभावः॥३५॥ विविधसंसंस्थानैः॥ नानाप्रकारसन्निवेशैः॥ नानाव्यंजनलक्षणैः॥ परस्परभेदव्यंजकतत्तल्लक्षणयुतैः॥३६॥

चारणा देववंदिनः वनचारिणः वनवासिन इत्येकत्र परत्र वनस्थफलभक्षका इत्यर्थः ॥ २३ ॥ २४ ॥ २५
सर्वास्त्रकोविदा इति स्वयं प्रतिभातसर्वास्त्रपरिहारोपाया इत्यर्थः शिलाप्रहरणा इत्याद्युक्तेः

चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ॥ वानरान्सुमहाकायान्सर्वान्वै वनचारिणः ॥ २२ ॥
अप्सरःसु च मुख्यासु तथा विद्याधरीषु च ॥ २३ ॥ नागकन्यासु च तदा गंधर्वीणां तनूषु च
कामरूपबलोपेता यथाकामविचारिणः ॥ २४ ॥ सिंहशार्दूलसदृशा दर्पेण च बलेन च
शिलाप्रहरणाः सर्वे सर्वे पर्वतयोधिनः ॥ २५ ॥ नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोवि
दाः ॥ विचालयेयुः शैलेंद्रान्भेदयेयुः स्थिरान्द्रुमान् ॥ २६ ॥ क्षोभयेयुश्च वेगेन समु
द्रं सरितांपतिं ॥ दारयेयुः क्षितिं पद्भ्यामाप्लवेयुर्महार्णवान् ॥ २७ ॥ नभस्तलं विशेयु
श्च गृह्णीयुरपि तोयदान् ॥ गृह्णीयुरपि मातंगान्मत्तान्प्रव्रजतो वने ॥ २८ ॥ नर्दमानाश्च
नादेन पातयेयुर्विहंगमान् ॥ ईदृशानां प्रसूतानि हरीणां कामरूपिणां ॥ २९ ॥ शतं शतस
हस्राणि यूथपानां महात्मनां ॥ ते प्रधानेषु यूथेषु हरीणां हरियूथपाः ॥ ३० ॥ ॥

तेषामस्त्रप्रयोक्तृत्वाभावात् ॥ विचालयेयुरित्यादौ शक्यार्थे लिङ् विचालनशक्ता इत्यर्थः ।
आप्लवेयुः संतरेयुः ॥ २७ ॥ प्रव्रजतः स्वच्छंदगतीन् ॥ २८ ॥ नादेनेत्यस्य पातयेयुरित्यनेनान्व
यः ॥ २९ ॥ शतसहस्राणि कोटिरित्यर्थः ॥ ३० ॥

सानुयात्रेणासंभतेनराज्ञादशरथेनअनुगम्यमानऋष्यशृंगःप्रययौस्वस्थानमितिशेषः॥६॥
सर्वान्वसिष्ठादीनपि·तत्रपुरे॥७॥ऋतुनामितिप्रथमार्थेषष्ठी॥समत्ययुः॥समतीताः।

शांतयाप्रययौसार्धमृष्यशृंगःसुपूजितः॥अनुगम्यमानोराज्ञाचसानुयात्रेणधी
मता॥६॥एवंविसृज्यतान्सर्वान्राजासंपूर्णमानसः॥उवाससुखितस्तत्रपुत्रो
त्पत्तिंविचिंतयन्॥७॥ततोयज्ञेसमाप्तेतुऋतूनांषट्समत्ययुः॥ततश्चद्वाद
शेमासेचैत्रेनावमिकेतिथौ॥८॥नक्षत्रेऽदितिदैवत्येस्वोच्चसंस्थेषुपंचसु॥
ग्रहेषुकर्कटेलग्नेवाक्पताविंदुनासह॥९॥ ॥ राम ॥ ॥

नावमिकेनवम्यांतिथौस्वर्थेठक॥८॥अदितिदैवत्येपुनर्वसौ·पंचसु·रविभौमशनिगुरुशु
क्रेषुउच्चसंस्थेषु·मेषमकरतुलाकर्कमीनस्थेषु·॥सचंद्रगुरौकर्कटेलग्नेस्थितेसति॥९॥

75

अचलकूटः पर्वतशृंगं यूथपाधिपैः यूथपानामधिपैरित्यर्थः ॥ भीमशरीररूपैः भयजनकशरी
राकृतिभिः ॥ ३७ ॥ इति सप्तदशः सर्गः ॥ १७ ॥ प्रासंगिकदेवतावतारमुक्त्वा प्रकृतप्रधानावतारउ
च्यते निर्वृत्ते इत्यादि निर्वृत्ते समाप्ते ॥ पुत्रोत्पत्तिं विचिंतयन्नित्यंततो वृत्तानुवादः ॥ हयमेधे इ

तैर्मेघवृंदाचलकूटसन्निभैर्महाबलैर्वानरयूथपाधिपैः ॥ बभूव भूर्भीमशरीर
रूपैः समावृता रामसहायहेतोः ॥ ३७ ॥ इत्यार्षे श्रीरामायणे बालकांडे सप्तदशः सर्गः
॥ १७ ॥ निर्वृत्ते तु क्रतौ तस्मिन् हयमेधे महात्मनः ॥ प्रतिगृह्यामरा भागान्प्रतिजग्मुर्य
थागतम् ॥ १ ॥ समाप्तदीक्षानियमः पत्नीगणसमन्वितः ॥ प्रविवेश पुरीं राजा सभृत्य
बलवाहनः ॥ २ ॥ यथार्हं पूजितास्तेन राज्ञा च पृथिवीश्वराः ॥ मुदिताः प्रययुर्देशान्प्र
णम्य मुनिपुंगवं ॥ ३ ॥ श्रीमतां गच्छतां तेषां स्वगृहाणि पुरात्ततः ॥ बलानि राज्ञां शुभ्रा
णि प्रहृष्टानि चकाशिरे ॥ ४ ॥ गतेषु पृथिवीशेषु राजा दशरथः पुनः ॥ प्रविवेश पुरीं
श्रीमान् पुरस्कृत्य द्विजोत्तमान् ॥ ५ ॥

तस्य पुत्रेष्टियुते इति शेषः ॥ १ ॥ प्रविवेश प्रवेशाभिमुखो बभूव ॥ २ ॥ मुनिपुंगवं वसिष्ठं ऋष्यशृं
गं च ॥ ३ ॥ शुभ्राणि दशरथदत्तवस्त्राभरणादिनात्युज्वलानि प्रहृतानि प्रहृष्टानि ॥ ४ ॥ द्विजोत्तमान्
॥ वसिष्ठादीन् ॥ ५ ॥

विष्णोरर्धेति· विष्णोरामस्य· अर्धशब्दो भागवाची न समांशवाची· तेन पायसाष्टमांशो लक्ष्मण
शत्रुघ्नाविति बोध्यं· ॥१४॥ सार्पं अश्लेषा· कुलीरः कर्कटः ॥ अभ्युदिते इत्यस्य उच्चस्थे इत्यर्थः ॥ सौ
मित्री इति द्विवचनेन तयोर्यमजत्वं सूच्यते ॥१५॥ राज्ञ इति· पृथक् गुणवंतः प्रत्येकं अनन्यसा

अथ लक्ष्मणशत्रुघ्नौ सुमित्राजनयत्सुतौ ॥ वीरौ सर्वास्त्रकुशलौ विष्णोरर्धसमन्वितौ ॥१४॥
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ॥ सार्पे जातौ तु सौमित्री कुलीरेभ्युदिते रवौ ॥१५॥
राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ॥ गुणवंतः सुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥१६॥
जगुः कलं च गंधर्वा ननृतुश्चाप्सरोगणाः ॥ देवदुंदुभयो नेदुः पुष्पवृष्टिश्च खात्पतत् ॥१७॥
उत्सवश्च महानासीदयोध्यायां जनाकुलः ॥ रथ्याश्च जनसंबाधा नरनर्तकसंकुलाः ॥१८

धारणगुणवंतः अनुरूपाः ज्येष्ठकनिष्ठत्वादियोग्यव्यवहारवंतः ॥ रुच्या कांत्या· ॥ प्रोष्ठपदा
इति पूर्वाभाद्रपदयोर्नाम तयोश्च प्रत्येकं द्वे द्वे तारे इति ज्योतिःशास्त्रप्रसिद्धं· तैत्तिरीयश्रु
तिरपि· ॥ चत्वार एकमभिकर्मदेवाः प्रोष्ठपादास इति यान्वदंतीति तदुपमा इत्यर्थः ॥१६॥
जगुरिति· ॥ रामाद्युत्पत्तिकाले इति शेषः ॥ पतदित्यत्र अडभावश्छांदसः ॥१७॥

76

प्रोद्यमाने तत्र लग्ने उदयं गच्छति सतीत्यर्थः सर्वलोकनमस्कृतं। अस्य सर्वलोकरूपश्चासौ नमस्कृतश्च तमित्यप्यर्थः॥ तेनादौ प्रादुर्भावसमये मात्रा विराट्रूपस्य दर्शनम्॥ ततस्तद्रूपदर्शनविस्मयात्तया नमस्कृतः सन् मायया बालभावं दधाविति सूचितम्॥१०॥ विष्णोः शंखचक्रानंतविशिष्टस्य विष्णोरित्यर्थः॥ अर्धं किंचिन्न्यूनमर्धमित्यर्थः॥ शंखचक्रादेरभावादिति भावः

प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम्। कौसल्याजनयद्रामं दिव्यलक्षणसंयुतम्॥१०॥
विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकुनंदनम्। लोहिताक्षं महाबाहुं रक्तोष्ठं दुंदुभिस्वनम्॥११॥
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा। यथा वरेण देवानामदितिर्वज्रपाणिना॥१२॥
भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः। साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः॥१३॥

॥११॥ देवानां वरेण देवश्रेष्ठेन॥१२॥ चतुर्भागः चतुर्न्यूनो भागश्चतुर्भागः पायसार्धस्य चतुर्थांशन्यूनो भागः॥ अत एव साक्षात् विष्णोः सर्वैर्गुणैः समुदितः युक्तः॥ अस्य पांचजन्यावतारतया स्वधारकस्य विष्णोः॥ साक्षाद्धि रूपत्वमुक्तं॥ अनेन पांचजन्यस्यापि विष्णुत्वमेवेति सूचितम्। तदीयसर्वगुणवत्तासूचनेनास्यापि रामतुल्यत्वं॥ रामपायसांशसमपायसांशजन्यत्वं च सूचितम्॥१३॥

ब्राह्मणान्भोजयामासेतिराजाज्ञयेतिशेषः॥ बहु बहुमानपूर्वकमित्यर्थः॥२३॥ जन्मक्रियादीनि तदाद्युपनयनांतानीत्यर्थः॥ अकारयत वसिष्ठो राज्ञेतिशेषः॥ केतुः विरुदध्वजः॥ स यया अन्नदानादिकीर्त्तिं ख्यापयति॥ एवं इक्ष्वाकुकुलवैभवप्रकाशकः रतिः प्रीतिः॥२४॥ स्वयंभू

ब्राह्मणान्भोजयामास पौरजानपदानपि॥ अददद्ब्राह्मणानां च रत्नौघममलं बहु॥२३॥
तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत्॥ तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः॥२४॥
बभूव भूयो भूतानां स्वयंभूरिव संमतः॥ सर्वे वेदविदः शूराः सर्वे लोकहिते रताः॥२५॥
सर्वे ज्ञानोपसंपन्नाः सर्वे समुदिता गुणैः॥ तेषामपि महातेजा रामः सत्यपराक्रमः॥२६॥
इष्टः सर्वस्य लोकस्य शशांक इव निर्मलः॥ गजस्कंधेऽश्वपृष्ठे च रथचर्यासु संमतः॥२७॥
धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः॥ बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः॥२८॥

हिरण्यगर्भः स इव सर्वश क्तिमत्वेन संमतः॥२५॥ ज्ञानोपसंपन्नाः तत्वज्ञानयुक्ता इति केचित्॥ गुणैः साधारणैः तत्रासाधारणैश्च सद्गुणैरित्यर्थः॥ तेषामिति निर्धारणषष्ठी॥ रामः॥ सर्वसहुणाइतिशेषः॥२६॥ इष्टः सर्वस्येत्यादिगुणकथनेपौनरुक्त्यं दार्ढ्याय॥ रथचर्यासु रणोचितरथप्रचारेषु॥२७॥ लक्ष्मिवर्धन इति ह्रस्व आर्षः॥२८॥ ॥

गायनैः गायकैः वादनैः वादकैः विराविणः सशब्दाः रथ्याइति विशेष्यं सर्वरत्नसमन्विताः ॥ न
टाद्युद्देशेन क्षिप्तैरत्नैर्युक्ताः ॥१९॥ प्रदेयान् पारितोषिकान् सूताः पौराणिकाः मागधाः वंशावली
कीर्तिकाः ॥ वंदिनः स्तुतिपाठकाः संबंधसामान्ये षष्ठी सूतादि संबंधि यद्देयं पारितोषिकं
तत्तेभ्यो ददौ वित्यन्वयः ॥२०॥ अतीत्येति एकादशाहशब्दः सूतकोपलक्षणं अन्यथा क्षत्रियस्य

गायनैश्च विराविणो वादनैश्च तथापरैः ॥ विरेजुर्विपुलास्तत्र सर्वरत्नसमन्विताः ॥१९॥
प्रदेयांश्च ददौ राजा सूतमागधवंदिनाम् ॥ ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥२०॥
अतीत्यैकादशाहं तु नामकर्म तथाकरोत् ॥ ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम् ॥२१॥
सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा ॥ वसिष्ठः परमप्रीतो नामानि कुरुते तदा ॥२२॥

द्वादशाहं सूतकमिति स्मृतिविरोधः स्यात् तथा च रामजन्मतस्त्रयोदशे दिने नामकरणमक
रोदित्यर्थः ॥ अस्य निरुक्तिः पूर्वं दर्शिता श्रियः कमलवासिन्या रमणो यं यतो हरिः तस्मात् श्री
राम इत्यस्य नाम सिद्धं पुरातनं ॥ सहस्रनामसदृशं स्मरणान्मुक्तिदं नृणामिति पाद्मेउक्तं ॥२२॥
नामानि कुरुते नामकरणमकारयदित्यर्थः वर्त्तमानसामीप्ये लट् अंतर्भावितण्यर्थतावा
यत्तु कतकेन राज्ञो नामकरणादावनधिकार इत्युक्तं अकरोदित्यत्र च पुरोहितद्वारेतिशे

श्रीरामायणतिलके बा॰ १८

एवंप्रभावाणांप्रागुक्तप्रभाववतां लाभेनेतिशेषः पितात्वस्यइत्यन्वयः ॥३५॥ वैदिकाध्ययनेवेदसंबंधाध्ययने ॥३६॥ दारक्रियाविवाहः ॥ कुमारस्यविशालाक्षंपांडुतांमुखमाददे कपोलतलसंलीनपाणिः पद्मासनस्थितइत्यादियोगवासिष्ठोक्तरीत्यासंसारासारत्वदर्शनेनजातांमुखपांडु

ह्रीमंतः कीर्त्तिमंतश्चसर्वज्ञादीर्घदर्शिनः ॥ तेषामेवंप्रभावाणांसर्वेषांदीप्ततेजसाम् ॥३५
पितादशरथोत्हष्टोब्रह्मालोकाधिपोयथा ॥ तेचापिमनुजव्याघ्रावैदिकाध्ययनेरताः ॥३६॥
पितृशुश्रूषणारताधनुर्वेदेचनिष्ठिताः ॥ अथराजादशरथस्तेषांदारक्रियांप्रति ॥३७॥
चिंतयामासधर्मात्मासोपाध्यायःसबांधवः ॥ तस्यचिंतयमानस्यमंत्रिमध्येमहात्मनः ॥३८॥
अभ्यागच्छन्महातेजाविश्वामित्रोमहामुनिः ॥ सराज्ञोदर्शनाकांक्षीद्वाराध्यक्षानुवाचह ॥३९॥
शीघ्रमाख्यातमांप्राप्तंकौशिकंगाधिनःसुतं ॥ तच्छ्रुत्वावचनंतस्यराज्ञोवेश्मप्रदुद्रुवुः ॥४०॥
संभ्रांतमनसःसर्वेतेनवाक्येनचोदिताः ॥ तेगत्वाराजभवनंविश्वामित्रमृषिंतदा ॥४१॥

त्वादीनांकामकृतत्वसंभावनयाविवाहक्रियाचिंतनमितिबोध्यं ॥३७॥ सोपाध्यायःसपुरोहितः ॥३८॥३९॥ कौशिकंकुशिकगोत्रापत्यं॰ विलंबेशापत्रासात्द्वाराध्यक्षाःराजवेश्मत्वरयाप्रविविशुः तदागमननिवेदनायेतिशेषः ॥४०॥ संभ्रांतमनसःक्षुभितचित्ताःतेनतदीयेनवि

रामस्यसुस्निग्धइतिप्राक्तनेनान्वयः स्वशरीराद पितस्यस्वात्मभूतस्यरामस्यप्रियंकरः ॥२९॥ राम
स्यअपरः बहिःसंचरन्प्राणइवलक्ष्मणः प्रियः॥ तदेवाह नचेति ॥३०॥ मृगयांआखेटमुद्दिश्ये
त्यर्थः ॥३१॥ परिपालयन् रामशरीरमितिशेषः॥ अनेनलक्ष्मणस्यभक्त्यतिशयउक्तः॥ हियतः

रामस्यलोकरामस्यभ्रातुर्ज्येष्ठस्यनित्यशः॥ सर्वप्रियकरस्तस्यरामस्यापिशरीरतः ॥२९॥
लक्ष्मणोलक्ष्मिसंपन्नोबहिःप्राणइवापरः॥ नचतेनविनानिद्रांलभतेपुरुषोत्तमः ॥३०॥
मृष्टमन्नमुपानीतमश्नातिनहितंविना॥ यदाहि हयमारूढो मृगयांयातिराघवः ॥३१॥
अथैनंपृष्ठतोभ्येतिसधनुःपरिपालयन्॥ भरतस्यापिशत्रुघ्नोलक्ष्मणावरजोहिसः ॥३२॥
प्राणैःप्रियतरोनित्यंतस्यचासीत्तथाप्रियः॥ सचतुर्भिर्महाभागैःपुत्रैर्दशरथःप्रियैः ॥३३॥
बभूवपरमप्रीतोदेवैरिवपितामहः॥ तेयदाज्ञानसंपन्नाः सर्वेसमुदितागुणैः ॥३४॥

शत्रुघ्नोलक्ष्मणावरजोतोरामावरजस्यभरतस्यप्रियइतिशेषः॥ रामलक्ष्मणाविवभर
तशत्रुघ्नौपरस्परप्रियावित्यर्थः ॥३२॥ तस्यशत्रुघ्नस्यभरतइतिशेषः॥ तथातस्यभरतस्य
शत्रुघ्नःप्रियआसीत् ॥३३॥ देवैः चतुर्भिर्दिक्पालैः यद्वा वसुरुद्रादित्यविश्वेदेवैः॥ तेसर्वे
रामादयः गुणैः समुदितायुक्ताआसन्नितिशेषः ॥३४॥ श्रीरघुनाथायनमः ॥

अपिदैवंकर्म॰ होमदेवतार्चनादिकं॰ मानुषंकर्मसामभेदादिकं। राजप्रेरितार्घ्यदातृत्वेनप्रथमतो
राज्ञेऽनामयादिपृष्ट्वा ततोवसिष्ठेनसमागम्यालिंगनादिकृत्वा॰ कुशलमित्यस्यपपृच्छेतिशेषः
अनेनराजपुरोहितत्वकृतः पूर्वस्पर्धयेषदपमानोवसिष्ठस्यविश्वामित्रकृतःसूचितः वसि
ष्ठश्चसमागम्यप्रहसन्मुनिपुंगवः यथार्हंपूजयित्वैनंपप्रच्छकुशलंतदेतिक्वचित्पाठः तत्रप्

दैवंचमानुषंचैवकर्मतेसाध्वनुष्ठितं॥ वसिष्ठंचसमागम्यकुशलंमुनिपुंगवः॥४७॥
ऋषींश्चतान्यथान्यायंमहाभागउवाचह॥ तेसर्वेहृष्टमनसस्तस्यराज्ञोनिवेशनं॥४८॥
विविशुःपूजितास्तेननिषेदुश्चयथार्हतः॥ अथहृष्टमनाराजाविश्वामित्रंमहामुनिं॥४९॥
उवाचपरमोदारोहृष्टस्तमभिपूजयन्॥ यथामृतस्यसंप्राप्तिर्यथावर्षमनूदके॥५०॥
यथासदृशदारेषुपुत्रजन्माप्रजस्यवै॥ प्रणष्टस्ययथालाभोयथाहर्षोमहोदयः॥५१॥

र्वेमांस्पर्धमानोपिमद्राजसन्निधावागतइतिहासः॥४७॥ ऋषीन्वामदेवादीन्॰ यथान्यायंसंग
त्यकुशलंचोवाच॰ अत्रवामदेवादिभिःस्वस्थानस्थैरेवसमागम्यस्वकार्यसिद्धयेतान्गही
त्वैवतेस्वयंचराजसदनेविविशुरित्यन्वयः॥४८॥ पूजिताइत्यस्यराज्ञेतिशेषः॥४९॥ परमोदा
रःपरमदाता॰ हृष्टः पुलकितः॥ अनुदकेइत्यार्षदीर्घत्वं॥५०॥ सदृशदारेषु॰ जातिवयोरूप
गुणतुल्येषु॰ प्रनष्टस्यजिह्वादेरितिशेषः महः॰ पुत्रजन्माद्युत्सवः तस्मादुदयोयस्यसहर्षः
॥५१॥

इक्ष्वाकवे· तद्वृत्तं राजत्वात्तत्त्वं च· समाहितः एकाग्रचित्तः॥४२॥ब्रह्माणं बृहस्पतिं· बृहस्पतिर्देवानां ब्रह्मेति श्रुतेः॥ संशितव्रतं तीव्रं नियमं॥४३॥उपहारयदिति· वसिष्ठेनेतिशेषः॥ अ

प्राप्तमावेदयामासुर्नृपायेक्ष्वाकवे तदा॥ तेषां तद्वचनं श्रुत्वा सपुरोधाः समाहितः॥४२॥
प्रत्युज्जगाम संहृष्टो ब्रह्माणमिव वासवः॥ स दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतम्॥
॥४३॥ तं हृष्टवदनो राजा ततोऽर्घ्यमुपहारयत्॥ स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा॥
॥४४॥ कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम्॥ पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च॥४५॥
कुशलं कौशिको राज्ञः पर्यपृच्छत्सुधार्मिकः॥ अपि ते सन्नताः सर्वे सामन्ता रिपवो जिताः॥४६॥

उभाव अर्घः राज्ञोऽर्घ्यं राजप्रेरणया वसिष्ठानीतं॥४४॥ कुशलपदं अनामयोलक्षणं· तत्र वंधु मनामयमिति स्मृतेः॥ अव्ययं वृद्धिं॥४५॥ मुनिर्विशिष्य पप्रच्छेति· कुशलमिति· विशेषप्रकारमाह· अपि तेइति· अपिः प्रश्नेः एवमग्रेपि· सामन्ताः सन्नताः नम्राः अपि रिपवो जिताः॥४६॥

स्वाभिमतकार्ययोगेनअनुगृहीतोहं त्वम्मयोजनपरिवृद्धिं निष्पत्तिं कर्त्तुमिच्छामि विमर्शं करिष्यति न वेति संदेहः ॥५७॥ तत्रहेतुमाह॰ दैवतं हीति॰ इतश्चनसंदेह इत्याह॥ ममचेति॰ तवागमनजः कृत्स्नो धर्मः ममम्महानभ्युदयः प्राप्तः ॥ हर्षातिशयो द्विजेतिपुनरुक्तिर्नदोषाय ॥५५॥ इतीति॰ यतोत्हृदय

इच्छाम्यनुगृहीतोहं त्वदर्थं परिवृद्धये ॥ कार्यस्यन विमर्शं च गंतुमर्हसि सुव्रत ॥५७॥
कर्त्ता चाहमशेषेण दैवतं हि भवान्मम ॥ ममचायमनुप्राप्तोमहानभ्युदयो द्विज ॥५७॥
तवागमनजः कृत्स्नोधर्मश्चानुत्तमो द्विज ॥५५॥ इति हृदयसुखं निशम्यवाक्यं श्रुतिसुखमात्मवता विनीतमुक्तं ॥ प्रथितगुणयशा गुणैर्विशिष्टः परमऋषिः परमं जगामहर्षं ॥५६॥ इत्यार्षे श्रीरामायणे वाल्मीकियेवालकांडेऽष्टादशः सर्गः ॥१८॥ तच्छ्रुत्वाराजसिंहस्यवाक्यमद्भुतविस्तरं ॥ हृष्टरोमा महातेजा विश्वामित्रोभ्यभाषत ॥१॥

सुखं अतएवश्रुतिसुखं॰ आत्मवतास्वाधीनेन॰ विनीतं विनययुक्तं॰ प्रथितैर्गुणैः त्रिशंकुस्वर्गारोहणादिभिः यशोयस्य॰ गुणैः शमदमादिभिः परमऋषिः कृत्यक इतिप्रकृतिभावः ॥५६॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके वालकांडेऽष्टादशोऽध्यायः ॥१८॥ तदितिअद्भुतविस्तरं॰ दैवतं हि भवान्ममेत्याद्युक्तिरूपमाश्चर्यप्रपंचं ॥१॥ श्रीरामायनमः ॥

यथातथातेआगमनंमन्ये·अत्रस्वकार्यहर्षसादृश्यस्यागमनेउक्तत्वात्वागमनजहर्षस्यानिर्वाच्यत्वंव्यज्यते·
स्वागतंतेइतिभिन्नंवाक्यं·चपरंकं कामंकिमुकेनप्रकारेणाकरोमिकुर्यामित्यर्थः वर्त्तमानसामीप्येलट्·
५२॥पात्रभूतःसर्वसेवायोग्यः॥दिष्ट्याशुभादृष्टेन·सुजीवितंअद्यैवतत्फललाभादितिभावः॥५३॥
पूर्वमिति·राजर्षिशब्दसाधकेनतपसापूर्वंअतिशयितकांतिमान्॥५४॥अनुपश्चात्ब्रह्मर्षित्वसा

तथैवागमनंमन्येस्वागतंतेमहामुने॥कंचतेपरमंकामंकरोमिकिमुहर्षितः॥५२॥पात्रभूतोसि
मेब्रह्मन्दिष्ट्याप्राप्तोसिमानद॥अद्यमेसफलंजन्मजीवितंचसुजीवितं॥५३॥यस्माद्विप्रे
न्द्रमद्राक्षंसुप्रभातानिशाममं॥पूर्वंराजर्षिशब्देनतपसाद्योतितप्रभः॥५४॥ब्रह्मर्षित्वमनुप्रा
प्तःपूज्योसिबहुधामया॥तदद्भुतमभूद्विप्रपवित्रंपरमंमम॥५५॥शुभक्षेत्रगतश्चाहंतवसं
दर्शनात्प्रभो॥ब्रूहियत्प्रार्थितंतुभ्यंकार्यमागमनंप्रति॥५६॥

धकेनतपसाब्रह्मर्षित्वंप्राप्तोतोम
याबहुधाबहुप्रकारेणराजर्षिब्रह्मर्षिप्रकारेणपूज्योसीत्यन्वयः॥तदिति·परमंपवित्रमिदंत्वदागम
नंयन्ममपुरेऽभूत·तदद्भुतमत्याश्चर्यमित्यर्थः॥५५॥हेप्रभोतवसंदर्शनात्शुभक्षेत्रंसकलपापाभा
वविशिष्टसकलशुभसाधनपुण्यवद्देहंगतःप्राप्तवान्·तेनसफलजन्मतानिष्पापताचध्वनिता·इ
दंशरीरंकौन्तेयक्षेत्रमित्यभिधीयतेइतिभगवद्गीतोक्तेः·ब्रूहीति·तुभ्यमितिषष्ठ्यर्थेचतुर्थी·तेयत्का
र्यंप्रतियत्कार्यार्थंमागमनंतन्मयाप्रार्थितंसत्ब्रूहिकथय॥५६॥ राम

तत्र हेतुमाह॰ तथाभूतेति॰ शापादिप्रवर्त्तनहेतुरित्यर्थः॥ अतः स्वपुत्रमित्यादि॥८॥ बालानां काकपक्षस्थानीयशिखावान् काकपक्षः॥ ननु अनेन बालेन किं करिष्यसीत्यत्राह॰ शक्त इत्यादि॰ मया पितृस्थानीयेनेति शेषः॥ दिव्यं तेजो वै सर्वं॰ तेन युक्त इति शेषः॥९॥ विकर्त्तारः विघ्नकर्त्तारः तेषां विनाशनेपि शक्तः॥ किं पुनर्मदध्वरक्षणे॰ मारीचसुबाहुसेनाभिप्रायेण तेषामिति बहुवचनं॰ राक्षसोदान

तथाभूता हि सा चर्या न शापस्तत्र मुच्यते॥ स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम्॥८॥
काकपक्षधरं वीरं ज्येष्ठं मे दातुमर्हसि॥ शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा॥९॥
राक्षसा ये विकर्त्तारस्तेषामपि विनाशने॥ श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः॥१०॥

प्ररोचनायाह॰ श्रेयश्चेति॰ बहुरूपं॰ अस्त्रदानविवाहादिरूपं॰ किंच॰ मुखपाण्डुत्वादिनिवर्त्तकं बहुरूपं विपुलतरं परमार्थरूपं च श्रेयः आत्मस्वरूपं प्रदास्यामि॰ वसिष्ठद्वारा दापयिष्यामि बोधयिष्यामीत्यर्थः॥ रामस्यापि ईश्वरस्य इत्युक्तस्वभावत्वेपि लोकानां तत्त्वबोधनमेव रा

एतन्नैवसदृशंनान्यतः नान्यस्य तत्रहेतुगर्भविशेषणं महावंशेत्यादि च सिष्ठव्यपदेशिनः वसिष्ठनि
योगवर्त्तिनः ॥२॥ यत्त्विति तस्यतत्प्रतिपाद्यस्यकार्यस्यनिश्चयंकर्त्तव्यत्वनिश्चयं सर्वथाकरिष्यामी
त्यंगीकारंकुरुष्व ॥ कृत्वाचसत्यप्रतिश्रवःसत्यप्रतिज्ञोभव ॥३॥ अहमिति विध्यर्थं यागार्थं नियमं

सदृशंराजशार्दूलत्वैवभुविनान्यतः ॥ महावंशप्रसूतस्यवसिष्ठव्यपदेशिनः ॥२॥ यत्तु
मेत्वद्गतंवाक्यंतस्यकार्यस्यनिश्चयं ॥ कुरुष्वराजशार्दूलभवसत्यप्रतिश्रवः ॥३॥ अहं
नियममातिष्ठेविध्यर्थंपुरुषर्षभ ॥ तस्यविघ्नकरौद्वौतुराक्षसौकामरूपिणौ ॥४॥
व्रतेतुबहुशश्चीर्णेसमाप्त्यांराक्षसाविमौ ॥ मारीचश्चसुबाहुश्चवीर्यवंतौसुशिक्षितौ ॥५॥
तौमांसरुधिरौघेणवेदिंतामभ्यवर्षताम् ॥ अवधूतेतथाभूतेतस्मिन्नियमनिश्चये ॥६॥
कृतश्रमोनिरुत्साहस्तस्माद्देशादपाक्रमे ॥ नचमेक्रोधमुत्स्रष्टुंबुद्धिर्भवतिपार्थिव ॥७॥

दीक्षां ॥ आतिष्ठे आस्थितोस्मि तस्ययज्ञस्य ॥४॥ व्रतेत्विति बहुशश्चीर्णे समाप्तिकल्पेसमाप्त्यां सम
प्तिसमये ॥५॥ नियमनिश्चयेव्रतसंकल्पे अवधूतेतस्मिन् तत्संकल्पविषयेयज्ञेचतथाभूते
नाशितेसति ॥६॥ कृतश्रमः कृतवृथाप्रयासः ॥ अतएवनिरुत्साहः ॥ तस्माद्देशादपाक्रमेनिर्गतो
स्मि ननुभवद्भिःशापेनैवकुतस्तौननाशितौनत्राह ॥ नचेति क्रोधमुत्स्रष्टुंशापं ॥७॥

त्रयाणां त्रिविधत्यर्थः येनमद्दत्तास्त्रादिना आसाद्ययुद्धे इतिशेषः ॥११॥ नचेति· तत्र हेतुमाह· वीर्येत्यादि·
रामस्तर्हि किं कथं हन्यादित्यत्राह· कालेति· ॥१२॥ रामस्य रामवीर्यस्य· पुत्रगतं पुत्रविषयं· रामेइति
शेषः ॥ नायं तव पुत्रः किं तर्हि दिव्यमेतत्तेज इतितात्पर्यम् ॥१३॥ तत्र हेतुमाह· अहमिति· हता

त्रयाणामपिलोकानां येनख्यातिं गमिष्यति ॥ नचतौराममासाद्यशक्तौस्थातुंकथंच
न ॥११॥ नचतौराघवादन्योहंतुमुत्सहते पुमान् ॥ वीर्योत्सिक्तौहितौ पापौ कालपाश
वशंगतौ ॥१२॥ रामस्य राजशार्दूलन पर्याप्तौ महात्मनः ॥ नचपुत्रगतं स्नेहं कर्तु
मर्हसि पार्थिव ॥१३॥ दशरात्रस्थे यज्ञश्च तस्मिन्रामेण राक्षसौ ॥ हंतव्यौ विघ्नक
र्त्तारौ मम यज्ञस्य वैरिणौ ॥१४॥ अहं ते प्रतिजानामि हतौ तौ विद्धि राक्षसौ ॥ अहं
वेद्मि महात्मानं रामं सत्यपराक्रमं ॥१५॥ वसिष्ठोपि महातेजा ये चेमे तपसि स्थिताः
यदि ते धर्मलाभं तु यशश्च परमं भुवि ॥१५॥

विति· भूतप्रत्यये नवधस्य सुकर
त्वं ध्वन्यते· रामं निरतिशयवैभवविष्णुतेजोंशावताररूपम् ॥१४॥ स्वज्ञाने संवादमाह·
वसिष्ठोपीत्यादि· तेप्येवंविदुरितिशेषः ते इति· त्वमित्यर्थे· धर्मलाभं परमं यशश्च
यदिस्थिरमिच्छसीत्यन्वयः तेन राममदानं तवापि फलदमित्याशयः ॥१५॥ ॥

मवोधस्य फलम्- सनत्कुमारशापवशात्तिरोहितस्य ज्ञानस्य प्रादुर्भूतिश्च फलमिति वोध्यम्-
तदुक्तमादित्यपुराणे-॥विज्ञानमेतदखिलं विश्वाकारमवुद्धयः॥ पश्यंति ज्ञानिनस्त्वेकमा
त्मरूपमिदंजगत्॥ दुर्विज्ञेयंवसिष्ठेनरामायकथितंपुरेतिस्कंदं प्रतिशिवोक्तेः॥ योगवा
सिष्ठेचस्फुटमेतत्॥ तद्द्रूपति- त्रयाणामित्यादि- मुख्यश्रेयश्च विष्णुपुराणे द्वितीयें
शे॰ तन्मत्वप्रमाणतायत्वंयच्छ्रेयः परमं द्विज॥ तद्दाखिलविज्ञानं जलवीच्युदधिर्भवानि
ति॥राजप्रश्नपुत्रस्वर्गादीनामापेक्षिकश्रेयस्त्वेपिनपरमार्थरूपंश्रेयस्त्वमित्युक्त्वा एको
व्यापीसमःशुद्धोनिर्गुणःप्रकृतेःपरः॥जन्मवृद्ध्यादिरहितआत्मासर्वगतोऽव्ययः॥पर
ज्ञानमयोसद्भिर्नामजात्यादिभिर्विभुः॥नयोगवान्नयुक्तोभून्नैवपार्थिवयोत्स्यते॥तस्यात्म
परदेहेषुसतोप्येकमयंहियत्॥विज्ञानंपरमार्थोसावितिजडभरतोक्त्यात्मस्वरूपमेव
परमार्थश्रेयस्त्वेनदर्शितम्-॥तथात्रैवश्रात्माध्येयःसदाभूपयोगयुक्तैस्तथापरं-श्रेयस्त
स्यैवसंयोगःश्रेयोयःपरमात्मनेतियुक्तं-॥प्रघट्टकांतरे-॥तथाजीवपरमात्मनोर्यः॥संयोग
उपाधिनिर्गमरूपःसपरंश्रेयइतितदर्थः॥विभेदजनकेज्ञानेनाशमात्यंतिकेगते-॥आ
त्मनोब्रह्मणोभेदमसंतंकःकरिष्यतीति-प्रघट्टकांतरोक्तेः॥परमात्मात्मनोर्योगःपरमा
र्थइतीयंतेइतितेनैवोक्तत्वाच्चेत्यलम्॥१०॥ रामरामरामरामरामराम

इतीति। अतीवअत्यर्थं हृदयस्य हृदयपुंडरीकवर्त्तिमनःमनसोंतःकरणस्य च विदारणं पीडाज
नकं शुश्रूवान् शुश्राव महान्नरपतिः सर्वभौम इति यावत्। महात्मा महाबुद्धिः व्यथितमनाः मूर्छि
तचित्तः अभवत्। अवस्थातुमशक्तः। आसनाच्च चाल च निःसंज्ञाः पपातेत्यर्थः॥२२॥ इति
टीकायां एकोनविंशः सर्गः॥१९॥ तदिति। निःसंज्ञ इव निष्प्राण इव। रामे प्रीकृतत्व बुध्या राक्षसे

इति हृदयमनोविदारणं मुनिवचनं तदतीव शुश्रुवान्। नरपतिरभवन्महान्महा
त्मा व्यथितमनाः प्रचचाल चासनात्॥२१॥ इत्यार्षे श्रीरामायणे बालकांडे एकोनविंशः
सर्गः॥१९॥ तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम्। मुहूर्त्तमिव निःसंज्ञः संज्ञावा
निदमब्रवीत्॥१॥ ऊनषोडशवर्षो मे रामो राजीवलोचनः। न युद्धयोग्यतामस्य पश्यामि
सह राक्षसैः॥२॥

भीमयसंभावनया दातप्रतिज्ञया च व्याकुलत्वान्मूर्छित इत्यर्थः। ततः संज्ञावान् गतमूर्छः। इ
दं वक्ष्यमाणमब्रवीत्॥१॥ ऊनेति। किंचिदूनानि षोडशवर्षाणि यस्य सः। इदं च युद्धायोग्यत्व
प्रतिपादकं षोडशवर्षः क्षत्रियकुमार एव कवचधरो युद्धार्ह इति शास्त्रादिति कतकः।
अस्मेतु ऊनषोडशवर्षशब्दस्य द्वादशवर्ष इत्यर्थः। कौशिकयागरक्षणार्थमागतस्य रामस्य
वयोविशेषमुद्दिश्य बालो द्वादशवर्षोयमकृतास्त्रश्च राघव इत्यारण्यकांडे एवं प्रतिमारी
चोक्तेरित्याहुः। आरण्ये बालो षोडशवर्षीय मित्येव पाठो रावणस्य भयातिशयाशयार्थं वामारी

मेमत्वं किंचमंत्रिणांसंमतेपिदातुमर्हसीत्याह॥यदित्यादि॥अभ्यनुज्ञातोरामदानविषयकानुमति
१६॥ततःतदा॥अभिप्रेतंममेच्छंतववचअसंसक्तं॥अतीतबाल्यत्वान्मातापितृसक्तिरहितं॥ई
श्वरत्वात्॥कार्यप्नासक्तमितिवार्थः॥१७॥तापिनातिचरविप्रयोगस्तेपुत्रेणेत्याह॥दशेति॥यज्ञसं
बंधिदशरात्रात्मकः॥काल एव॥राममपेक्षतइतिशेषः॥हे राघव मम अयं यज्ञस्य कालः यथाय

स्थिरमिच्छसिराजेंद्ररामंमेदातुमर्हसि॥यद्यभ्यनुज्ञांकाकुत्स्थददतेतवमंत्रिणः॥१६॥
वसिष्ठप्रमुखाःसर्वेततोरामंविसर्जय॥अभिप्रेतमसंसक्तमात्मजंदातुमर्हसि॥१७॥द
शरात्रंहियज्ञस्यरामंराजीवलोचनं॥नात्येतिकालोयज्ञस्ययथायंममराघव॥१८॥
तथाकुरुष्वभद्रंतेमाचशोकेमनःकृथाः॥इत्येवमुक्त्वाधर्मात्माधर्मार्थसहितंवचः॥१९॥
विरराममहातेजाविश्वामित्रोमहामतिः॥सतन्निशम्यराजेंद्रोविश्वामित्रवचःशुभं॥२०॥
शोकेनमहताविष्टश्चचालचमुमोहच॥लब्धसंज्ञस्तथोत्थायव्यषीदतभयान्वितः॥२१॥

र्थोक्तंकालेनात्येति॥नातिक्रामति॥ततोऽधिकोविलंबोनभवतीत्यर्थः॥१८॥तथेति॥अत्रापिपूर्व
श्लोकात्यार्धआवृत्यासंबध्यते॥हेराघवममायंयज्ञस्यकालोनात्येतिनानिपतेत्॥तथाकु
रुष्वेत्यन्वयः॥धर्मार्थसहितं॥अर्थोरामस्यास्त्रादिलाभरूपः॥१९॥२०॥चलनंकंपः॥ततोत्थायेति
कांदसं॥व्यषीदत॥तेत्यप्येवंभयान्वितः॥रक्षोनिमित्तपुत्रवियोगभयान्वितः॥२१॥

रामा-वा-
८४

नचेति-रक्षसामित्यस्यरणेइतिशेषः कूटंकपरं-रामनयनेबाधकमप्याह-विप्रेत्यादि ॥८॥ उक्तो-
पपत्तिपरिहारायाह-यदिवेति ॥९॥ इतोपिरामनयनमयुक्तमित्याहः षष्टिरिति-अतीतानीति
शेषः ॥१०॥ कृच्छ्रेणदुःखेन-कथंचित्दुःखेनेत्येवपाठः ॥ यज्ञदीक्षादिलक्षणेन-परमिकाअति
शयितास्वार्थकः चतुर्णामिति-निर्द्धारणेषष्ठी-तेषांमध्येऽस्मिन्ममप्रीतिरधिकेत्यर्थः ॥११॥

९५

नचासौरक्षसांयोग्यःकूटयुद्धाहिराक्षसाः ॥ विप्रमुक्तोहिरामेणमुहूर्त्तमपिनोत्सहे ॥८॥
जीवितुंमुनिशार्दूलनरामंनेतुमर्हसि ॥ यदिवाराघवंब्रह्मन्नेतुमिच्छसिसुव्रत ॥९॥
चतुरंगसमायुक्तंमयासहचतंनय ॥ षष्टिर्वर्षसहस्राणिजातस्यममकौशिक ॥१०॥
कृच्छ्रेणोत्पादितश्चायंनरामंनेतुमर्हसि ॥ चतुर्णामात्मजानांहिप्रीतिःपरमिकामम ॥११॥
ज्येष्ठेधर्मप्रधानेचनरामंनेतुमर्हसि ॥ किंवीर्याराक्षसास्तेचकस्यपुत्राश्चकेचते ॥१२॥

प्रीत्याधिक्येकारणमाह-ज्येष्ठेइति-अनेनराज्ययोग्यताध्वनिता-धर्मप्रधानेत्रिपुरुषा
र्थेषुधर्माधीनप्रवृत्तिकोराक्षसैर्युद्धेहिपाक्षिकनाशसंभावयाराज्यविच्छेदएवभवेत्-
धर्मेणप्रजापालनंच ॥ नान्यतोनिर्वहेत-अतोरामोनतुमयोग्यः अथरामनयनस्यसर्व
थाऽयोग्यत्वप्रतिपादयितुंरक्षःस्वरूपंपृच्छति-किंवीर्यइति-केकेचेतेकिंनामानः

राम
८४
१२

इद्वयमिति· एकोरथोगजश्चैको नराः पंचपदातयः॥ त्रयश्चतुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते॥ पत्तिं
तु त्रिगुणामेकं विदुः सेनामुखं बुधाः॥ त्रीणि सेनामुखान्येको गुल्मइत्यभिधीयते॥ त्रयो गुल्मा ग
णो नाम वाहिनी तु गणास्त्रयः॥ स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः॥ चमूस्तु पृतनास्तिस्र
श्चम्वस्तिस्रस्त्वनीकिनी॥ अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाइति· यस्याहमिति सं

इयमक्षौहिणी सेना यस्याहं पतिरीश्वरः॥ अनया सहितो गत्वा योद्धाहं तैर्निशाचरैः ३॥
इमे शूराश्च विक्रान्ता भृत्या मेऽस्त्रविशारदाः॥ योग्यारक्षोगणैर्योद्धुं न रामं नेतुमर्हसि ४॥
अहमेव धनुष्पाणिर्गोप्ता समरमूर्द्धनि॥ यावत्प्राणान्धरिष्यामि तावद्योत्स्ये निशाचरैः॥
५॥ निर्विघ्ना व्रतचर्या सा भविष्यति सुरक्षिता॥ अहं तत्र गमिष्यामि न रामं नेतुमर्हसि ६॥
बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम्॥ न चास्त्रबलसंयुक्तो न च युद्धविशारदः ७॥

धिरार्थः॥ पतिः पालकः ईश्वरः स्वामी· योद्धेत्यस्य अस्मीतिशेषः॥ ३॥ ४॥ गोप्ता यस्येतिशेषः
प्राणान्धरिष्यामि जीविष्यामीत्यर्थः॥ ५ ६॥ रामगमने अनुपपत्तिमाह· बाल इत्यादि· ऊन
षोडशवर्षत्वादेव बालत्वव्यवहारः स्नेहातिशयेन च· तेनैव अकृतविद्यत्वव्यवहारः॥ अ
न्यथा· सर्ववेदविदः शूराः सर्वे ज्ञानोपसंपन्ना इति पूर्वोक्त्या विरोधः स्यात्॥ ७॥

रामा·बा
८५

अथ रावणनामश्रुत्वा स्वयमेव निवृत्तप्रतीकारप्रत्याशो राजा आह· इत्युक्त इति·॥२०॥ अल्पभागस्यत्वन्नियोगाकरणादितिशेषः प्रसादयितुमाह· दैवतमित्यादि॥२१॥२२॥ सत्विति· वीर्यमादत्तेनाशयतीत्यर्थः॥ अतस्तत्संग्रामाद्युद्धमपिन दोषायेतिभावः तस्यबलैः मारी

इत्युक्तो मुनिना तेन राजोवाचमुनिंतदा॥ नहिशक्तोस्मिसंग्रामेस्थातुंतस्यदुरात्मनः॥२०॥
सत्वंप्रसादंधर्मज्ञकुरुष्वममपुत्रके॥ ममचैवाल्पभाग्यस्यदैवतंहिभवान्गुरुः॥२१॥
देवदानवगंधर्वायक्षाः पतगपन्नगाः॥ नशक्तारावणंसोढुं किंपुनर्मानवायुधि॥२२॥
सतुवीर्यवतांवीर्यमादत्तेयुधिरावणः॥ तेनचाहंनशक्तोस्मिसंयोद्धुंतस्यवाबलैः॥२३॥
सबलोवामुनिश्रेष्ठसहितोवाममात्मजैः॥ कथमप्यमरप्रख्यंसंग्रामाणामकोविदम्॥२४॥

85

चादिभिः॥२३॥ हे मुनिश्रेष्ठ· सबलः ससैन्यः ममपुत्रैः सहितोवाभवानपितेनयोद्धुंनशक्त इत्यनुषंगः अस्तुवाकथंचिद्भवतस्तथासामर्थ्यंपुत्रंतुसर्वथानदास्यामीत्याह· कथमपीत्यादि· अमरप्रख्यं अमरतुल्यं· रूपमेवनत्वमरोमितितितात्पर्यं· नैवदास्यामीत्यन्वयः॥२४॥

राम
८५

कथंप्रमाणाः कीदृक्शरीरप्रमाणाः॥ रक्षंतिस्वामित्वेनेतिशेषः॥ प्रतिकर्त्तव्यं प्रतिविधेयं संहारः क
थंकर्तव्यइत्यर्थः॥१३॥ मयारणे इत्यत्रप्रतिकर्तव्यमित्यनुषंगः॥१४॥ स्थातव्यमिति॰ दुष्टभा॰

कथंप्रमाणाः केचैतान्रक्षंतिमुनिपुंगव॥ कथंचप्रतिकर्त्तव्यंतेषांरामेणरक्षसाम्॥१३॥
मामकैर्वाबलैर्ब्रह्मन्मयावाकूटयोधिनाम्॥ सर्वंमेशंसभगवन्कथंतेषांमयारणे॥१४॥
स्थातमंदुष्टभावानांवीर्योत्सिक्ताहिराक्षसाः॥ तस्यतद्वचनंश्रुत्वाविश्वामित्रोभ्यभाषत
॥१५॥ पौलस्त्यवंशप्रभवोरावणोनामराक्षसः॥ सब्रह्मणादत्तवरस्त्रैलोक्यंबाधतेभृश
म्॥१६॥ महाबलोमहावीर्योराक्षसैर्बहुभिर्वृतः॥ श्रूयतेचमहाराजरावणोराक्षसा॰
धिपः॥१७॥ साक्षाद्वैश्रवणभ्रातापुत्रोविश्रवसोमुनेः॥ यदानखलुयज्ञस्यविघ्नकर्ता
महाबलः॥१८॥ तेनसंचोदितौतौतुराक्षसौचमहाबलौ॥ मारीचश्चसुबाहुश्चयज्ञविघ्नं
करिष्यतः॥१९॥

वानांतेषांसंबंधिनिरणेकथंस्थातव्यमितिचशंसेतिसंबंधः तत्रहेतुः वीर्येत्यादि॥१५॥१६॥ प्रसिद्ध
श्चायंरावणइत्याह॰ श्रूयतइत्यादि॥१७॥ यतोमहाबलः॥ ततोयदाअनादरात्स्वयंयज्ञस्यविघ्न
कर्तानखलु॥ अनादरात्स्वयंविघ्नायनागच्छतितदा॥१८॥ तेनरावणेनप्रेरितौ॰॥ मारीचसुबाहु

अयं विपर्ययः प्रतिज्ञाहानिरूपः राघवाणामयुक्तः॥ यतोऽयं अस्य कुलस्य विपर्ययः नाशः विपर्यय पदावृत्तिर्बोध्या॥२॥ यदि इदं प्रतिज्ञाहानिरूपं तवमयुक्तं- इदं तत्फलं च यदि त्वमसत्यं तत् तदा यथागतं गमिष्यामि मिथ्यावादी त्वं सुहृद्वृतः सुखी भवेति विपरीतलक्षणयोक्तिः॥३॥ धीमत

पूर्वमर्थं प्रतिश्रुत्य प्रतिज्ञां हातुमिच्छसि॥ राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः॥२॥
यदीदं ते तथा राजन् गमिष्यामि यथागतं॥ मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सुहृद्वृतः॥३॥
तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः॥ चचाल वसुधा कृत्स्ना देवानां च भयं महत्॥४॥
त्रस्तरूपं तु विज्ञाय जगत्सर्वं महानृषिः॥ नृपतिं सुव्रतो धीरो वसिष्ठो वाक्यमब्रवीत्॥५॥
इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः॥ धृतिमान्सुव्रतः श्रीमान्न धर्मं हातुमर्हसि॥६॥
त्रिषु लोकेषु विख्यातो धर्मात्मा इति राघव॥ स्वधर्मं प्रतिपद्यस्व नाधर्मं वोढुमर्हसि॥७॥

इत्यत्र रोषं दृष्ट्वेति शेषः जगदन्यथाकरणसमर्थोऽयमद्य क्रुद्धः किं करिष्यतीति देवानां भयम्॥४॥ त्रस्तरूपं अतिशयेन त्रस्तं जगत् त्रैलोक्यं॥५॥ साक्षात् धर्म इव- इवशब्द एवार्थे- दृढारोपं रूपकमिदम्॥६॥ स्वधर्मं सत्यप्रतिज्ञत्वं॥७॥ ॥

अतिदुःखितोक्तित्वात्तनयपुत्रकशब्दयोः पौनरुक्त्यं न दोषः पुत्रकमित्यनुकंपायां कन्‌· अदा
नेहेत्वितरमप्याह· अयोत्पादि· यतः सुंदोपसुंदपुत्रौ कालोपमौ यमनुल्यौ मारीचसुबाहू दैत्य
कुलजसुंदोपसुंदाभार्यायक्षकन्यायां जातत्वेन अगस्त्यशापेन च अतिक्रूरतमौ राक्षसत्वंप्रा

बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकं ॥ अथ कालोपमौ युद्धे सुतौ सुंदोपसुंदयोः २५॥
यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकं ॥ तौ तु राक्षसकन्यायां जातौ दैत्यकुलोद्भवौ
मारीचश्च सुबाहुश्च वीर्यवंतौ सुशिक्षितौ ॥ २६॥ तयोरन्यतरं योद्धुं यास्यामि ससुहृद्ग
णः ॥ अन्यथा त्वनुनेष्यामि भवंतं सहबांधवः ॥ २७॥ इति नरपतिजल्पनाद्द्विजेंद्रं
कुशिकसुतं सुमहान्विवेश मन्युः ॥ सुहुत इव मखेग्निराज्यसिक्तः समभवदुज्ज्व
लितो महर्षिवह्निः ॥ २८॥ इत्यार्षे श्रीरामायणे बालकांडे विंशः सर्गः ॥ २०॥ तच्छ्रुत्वा वच
नं तस्य स्नेहपर्याकुलाक्षरं ॥ स मन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ॥ १॥

प्तौ यतस्तौ यज्ञविघ्नकरौ अतः सुतं नैव दास्यामीत्यन्वयः ॥ २५ ॥ २६ ॥ अन्यथा भवतामममानयने·
अनुनेष्यामि रामागमनायेतिशेषः ॥ २७ ॥ इतीति· सुहुतः प्रथमं शुष्कसमिद्भिः हुतः पश्चादाज्य
सिक्तो अग्निरिवेति योजना· उत्तज्ज्वलितः रोषजज्वालारूपक्षित्तवृत्तियुक्तः इति विंशतिः सर्गः २०
तदिति· स्नेहेन पुत्रस्नेहेन· पर्याकुलानि गद्गदानि अक्षराणि यस्मिन्‌ तत्तस्य वचनं श्रुत्वेत्यन्वयः ॥ १॥

रामा·बा·
८१

नतुदेवाद्यनवगतसर्वास्त्रप्राप्तिः॥ कृषेः कथमित्यत आह· कृशाश्वः प्रजापतिर्विवेकः परमधार्मिकाइति
पाठ परमधार्मिकम्प्रतिद्यावंतइत्यर्थः एतेनापिदूर्लभत्वंध्वनितं· दत्ता· शिवेनेति शेषः प्रशासतिप्र
शास्तिस्मेत्यर्थः शवार्षः॥१३॥ अस्त्राणांमातप्राशस्त्यमप्याह· तेपीति· प्रजापतिसुतेदक्षकन्येतयो

८१२

सर्वास्त्राणिकृशाश्वस्यपुत्राःपरमधार्मिकाः॥ कौशिकायपुरादत्तायदाराज्यंप्रशासति॥१३॥
तेपिपुत्राःकृशाश्वस्यप्रजापतिसुतासुताः॥ नैकरूपामहावीर्याद्गिमंतोजयावहाः॥१४॥
जयाचसुप्रभाचैवदक्षकन्येसुमध्यमे॥ तेसूतेस्त्राणिशस्त्राणिशतंपरमभास्वरम्॥१५॥
पंचाशतंसुतांलेभेजयालब्धवरावरान्॥ वधायासुरसैन्यानामप्रमेयानरूपिणः॥१६॥
सुप्रभाजनयच्चापिपुत्रान्पंचाशतंपुनः॥ संहारान्नामदुर्धर्षान्दुराक्रामान्वलीयसः॥१७॥
नानिचास्त्राणिवेत्येषयथावत्कुशिकात्मजः॥ अपूर्वाणांचजननेशक्तोभूयश्चधर्मवित्॥१८

सुताः नैकरूपाः अनेकरूपाः॥१४॥ तेसूतेसुवातेइत्यर्थः शस्त्राणिपरविशसनकर्तृणि॥१५॥ व
रान्श्रेष्ठान्अप्रमेयान्गुणायत्तयाअपरिच्छेद्यान्अरूपिणः अदृश्यमानरूपान्॥१६॥ संहा
रान्अन्वर्थसंहारनामकान्· दुर्धर्षान्परैःसोढुमशक्यान्दुराक्रामान्दीर्घश्चार्षः दुराक्र
मान्अमोघान्॥१७॥ अपूर्वाणांअस्त्रविद्याविशेषाणामितिशेषः॥१८॥ श्री

८४

राम
८१

इष्टं अश्वमेधांतयागः॥ आपूर्त्तं वापीकूपादिनिर्माणं तद्वधः तत्फलनाशः भूयात् भवेत् भविष्यतीतिया
वत् करिष्ये इति प्रतिश्रुत्य प्रतिज्ञाय संधिरार्षः॥ उक्तं वाक्यं अकुर्वतः अननुतिष्ठतः॥ ८॥ कृतास्त्रं शि
क्षितास्त्रं शक्ष्यंति सहिष्यंते प्रधर्षयितुमिति शेषो वा अग्निना रक्षितममृतमिव त्वमुपमा॥ अनेन पुत्र

प्रतिश्रुत्य करिष्ये इति उक्तं वाक्यमकुर्वतः॥ इष्टापूर्त्तवधो भूयात्तस्माद्रामं विसर्जय॥ ८॥ कृता
स्त्रमकृतास्त्रं वा नेनं शक्ष्यंति राक्षसाः॥ गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा॥ ९॥ एष विग्र
हवान्धर्म एष वीर्यवतां वरः॥ एष विद्याधिको लोके तपसश्च परायणम्॥ १०॥ एषोऽस्त्रान्
विविधान्वेत्ति त्रैलोक्ये सचराचरे॥ नैनमन्यः पुमान्वेत्ति न च वेत्स्यंति केचन॥ ११॥ न देवा
नर्षयः केचिन्नामरा न च राक्षसाः॥ गंधर्वयक्षप्रवराः सकिन्नरमहोरगाः॥ १२॥ श्री

विपत्तिभीत्यपनयः॥ ९॥ न केवलं विश्वामित्रकृतसंरक्षणे नैव रामस्य दुर्धर्षत्वं किंतु स्वतोपी
त्याह॥ रामविश्वामित्रयोः श्लिष्टवर्णनेन। एषः रामः विश्वामित्रश्च। रामपक्षे विद्याधिकः सह
जज्ञानशक्तिः तपसः मननादेः परायणं प्राप्यः विश्वामित्रपक्षे तपस आश्रयः॥ १०॥ रामपक्षे
अन्यः पुमान् अविद्यावतः पुमानित्यर्थः॥ विश्वामित्रपक्षे एनं अस्त्रगणम्॥ ११॥ १२॥

राजापि तद्वाक्यश्रवणेन सुप्रीतमनाः सन् रामं ददौ ॥ ३ ॥ यात्रायां शकुनमाह· तत इति· ववौ इत्यस्य पूर्वत इति शेषः विश्वामित्रगतं तत्संबद्धं· राजीवं पद्मं ॥ ४ ॥ प्रयाते प्रयाणोन्मुखे· स्वप्रयोजनोपक्रमात् देवानां दुंदुभिस्वनसहिता पुष्पवृष्टिः शंखादिघोषस्तु स्वनगरजः ॥ ५ ॥ धन्वी धनुर्विद्याकृतश्रमः ॥ ६ ॥ कलापिनौ सतूणीरौ शोभयानौ प्रकाशयंतौ· शस्त्रतेजसा अनुगमभावत्र्यार्षः त्रिशीर्षौ विव पन्नगौ· स्कंधस्थि

४४

स पुत्रं मूर्ध्न्युपाघ्राय राजा दशरथस्तदा ॥ ददौ कुशिकपुत्राय सुप्रीतेनांतरात्मना ॥ ३ ॥
ततो वायुः सुखस्पर्शो नीरजस्को ववौ तदा ॥ विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम् ॥ ४ ॥
पुष्पवृष्टिर्महत्यासीद्देवदुंदुभिनिस्वनैः ॥ शंखदुंदुभिनिर्घोषः प्रयाते तु महात्मनि ॥ ५ ॥
विश्वामित्रो ययावग्रे ततो रामो महायशाः ॥ काकपक्षधरो धन्वी तं च सौमित्रिरन्वगात् ॥ ६ ॥
कलापिनौ धनुष्पाणी शोभयानौ दिशो दश ॥ विश्वामित्रं महात्मानं त्रिशीर्षाविव पन्नगौ ॥ ७ ॥

त्रिशीर्षत्वं यद्वा प्र

तधनुषा पृष्ठवद्धतूणीरेण मस्तकेन च त्रैमेकं तूणीरद्वयधारणात् त्रिशीर्षत्वं· धनुषः पाणावुक्तत्वात्· अत्रेदं तूणीरादि वैष्णवं गरुडेन दत्तं रामाय ताडकासुबाहुवधाय मारीचस्य समुद्रे पातनाय च· न हि प्राकृतशस्त्रसाध्यमेतत्· तदुक्तं पाद्मे· पथितार्दर्पः समागम्य त्रीणि चास्त्राणि कार्मुकं सर्वभूतैरदृश्यः सन् दत्वा ताभ्यां पुनर्ययाविति· अस्त्राणि शस्त्राणि· खड्गचर्मतूणीररूपाणि ॥ ७ ॥

१९॥२०॥ वस्कतोरस्तोनिग्रहेशक्तोपिविश्वामित्रः त्वत्पुत्रानुग्रहायैवतंयाचतइत्याह-तेषामिति-हितं-प्र
तिरहस्यानन्यदुर्लभानेकविद्याप्रदानादिरूपं॥२१ मुमोदेति-परस्मैपदमार्षं-चत्वर्थः प्रसन्नचित्त
इत्युत्तरंयोज्यः राघवस्यरामस्य-कुशिकात्मजायरामंदातुंबुध्वाआचिंतयदितिशेषः॥२२॥ इतिश्री

तेनास्यमुनिमुख्यस्यधर्मज्ञस्यमहात्मनः॥ नकिंचिदस्त्यविदितंभूतंभव्यंचराघव॥१९॥
एवंवीर्योमहातेजाविश्वामित्रोमहायशाः॥ नराममगमनेराजन्संशयंगंतुमर्हसि॥२०॥ तेषां
निग्रहणेशक्तः स्वयंचकुशिकात्मजः॥ तवपुत्रहितार्थायत्वामुपेत्याभियाचते॥२१॥ इति
मुनिवचनात्प्रसन्नचित्तोरघुवृषभश्चमुमोदपार्थिवः॥ गमनमभिरुरोचराघवस्यप्रथि
तयशाःकुशिकात्मजायबुध्वा॥२२॥ इत्यार्षेश्रीरामायणेबालकांडेएकविंशः सर्गः॥२१॥
तथावसिष्ठेब्रुवतिराजादशरथः स्वयं॥ प्रहृष्टवदनोराममाजुहावसलक्ष्मणं॥१॥ कृत
स्वस्त्ययनंमात्रापित्रादशरथेनच॥ पुरोधसावसिष्ठेनमंगलैरभिमंत्रितम्॥२॥

रामाभिरामेश्रीरामीयेरामायणतिलकेबालकांडेएकविंशः सर्गः॥२१॥ तथेति-सलक्ष्मणंरामंआजु
हावतयोरवियोगाभावज्ञानादितिशेषः॥१॥ कृतस्वस्त्ययनंकृतमंगलाचरणं-मंगलैःमंगलसूक्तैः
मंत्रैः किंच-तत्वज्ञानप्रतिपादकवाक्यैरभिमंत्रितंबोधितमित्यर्थः तद्बोधनंचयोगवासिष्ठेप्रसिद्धं॥२॥

मंत्रग्रामं·बलाविद्यासंज्ञकं मंत्रसमूहं·तथा अतिबलासंज्ञकंच·अन्येतुप्रागुक्तादिव्यास्त्रशतरूपंमं
त्रसमूहंतथाप्रकृतोपयोगिन्यौबलाअतिबलाख्येचविद्येइत्यर्थः·परंतुअत्रबलातिबलयोरेव
दानं·अन्येषांतुदानंअग्रेभविष्यतीत्याहुः·गृहाणत्वमित्युपलक्षणं·लक्ष्मणस्यापिक्षुत्पिपासा
द्यंतिरूपफलस्यउभयोरपिदर्शनात्॥ अपेतणाञ्च·श्रमोबहुदूरगमनादौतन्मूलकोज्वरोपिनवि

मंत्रग्राममंगृहाणत्वंबलामतिबलांतथा॥ नश्रमोनज्वरोवातेनरूपस्यविपर्ययः॥१३॥
नचसुप्तंप्रमत्तंवाधर्षयिष्यंतिनैर्ऋताः॥ नवाह्वोः सदृशोवीर्येपृथिव्यामस्तिकश्चन॥१४॥
त्रिषुलोकेषुवारामनभवेत्सदृशस्तव॥ बलामतिबलांचैवपठतस्तातराघव॥१५॥ न
सौभाग्येनदाक्षिण्येनज्ञानेबुद्धिनिश्चये॥ नोत्तरेप्रतिवक्तव्येसमोलोकेतवानघ॥१६॥
एतद्विद्याद्वयेलब्धेनभवेत्सदृशस्तव॥ बलाचातिबलाचैवसर्वज्ञानस्यमातरौ॥१७॥

पर्ययः॥ अन्यथाभावः तद्विद्याजपेनभविष्यतीतिशेषः॥१३॥ प्रमत्तंअकृताचमनादिकं·धर्षणमभि
भवः॥ अस्तीतिवर्त्तमानसामीप्येभविष्यतिलट्·सर्वत्रातद्विद्यालाभोहेतुः॥१४॥ नकेवलंपृथिव्या
मेवेत्याह·त्रिष्वित्यादि॥१५॥ ज्ञानंतत्वज्ञानं·बुद्धिनिश्चयःऐहिकविषयकः॥ वादिनांप्रतिवक्त
व्येउत्तरेइत्यर्थः॥१६॥ तवदृसशोन·केनापिगुणेनेतिशेषः सर्वज्ञानस्यमातरावितिः·अप्रति
भामूलकक्षुधादिनिवृत्तिसामर्थ्यवत्वात्सर्वज्ञानजनकेइत्यर्थः॥१७॥ ॥

अक्रूद्धौ· अनल्परूपवीर्यादिमंतौ· शोभयंतौ विश्वामित्रमिति शेषः॥८॥ बद्धगोधाचर्मकृतं अंगुलित्रा
णम्· ययोस्तौ· गोधाहस्तत्राणमिति कश्चित्· अंगुलित्राणस्य पौनरुक्त्यापत्तेस्तच्चिंत्यम्॥९॥ शोभ
येतामित्यडभावश्छांदसः॥१०॥ स्थाणुं रुद्रं पावकी स्कंद विशाखौ· अध्यर्धयोजनं अर्धाधिकयो

अनुजग्मतुरक्षुद्रौ पितामहमिवाऽश्विनौ॥ अनुयातौ श्रियादीप्तौ शोभयंतावनिंदितौ॥८॥
तदा कुशिकपुत्रं तु धनुष्पाणी स्वलंकृतौ॥ बद्धगोधांगुलित्राणौ खड्गवंतौ महाद्युती॥९॥
कुमारौ चारुवपुषौ भ्रातरौ रामलक्ष्मणौ॥ अनुयातौ श्रियादीप्तौ शोभयेतामनिंदितौ॥१०॥
स्थाणुं देवमिवाचिंत्यं कुमाराविव पावकी॥ अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे॥११॥
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत॥ गृहाण वत्स सलिलं माभूत्कालस्य पर्ययः॥१२॥

जनं षट्क्रोशमिति यावत्॥११॥ तावद्दूरगमनेन बालकयोः क्षुत्तृट्पीडाप्रादुर्भाव
स्यावश्यकत्वान्महर्षिर्विनाप्यन्नं परमतृप्त्यादिकृद्विद्ये उपदेक्ष्यमाणः· वत्सरामेत्यादि· सलि
लं गृहाण· शुद्धाचमनं कुरु· कालस्य अन्नभोजनकालस्य पर्यायोऽतिक्रमः॥१२॥

सहस्रेत्यादि पूर्वान्वयि· कुशिकात्मजो विश्वामित्रः गुरुकार्याणि गुरुविषयाणि कार्याणि· पूर्वोत्थाय
पश्चात्संनिवेशीत्यादीनि तानि सर्वाणि नियुज्य उपदिश्येत्यर्थः सप्तम्यंतपाठे॥ गुरुकार्याणिपा
दोपसंग्रहणादीनि· कुशिकात्मजे नियुज्य कृत्वेत्यर्थः सरय्वास्तीरे॥२३॥ दशरथेत्यादि षष्ठ्य
र्थे चतुर्थ्यः॥ तृणाद्यनुचितशयनोषितयोरपि रात्रेः सुखमुष्टत्वे हेतुः कुशिकसुतवचोनुलालि

सहस्ररश्मिर्भगवान्शरदीव दिवाकरः॥ गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे
ऊषुस्तां रजनीं तत्र सरय्वां सुसुखं त्रयः॥२३॥ दशरथनृपसूनुसत्तमाभ्यां तृणशयने
नुचिते तदोषिताभ्यां॥ कुशिकसुतवचोनुलालिताभ्यां सुखमिव सा विबभौ विभाव
री॥२४॥ इत्यार्षे श्रीरामा॰ बा॰ द्वाविंशः सर्गः॥२२॥ प्रभातायां तु शर्वर्यां विश्वामित्रो म
हामुनिः॥ अभ्यभाषत काकुत्स्थौ शयानौ पर्णसंस्तरे॥१॥ कौसल्या सुप्रजा राम पूर्वा संध्या
प्रवर्त्तते॥ उत्तिष्ठ नरशार्दूल कर्त्तव्यं दैवमाह्निकम्॥२॥

तत्वं· विबभौ सुष्ठेति यावत्॥२४
इति द्वाविंशः सर्गः॥२२॥ प्रभातायामिति· पर्णसंस्तरे· मृदुपर्णादिपरिकल्पिते शयनीये· पू
र्वस्मिँल्लोके तृणशयन इत्युपलक्षणं बोध्यं॥१॥ कौसल्येति· हे राम त्वया पुत्रेण कौसल्या सुपुत्रा
शोभनपुत्रवती· अतस्तादृशस्य सुपुत्रस्य तव अस्मिन् समये निद्रा अनुचिता· यतः पूर्वा सं
ध्या प्रातःसंध्या प्रवर्त्तते अत उत्तिष्ठ· दैवं देवताध्यानं· आह्निकं शौचादिक्रिया॥२॥

१५ विद्याद्वयमधीयानेत्वयीतिशेषः॥ यशश्चाप्यतुलंभुवीतिपाठेभविष्यतीत्यपिशेषः॥ तयोर्विद्ययोः तादृशसामर्थ्येकारणमाह॥ पितामहेत्यादि॥ तन्निर्मितत्वात्तत्सुते॥१६॥ प्रदातुंममबुद्धिरितिशेषः॥ सदृशः तद्दानयोग्यइत्यर्थः॥ एतेएतद्विद्याप्रदानयोग्याः बहुतिल्लुप्तविभक्तिकंबहवइत्यर्थः॥

क्षुत्पिपासेनतेरामभविष्येतेनरोत्तम॥ बलामतिबलांचैवपठतस्तातराघव॥१८॥
विद्याद्वयमधीयानेयशश्चाप्यभवेद्भुवि॥ पितामहसुतेह्येतेविद्येतेजःसमन्विते॥१९॥
प्रदातुंतवकाकुत्स्थसदृशस्त्वंहिपार्थिव॥ कामंबहुगुणाःसर्वेत्वय्येतेनात्रसंशयः॥२०॥
तपसासंभृतेचैतेबहुरूपेभविष्यतः॥ ततोरामोजलंस्पृष्ट्वाप्रहृष्टवदनःशुचिः॥२१॥
प्रतिजग्राहतेविद्येमहर्षेर्भावितात्मनः॥ विद्यासमुदितोरामःशुशुभेभीमविक्रमः॥२२॥

विपुलाइतियावत्॥२०॥ तपसामदीयेनसंभृतेपूर्णेबहुरूपेशास्त्रोक्तफलादधिकफलप्रदे॥ यद्वा॥ तपसासर्वतपःप्राप्त्यैनतपोरूपेणभवतासंभृतेधृतेइत्यर्थः॥ जलंस्पृष्ट्वाऽचम्य॥२१॥ विद्यासमुदितः॥ विद्यासंबद्धःस्वतोविक्रमवानपिविद्यासंबंधात्॥ अधिकविक्रमइत्यर्थः॥२२॥

कृतोद्वाहं समाधेः कृतव्युत्थानं कालोचितविलासदेशं गच्छंतं देवेशं दुर्मेधाः कामः धर्षयामास चित्त
विकारोत्पादनेन अभिभूतवान् ततो महात्मना रुद्रेण ज्ञातापराधेन हुंकृतः ॥ चक्षुषा अवध्यातो दु
ष्टश्चेत्युत्तरेणान्वयः ॥११॥ व्यशीर्यंत विशीर्णानि सर्वगात्राणि सर्वेवयवाः ॥१२॥ तत्र प्रसिद्धतरेऽस्मि

कृतोद्वाहं तु देवेशं गच्छंतं समरुद्गणम् ॥ धर्षयामास दुर्मेधा हुंकृतश्च महात्मना ॥११॥
अवध्यातस्य रुद्रेण चक्षुषा रघुनंदन ॥ व्यशीर्यंत शरीरात्स्वात्सर्वगात्राणि दुर्मतेः ॥१२॥
तत्र गात्रं हतं तस्य निर्दग्धस्य महात्मना ॥ अशरीरः कृतः कामः क्रोधाद्देवेश्वरेण ह ॥१३॥
अनंग इति विख्यातस्तदाप्रभृति राघव ॥ स चांगविषयः श्रीमान्यत्रांगं स मुमोच ह ॥१४॥
तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा ॥ शिष्या धर्मपरा वीर तेषां पापं न विद्यते ॥१५॥
इहाद्य रजनीं राम वसेम शुभदर्शन ॥ पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयम् ॥१६॥

न्नाश्रमे हतं न वष्टं ह शब्दः प्रसिद्धो ॥१३॥ ततो भयात्पलायमानो यत्र देशे स कामः अंगं मु
मोच सोंगविषयः ॥ अंगदेश इति विख्यात इति शेषः ॥१४॥ तस्य पस्याणोः ॥ इमे मुनयः इदानी
मिह तपस्यंतः ॥ तस्य रुद्रस्य पुरा पूर्वकालसंतानपरंपरया शिष्याः अत एव धर्मपराः अ
त एव तेषां पापं न विद्यते ॥१५॥ सरितोः गंगासरय्वोः ॥१६॥ राम

स्नात्वा कृतोदकौ कृतार्घ्यदानौ। इदं तावत्स्वयं तत्कर्तव्यक्रियामात्रोपलक्षणं। परमं जपं सावित्रीं ॥ ३ ॥ अभित स्तस्थतुः सन्मुखौ स्थितावित्यर्थः ॥ ४ ॥ प्रयांतौ गंतौ ॥ ५ ॥ तत्र गंगासरय्वाः संगमप्रदेशे तप्यतां तपतां यः छो

तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ ॥ स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपं ॥ ३ ॥ कृता न्हिकौ महावीर्यौ विश्वामित्रं तपोधनं ॥ अभिवाद्यातिसंहृष्टौ गमनायाभितस्थतुः ॥ ४ ॥ तौ प्रयांतौ महावीर्यौ दिव्यां त्रिपथगां नदीं ॥ ददृशाते ततस्तत्र सरय्वाः संगमे शुभे ॥ ५ ॥ तत्रा श्रमपदं पुण्यमृषीणां भावितात्मनां ॥ बहुवर्षसहस्राणि तप्यतां परमं तपः ॥ ६ ॥ तं दृष्ट्वा पर मप्रीतौ राघवौ पुण्यमाश्रमं ॥ ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः ॥ ७ ॥ कस्यायमाश्रमः पुण्यः को न्वस्मिन्वसते पुमान् ॥ भगवंछ्रोतुमिच्छावः परं कौतूहलं हि नौ ॥ ८ ॥ तयोस्तद्वचनं श्रुत्वा प्रहस्य मुनिपुंगवः ॥ अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ॥ ९ ॥ कंदर्पो मूर्ति मानासीत्काम इत्युच्यते बुधैः ॥ तपस्यंतमिह स्थाणुं नियमेन समाहितं ॥ १० ॥ ।

दसः ऋषीणामाश्रमपदं ददृशाते इत्युत्कर्षः ॥ ६ ॥ तं परमरमणीयं ॥ ७ ॥ वसते वसति तङ् छांदसः ॥ ८ ॥ प्रहस्य बालकवचनश्रवणाज्जसंतोषाद्धासः ॥ सर्वज्ञोप्येवं नाटयतीति वा। यस्य पूर्वः यस्य पूर्व कालाधिस्थेयः अभूत्स श्रूयतामित्यन्वयः ॥ ९ ॥ मूर्त्तिमान् शरीरधरः समाहितं समाहितचित्तं। स्था णुं रुद्रम् ॥ १० ॥

रामा॰बा॰
६२

कामाश्रमपदेसर्वकामपरिप्लुरके भर्गाश्रमे॥२४॥२३॥इतिश्रीबालकांडेटीकायांत्रयोविंशःसर्गः॥२३॥त
तइति॰नद्याःगंगायाः॥१॥उपस्थाप्यप्रज्ञानप्य॥२॥राजपुत्रपुरस्कृतइतीतृतीयातत्पुरुषः॥तीर्त्वेतिशे

न्यवसन्सुसुखंतत्रकामाश्रमपदेतदा॥कथाभिरभिरामाभिरभिरामौनृपात्मजौ॥२२॥
रमयामासधर्मात्माकौशिकोमुनिपुंगवः॥२३॥इत्यार्षेश्रीरामायणेवालकांडेत्रयोविंशःसर्गः
॥२३॥ततःप्रभातेविमलेकृताह्निकमरिंदमौ॥विश्वामित्रंपुरस्कृत्यनद्यास्तीरमुपागतौ
॥१॥तेचसर्वेमहात्मानोमुनयःसंशितव्रताः॥उपस्थाप्यशुभांनावंविश्वामित्रमथाब्रुवन्॥२॥
आरोहतुभवान्नावंराजपुत्रपुरस्कृतः॥अरिष्टंगच्छपंथानंमाभूत्कालस्यपर्ययः॥३॥वि
श्वामित्रस्तथेत्युक्त्वातानृषीन्प्रतिपूज्यच॥ततारसहितस्ताभ्यांसरितंसागरंगमां॥४॥
तत्रशुश्राववैशब्दंतोयसंरंभवर्धितम्॥मध्यमागम्यतोयस्यतस्यशब्दस्यनिश्चयम्॥५॥

९२

षः॥अरिष्टंशुभंयथाभवतितथा॥ऋषिभिर्हिंसार्थत्वात्॥३॥ततारतर्त्तुमुपक्रांतः॥सरितंगंगां॰सागरं
गच्छतिजलपूर्णत्वरूपस्वरूपंप्रापयतिति॥अंतर्भावितएयर्थः॥अगस्त्यशोषितस्यसमुद्रस्यगं
गयापूरणांकृतमितितिप्रसिद्धेः॥४॥तोयसंरंभेणपरस्परंतरंगसंघट्टजन्नोभेणवर्धितंअतिप्रव
द्धं॰निश्चयंसहजक्षोपाधिकोवत्येतदन्यतरनिश्चयम्॥५॥

राम
६२

स्नानादिनाशुचयोभूत्वापुण्यमाश्रममभिगच्छामहे। व्यत्ययात्तङ्· हेइतिपृथक्पदंवा· परःयुक्ततरः
१७॥स्नाताइत्यादीनि॥तदाश्रमवासिमुनिविशेषणानि· तेषांसंवदतां· तेषुसंवदत्सु· तान्अदृ
ष्ट्वापितपोमहिमजातदीर्घत्ववताअतएवविप्रकृष्टार्थग्राहिणाचक्षुषारामाद्यागमनंवि
ज्ञायेत्युत्तरेणान्वयः॥१५॥आतिथ्यमतिथ्यर्हंभोजनादि॥१६॥पश्चात्भगवतोपिमनुष्यरूप

अभिगच्छामहेसर्वेशुचयःपुण्यमाश्रमं॥इहवासःपरोस्माकंसुखंवत्स्यामहेनिशां॥१७॥
स्नाताश्चकृतजप्याश्चहुतहव्यानरोत्तम॥तेषांसंवदतांतत्रतपोदीर्घेणचक्षुषा॥१८॥
विज्ञायपरमप्रीतामुनयोहर्षमागमन्॥अर्घ्यंपाद्यंतथातिथ्यंनिवेद्यकुशिकात्मजे॥१९॥
रामलक्ष्मणयोःपश्चादकुर्वन्नतिथिक्रियां॥सत्कारंसमनुप्राप्यकथाभिरभिरंजयन्॥२०॥
यथार्हमजपन्संध्यामृषयस्तेसमाहिताः॥तत्रवासिभिरानीतामुनिभिःसुव्रतैःसह॥२१॥

धारित्वेनविश्वामित्रेगुरुत्वनाटनेनच आदौविश्वामित्रेअर्घ्यादिदत्वापश्चाद्रामेददुः॥अ
भ्यरंजयन्अडभावआर्षः॥तदाश्रमस्थानृषीन्प्रतिशेषः·यद्वासत्कारंसमनुप्राप्यतं·
प्रापय्यविश्वामित्रादीन्·तदाश्रमस्थाऋषयोभ्यरंजयन्नित्यर्थः॥२०॥अजपत्·नदीती
रे·तेविश्वामित्राद्याःऋषयस्तद्वासिभिर्मुनिभिःसहस्वसाहित्येनआनीताःसंवेशनाय
स्वाश्रमंप्रापिता॥२१॥

भैरवैः भयंकरैः श्वापदानि दुष्टमृगाः॥ दारुणारवैः दारुणशब्दैः शाकुंतैः भासैः शाकुनैः सर्वपक्षिभिः भैरवस्वनैर्वाश्यद्भिः अतिभैरवं शब्दं कुर्वद्भिः॥१४॥ शोभितं युक्तं· धवादयो वृक्षविशेषः॥१५॥ किं नु कुतो नु॥१६॥ यस्य प्राणिनः सश्रूयतामित्यन्वयः स्फीतौ समृद्धौ॥१७॥ मलदाः करुशा इति वक्तव्

भैरवैः श्वापदैः कीर्णं शकुंतैर्दारुणारवैः॥ नानाप्रकारैः शकुनैर्वाश्यद्भिर्भैरवस्वनैः॥१४॥
सिंहव्याघ्रवराहैश्च वारणैश्चापि शोभितं॥ धवाश्वकर्णककुभैर्बिल्वतिंदुकपाटलैः॥१५॥
संकीर्णं बदरीभिश्च किं न्विदं दारुणं वनम्॥ तमुवाच महातेजा विश्वामित्रो महामुनिः॥१६॥
श्रूयतां वत्स काकुत्स्थ यस्यैतद्दारुणं वनम्॥ एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम॥१७॥
मलदाश्च करूषाश्च देवनिर्माणनिर्मितौ॥ पुरा वृत्रवधे राम मलेन समभिप्लुतं॥१८॥
क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत्॥ तमिंद्रं मलिनं देवा ऋषयश्च तपोधनाः॥१९॥
कलशैः स्नापयामासुर्मलं चास्य प्रमोचयन्॥ इह भूम्यां मलं दत्वा देवाः कारूशमेव च॥२०॥

चनम्·॥ शाब्दस्वभावकृतं देवनिर्माणे नरदेवयत्नेन निर्मितौ मलेन अशुच्याचारेण॥१८॥ क्षुधा बुभुक्षया· समभिप्लुतमित्यनुकृष्यते· ब्रह्महत्या वृत्रस्य ब्रह्मसंतानत्वात्· देवाः वस्वादयः॥१९॥ कलशैः॥ गंगाजलपूर्णघटैः॥ प्रमोचयन् प्रामोचयन्· कारूशं कृतवदत्वात्प्रकृते तत्पर्थः॥२०॥

93

ज्ञातुकामस्य संकल्पस्य जात इति शेषः ॥ ६ ॥ भिद्यमानस्य परस्परसंघट्टमानस्य ॥ ७ ॥ निश्चयं निश्चयजनकहेतुं ॥ प
तेन मनोनिर्मितत्वेन· तस्मात्सरसः ॥ यास्मुस्राव सेत्यन्वयः ॥ ८ ॥ सरसो यो त्ति प्रवर्तन इति सरय्वाः सरः

ज्ञातुकामो महातेजाः सह रामः कनीयसा ॥ अथ रामः सरिन्मध्ये पप्रच्छ मुनिपुंगवम् ॥ ६ ॥ वारिणो
भिद्यमानस्य किमयं तुमुलो ध्वनिः ॥ राघवस्य वचः श्रुत्वा कौतूहलसमन्वितम् ॥ ७ ॥ कथयामास धर्मात्मा तस्य शब्दस्य निश्चयं ॥ कैलासपर्वते राम मनसा निर्मितं पुरा ॥ ८ ॥ ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः ॥ तस्मात्सुस्राव सरसः सायोध्यामुपगूहते ॥ ९ ॥ सरः प्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥ तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते ॥ १० ॥ वारिसंक्षोभजो राम प्रणामं नियतः कुरु ॥ ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्मिकौ ॥ ११ ॥ तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ ॥ स वनं घोरसंकाशं दृष्ट्वा नरवरात्मजः ॥ १२ ॥ अविप्रहतमैक्ष्वाकः पप्रच्छ मुनिपुंगवम् ॥ अहो वनमिदं दुर्गं झिल्लिकागणसंयुतम् ॥ १३ ॥

प्रवर्तते तिनद्योगनिर्वचनं· पुण्ये
हेतुर्ब्रह्मसरश्च्युतत्वं· ॥ तस्या अयं संधिरार्षः ॥ या जाह्नवीमभिवर्त्तते तया सह संगच्छते तस्या
अयं शब्द इत्यर्थः ॥ १० ॥ ताभ्यां सरयूगंगाभ्यां ॥ ११ ॥ विक्रमः पादविक्षेपः ॥ घोरसंकाशं भयंकरदर्शनं
१२ ॥ अविप्रहतं सार्थगमाभावात् ॥ अक्षुण्णं ॥ झिल्लीकाकीटविशेषः ॥ १३ ॥ ॥

२८॥सेयंयाविनाशायतिसेत्यर्थः॥आवत्यनिरुध्य अर्द्धं अतिक्रांतमत्यर्धंतादृशेयोजने॥२९॥यतश्चे
दंताटकावनंअस्माभिर्गंतव्यंअतएवचहेतोर्हे रामस्वबाहुबलमाश्रित्यइमांजहि॥३०॥ननु॥

राक्षसीभैरवाकारो नित्यंत्रासयतेप्रजाः॥इमौजनपदौनित्यंविनाशयतिराघव॥२८॥
मलदांश्चकरूशांश्चताटकादुष्टचारिणी॥सेयंपंथानमावृत्य वसत्यत्यर्धयोजने॥२९॥
अतएवचगंतव्यंताटकायावनंयतः॥स्वबाहुबलमाश्रित्यजहीमांदुष्टचारिणीं॥३०॥
मन्नियोगादिमंदेशंकुरुनिष्कंटकंपुनः॥नहिकश्चिदिमंदेशंशक्तोह्यागंतुमीदृशं॥३१॥
यक्षिण्याघोरयारामउत्सादितमसह्यया॥एतत्तेसर्वमाख्यातंयथैतद्दारुणंवनं॥य
क्ष्याचोत्सादितंसर्वमद्यापिननिवर्त्तते॥३२॥इत्यार्षेश्रीरामायणेवाल्मीकियेबालकां
डेचतुर्विंशःसर्गः॥२४॥अथतस्याप्रमेयस्यमुनेर्वचनमुत्तमं॥श्रुत्वापुरुषशार्दूलः
प्रत्युवाचशुभांगिरं॥१॥अल्पवीर्यायदायक्षीश्रूयतेमुनिपुंगव॥कथंनागसहस्र
स्यधारयत्यबलाबलम्॥२॥

९५

स्त्रीकथंहंतव्यातत्राह॰मन्नियोगादिति॰मदाज्ञयास्त्रीव
धशंकांत्यज॰ईदृशंताटकाक्रांतं॥३१॥अद्यापिननिवर्त्तते अत्रपूर्वस्थितोजनइतिशेषः॥३२॥
इतिचतुर्विंशतिःसर्गः॥२४॥अथेति॰अप्रमेयस्यअप्रमेयप्रभावस्य॰शार्दूलःश्रेष्ठः॥१॥यदा
यतःयक्षीयक्षजातिःश्रूयतेपुराणादावितिशेषः॥अबलेतिसाभिप्रायम्॥२॥

शरीरजमितिपूर्वान्वयि· प्रपेदिरे देवा इतिशेषः ॥२१॥ ततः तदेत्यर्थः ॥२२॥ यस्मात्त्वममांगमलधारिणौत
स्मात्त्ख्यातिंगमिष्यतइतिपूर्वेणान्वयः ॥२३॥ शक्रेणाकृतांदेशस्यपूजांदृष्ट्वापाकशासनंसाधि

शरीरजंमहेंद्रस्यततोहर्षंप्रपेदिरे ॥ निर्मलोनिष्करूषश्चशुद्धइंद्रोयथाभवत् ॥२१॥
ततोदेशस्यसुप्रीतोवरंप्रादादनुत्तमम् ॥ इमौजनपदौस्फीतौख्यातिंलोकेगमिष्यतः ॥२२॥
मलदाश्चकरूशाश्चममांगमलधारिणौ ॥ साधुसाध्वितितंदेवाःपाकशासनमब्रुवन् ॥२३॥
देशस्यपूजांतांदृष्ट्वाकृतांशक्रेणधीमता ॥ एतौजनपदौस्फीतौदीर्घकालमरिंदम ॥२४॥ म
लदाश्चकरूशाश्चमुदिताधनधान्यतः ॥ कस्यचित्त्वथकालस्ययक्षिणीकामरूपिणी ॥२५॥
बलंनागसहस्रस्यधारयंतीतदाह्यभूत् ॥ ताटकानामभद्रंतेभार्यासुंदस्यधीमतः ॥२६॥ मा
रीचोराक्षसःपुत्रोयस्याःशक्रपराक्रमः ॥ वृत्तबाहुर्महाशीर्षोविपुलास्यतनुर्महान् ॥२७॥

तिश्रब्रुवन्नितिपूर्वेणान्वयः ॥२४॥ कस्यचित् कियतःकालस्यअपगमेइतिशेषः ॥२५॥ भद्रे
तेइतिविश्वामित्रस्यआशीर्वचनम्· बालकत्वेनत्वादृशायक्षिणीनामश्रवणेनत्रासोमाभूदि
ति· यद्वा· ताटकानामतेभद्रम्· प्रथमशौर्यस्थानत्वेनशौर्यप्रसिद्धिकरत्वरूपं· भद्रत्वमस्याइ
तिबोध्यम् ॥२६॥२७॥

जातसंरंभास्वभर्तृवधजकोपवती ॥११॥ भजस्व शुद्धयोनिस्वरूपं मुक्तोतिशेषः शप्तवान् राक्षसत्वं भज
स्वेति ॥१२॥ तदेव विस्तरेणाह पुरुषादीति भवेति शेषः । तदेवोपपादयति इदमिति इदं रूपं परित्य
ज्य रूपं विहाय त्याजयित्वा दारुणं रूपं राक्षसीरूपम् अस्तु भवतु । तदेवाभिप्रेत्योपाध्येऽनुक्तं सौराम

भर्त्रार्थे जातसंरंभा गर्जंती साभ्यधावत ॥ आपतंतीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः ॥११॥ रा
क्षसत्वं भजस्वेति मारीचं व्याजहार सः ॥ अगस्त्यः परमामर्षस्ताटकामपि शप्तवान् ॥१२॥ पुरु
षादी महायक्षी विकृता विकृतानना ॥ इदं रूपं विहायाशु दारुणं रूपमस्तु ते ॥१३॥ सैषा शा
पकृतामर्षा ताटका क्रोधमूर्च्छिता ॥ देशमुत्सादयत्येनमगस्त्याचरितं शुभम् ॥१४॥ एनां रा
घव दुर्वृत्तां यक्षीं परमदारुणाम् ॥ गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम् ॥१५॥ न ह्ये
नां शापसंसृष्टां कश्चिदुत्सहते पुमान् ॥ निहंतुं त्रिषु लोकेषु त्वामृते रघुनंदन ॥१६॥

95

लक्ष्मणो वीरावायांतीं पथि राक्षसी तां ताटकां नाम घोरां नां सुंदभार्यां सुकेतुजामिति ॥१३॥ अमर्षा
त् असहनात् । देशोत्सादने हेतुगर्भं विशेषणं अगस्त्याचरितमिति अगस्त्यतपःस्थानमित्य
र्थः ॥१४॥ गोब्राह्मणहितार्थायेति स्त्रीवधशंकानिरासाय । तद्धितायत्क्रियमाणं पापवदाभास
मानमपि धर्मायैवेति भावः ॥१५॥ शापसंसृष्टां अगस्त्यशापव्याप्तां ॥१६॥ ॥

३ वीर्यशौर्यादि॰ बलमात्रमत्रैव वीर्याभिधानं शौर्यादयोन्येपि गुणाः तस्यासंतीति ज्ञापनार्थं ॥ ४ ॥ वरप्राप्तिमू-
लमाह॰ पूर्वमिति॰ तेपे पुत्रार्थं पितामहमुद्दिश्येति शेषः ॥ ५ ॥ कन्यारत्नं दिव्यरूपवती कन्या ॥ ६ ॥ तद-

इत्युक्तं वचनं श्रुत्वा राघवस्यामितौजसः ॥ हर्षयन् श्लक्ष्णया वाचा स लक्ष्मणम रिंदमं ॥ ३ ॥
विश्वामित्रोब्रवीद्वाक्यं शृणु येन बलोत्कटा ॥ वरदानकृतं वीर्यं धारयत्यबला बलं ॥ ४ ॥
पूर्वमासीन्महायक्षः सुकेतुर्नाम वीर्यवान् ॥ अनपत्यः शुभाचारः स च तेपे महत्तपः ॥ ५ ॥
पितामहस्तु सुप्रीतस्तस्य यक्षपतेस्तदा ॥ कन्यारत्नं ददौ राम ताटकां नाम नामतः ॥ ६ ॥
ददौ नागसहस्रस्य बलं चास्याः पितामहः ॥ न त्वेव पुत्रं यक्षाय ददौ चासौ महायशाः ॥ ७ ॥
तां तु बालां विवर्धंतीं रूपयौवनशालिनीं ॥ जंभपुत्राय सुंदाय ददौ भार्यां यशस्विनीं ॥ ८ ॥
कस्यचित्त्वथ कालस्य यक्षी पुत्रं व्यजायत ॥ मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोभवत् ॥ ९ ॥
सुंदे तु निहते राम अगस्त्यमृषिसत्तमम् ॥ ताटका सह पुत्रेण प्रधर्षयितुमिच्छति ॥ १० ॥

भिसंहितगुणावता पुत्रेणान्यजनपीडा भवेदिति विचार्य पुत्रं न ददौ ॥ ७ ॥ विवर्धंती वर्धमानां॰
जंभपुत्राय इत्यत्र खंजुपुत्राय इति पाठे खंजोः पुत्रः खंजुपुत्रः असुरयक्षयोः देवयोनित्वेनोचितः
संबंधः ॥ ८ ॥ व्यजायत प्रासोष्ट असूत ॥ ९ ॥ शापं दर्शयति॰ सुंदे त्विति॰ निहते अगस्त्येन शापं दत्त्वेति ॥

बा॰टी॰ १ सर्गः २५ १०

एतैः एतादृशैः यद्वा आर्षत्वात् बहुत्वं एताभ्यां शास्त्रविद्भ्यामित्यर्थः । मच्छासनादिति· यथा परशुरामस्य जमदग्नेर्गुरोराज्ञया मातृवधेपि न दोषस्तथा बलादिविद्यादातृत्वेन गुरोर्मम आज्ञया स्त्रीवधे तव न दोष इति भावः २२ इति श्रीटीकायां पंचविंशतिः सर्गः ॥ २५ ॥ मुनेरिति· अक्लीबं धृष्टं ॥ १ ॥ पितुरिति· कौशि

एतैश्चान्यैश्च बहुभी राजपुत्रैर्महात्मभिः ॥ अधर्मसहिता नार्यो हताः पुरुषसत्तमैः तस्मा
देनां घृणां त्यक्त्वा जहि मच्छासनान्नृप ॥ २२ ॥ इत्यार्षे श्रीरामायणे बालकांडे पंचविंशतिः सर्गः ॥
॥ २५ ॥ मुनेर्वचनमक्लीबं श्रुत्वा नरवरात्मजः ॥ राघवः प्रांजलिर्भूत्वा प्रत्युवाच दृढव्रतः ॥ १ ॥
पितुर्वचननिर्देशात्पितुर्वचनगौरवात् ॥ वचनं कौशिकस्येति कर्त्तव्यमविशंकया ॥ २ ॥
अनुशिष्टोस्म्ययोध्यायां गुरुमध्ये महात्मना ॥ पित्रा दशरथेनाहं नावज्ञेयं हि तद्वचः ॥ ३ ॥
सोहं पितुर्वचः श्रुत्वा शासनाद्ब्रह्मवादिनः ॥ करिष्यामि न संदेहस्ताटकावधमुत्तमम् ॥ ४ ॥

कस्य वचनं अविशंकया कर्त्तव्यं त्वयेत्येवंरूपान्निर्देशात् नियोगात् पितुर्वचनगौरवात्· पर
माप्तवाक्यत्वेन अनितिप्रमाणत्वात्· त्वद्वचनं अवश्यं कर्त्तव्यत्वेन निश्चितमिति शेषः २ कदे
वं नियोगः कृत इत्यत्राह· अनु इति· गुरवो वसिष्ठवामदेवाद्याः अनवज्ञाने हेतुः उक्त एव·
तद्वचो विश्वामित्रवच इत्यनुशिष्ट इत्यन्वयः ॥ ३ ॥ सोहमिति· ब्रह्मवादिनः तस्य पापास्पर्शेन तत्
संकल्पादन्यस्यापि पापम पापं पुण्यं चेत्याह· उत्तममिति· उत्कृष्टधर्ममित्यर्थः ॥ ४ ॥

हेनरोत्तमतेस्त्रीवधनिमित्तादूणानकार्या· अत्रनरोत्तमेत्यनेनपुरुषोत्तमेश्वररूपत्वातवपापसंबंधाभाव
इतिध्वनितं· चातुर्वर्ण्येहितार्थंतद्धितायकर्त्तव्यमित्यस्यनृशंसमित्याद्युत्तरेणान्वयः वाशब्द इवार्थे·
अनृशंसमिवनृशंसंक्रूरमपिकार्यमित्यर्थः॥१७॥प्रजारक्षणकारणात्· प्रजारक्षणाद्धेतोः॥एषधर्म
इतिधर्मबहुलकत्वादितिभावः रक्षतासदेति· रक्षाधर्मसिद्धिशेषत्वेनेतिशेषः॥१८॥पातकंवामु

नहितेस्त्रीवधकृतेघृणाकार्यानरोत्तम॥चातुर्वर्ण्यहितार्थंहिकर्त्तव्यंराजसूनुना॥१७॥नृ
शंसमनृशंसंवाप्रजारक्षणकारणात्॥पातकंवासदोषंवाकर्त्तव्यंरक्षतासदा॥१८॥राज्यभा
रनियुक्तानामेषधर्मःसनातनः॥अधर्म्यांजहिकाकुत्स्थधर्मोह्यस्यानविद्यते॥१९॥श्रूयते
हिपुराशक्रोविरोचनसुतांनृप॥पृथिवींहन्तुमिच्छंतीमंथरामभ्यसूदयत्॥२०॥विष्णुना
चपुरारामभृगुपत्नीपतिव्रता॥अनिंद्रंलोकमिच्छंतीकाव्यमातानिषूदिता॥२१॥

रव्यपातकंवासदोषंवा·॥यज्ञादिवत्सदोषईषत्पापयुतंधर्मंवासदोषवधरूपमितियावत्· अ
तोप्यस्यावधोन्याय इत्याह·॥अधर्म्यामिति· धर्मादपेतां· नरदेवोपपादयतिधर्मोहीति॥१९॥अ
धर्म्यस्त्रीवधोपिधर्मएवेत्यर्थंसंमतिभिरुपपादयति·॥पृथिवीनदधिष्ठात्रीदेवतां· यद्वा· त
स्या· प्रजा इत्यर्थः॥२०॥अनिंद्रंनिद्रासुखरहितं· अनिंद्रमितिपाठेइंद्ररहितं· काव्यः शुक्रः॥२१॥

कर्णादिहरणमात्रे हेतुमाह नहीति वीर्यं परं पराभवशक्तिं गतिं आकाशादिगतिं पाणिपादच्छेदेनेति
शेषः ॥ तावतैव देशहितस्य गुरुवचनानुष्ठानस्य च सिद्धावप्यस्य विगर्हितः स्त्रीवधोनुचित इति भावः
॥१२॥ राममेवाविश्वामित्रस्य दुर्धर्षत्वेन तं विसृज्य मानुषबुध्या राममेवेत्यर्थः ॥१३॥ तां रामसन्मुख

नह्येनामुत्सहे हंतुं स्त्रीस्वभावेन रक्षितां ॥ वीर्यं चास्या गतिं चैव हन्यामिति हि मे मतिः ॥१२॥
एवं ब्रुवाणे रामे तु ताटका क्रोधमूर्छिता ॥ उद्यम्य बाहुं गर्जंती राममेवाभ्यधावत ॥१३॥ वि
श्वामित्रस्तु ब्रह्मर्षिर्हुंकारेणाभिभर्त्स्यतां ॥ स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत ॥१४॥
उद्धुन्वाना रजो घोरं ताटका राघवावुभौ ॥ रजोमेघेन महता मुहूर्त्तं सा व्यमोहयत् ॥१५॥ त
तो मायां समास्थाय शिलावर्षेण राघवौ ॥ अवाकिरत्सुमहता ततश्चुक्रोध राघवः ॥१६॥
शिलावर्षं महत्तस्याः शरवर्षेण राघवः ॥ प्रतिवार्योपधावन्त्याः करौ चिच्छेद पत्रिभिः ॥१७॥
ततश्छिन्नभुजां श्रांतामभ्यासे परिगर्जतीं ॥ सौमित्रिरकरोत्क्रोधाद्धृतकर्णाग्रनासिकां ॥१८॥

मभिधावंतीं जयं च जयविषयकाशिशिषं च ॥१४॥ घोरं रजः उद्धुन्वाना इत्यन्वयः ॥ रजोमेघेन रजों
धकारेण ॥१५॥ मायां समास्थाय अंतर्धानं गत्वेति यावत् चुक्रोध स्त्रीत्वप्रयुक्तदाक्षिण्यं विसृज्ये
ति शेषः ॥१६॥ पत्रिभिरिति एकैकस्य बहुधा खंडनाभिप्रायेण ॥१७॥ हृते कर्णाग्रे नासिका च यस्यास्तां ॥१८॥

पुण्यत्वमेवोपपादयति· गोब्राह्मणेति· अप्रमेयस्य तव च हिताय· अस्य हितं स्वाज्ञापरिपालनेन संतो
षरूपं इदमावर्त्तते· तव वचनं कर्त्तुमुद्यतो विचिकित्सारहितोऽहं ताटकावधं करिष्यामीति पूर्वे
णान्वयः॥५॥ तीव्रं परुषश्रवणं॥६॥ वित्रस्ता· भीताः मोहिता व्याकुलचित्ता जाता॥७॥ तं शब्दं श्रुत्वा

गोब्राह्मणहितार्थाय देशस्य च हिताय च॥ तव चैवाप्रमेयस्य वचनं कर्त्तुमुद्यतः॥५॥ एव
मुक्त्वा धनुर्मध्ये बध्वा मुष्टिमरिंदमः॥ ज्याघोषमकरोत्तीव्रं दिशः शब्देन नादयन्॥६॥ तेन
शब्देन वित्रस्तास्ताटकावनवासिनः॥ ताटका च सुसंक्रुद्धा तेन शब्देन मोहिता॥७॥ तं श
ब्दमभिनिध्याय राक्षसी क्रोधमूर्छिता॥ श्रुत्वा चाभ्यद्रवत्क्रुद्धा यत्र शब्दो विनिःसृतः॥८॥
तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननां॥ प्रमाणेनातिवृद्धां च लक्ष्मणं सोऽभ्यभाष
त॥९॥ पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः॥ भिद्येरन्दर्शनादस्या भीरूणां हृदयानि
च॥१०॥ एतां पश्य दुराधर्षां मायाबलसमन्वितां॥ विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासि
कां॥११॥
च क्रुद्धा स शब्दो यत्र यतो निःसृतः तं तमभिनिध्याय शब्दनिःसरणावधिदेशं लक्षीकृत्य अभ्यद्र
वदिति योजना॥८॥ प्रमाणेन शरीरप्रमाणेन॥९॥ भैरवं भयंकरं दारुणं घोरं· अस्य वपुषः चोप्यधिः
अभीरूणामपीत्यर्थः॥१०॥ एतामिति· विनिवृत्तां· अस्मत्संमुखागमनात्परावृत्तां पलायितामिभति यावत्

भीमसंकाशं भीमरूपं ॥२६॥ अभिपूजयन् अङ्गभावश्चार्षः सहस्राक्षः विश्वामित्रमुवाचेत्यन्वयः ॥२७॥
किमुक्तवंतस्तदाह मुनेइति ॥२८॥ तोषितावयमितिशेषः ॥ अनेनकर्मणा त्वत्प्रवर्तितताटकाव
धरूपेण स्नेहं दर्शयमदीयोयमाप्तः शिष्यइति स्नेहमूलंत्वंव्यापारंप्रवर्त्तय तमेवव्यापारमा

शरेणोरसिविव्याधपपातचममारच ॥ तां हतां भीमसंकाशां दृष्ट्वा सुरपतिस्तदा ॥२६॥
साधुसाध्वितिकाकुत्स्थंसुराश्चाप्यभिपूजयन् ॥ उवाचपरमप्रीतः सहस्राक्षः पुरंदरः ॥२७॥
सुराश्चसर्वेसंहृष्टा विश्वामित्रमथाब्रुवन् ॥ मुनेकौशिकभद्रंतेसेन्द्राः सर्वेमरुद्गणाः ॥२८॥
तोषिताः कर्मणानेनस्नेहंदर्शयराघवे ॥ प्रजापतेर्भृशाश्वस्यपुत्रान्सत्यपराक्रमान् ॥२९॥
तपोबलभृतोब्रह्मन्राघवायनिवेदय ॥ पात्रभूतश्चतेब्रह्मंस्तवानुगमनेरतः ॥३०॥
कर्त्तव्यंसुमहत्कर्मसुराणांराजसूनुना ॥ एवमुक्त्वासुराः सर्वेजग्मुर्हृष्टाविहायसम् ॥३१॥
विश्वामित्रंपूजयंतस्ततः संध्याप्रवर्त्तते ॥ ततोमुनिवरः प्रीतस्ताटकावधतोषितः ॥३२॥

रुः प्रजापतेरिति ॥२९॥ तपसाज्ञानेनबलेनचभृतः पूर्णाः तेनवदानस्यपात्रभूतश्चराघवः
अतस्तस्मैकृशाश्वपुत्रान्निवेदय तथालब्धानामेवास्त्राणांकार्यंतमत्वमितिभावः अनु
गमनेशुश्रूषणे दृढनिश्चयः ॥३०॥३१॥ पूजयंतस्तवंतोजग्मुरित्यन्वयः प्रवर्त्ततेइत्यस्यसंध्येति
शेषः ॥३२॥

अनेकशः रूपाणि कृत्वा अंतर्धानं गता सती स्वमायया राघवौ मोहयंती ॥१९॥ भैरवं अश्मवर्षमित्यन्वयः ॥
२०॥ घृणायां अलं स्त्री इति घृणामास्त्वित्यर्थः दुष्टचारिणी मायाशक्त्या अंतर्धाने न पाषाणदृष्टि
कर्त्री अतो घृणा अनुचिता ॥२१॥ घृणानौचित्ये त्पत्र हेत्वंतरमाह यत्त्वविघ्नकरीति मायया पुराय

काम रूपधरा सा तु कृत्वा रूपाण्यनेकशः ॥ अंतर्धानगता यक्षी मोहयंती स्वमायया ॥१९॥ अ
श्मवर्षं विमुंचंती भैरवं विचचार सा ॥ ततस्तावश्मवर्षेण कीर्यमाणौ समंततः ॥२०॥ दृष्ट्वा गा
धिसुतः श्रीमानिदं वचनमब्रवीत् ॥ अलं ते घृणया राम पापैषा दुष्टचारिणी ॥२१॥ यज्ञ
विघ्नकरी यक्षी पुरा वर्धेत मायया ॥ वध्यतां तावदेवैषा पुरा संध्या प्रवर्त्तते ॥२२॥ रक्षांसि
संध्याकाले तु दुर्धर्षाणि भवंति हि ॥ इत्युक्तः स तु तां यक्षीमश्मवृष्ट्याभिवर्षिणीं ॥२३॥
दर्शयन्शब्दवेधित्वं तां रुरोध स सायकैः ॥ सा रुद्धा बाणजालेन मायाबलसमन्विता ॥२४॥
अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी ॥ तामापतंतीं वेगेन विक्रांतामशनीमिव ॥२५॥

वर्द्धेत तावत्तत्कालात्पुरैव पूर्वमेवैषा वध्यतां सायंसंध्या पुरा प्रवर्त्तते प्रवर्त्स्यतीत्यर्थः
२२॥ किं तत इत्यत्राह रक्षांसीति अश्मवृष्ट्या अतिकरोति नीया ॥२३॥ शब्दमात्रेण लक्ष्यं सम्यक्
निश्चित्य वेधकर्तृत्वसामर्थ्यं दर्शयन्नित्यर्थः ॥२४॥ अभिदुद्रावेति अंतर्धानं हित्वेशेषः ॥२५॥

दंडचक्रादयोस्त्रभेदाः॥४॥५॥शूलवंतं-शूलवतनामकं-क्वचित्तुशूलवरमितिपाठः ब्रह्मशिरोस्त्रं
ब्रह्मास्त्रादन्यत्॥६॥गदेद्वेमोदकीशिखरीसंज्ञेद्वेगदेगदासंज्ञकेअस्त्रे॥७॥८॥अस्त्रंचवारुण-

तानिदिव्यानिभद्रंतेददाम्यस्त्राणिसर्वशः॥दंडचक्रंमहद्दिव्यंतवदास्यामिराघव॥४॥
धर्मचक्रंततोवीरकालचक्रंतथैवच॥विष्णुचक्रंतथात्युग्रमैंद्रंचक्रंतथैवच॥५॥
वज्रमस्त्रंनरश्रेष्ठशैवंशूलवतंतथा॥अस्त्रंब्रह्मशिरश्चैवऐषीकमपिराघव॥६॥ददा
मितेमहाबाहोब्राह्ममस्त्रमनुत्तमं॥गदेद्वेचैवकाकुत्स्थमोदकीशिखरेशुभे॥७॥प्र
दीप्तेनरशार्दूलप्रयच्छामिनृपात्मज॥धर्मपाशमहंरामकालपाशंतथैवच॥८॥वारुणं
पाशमस्त्रंचददाम्यहमनुत्तमं॥अशनीद्वेप्रयच्छामिशुष्कार्द्रेरघुनंदन॥९॥ददामिचा
स्त्रंपैनाकमस्त्रंनारायणंतथा॥आग्नेयमस्त्रंदयितंशिखरंनामनामतः॥१०॥वायव्यंम
थनंनामददामितवचानघ॥अस्त्रंहयशिरोनामक्रौंचमस्त्रंतथैवच॥११॥शक्तिद्व
यंचकाकुत्स्थददामितवराघव॥कंकालंमुसलंघोरंकापालमथकिंकिणी॥१२॥

९९

णास्त्रंचेत्यर्थः॥शुष्कार्द्रेसंज्ञकेद्वेअशनीअशनिसंज्ञकेअस्त्रे॥९॥पिनाकिनइदंपैनाकं-दयि
तंअग्नेरितिशेषः शिखरंनाममितिप्रसिद्धं॥१०॥मथनंमुख्यं॥११॥कंकालादीन्यसुरधार्यास्त्राणि॥१२॥

३३॥३४ मुक्तशापं· अपगतोपद्रवं· यद्वा· लब्धशापयाताटकया मुक्तं॥३५॥प्रभातवेलांप्रतिबोध्यमान इति· विश्वामित्रेणोत्पादितः जजागरेतिशेषः॥३६॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके

मूर्ध्निराममुपाघ्रायइदंवचनमब्रवीत्॥इहाद्यरजनींरामवसामशुभदर्शन॥३३॥श्वःप्र भातेगमिष्यामस्तदाश्रमपदंमम॥विश्वामित्रवचःश्रुत्वाहृष्टोदशरथात्मजः॥३४॥उवा सरजनींतत्रताटकायावनेसुखं॥मुक्तशापंवनंतच्चतस्मिन्नेवतदाहनि॥३५॥रमणीयंवि बभ्राजयथाचैत्ररथंवनं॥३५॥निहत्यतांयक्षसुतांसरामःप्रशस्यमानःसुरसिद्धसंघैः॥उ वासतस्मिन्मुनिनासहैवप्रभातवेलांप्रतिबोध्यमानः॥३६॥इत्यार्षेश्रीरामायणेवाल्मी कियेबालकांडेताटकावधोनामषड्विंशःसर्गः॥२६॥अथतांरजनींमुष्यविश्वामित्रोमहा यशाः॥प्रहस्यराघवंवाक्यमुवाचमधुरस्वरं॥१॥परितुष्टोस्मिभद्रंतेराजपुत्रमहायशः प्रीत्यापरमयायुक्तोददाम्यस्त्राणिसर्वशः॥२॥देवासुरगणान्वापिसगंधर्वोरगान्भुवि येरमित्रान्प्रसह्याजौवशीकृत्यजयिष्यसि॥३॥

बालकांडेषड्विंशःसर्गः॥२६॥अथेति·उष्येति· आर्षे·प्रहस्यविजयशालिरामदर्शनजसंतोषजोहासः॥१॥सर्वशःसर्वाणि॥२॥देवासुरगणान्वापि वाशब्दश्चार्थे·गंधर्वोरगसहितदेवासुरगणरूपशत्रून्·अपिप्रसह्यबलेनजयिष्यसिजेष्यसि·य दिवधेदयातदावशीकृत्यसंग्रामेआस्त्रादिनाजेष्यसिअन्यथातुकागणनेतिभावः॥३॥

मंत्रग्रामंअस्त्राणांमंत्रमूर्त्तित्वात्॥ नतुबलातिबलादानप्रसंगेपिमंत्रग्रामंगृहाणेत्युक्तमितिपुनरत्र
दीनंविफलमितिचेन्न गृहाणेत्येवतत्रोक्तत्वात्॥ तत्तुददाविति नेनतत्कालोपयोगिबलातिबल
योरेवतत्रदानं इतरेषांत्वन्यत्रेतिविवेक इतिकतककृतः॥ वस्तुतोबलातिबलेमंत्रसमूहा
त्मके इति तद्रूपंमंत्रग्राममितितत्रार्थ इतिनदोषइतिपरे॥२२॥ सर्वेति येषांउक्तदिव्यास्त्रा
णांसर्वसंग्रहणंसर्वधारणंकर्त्तुंदैवतैरपिदुर्लभदुष्करं देवाअपियात्किंचिदस्त्रमेवजा

स्थितस्तुप्राङ्मुखोभूत्वाशुचिर्मुनिवरस्तदा॥ ददौरामायसुप्रीतोमंत्रग्राममनुत्तमम्॥२२
सर्वसंग्रहणंयेषांदैवतैरपिदुर्लभम्॥ तान्यस्त्राणितदाविप्रोराघवायन्यवेदयत्॥२३॥
जपतस्तुमुनेस्तस्यविश्वामित्रस्यधीमतः॥ उपतस्थुर्महार्हाणिसर्वाण्यस्त्राणिराघवम्॥
॥२४॥ ऊचुश्चमुदितारामंसर्वेप्राञ्जलयस्तदा॥ इमेचपरमोदारकिंकरास्तवराघव॥२५॥

नंतीतिभावः तानिसर्वाण्यस्त्राणिराघवायरामायविश्वामित्रः न्यवेदयत् दत्तवान् राघवाय
रामायलक्ष्मणाय चेत्यपिबोध्यं युगपदेवोभयोरुपदेशादितिबोध्यं॥२३॥ जपतः रामायदातुंते
षांवीर्यवत्तासंपादनायतान्यस्त्राणिजपत इत्यर्थः॥ उपतस्थुः गृहीतभामंडलवपूंषि उपत
स्थुः उपस्थितानि विश्वामित्रनियोगेनरामंच उपतस्थुः॥२४॥ सर्वेअस्त्रदेवाः मुदिताः स्वा
धिदैवतरामसंबंधेनतुष्टाः॥ किंकराः अंगीकृतदासत्वाः॥२५॥ ॥

यानिरक्षसांवधार्थंसमर्थानिएतानिददामीत्यन्वयः॥१३॥वैद्याधरंविद्याधरसंबंधि॥ नंदनंनामकं असिरत्नमित्यन्वयः॥यतोस्त्रादसीनांप्रादुर्भावइतिभावः॥१४॥दद्यीत्यार्थं प्रशमनंरिपूणां क्रोध

वधार्थंरक्षसांयानिददाम्येतानिसर्वशः॥वैद्याधरंमहास्त्रंचनंदनंनाममनामतः॥असिरत्नं महाबाहोददामिनवरात्मज॥गांधर्वमस्त्रंदयितंमोहनंनाममनामतः॥१४॥प्रस्वापनंप्रश मनंदद्मिसौम्यंचराघव॥वर्षणंशोषणंचैवसंतापनविलापने॥१५॥मादनंचैवदुर्धर्षंकं दर्पंदयितंतथा॥गांधर्वमस्त्रंदयितंमानवंनाममनामतः॥१६॥पैशाचमस्त्रंदयितंमोहनं नाममनामतः॥प्रतीच्छनरशार्दूलराजपुत्रमहायशः॥१७॥तामसंनरशार्दूलसौमनंचम हाबल॥संवर्तंचैवदुर्धर्षंमौसलंचनृपात्मज॥१८॥सत्यमस्त्रंमहाबाहोतथामायामयं परं॥सौरंतेजःप्रभंनामपरतेजोपकर्षणं॥१९॥सोमास्त्रंशिशिरंनामत्वाष्ट्रमस्त्रंसुदा रुणम्॥दारुणंचभगस्यापिशीतेषुमथमानदम्॥२०॥एतान्रामहाबाहोकामरू पान्महाबलान्॥गृहाणपरमोदारान्क्षिप्रमेवनृपात्मज॥२१॥ राम

शामकमस्त्रं॰ विलापनंपरिदेवनकारकं॥१५॥मादनंशत्रूणांमदजनकं॰ दुर्धर्षमित्याद्यस्यविशे षणं॥१६॥प्रतीच्छगृहाण॥१७॥मौसलंमुसलादन्यत्॥१८॥१९॥२०॥२१॥ ॥

तदाह-सत्यवंतमित्यादि-ददामीतिसर्वत्रशेषः॥४॥५॥६॥७॥सार्चिमाल्यादयोन्येतांश्चददामीत्यर्थः
८॥९॥भास्वरान्-तेजोमयान्-प्रतीच्छगृहाण-पात्रभूतः अस्त्रदानस्येतिशेषः ममममत्तः॥१०॥वाढ

सत्यवंतंसत्यकीर्त्तिंधृष्टंरसमेवच॥प्रतिहारतरंनामपराङ्मुखमवाङ्मुखं॥४॥लक्ष्याल
क्षाविमौचैवदृढनाभसुनाभकौ॥दशाक्षशतवक्त्रौचदशशीर्षशतोदरौ॥५॥पद्मनाभम
हानाभौदुंदुनाभसुनाभकौ॥ज्योतिषंशकुनंचैवनैरास्यविमलावुभौ॥६॥योगंधरवि
निद्रौचदैत्यप्रमथनौतथा॥शुचिबाहुर्महाबाहुर्निष्कलिर्विरुचस्तथा॥७॥सार्चिमाली
धृतिमालीवृत्तिमान्रुचिरस्तथा॥पित्र्यःसौमनसश्चैवविधूतमकरावुभौ॥करवी
रंधृतिंचैवधनधान्यौचराघव॥८॥कामरूपंकामरुचिंमोहमावरणंतथा॥जंभकंसर्प
नाथंचपंथानवरुणौतथा॥९॥भृशाश्वतनयान्रामभास्वरान्कामरूपिणः॥प्रतीच्छम
मभद्रंतेपात्रभूतोसिराघव॥१०॥वाढमित्येवकाकुत्स्थःप्रहृष्टेनांतरात्मना॥दिव्यभा
स्वरदेहाश्चमूर्त्तिमंतःसुखप्रदाः॥११॥केचिदंगारसदृशाःकेचिद्धूमोपमास्तथा
चंद्रार्कसदृशाःकेचित्प्रह्वांजलिपुटास्तथा॥११॥

मित्यंगीकारे-प्रहृष्टेनांतरात्मना-प्रत्य
गृहीदितिशेषः-मूर्त्तिमंतःस्वस्वदेवतारूपेण॥११॥प्रह्वांजलिपुटाः-प्रह्वाः-नम्राः-तेचतेअंजलिःपुटंसंश्ले
येषांतादृशा
॥१२

२६॥ समालभ्यतु पस्पृश्य मानसाः सदा मनःस्थिताः यद्यपि भगवतो रामस्य सर्वं विदितमेव तथापि विद्यागु
रूपदेशगृहीतैव फलदा नान्यथेति लोकान्बोधयितुं विश्वामित्रत उपदेशग्रहणमिति बोध्यम् ॥२७
२८॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे सप्तविंशतिः सर्गः ॥२७॥ गच्छन्रामि

यद्यदिच्छसि भद्रं ते तत्सर्वं करवाम वै॥ ततो रामः प्रसन्नात्मा तैरित्युक्तो महाबलैः॥२६॥ प्र
तिगृह्य च काकुत्स्थः समालभ्य च पाणिना॥ मानसा मे भविष्यध्वमिति तानभ्यचोदयत्॥२७
ततः प्रीतमना रामो विश्वामित्रं महामुनिं॥ अभिवाद्य महातेजा गमनायोपचक्रमे॥२८॥ इत्या
र्षे श्रीरामायणे वाल्मीकिये बालकांडे सप्तविंशतिः सर्गः॥२७॥ प्रतिगृह्य ततोऽस्त्राणि प्र
हृष्टवदनः शुचिः॥ गच्छन्नेव च काकुत्स्थो विश्वामित्रमथाब्रवीत्॥१॥ गृहीतास्त्रोऽस्मि भ
गवन्दुराधर्षः सुरैरपि॥ अस्त्राणां त्वहमिच्छामि संहारान्मुनिपुंगव॥२॥ एवं ब्रुवति का
कुत्स्थे विश्वामित्रो महातपाः॥ संहारान्व्याजहाराथ धृतिमान्सुव्रतः शुचिः॥३॥

च्छन्॥१॥ संहारान् ज्ञातुमिति शेषः॥ उपसंहारापरिज्ञाने पुनः प्रयोगानर्हतया अप्राप्तप्रायत्वा
त्॥ ज्ञाने च्छा संहारो नाम प्रयुक्तस्यास्त्रस्य मंत्रविशेषेण पुनः॥ स्वात्मनि स्थापनं॥२॥ एवमिति
उक्तास्त्राणां संहारमार्गमुपदिश्य अथ अनंतरं तत्र असंतुष्टः॥ परमऋषिः अन्यान्यप्यस्त्राण्यु
पदिशति स्म॥३॥

मेघसंकाशं कानर्म्यात् नैविड्याच्च वृक्षषंडं वृक्षसमूहः किं च न संबंधि तत्राश्रमसंबंधीति प्रश्नः ॥१७
वल्गुभावैः मधुरभावैः ॥१८॥ रोमहर्षणात् नाटकया निर्जनीकरणात् तस्य भयानकत्वेन रोमहर्ष
णत्वं अनया दिशा स्पष्टसुखवत्तया इदमाश्रमपदं त्वं वगच्छामि ॥१९॥ आश्रमपदत्वं निर्णीयतत्क

किमेतन्मेघसंकाशं पर्वतस्याविदूरतः ॥ वृक्षषंडमितो भाति परं कौतूहलं हि मे ॥१७॥ दर्श
नीयं मृगाकीर्णं मनोहरमतीव च ॥ नानाप्रकारैः शकुनैर्वल्गुभाष्यैरलंकृतं ॥१८॥ निःसृतास्म
मुनिश्रेष्ठ कांताराद्रोमहर्षणात् ॥ अनया त्ववगच्छामि देशस्य सुखवत्तया ॥१९॥ सर्वं मे
शंस भगवन्कस्याश्रमपदं त्विदं ॥ संप्राप्ता यत्र ते पापा ब्रह्मघ्ना दुष्टचारिणः ॥२०॥ तव य
ज्ञस्य विघ्नाय दुरात्मानो महामुने ॥ भगवंस्तस्य को देशः सा यत्र तव याज्ञिकी ॥२१॥ रक्षि
तव्या क्रिया ब्रह्मन्मया वध्याश्च राक्षसाः ॥ एतत्सर्वं मुनिश्रेष्ठ श्रोतुमिच्छाम्यहं प्रभो ॥२२॥
इत्यार्षे श्रीरामायणे वाल्मीकीये बालकांडे अष्टाविंशः सर्गः ॥२८॥

स्येति शंसेति पृच्छति॰
सर्वं च शंश सर्वं शब्दविवक्षितं जिज्ञासांतरं स्वयमेवाह संप्राप्ता इति ते ब्रह्मघ्नाः तव यज्ञ
स्य विघ्नाय यत्र संप्राप्ताः स देशः कः ॥२०॥ यत्र च तव याज्ञिकी क्रिया मया रक्षितव्या यत्र च रा
क्षसा वध्याः भगवंस्तस्य त्वदाश्रमस्य को देशः कः प्रदेश इत्यन्वयः ॥२१॥२२॥ इति श्रीरामाभिरामे
श्रीरामीये रामायणतिलके बालकांडे अष्टाविंशः सर्गः ॥२८॥

इमेस्मसन्निहितावयमितिशेषः शाधि आज्ञापय ॥१३॥ गम्यतां इदानीमितिशेषः कार्यकालेषु मान
साः मनसि सन्निहिताभूत्वा साहाय्यं करिष्यथ ॥१४॥ प्रदक्षिणां सकलस्वदेवताऽधिदैवतरूपत्वा
त्रामस्य प्रदक्षिणाकरणं ॥१५॥ एतदुत्तरं ततस्तु रामः काकुत्स्थः शासनाद्ब्रह्मवादिनः लक्ष्म

रामंप्राञ्जलयोभूत्वाब्रुवन्मधुरभाषिणः ॥ इमेस्मनरशार्दूलशाधिकिंकरवामते ॥१३॥
गम्यतामितितानाहयथेष्टंरघुनंदनः ॥ मानसाःकार्यकालेषुसाहाय्यंमेकरिष्यथ ॥१४॥
अथतेराममामंत्र्यकृत्वाचापिप्रदक्षिणं ॥ एवमस्त्वितिकाकुत्स्थमुक्त्वाजग्मुर्यथागतं ॥१५॥
सचतान्राघवोज्ञात्वाविश्वामित्रंमहामुनिं ॥ गच्छन्नेवाथमधुरंश्लक्ष्णंवचनमब्रवीत् ॥१६॥

णाय च तान्सर्वान्स चास्त्रान् रघुनंदनः ससंहारान्ससंतस्थः श्रीमांस्तस्मैन्यवेदयदित्यधि
कं दृश्यते · तन्न क्षिप्तं · बलातिबलयोरिवास्त्राणामपि युगपदुभयोर्विश्वामित्रेणैवोपदेश
दानसंभवात् · स तानुपदिश्यान अस्त्रान् राघवो रामः ज्ञात्वा मंत्रतो मूर्तितः प्रयोगतश्चेति
शेषः ॥१६॥

यजतेकत्तभिप्रायत्वादात्मनेपदं॰ ननु असुरस्य बलेर्देवद्विषो यागाद्यनुपपत्तिः यागतर्पणी
यदेवताभावात्॰ इन्द्रादीनांतद्द्वेष्यत्वात्॰ नचशब्दमात्रंदेवतेत्युक्तं। अर्थवादप्रामाण्येन
देवताया विग्रहवत्वस्योत्तरमीमांसायांसिद्धांतितत्वादितिचेन्न॰ कर्मदेवाजानदेवभे
देनदेवानांद्वैविध्यात्॰ तत्रयेकर्मणादेवत्वंप्राप्ताःतेकर्मदेवाः। आजानदेवास्तु॰ यज्ञ
मंत्रार्थभूताः मंत्रेण नित्यसंबंधाः कर्मदेवेभ्यः प्राचीनाश्च॰ तत्कर्मदेवानांद्वेष्यत्वेपि आजा
नदेवानांयज्ञेतर्पणत्वेनदोषः। विघ्नकर्तारोप्यत्रकर्मदेवाः एवयज्ञाद्यधिकाराभावोप्याज

बलिर्वैरोचनिर्विप्रो यजतेयज्ञमुत्तमम्। असमाप्तव्रतेतस्मिन्स्वकार्यमभिपद्यतां॥७
येचैनमभिवर्तन्ते याचितारइतस्ततः। यच्चयत्रयथाकच्च सर्वंतेभ्यः प्रयच्छति॥८॥

नदेवानामेवयज्ञस्यदेवतांतराभावात्॰ कर्मदेवानांत्वस्त्वेव॰। अतएवेंद्रादीनांयज्ञादि
श्रवणंनानुपपन्न इत्यन्यत्रविस्तरः असमाप्तव्रते असमाप्तयज्ञे॰ स्वकार्यंआत्मीयानां
देवानांकार्यंअभिपद्यतांसंपाद्यतां॥७॥ असमाप्तव्रतइत्युक्तेः। प्रयोजनंदर्शयंतस्तत्सं
पादनेउपायमपिस्वयमेववदंति॰। येचेति॰। अभिवर्तंतेप्राप्नुवंति॰ इतस्ततः नानादेशे
भ्यः। यच्चगोभूहिरण्यादिविषये॰। यच्चयाचंतेतेभ्यः तत्सर्वंयथावत्॰ यज्ञसाद्गुण्याय अ
वमाभादिरहितंसत्कारपूर्वंप्रयच्छति॰। चोएवार्थे॥८॥ राम

तस्य रामस्य परिपृच्छतो वचनं श्रुत्वेति शेषः व्याख्यातुं प्रश्नोत्तरमिति शेषः ॥१॥ इह वने इह प्रदेशे ॥२॥ तपश्चरणयोगार्थं स्वाचारेण लोकप्रवर्तनाय स्वतपश्चरणं वामनस्य करिष्यमाणं वामनावतारस्य विष्णोः पूर्वाश्रमः वामनावतारात्पूर्वकालेन पो योगार्थं परिगृहीत आश्रमः ॥३॥ सिद्धाश्रमत्वव्यवहा

अथ तस्याप्रमेयस्य वचनं परिपृच्छतः ॥ विश्वामित्रो महातेजा व्याख्यातुमुपचक्रमे ॥१॥
इह राम महाबाहो विष्णुर्देवनमस्कृतः ॥ वर्षाणि सुबहूनीह तथा युगशतानि च ॥२॥
तपश्चरणयोगार्थमुवास सुमहातपाः ॥ एष पूर्वाश्रमो राम वामनस्य महात्मनः ॥३॥
सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः ॥ एतस्मिन्नेव काले तु राजा वैरोचनिर्बली ॥४॥
निर्जित्य दैवतगणान् सेन्द्रान् सह मरुद्गणान् ॥ कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः ॥५॥
यज्ञं चकार सुमहानसुरेन्द्रो महाबलः ॥ बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः ॥
समागम्य स्वयं चैव विष्णुमूचुरिहाश्रमे ॥६॥

रेवीजमाह हि यस्मात् अत्र महातपा विष्णुः
तपःसिद्धो जात इति एतस्मिन्काले विष्णोस्तपःकाले ॥४॥ मरुद्गणान् आवहादिवायुगणान् कारयामास स्वार्थेणिच् चकारेत्यर्थः यद्वा इन्द्रादिराज्यं स्वीयैः कैश्चिद्देवकारयामासेत्यन्वयः ॥५॥
बलेर्यजमानस्य अवहारं हस्य इति शेषः साग्निपुरोगमाः पुरोगमेनाग्निना सहिता इत्यर्थः अग्निमुखत्वाद्धविर्देवानां तस्मिन् पुरोगामत्वं स्वयं से वा रामस्य नतत्त्व मुखेन ॥६॥

स्यपमानंच वैराजं रूपमित्याह· शरीरेइत्यादि· अनिर्देश्यः अशक्यपरिच्छेदः॥१३॥ वरं अमीष्टं· वराई· दिव्यवर्षसहस्रतपसा वरदानयोग्यः॥१४॥ मारीचः मरीचिपुत्रः आदित्याइत्यादि· याचमानायाइत्यादिशेषः॥१५॥ याच्यमानवरमाह· पुत्रत्वमित्यादि॥१६॥ यवीयान् कनिष्ठः साहाय्यंवलि

शरीरेतववश्यामिजगत्सर्वमिदंप्रभो॥ त्वमनादिरनिर्देश्यस्त्वामहंशरणंगतः॥१३॥ तमुवाचहरिःप्रीतःकश्यपंधूतकल्मषं॥ वरंवरयभद्रंतेवरार्होसिमतोमम॥१४॥ तच्छ्रुत्वावचनंतस्यमारीचःकश्यपोब्रवीत्॥ अदित्यादेवतानांचममचैवानुयाचितं॥१५॥ वरंवरदसुप्रीतोदातुमर्हसिसुव्रत॥ पुत्रत्वंगच्छभगवन्नदित्याममचानघ॥१६॥ भ्राताभवयवीयांस्त्वंशक्रस्यासुरसूदन॥ शोकार्तानांतुदेवानांसाहाय्यंकर्त्तुमर्हसि॥१७॥ अयंसिद्धाश्रमंनामप्रसादात्तेभविष्यति॥ सिद्धेकर्मणिदेवेशउत्तिष्ठभगवन्नितः॥१८॥ अथविष्णुर्महातेजाअदित्यांसमजायत॥ वामनंरूपमास्थायवैरोचनिमुपागमत्॥१९॥ त्रीन्पदानथभिक्षित्वाप्रतिगृह्यचमेदिनीं॥ आक्रम्यलोकान्लोकार्थीसर्वलोकहितेरतः॥२०॥

क्षलरूपं॥१७॥ अयंयत्राश्रमेतपोमयस्त्वमयादेवैश्चअनुभूयसे इत्यर्थः सिद्धएतदाश्रमस्थितिसाध्येतपःकर्मणिसिद्धेसतिनिष्पन्नेसतिप्रयोजनाभावात्· इतउत्तिष्ठदेवकार्यायेतिशेषः॥१८॥ अथदेवकार्यनियोगानंतरं॥१९॥ आक्रम्यत्रिभिःपादैरितिशेषः लोकार्थीत्रैलोक्यक्रमणार्थं॥२०॥

मायास्वतत्वाछादनेनप्राकृतमर्त्यादिभावप्रकाशिकाशक्तिः तस्ययोगः संबंधः तमाश्रितः वामनत्वप्रा
प्तावयंहेतुः वामनरूपस्यात्पार्श्वर्यत्वेनतत्प्रार्थना विषयस्यावश्यंयजमानकर्त्तव्यतयातद्रूप
प्रार्थनं ॥९॥ एतस्मिन्नंतरे देवैर्वामनावतारप्रार्थनसमये रामेतिहि संबोधनंस्वाश्रमसंनि
धानेनरामपश्यतन्महत्वकथनेनहर्षातिशयाच्चबोध्यं ॥१०॥ अदित्यासहितोव्रतंसमाप्यदेवी
सहायस्तस्थावेत्यन्वयः देवी अदितिरेव यद्वादेवीसरस्वती वरदंविष्णुरूपपुत्रप्राप्युद्देशे

सत्वंसुरहितार्थायमायायोगमुपाश्रितः ॥ वामनत्वंगतोविष्णोकुरुकल्याणमुत्तमं ॥९॥ एत
स्मिन्नंतरेरामकश्यपोग्निसमप्रभः ॥ अदित्यासहितोरामदीप्यमानइवौजसा ॥१०॥ देवीसहायो
भगवान्दिव्यंवर्षसहस्रकं ॥ व्रतंसमाप्यवरदंतुष्टावमधुसूदनं ॥११॥ तपोमयंतपोराशिंत
पोमूर्त्तिंतपात्मकं ॥ तपसात्वांसुतप्तेनपश्यामिपुरुषोत्तमं ॥१२॥

नकृतव्रतांतेवरदानोस्तुरव
॥११॥ स्तोत्रप्रकारमाह तपोमयमित्यादि ॥ अन्नमयोयज्ञइतिवत्प्रचुरतपोयुक्तमित्यर्थः तावता
परेषांकिमतआह तपोराशिं इष्टनणां सकलतपोजन्यफलप्राप्याभगवतस्तपोराशित्वं ननु
तपसोत्पत्वेअहेतश्च निबाधः अतआह तपोमूर्त्तिंश्चिति एवंचतपसस्तदनन्यत्वेननादेः तद्दा
निः तपात्मकमिति घञर्थेकविधानमितिकप्रत्ययेतपनंतपः ज्ञानं तपआलोचनइतिधात्वनु
सारात् तदात्मकं ज्ञानस्वरूपमित्यर्थः अनादिज्ञानमसाधारणमशक्यइत्यतस्तपसात्वामिति

अथैव प्रवेशदिनाद्वेःकालविलंबेफलाभावात्-सिद्धःत्वयज्ञसिध्या-अन्वर्थसिद्धसंज्ञःतववचः अत्रैवपुरु
षव्याघ्रहंतव्यादुश्चारिणाद्नियततत्सत्यमस्तु-राद्तसान्सर्वथाहनिष्येइतिभावः॥२६॥नियतःनिग्र
हीतांतःकरणः॥३०॥कुमाराविवस्कंदविशाखाविव॥३१॥प्रशुची अवतारत्वादशुचित्वसंभावनारा

अथैवदीक्षांप्रविशभद्रंतेमुनिपुंगव॥सिद्धाश्रमोयंसिद्धःस्यात्सत्यमस्तुवचस्तव॥२६॥एवमु
क्तोमहातेजाविश्वामित्रोमहानृषिः॥प्रविवेशततदादीक्षांनियतोनियतेंद्रियः॥३०॥कुमाराविव
तांरात्रिमुषित्वासुसमाहितौ॥प्रभातकालेचोत्थायपूर्वांसंध्यामुपास्यसः॥३१॥प्रशुचीपरमंजा
प्यंसमाप्यनियमेनच॥हुताग्निहोत्रमासीनंविश्वामित्रमवंदतां॥३२॥इत्यार्षेश्रीरा॰वाल॰एको
नत्रिंशःसर्गः॥२६॥अथतौदेशकालज्ञौराजपुत्रावरिंदमौ॥देशेकालेचवाक्यज्ञावब्रूतांकौ
शिकंवचः॥१॥भगवंछ्रोतुमिच्छावोयस्मिन्कालेनिशाचरौ॥संरक्षणीयौतौब्रूहिनातिवर्तेततत्
क्षणं॥२॥एवंब्रुवाणौकाकुत्स्थौत्वरमाणौयुयुत्सया॥सर्वेतेमुनयःप्रीताःप्रशशंसुर्नृपात्मजौ॥३॥

हित्वेनप्रकर्षतःशुची-नियमेनकर्तव्यंजप्यंसमाप्येत्यन्वयः दीक्षामध्येनाग्निहोत्रमितिनिषेधादग्निहो
त्रपदमौपासनहोमपरमितिकेचित्॥३२॥इतिश्रीरामाभिरामेश्रीरा॰रा॰तिवाल॰एकोनत्रिंशःस
र्गः॥२६॥अथेति-कौशिकंवचोऽब्रूतामित्यन्वयः॥१॥तौनिशाचरौसंरक्षणीयौयैःयज्ञसंरक्षणायनिवा
रणीयौ-गृहादित्वात्कः तत्क्षणंरक्षणःयथानातिवर्तेततनातिक्रमेततथाब्रूहीत्यन्वयः॥२॥३॥

105

नियम्य वध्वा ॥२१॥ तेनैव वामनावतारकर्त्रा मया विश्वामित्रेण ॥२२॥ पूर्वे सर्गे तत्कृत द्वितीयप्रश्नोत्तर
माह एनमिति ॥२३॥ अनुत्तमं सर्वोत्तमं हे तात तत्तदाश्रमपदं यथा मम स्वभूतं तथा तवापि विष्व

महेंद्राय पुनः प्रादान्नियम्य बलिमोजसा ॥ त्रैलोक्यं समहातेजाश्चक्रे शक्रवशं पुनः ॥२१॥
तेनैव पूर्वमाक्रांत आश्रमः श्रमनाशनः ॥ मयापि भक्त्या तस्यैव वामनस्योपभुज्यते ॥२२॥
एनमाश्रममायांति राक्षसा विघ्नकारिणः ॥ अत्र ते पुरुषव्याघ्र हंतव्या दुष्टचारिणः ॥२३॥
अद्य गच्छामहे राम सिद्धाश्रममनुत्तमं ॥ तदाश्रमपदं तात तवाप्येतद्यथा मम ॥२४॥ इत्यु
क्त्वा परमप्रीतो गृह्य रामं सलक्ष्मणं ॥ प्रविशन्नाश्रमपदं व्यरोचत महामुनिः ॥२५॥ शशी
व गतनीहारः पुनर्वसुसमन्वितः ॥ तं दृष्ट्वा मुनयः सर्वे सिद्धाश्रमनिवासिनः ॥२६॥ उ
त्पत्योत्पत्य सहसा विश्वामित्रमपूजयन् ॥२७॥ यथार्हं चक्रिरे पूजां विश्वामित्राय धीम
ते ॥ तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियां ॥२७॥ मुहूर्तमथ विश्रांतौ राजपुत्रावरिंद
मौ ॥ प्रांजली मुनिशार्दूलमूचतू रघुनंदनौ ॥२८॥

वतारत्वादिति गूढोभिसंधिः ॥२४॥ पुनर्वसू द्वे तारे २५ उत्पत्योत्पत्य संतोषातिशयादिति शेषः ॥२६॥
॥२७॥ ॥२८॥

यथाप्रावृषिगगनमावार्यगगनमावृत्य॥ महाशनिमहागर्जमहावर्षादिविचित्रकार्यकारीदृश्यते
तथामायांप्रकटीकुर्वाणौराक्षसौअभ्यधावतां॥११॥ कौतौकाचसामायेत्यत्राह॥ मारीचेइत्यादि॥ अ

आवार्यगगनंमेघोयथाप्रावृषिदृश्यते॥ तथामायांविकुर्वाणौराक्षसावभ्यधावतां॥११॥
मारीचश्चसुबाहुश्चतयोरनुचरास्तथा॥ आगम्यभीमसंकाशारुधिरौघानवासृजन्॥१२॥
तांतेनरुधिरौघेणवेदिंवीक्ष्यसमुक्षितां॥ सहसाभिद्रुतोरामस्तानपश्यत्ततोदिवि॥१३॥
तावापतंतौसहसादृष्ट्वाराजीवलोचनः॥ लक्ष्मणंत्वभिसंप्रेक्ष्यरामोवचनमब्रवीत्॥१४॥
पश्यलक्ष्मणदुर्वृत्तान्राक्षसान्पिशिताशनान्॥ मानवास्त्रसमाधूतानानिलेनयथाघनान्॥
॥१५॥ करिष्यामिनसंदेहोनोत्सहेहंतुमीदृशान्॥ इत्युक्त्वावचनंरामश्चापेसंधायवेगवान्॥१६॥
मानवंपरमोदारमस्त्रंपरमभास्वरं॥ चिक्षेपपरमक्रुद्धोमारीचोरसिराघवः॥१७॥ सतेन
परमास्त्रेणमानवेनसमाहतः॥ संपूर्णंयोजनशतंक्षिप्तःसागरसंप्लवे॥१८॥

वासृजन्ववर्षुः॥१२॥ समुक्षितांअभ्याशेद्दृतिशेषः॥ अभिद्रुतः अभितःशालांप्रधावत्॥ तत्रा
दृष्ट्वाततोदिवितानपश्यत्॥१३॥ आपतंतौस्वसंमुखमागच्छंतौ॥१४॥ मानवास्त्रसमाधूता
न्करिष्यामिपरक्षेपनियोजना॥१५॥ ईदृशान्स्थितायुःशेषान्दुर्बलान्वा॥१६॥ परमोदारंप
रमश्रेष्ठं॥१७॥ सतेनेति॥ समारीचः सागरसंप्लवेसमुद्रमध्ये॥१८॥

एवंविश्वामित्रे दीक्षयातस्यमौनित्वाद्दृष्टयज्ञ चु· अद्येति· मौनित्वंचगमिष्यति· अद्यापिदीक्षितत्वान्मौ
नेपव अतःपरमपिषड्रात्रपर्यंतमौनित्वंप्राप्स्यतीत्यर्थः॥४॥५॥यत्तौसन्नद्धौ· परमधन्विनावित्यार्षः विश्वा
मित्रंतयज्ञं॥६॥कालेपंचाहोरात्रलक्षणेषष्ठेऽहनि· आगतेइतिछेदः॥प्राप्तेइत्यर्थः॥यद्वाषष्ठेऽहनि

अद्यप्रभृतिषड्रात्रंरक्षतांराघवौयुवां॥दीक्षांगतोह्येषमुनिर्मौनित्वंचगमिष्यति॥४॥
तौतुतद्वचनंश्रुत्वाराजपुत्रौयशस्विनौ॥अनिद्रंषडहोरात्रंतपोवनमरक्षतां॥५॥उपासां
चक्रतुर्वीरौयत्तौपरमधन्विनौ॥ररक्षतुर्मुनिवरंविश्वामित्रमरिंदमौ॥६॥अथकालेगतेतस्मि
न्षष्ठेऽहनितथागते॥सौमित्रिमब्रवीद्रामोयत्तोभवसमाहितः॥७॥रामस्यैवंब्रुवाणस्य
स्यत्वरितस्ययुयुत्सया॥प्रजज्वालततोवेदिःसोपाध्यायपुरोहिता॥८॥सदर्भचमस
स्रुक्कासमित्कुसुमोच्चया॥विश्वामित्रेणसहितावेदिर्जज्वालसर्त्विजा॥९॥मंत्रवच्च
यथान्यायंयज्ञोसौसंप्रवर्तते॥एवंप्रवर्तितेयज्ञेविश्वामित्रस्यधीमतः॥आकाशेचम
हांश्शब्दःप्रादुरासीद्भयानकः॥१०॥

गतेरात्रावित्यर्थः॥यत्तःसज्जःसमाहितःएकाग्रचित्तः॥७॥
उपाध्यायोब्रह्मा· पुरोहितउपद्रष्टा· इदंऋत्विगंतराणामप्युपलक्षणं· इदंज्वलनंराक्षसागम
नसूचकउत्पातइत्याहुः॥८॥दर्भसहितचमसस्रुग्वली· समित्कुसुमोच्चयैश्चसहिता· इ
दंवेदीज्वलनंयज्ञोद्देश्यकं॥९॥संप्रवर्ततेस्म· आकाशेमहान्शब्दःप्रादुरासीच्च॥१०॥

एवंस्वयज्ञविघ्नविनाशफलकंसर्वास्त्रसंबंधानुग्रहंकृत्वाभगवान्विश्वामित्रःसहजलक्ष्मीशक्ति
संबंधानुग्रहायप्रवर्ततइत्याह॰अथेति॰तत्रयज्ञशालायां॥१॥कृतापौर्वाह्णिकीक्रियायाभ्यांतौ॥अभि
जग्मतुः॥अभिवादनार्थमितिशेषः॥तदुक्तंपूर्वसर्गांते॰संध्यामुपागमदिति॰सहगतोविश्वामि

अथतांरजनींतत्रकृतार्थौरामलक्ष्मणौ॥ऊषतुर्मुदितौवीरौप्रहृष्टेनांतरात्मना॥१॥प्रभा
तायांतुशर्वर्य्यांकृतपौर्वाह्णिकक्रियौ॥विश्वामित्रमृषींश्चान्यान्सहितावभिजग्मतुः॥२॥अ
भिवाद्यमुनिश्रेष्ठंज्वलंतमिवपावकं॥ऊचतुःपरमोदारंवाक्यंमधुरभाषिणौ॥३॥इमौस्मम्मु
निशार्दूलकिंकरौसमुपागतौ॥आज्ञापयमुनिश्रेष्ठशासनंकरवावकिं॥४॥एवमुक्तेतयोर्वा
क्येसर्वएवमहर्षयः॥विश्वामित्रंपुरस्कृत्यरामंवचनमब्रुवन्॥५॥मैथिलस्यनरश्रेष्ठजन॰
कस्यभविष्यति॥यज्ञःपरमधर्मिष्ठस्तत्रयास्यामहेवयम्॥६॥त्वंचैवनरशार्दूलसहास्मा
भिर्गमिष्यसि॥अद्भुतंचधनूरत्नंतत्रत्वंद्रष्टुमर्हसि॥७॥

त्रोहोमार्थंत्वरयाशालामागतइति
बोध्यम्॥२॥मुनिश्रेष्ठंविश्वामित्रं॥३॥स्मेत्यव्ययं॥४॥तयोरितिताभ्यामित्यर्थे॰विश्वामित्रंपुरस्कृ
त्य॰कृतविश्वामित्रानुमतिकाइतियावत्॥५॥मैथिलस्यमिथिलाधिपतेः॥परमधर्मिष्ठः॰उत्क
टातिशयितधर्मवान्॰परमेतिपृथक्पदंवा॰परामायस्मिन्नित्यर्थकंरामसंबोधनं॥६॥७॥

विचेतनं चैतन्यरहितं । अतएव विघूर्णमानं । शीतेषुरिति मानवास्त्रनामांतरं । दृश्यपदृश्य ॥ १९ ॥ शीतेषुं शीतेषुरित्यपरनामकं मानवास्त्रं । मनुसंहितं मनुप्रयुक्तं । वियुज्यते वियोजयतीतियावत् ॥ २० ॥ २१ ॥ २२

विचेतनं विघूर्णितं शीतेषुबलपीडितं ॥ निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् ॥ १९ ॥
पश्य लक्ष्मण शीतेषुं मानवं मनुसंहितं ॥ मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यते ॥ २० ॥
इमानपि वधिष्यामि निर्घृणान् दुष्टचारिणः ॥ राक्षसान्पापकर्मस्थान्यज्ञघ्नान्रुधिराशनान् ॥
२१ इत्युक्त्वा लक्ष्मणं चाशु लाघवं दर्शयन्निव ॥ विगृह्य सुमहच्चास्त्रमाग्नेयं रघुनंदनः ॥ सु
बाहूरसि चिक्षेप स विद्धः प्रापतद्भुवि ॥ २२ ॥ शेषान्वायव्यमादाय निजघान महायशाः ॥
राघवः परमोदारो मुनीनां मुदमावहन् ॥ २३ ॥ स हत्वा राक्षसान्सर्वान्यज्ञघ्नान्रघुनंदनः ॥
ऋषिभिः पूजितस्तत्र यथेंद्रो विजये पुरा ॥ २४ ॥ अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः
निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥ २५ ॥ कृतार्थोऽस्मि महाबाहो कृतं गुरु
वचस्त्वया ॥ सिद्धाश्रममिदं सत्यं कृतं वीर महायशः ॥ स हि रामं प्रशस्यैवं ताभ्यां संध्या
मुपागमत् ॥ २६ ॥ इत्यार्षे श्रीरामायणे बा० त्रिंशः सर्गः ॥ ३० ॥

निजघान दूरोत्सारणपूर्वकं ना
शनं । वायव्यास्त्रफलं बोध्यं ॥ २३ ॥ २४ ॥ निरीतिकाः निराबाधाः ॥ २५ ॥ सत्यं कृतं अन्वर्थनामकं कृ

आयागभूतं यजनीयदेवताभूतमित्यर्थः विश्रमनीत्यस्य तिष्ठतीति शेषः अतएवाह अर्चितमित्यादि न्यास
भूतं नरपतेरिति क्वचित्पाठः तत्रापि न्यस्यते अस्मिन् देवतेति व्युत्पत्त्या स एवार्थः देवतान्यासाश्रयस्था
गार्थ एव प्रतिमादौ ॥१३॥ एवमुक्त्वेति महर्षिगणद्वारे तिशेषः मुनिवरो विश्वामित्रः वनदेवताः वन

आयागभूतं नृपतेस्तस्य वेश्म निराघव ॥ अर्चितं विविधैर्गन्धैर्धूपैश्चागरुगन्धिभिः ॥१३॥
एवमुक्त्वा मुनिवरः प्रस्थानमकरोत्तदा ॥ सर्षिसंघः सकाकुत्स्थ आमन्त्र्य वनदेवताः ॥१४॥
स्वस्ति वोऽस्तु गमिष्यामि सिद्धः सिद्धाश्रमादहं ॥ उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयं ॥ प्र
दक्षिणं ततः कृत्वा सिद्धाश्रममनुत्तमं ॥१५॥ इत्युक्त्वा मुनिशार्दूलः कौशिकः स तपोधनः ॥ उ
त्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥१६॥ तं व्रजन्तं मुनिवरमन्वगादनुसारिणां ॥ शक
टीशतमात्रं तु प्रयाणे ब्रह्मवादिनां ॥१७॥ मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ॥ अनु
जग्मुर्महात्मानं विश्वामित्रं तपोधनं ॥१८॥ निवर्तयामास ततः सर्षिसंघः स पक्षिणः ॥ ते ग
त्वा दूरमध्वानं लम्बमाने दिवाकरे ॥१९॥

दुर्गाद्याः ॥१४॥ सिद्धः निर्विघ्नयज्ञसिद्ध्येति भावः क्व
गमिष्यसीत्यत्राह उत्तरेइति ॥१५॥१६॥ अनुसारिणां उक्तादिगनुसारिणां पश्चाद्गामिनामितिवा
शकटीशतमात्रं शतपरिच्छिन्नशकटाद्यारोपिताग्निहोत्रसंभारादिमत् ब्रह्मवादिनां यूथं अन्व
गादिति संबंधः ॥१७॥१८॥ पक्षिणो निवर्तयामासेत्यनेन ऋषीणामनिवर्तनमुक्तं तदेवाह तेगत्वेति
॥१९॥

पूर्वंपुर्वस्मिन्काले देवरातारव्यस्यप्राचीनजनकस्ययज्ञेसदसिदैवतैर्दत्तयज्ञंवधेप्रसाधिताच्छिवाद्दत्त
ध्वं यज्ञप्रसादितैः शिवसहितैर्देवैर्दत्तं अतस्तत्रतिष्ठतीतिशेषः॥८॥तस्याद्भुतत्वमाह नास्येति आरो
पणाशरप्रक्षेपयोगपञ्चासंबंधः नकथंचननकथमपीत्यर्थः॥९।१०॥तत्रमिथिलायां यज्ञंचेति यज्ञ
इक्षुसिचेत्यन्वयः चकारेणजानकीस्वीकारसमुच्चयः॥११॥कुतस्तादृशधनुषस्तत्रस्थितिस्तत्राह

तद्धिपूर्वंनरश्रेष्ठ दत्तंसदसिदैवतैः॥ अप्रमेयबलंघोरंमखेपरमभास्वरं॥८॥नास्यदे
वानगंधर्वानासुरानचराक्षसाः॥ कर्तुमारोपणंशक्तानकथंचनमानुषाः॥९॥धनुषस्तस्य
वीर्यंहिजिज्ञासंतोमहीक्षितः॥नशेकुरारोपयितुंराजपुत्रामहाबलाः॥१०॥तद्धनुर्नर
शार्दूलमैथिलस्यमहात्मनः॥तत्रद्रक्ष्यसिकाकुत्स्थयज्ञंचपरमाद्भुतं॥११॥तद्धियज्ञ
फलंतेनमैथिलेनोत्तमंधनुः॥याचितंनरशार्दूलसुनाभंसर्वदैवतैः॥१२॥

तद्धीति उत्तमंतद्धनुः मैथिलेननिजयज्ञप्रीतदेवेभ्यः यज्ञफलत्वेनयाचितं युद्धेरिपूणां
जयायसर्वदैवतैः शिवसहितैः सर्वदेवतैर्दत्तं अतस्तत्रतिष्ठतीत्यर्थः तदुक्तंपाद्मे चापं
शंभोर्दयादत्तमिति कौर्मेपि प्रीतश्चभगवानीशस्त्रिनेत्रोनीललोहितः प्रददौशत्रुनाशार्थं
जनकायाद्भुतंधनुरिति सुनाभंशोभनमुष्टिबंधनस्थानं॥१२॥

पालनंप्रजापालनं॥४॥निवेशंसन्निवेशं॥५॥महोदयंमहोदयनामकं॥६॥७॥एषागिरिव्रजापरपर्याया॥८॥
सुमागधीतत्संज्ञा॰आययाविततिपदच्छेदः॥९॥समागधीमगधादागततयामागधीत्वेनप्रसिद्धायास॰

तानुवाचकुशःपुत्रान्धर्मिष्ठान्सत्यवादिनः॥क्रियतांपालनंपुत्राधर्मंप्राप्स्यथपुष्कलं॥४॥
कुशस्यवचनंश्रुत्वाचत्वारोलोकसत्तमाः॥निवेशंचक्रिरेसर्वेपुराणांनवरास्तदा॥५॥कु
शांबस्तुमहातेजाःकौशांबीमकरोत्पुरीं॥कुशनाभस्तुधर्मात्मापुरंचक्रेमहोदयं॥६॥अमूर्त
रजसंनामधर्मारण्यंमहामतिः॥चक्रेपुरवरंराजावसुर्नामगिरिव्रजं॥७॥एषावसुमती
नामवसोस्तस्यमहात्मनः॥एतेशैलवराःपंचप्रकाशंतेसमंततः॥८॥सुमागधीनदीरम्या
मगधान्विश्रुतायया॥पंचानांशैलमुख्यानांमध्येमालेवशोभते॥९॥सैषाहिमागधीरामव
सोस्तस्यमहात्मनः॥पूर्वाभिचरितारामसुक्षेत्रासस्यमालिनी॥१०॥कुशनाभस्तुराज
र्षिःकन्याशतमनुत्तमं॥जनयामासधर्मात्माघृताच्यांरघुनंदन॥११॥तास्तुयौवनशालि
न्योरूपवत्यःस्वलंकृताः॥उद्यानभूमिमागम्यप्रावृषीवशतह्रदा॥१२॥गायंत्योनृत्यमा
नाश्चवादयंत्यस्तुराघव॥आमोदंपरमंजग्मुर्वराभरणभूषिताः॥१३॥

एषाशोणा॰तस्यमहद्दृश्यस्यवसोर्भवति॰पूर्वाभिचरितापूर्वदिक्गामिनी॰सुक्षेत्रापार्श्वद्वयेपी
तिशेषः॥१०॥घृताच्यांतन्नामिकाप्सरःसु॥११॥ताःशतंकन्याः॥१२॥आमोदंसंतोषं॥१३॥

शोणा इति गिरिव्रतसमीपस्थो नदीविशेषः इत्येतदुत्तरसर्गे स्पष्टं अस्तंगते अस्तं जिगमिषती त्यर्थः॥२०॥२१॥
२२॥ अयं देशः शोणाकूलस्थः॥२३॥ निखिलं वैभवमिति शेषः॥२४॥ इति श्रीरामाभिरामे श्रीरामीये रामा
यणतिलके बालकांडे एकत्रिंशः सर्गः॥३१॥ शोणाकूलदेशवैभवप्रश्ने महदंशपानामयं देश इत्युत्त

वासं चक्रुर्मुनिगणाः शोणाकूले समाहिताः॥ तेऽस्तंगते दिनकरे स्नात्वा हुतहुताशनाः॥२०॥ विश्वा
मित्रं पुरस्कृत्य निषेदुरमितौजसः॥ रामोऽपि सह सौमित्रिर्मुनींस्तानभिपूज्य च॥२१॥ अग्रतो नि
षसादाथ विश्वामित्रस्य धीमतः॥ अथ रामो महातेजा विश्वामित्रं तपोधनं॥२२॥ पप्रच्छ मुनि
शार्दूलं कौतूहलसमन्वितः॥ भगवन्को न्वयं देशः समृद्धवनशोभितः॥२३॥ श्रोतुमिच्छामि भ
द्रं ते वक्तुमर्हसि तत्त्वतः॥ नोदितो रामवाक्येन कथयामास सुव्रतः॥ तस्य देशस्य निखिलमृ
षिमध्ये महातपाः॥२४॥ इत्यार्षे श्रीरामायणे बालकांडे एकत्रिंशः सर्गः॥३१॥ ब्रह्मयोनिर्महा
नासीत्कुशो नाम महातपाः॥ अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः॥१॥ स महात्मा कुली
नायां युक्तायां सुमहाबलान्॥ वैदर्भ्यां जनयामास चतुरः सदृशान्सुतान्॥२॥ कुशांबं कुशना
भं च असूर्तरजसं वसुं॥ दीप्तियुक्तान्महोत्साहान्क्षत्रधर्मचिकीर्षया॥३॥

रमाह ब्रह्मयोनिरि
ति ब्रह्मपुत्र इत्यर्थः॥ अक्लिष्टव्रतश्चासौ धर्मज्ञश्चेति विग्रहः॥१॥ युक्तायां अशेषस्त्रीगुणयुक्तायामि
त्यर्थः॥ असूर्तरजसं न विद्यते सूर्तं प्रसृतं रजो यस्य तं [illegible] अभिमियोगविभागाद्चक्षत्रधर्मचिकी

वा० रा० ति० अ० १० एकत्रिंश

रामा॰ बा॰
११०

स्वप्रभावं दर्शयति॰ कुशनाभेत्यादि॰ स्थानात् वायुपदात्॰ देवमपि त्वां च्यावयितुं समर्था इति शेषः रक्षाम
स्त्विति॰ शापेन तथाकरणे हि तत्क्षयः स्यादिति भावः ॥२०॥ हे दुर्मेध॰ दुर्बुद्धे॰ यत्र काले पितरमवम
न्य अप्रमानविषयं कृत्वा स्वधर्मेण कामेन स्वयंवरमुपास्महे॰ आत्मना स्वातंत्र्येण वयं वरमंग
कुर्मः स कालः कदाचिदपि माभूदित्यन्वयः नावमन्येति॰ पाठस्तु क्वचित्कोऽपपाठः तथापा

कुशनाभसुता देव समस्ताः सुरसत्तम। स्थानाच्च्यावयितुं देवं रक्षामस्तु तपो वयं ॥२०॥ मा भूत्स
कालो दुर्मेधः पितरं सत्यवादिनं ॥ अवमन्य स्वधर्मेण स्वयंवरमुपास्महे ॥२१॥ पिता हि प्रभुर
स्माकं दैवतं परमं च सः। यस्य नो दास्यति पिता स नो भर्ता भविष्यति ॥२२॥ तासां तु वचनं श्रु
त्वा हरिः परमकोपनः। प्रविश्य सर्वगात्राणि बभंज भगवान्प्रभुः ॥२३॥ ताः कन्या वायुना भ
ग्ना विविशुर्नृपतेर्गृहं। प्रविश्य च सुसंभ्रांताः सलज्जाः सास्रलोचनाः ॥२४॥ स च ता दयि
ता भग्नाः परमशोभनाः। दृष्ट्वा दीनास्तदा राजा संभ्रांत इदमब्रवीत् ॥२५॥

110

कन्याः

ठेन इति छेदः छांदसं दीर्घत्वं॰ नः अस्माकं स कालो माभूदित्यन्वयः क्वचित्तु नो वमन्य स्वेति
पाठः अत एव माभूत्स कालो॰ यद्वा॰ नो पितरं सत्यवानां॰ कामतः समतिक्रम्य वरयेम स्वयंवरं इत्ये
तदर्थं विवरणं श्लोकोदृश्यते क्वचित् ॥२१॥ तत्र बीजमाह॰ पिता हीति ॥२२॥ हरिः॰ वायुः क्वचित्तु
वायुरित्येव पाठः ॥२३॥ सलज्जाः अन्याय्य॰ पतिसंगतः सलज्जाः ॥२४॥ भग्नाः भग्नांगाः ॥२५॥

राम
११०

घनांतरे मेचमध्येताराइवरेजु रितिशेषः॥१४॥१५॥ मत्कामनापूरणे· ममदेवस्यमानुष्योपिभार्याभवि
ष्यथेत्यादिवशीकरणायार्थवादः ननुमानुषीणांदेवसंबंधोऽनुचितस्तत्राह· मानुषस्स्यज्यतांभा
वइति· मदंगीकारमात्रेणविलक्षणाशक्त्याऽविर्भावान्मानुषभावत्यागेस्वतएवभवतीनांसाम
र्थ्यंभविष्यति· तत्फलमाह· दीर्घमिति॥१६॥मानुषेषुहियतः विशेषेणनित्यमनुदृणांयौवनंच

अथताश्चारुसर्वांग्यो रूपेणाप्रतिमाभुवि॥उद्यानभूमिमागम्यताराइवघनांतरे॥१४॥ताः
सर्वगुणसंपन्नारूपयौवनसंयुताः॥दृष्ट्वा सर्वात्मको वायुरिदंवचनमब्रवीत्॥१५॥
अहंवःकामयेसर्वाभार्यामम भविष्यथ॥मानुषस्त्यज्यतांभावोदीर्घमायुरवाप्स्यथ॥१६॥
चलंहियौवनंनित्यंमानुषेषुविशेषतः॥अक्षयंयौवनंप्राप्ताअमर्यश्चभविष्यथ॥१७॥
तस्यतद्वचनंश्रुत्वावायोरक्लिष्टकर्मणः॥अपहास्यततोवाक्यंकन्याशतमथाब्रवीत्॥१८॥
अंतश्चरसिभूतानांसर्वेषांसुरसत्तम॥प्रभावज्ञाश्चतेसर्वाः किमर्थमवमन्यसे॥१९॥

लंचंचलंक्रीयमाणमितियावत्· अतःमत्संबंधेन अक्षयंयौवनमित्याद्यन्वयः॥१७॥अपहा
स्य· हासपूर्वकंमपमान्य॥१८॥अंतश्चरसीतिपूर्वार्धेनस्वभावज्ञतावायोसूचिता· ननु
युष्मत्स्वभावापेक्षयामत्प्रभावोधिकइतिचेत्तत्राह· प्रभावज्ञाश्चतेसर्वाः तयाभ्रमंमाका
र्षीरितिभावः तस्मादेवमनुचितमार्थनया अस्मदेवमानमनुचितमित्याह· किमर्थमित्यादि

हे पुत्र्यः क्षमावतां क्षमावद्भिः कर्तुं सर्वैर्यत्क्षान्तं क्षमा तत् सुमहत्कृतं महती क्षमा कृतेति यावत् । गात्रभंगो
त्पन्नक्रोधवेगः सहनमिति दुष्करमिति भावः यच्च कुलं अवेक्षितं कामवेगसहनं तदपि सुमहत् ॥६॥ पु
रुषस्य वेति । अविशेषेण निःशेषः त्वस्तु दुष्करं यत् त्रिदशाविषये क्षान्तं कामवेगसहनं कृतं तत् ॥
अतिदुष्करं तेषां अभिरूप्यादिकमनीयगुणबाहुल्यात् ॥७॥ स्वकन्यानां क्षमां श्लाघयन् तादृशी

क्षान्तं क्षमावतां पुत्र्यः कर्त्तव्यं सुमहत्कृतं ॥ ऐकमत्यमुपागम्य कुलं चावेक्षितं मम ॥६॥ अलंका
रो हि नारीणां क्षमा तु पुरुषस्य वा ॥ दुष्करं तच्च वै क्षान्तं त्रिदशेषु विशेषतः ॥७॥ यादृशी वः ।
क्षमा पुत्र्यः सर्वासामविशेषतः ॥ क्षमा दानं क्षमा सत्यं क्षमा यज्ञश्च पुत्रिकाः ॥८॥ क्षमा यशः
क्षमा धर्मः क्षमायां विष्ठितं जगत् ॥ विसृज्य कन्याः काकुत्स्थ राजा त्रिदशविक्रमः ॥९॥
मंत्रज्ञो मंत्रयामास प्रदानं सह मंत्रिभिः ॥ देशे काले च कर्त्तव्यं सदृशे प्रतिपादनं ॥१०॥

क्षमां स्वकुले प्रार्थयते । यादृशीति । भो पुत्र्यः यादृशी युष्माकं क्षमा तादृशी अस्मत्कुले सर्वा
सामस्त्वविशेषः ॥ अथवा विशेषतः सकलस्त्रीपुरुषाविशेषेणेत्यर्थः ॥ क्षमायाः प्रार्थनीय
त्वे निमित्तमाह । क्षमेत्यादि । दानसत्यवचनयज्ञसमाधिजसकलधर्मफलात् क्षमा सकलजग
दाधारभूता च क्षमातः ॥ सोपादेत्येत्यर्थः ॥८॥ ९ ॥ प्रदानं कन्याप्रदानं उचिते । देशे काले सदृ
शे स्वकुलादिसदृशे पात्रे प्रदानं कर्त्तव्यं इति मंत्रिणा प्रक्रमः ॥१०॥ ॥

धर्ममवमन्यते बलात्कारं करोतीति यावत् रोदनादिना चेष्टं त्वयः किं नाभिभाषयेत्यन्वयः ॥२६॥ एवं पृष्ठे
तिशोषः समाधिं संदध इति तद्वचः श्रवणैकाग्रचित्तोभूदित्यर्थः ॥२७॥ इति श्रीरामाभिरामे श्रीरामी
ये रामायणतिलके बालकांडे द्वात्रिंशः सर्गः ॥३२॥ तस्येति चरणौ स्पृष्ट्वा नमस्कृत्य ॥१॥ प्रधर्षयितुं अ

किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते ॥ कुब्जाः केन कृताः सर्वाश्चेष्टं त्यो नाभिभाषत ॥२६॥ एवं
राजा विनिश्वस्य समाधिं संदधे ततः ॥२७॥ इत्यार्षे श्रीरा० बाल० द्वात्रिंशः सर्गः ॥३२॥ तस्य तद्वच
नं श्रुत्वा कुशनाभस्य धीमतः ॥ शिरोभिश्चरणौ स्पृष्ट्वा कन्याशतमभाषत ॥१॥ वायुः सर्वात्मको
राजन्प्रधर्षयितुमिच्छति ॥ अशुभं मार्गमास्थाय न धर्मं प्रत्यवेक्षते ॥२॥ पितृमत्यः स्म भद्रं ते स्व
च्छंदे न वयं स्थिताः ॥ पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ॥३॥ तेन पापानुबंधेन वचनं न
प्रतीच्छता ॥ एवं ब्रुवंत्यः सर्वाः स्म वायुना निहता भृशं ॥४॥ तासां तु वचनं श्रुत्वा राजा परम
धार्मिकः ॥ प्रत्युवाच महातेजाः कन्याशतमनुत्तमं ॥५॥

भिभवितुं इच्छति स्म अशुभं बलात्का
ररूपं अवेक्षते स्म ॥२॥ पितृमत्यः विवधीनाः स्वच्छंदे पति स्वीकार विषये स्वातंत्र्येन स्थिताः नव
र्तामहे यतः अतो नः पितरं वृणीष्व त्वं यदि नः अस्मान् तुभ्यं सदास्यति तदा तव त्वदीयाः भवि
ष्यामः ते तव भद्रं अस्तु इति योजना ॥३॥ एवं ब्रुवंतीनां नो वचनं प्रतीच्छता अनंगीकुर्वता पापानु
वंधेन अधर्मं वहुधर्मं विसेन एवं धर्ममनुवंत्यः सर्वाः वायुना अभिहताः स्म इति योजना ॥४।५॥

ननुपुत्रप्रार्थनायत्याचुचितंतत्राह॰ अपतिश्चास्मि इतः परमपि अस्मिअहंनकस्यचिद्भार्याभविष्यामीति शेषः अनेननैष्ठिकब्रह्मचारिणीतित्वंसूचितं अथापियथापुत्रावाप्तिर्भवतितथातेभद्रंअनुग्रहोस्तु॰ नन्वेवंनैष्ठिकब्रह्मचर्येकथंपुत्रलाभःसंभाव्येत अतआह॰ब्राह्म्येणेति॰ उपगतायाः किंकरत्वंप्राप्तायाः ब्राह्मेणब्रह्मसंबंधिनाउपायेनमेसुतंदातुमर्हसि॰ सनकादयइ

अपतिश्चास्मिभद्रंतेभार्याचास्मिनकस्यचित्॥ ब्राह्म्येणोपगतायाश्चदातुमर्हसिमेसुतं॥१७॥
तस्याःप्रसन्नोब्रह्मर्षिर्ददौब्राह्ममनुत्तमं॥ ब्रह्मदत्तइतिख्यातंमानसंचूलिनः सुतं॥१८॥
सराजाब्रह्मदत्तस्तुपुरीमध्यवसत्तदा॥ कांपिल्यांपरयालक्ष्म्यादेवराजोयथादिवि॥१९॥
सबुद्धिंकृतवान्राजाकुशनाभःसुधार्मिकः॥ ब्रह्मदत्तायकाकुत्स्थदातुंकन्याशतंतदा॥२०॥
तमाहूयमहातेजाब्रह्मदत्तंमहीपतिः॥ ददौकन्याशतंराजासुप्रीतेनांतरात्मना॥२१॥ यथाक्रमंतदापाणिंजग्राहरघुनंदन॥ ब्रह्मदत्तोमहीपालस्तासांदेवपतिर्यथा॥२२॥

वमानसःपुत्रोदेयमितिभावः॥१७॥ तस्याः सोमदायाःप्रसन्नः चूलिननामाब्रह्मर्षिः ब्राह्मंब्रह्मतपसायुक्तंब्रह्मणादत्तत्वात्॰ ब्रह्मदत्तइतिख्यातं मानसंसुतंददौ वित्पन्वयः फलीफलिनइतिवत्॰ चूलीचूलिनइति ऋषेर्नामद्वयंसाधु॥१८॥ राजागंधर्व्याःसोमदायाःक्षत्रियत्वात्॰ कांपिल्यांकपिलेनान्विर्वृत्तां॥१९॥२०॥२१॥ देवपतिर्यथेंद्रः इवसदृशोमहीपालइत्यर्थः॥२२॥

ऊर्ध्वरेता ब्रह्मचारी· ब्राह्मंतपः ब्रह्मविषयेचित्तैकाग्र्यं· मनसश्चेंद्रियाणां च ऐकाग्र्यं परमंतप इति·
स्मृतिः ॥११॥ यदा चूलीतपश्चरतित दा ऊर्मिलातनयासोमदा नाम गंधर्वीतं पर्युपास्तेस्म· ॥ म
अनुग्रहं कुर्विंतिप्रार्थनया सेवतेस्म· पर्युपासत इत्यपशब्दलुगार्षः ॥१२॥ तमिति· प्रतियोगेद्वि

एतस्मिन्नेवकालेतुचूलीनाम महाद्युतिः ॥ ऊर्ध्वरेताशुभाचारोब्राह्मंतप उपागमत् ॥११॥
तपस्यंतमृषिंतत्र गंधर्वी पर्युपासते ॥ सोमदानाम भद्रंतेऊर्मिलातनया तदा ॥१२॥ साचतं
प्रणाताभूत्वा शुश्रूषणपरायणा ॥ उवासकालेधर्मिष्ठातस्यास्तु ष्टोभवद्गुरुः ॥१३॥ सच
तां कालयोगेनप्रोवाचरघुनंदन ॥ परितुष्टोस्मि भद्रंते किं करोमितवप्रियं ॥१४॥ परि
तुष्टंमुनिंज्ञात्वा गंधर्वीमधुरस्वरं ॥ उवाच परमप्रीतावाक्यज्ञावाक्यकोविदम् ॥१५॥
लक्ष्म्यासमुदितोब्राह्म्याब्रह्मभूतोमहातपाः ॥ ब्राह्म्येणतपसायुक्तं पुत्रमिच्छामिधार्मिकं ॥१६॥

तीया· तत्समीपे आसेत्यर्थः ॥१३॥ कालयोगेन शुश्रूषाजनितधर्मपरिपाकाईकालसंबंधेन·
अनेन दिव्ययोगिनीयोगिनोः अकल्मषंतपः प्रवृत्तिः सूचिता ॥१४॥१५॥ ब्राह्म्या लक्ष्म्या ब्रह्म
वर्चसेनब्रह्मभूतः ब्रह्मात्मभावनाया· अतएवमहातपाः यतस्त्वमीदृशः ॥ अतः ब्राह्म्येण
तपसायुक्तं पुत्रमिच्छामि ब्राह्मंतपः ब्रह्मविषयमैकाग्र्यं· यद्वाब्राह्मंतपः स्वाध्यायः ॥१६॥

रामा-बा-
११३

कुशवाक्यमाह पुत्रइत्यादि सदृशः त्वत्सदृशः कोसौ तत्राह गाधिं गाधिनामानं प्राप्स्यसि तेन लोके शा
श्वतीं कीर्तिं च प्राप्स्यसि ॥३॥ कुशो नामेति पारायणात् कुशवृत्तं नाम प्रसिद्धमित्यर्थः आकाशमाविश्य आ
काशरूपो भूत्वा अनेन तस्य सुकृतत्वं सूचितं तेन स्ववंशमाहात्म्यातिशयः सूचितः ॥४॥ कस्यचित्त्व
थ कालस्य चित्कालस्य अनंतरमित्यर्थः ॥५॥ मम विश्वामित्रस्य कुशवंशप्रसूतत्वादहं कौशिकः ॥६॥

113

पुत्रस्ते सदृशः पुत्र भविष्यति सुधार्मिकः ॥ गाधिं प्राप्स्यसि तेन त्वं कीर्तिं लोके च शाश्वतीं ॥३॥
एवमुक्त्वा कुशो राम कुशनाभं महीपतिं ॥ जगामाकाशमाविश्य ब्रह्मलोकं सनातनं ॥४॥
कस्यचित्त्वथ कालस्य कुशनाभस्य धीमतः ॥ जज्ञे परमधर्मिष्ठो गाधिरित्येव नामतः ॥५॥ स
पिता मम काकुत्स्थ गाधिः परमधार्मिकः ॥ कुशवंशप्रसूतोस्मि कौशिको रघुनंदन ॥६॥
पूर्वजा भगिनी चापि मम राघव सुव्रता ॥ नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥७॥
सशरीरा गता स्वर्गं भर्तारमनुवर्तिनी ॥ कौशिकी परमोदारा प्रवृत्ता च महानदी ॥८॥ दि
व्या पुण्योदका रम्या हिमवंतमुपाश्रिता ॥ लोकस्य हितकामार्थं प्रवृत्ता भगिनी मम ॥९॥

न केवलमहमेव गाधेः पुत्रः मम पूर्वजा ज्येष्ठा नाम्ना सत्यवतीति प्रसिद्धा नाम्ना ऋचीके प्रतिपा
दिता ऋचीकाय दत्ता इति नाम प्रसिद्धं ॥७॥ सशरीरस्वर्गं गतो हे तु भर्त्तारमनुवर्त्तनी ति सह ग
मनं कृतवतीत्यर्थः अपि च अन्यदपि तस्याश्चरितं कौशिकी नाम्नी महानदी तद्रूपा प्रवृत्ता च जाता ॥८॥
हितकार्यार्थं हितकामार्थमिति पाठे हितमिच्छन्तु [illegible] का [illegible] हि [illegible] भयदो नार्थं मम ॥९॥

रामः
११३

तदा तेन राज्ञा पाणौ स्पृष्टमात्रेण ताः कन्याः विकुब्जाः कुब्जत्वरहिताः आसन्निति शेषः ब्राह्मतपोयुक्तत्वा
देवं सामर्थ्यं राज्ञः एवं च सति तदा कन्याशतं परया लक्ष्म्या विभावितम् अन्वयः ॥२३॥ सः राजा वायुनाभु
ग्नाः दृष्ट्वेत्यन्वयः भग्ना इति पाठः स्तु चिन्त्यः के चित्तु तत्पाठे पूर्वं भग्ना इति व्याचख्युः ॥२४॥ प्रेषयामा

स्पृष्टमात्रे तदा पाणौ विकुब्जा विगतज्वराः ॥ युक्तं परमया लक्ष्म्या बभौ कन्याशतं तदा ॥२३॥
स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः ॥ बभूव परमप्रीतो हर्षं लेभे पुनः पुनः ॥२४॥ कृतो
द्वाहं तु राजानं ब्रह्मदत्तं महीपतिः ॥ सदारं प्रेषयामास सोपाध्यायगणं तदा ॥२५॥ सोमदा
पि सुतं दृष्ट्वा पुत्रस्य सदृशीं क्रियां ॥ यथान्यायं च गंधर्वी स्नुषास्ताः प्रत्यनंदत ॥ स्पृष्ट्वा
स्पृष्ट्वा च ताः कन्याः कुशनाभं प्रशस्य च ॥२६॥ इत्यार्षे श्रीरा॰ बाल॰ त्रयस्त्रिंशः सर्गः ॥३३॥
कृतोद्वाहे गते तस्मिन्ब्रह्मदत्ते च राघव ॥ अपुत्रः पुत्रलाभाय पौत्रीमिष्टिमकल्पयत् ॥१॥
इष्ट्यां तु वर्तमानायां कुशनाभं महीपतिं ॥ उवाच परमोदारः कुशो ब्रह्मसुतस्तदा ॥२॥

सकां पित्वं प्रतीति शेषः ॥२५॥ सदृशीं क्रियां दारक्रियामित्यर्थः प्रतिनंदनप्रकारमाह स्पृष्ट्वेत्यादि
प्रशस्य च गतेत्यर्थः आश्चर्यमो साधेर्यं यद्देवश्रेष्ठस्याप्यनादरः धन्योयं राजा यस्येदृशः ग्रहो मे भा
ग्यं यस्या मे इदृश्यः स्नुषाः इत्येवं प्रतिनंदनं अनेन स्त्री माहात्म्यं तपोमाहात्म्यं च दर्शितं ॥२६॥ इति
श्रीरा॰ रा॰ बा॰ त्रयस्त्रिंशः सर्गः ॥३३॥ [illegible] योर्वा ॥ पुत्रलाभाय

शनैर्विसृज्यते वियुक्तो त्यर्थः वर्तमानसामीप्ये भूते लट् संध्याशब्देन तदुपासनयोग्यगोणकालसा
हित्येन सार्धं यामरूपः नक्षत्रताराग्रहं नभः सहस्राक्षवत् नेत्रैरावृत्तमिव तज्ज्योतिर्भिः तद्रश्मिभिः
अवभासते ॥१६॥ उत्तिष्ठते उदोनूर्ध्वीकर्मणि इति तङ् ॥१७॥ नैशानि निशाप्रभवानि तान्येवाह यक्षे

शनैर्विसृज्यते संध्या नभो नेत्रैरिवावृतं नक्षत्रताराग्रहनं ज्योतिर्भिरवभासते ॥१६॥ उत्ति
ष्ठते च शीतांशुः शशी लोकतमोनुदः ह्लादयन्प्राणिनां लोके मनांसि प्रभया स्वया ॥१७॥
नैशानि सर्वभूतानि प्रचरन्ति ततस्ततः यक्षराक्षससंघाश्च रौद्राश्च पिशिताशनाः ॥१८॥
एवमुक्त्वा महातेजा विरराम महामुनिः साधु साध्विति ते सर्वे मुनयो ह्यभ्यपूजयन् ॥१९॥
कुशिकानामयं वंशो महान्धर्मपरः सदा ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमाः ॥२०॥
विशेषेण भवानेव विश्वामित्र महायशाः कौशिकी सरितां श्रेष्ठा कुलोद्योतकरी तव ॥२१॥
मुदिते मुनिशार्दूलैः प्रशस्तः कुशिकात्मजः निद्रामुपागमच्छ्रीमानस्तंगते इवांशुमान् ॥२२॥

त्यादि ॥१८॥ अभ्यपूजयन् अस्तुवन् ॥१९॥ स्तुतिप्रकारमाह कुशिकानामित्यादि ब्रह्मोपमाः
ब्रह्मर्षितुल्याः ॥२०॥ हे महायशा विश्वामित्र भवानेव विशेषेण महात्मेति शेषः यस्तपसा
ब्राह्मणत्वं प्राप्त इति भावः किंच यस्य तव भगिनी तव कुलस्योद्योतकरी उद्धारकर्त्री सरितां
श्रेष्ठा अनेन सकलजगदुद्धारकत्वं तस्याः सूचितं ॥२१॥ प्रशस्तः स्तुतः अस्तंगत इवांशुमा

यतोभगिन्यांस्नेहसंयुक्तः अतः हिमवत्पार्श्वे कौशिक्यां नियतः नित्यंसुखंवसामीत्यन्वयः ॥१०॥ इतश्चतस्यां वा
सङ्गत्याह· सात्विति· सत्येधर्मेप्रतिष्ठितात जलपानादिनासत्यात्· मनोननिवर्ततइतिभावः ॥११॥ नन्वेवंक
यं· सिद्धाश्रमेस्थितिरतआह· अहंहीति· नियमात्· गयापिंडदानवत्· सिद्धाश्रमैकसाध्ययागज
न्यसिद्धिहेतोः ॥ आगमनकार्यं चत्वदनुग्रहात्सिद्धमित्याह· सिद्धाश्रममित्यादि ॥१३॥ उपसंहरति· एवे

ततोहंहिमवत्पार्श्वेवसामिनियतःसुखं ॥ भगिन्यांस्नेहसंयुक्तःकौशिक्यांरघुनंदन ॥१०॥ सा
तुसत्यवतीपुण्यासत्येधर्मेप्रतिष्ठिता ॥ पतिव्रतामहाभागाकौशिकीसरितांवरा ॥११॥ अहंहि
नियमाद्राम हित्वातांसमुपागतः ॥ सिद्धाश्रममनुप्राप्यसिद्धोस्मितवतेजसा ॥१२॥ एषाराममम
मोत्पत्तिःस्वस्यवंशस्यकीर्त्तिता ॥ देशस्यहिमहाबाहोयन्मांत्वंपरिपृच्छसि ॥१३॥ गतोर्धरात्रः
काकुत्स्थकथाःकथयतोमम ॥ निद्रामभ्येहिभद्रंतेमाभूद्विघ्नोध्वनीहनः ॥१४॥ निष्पंदास्तर
वःसर्वेनिलीनामृगपक्षिणः ॥ नैशेनतमसाव्याप्तादिशश्चरघुनंदन ॥१५॥ ॥

ति ॥ ममगाधेःसकाशादुत्पत्तिःकीर्तिता· स्वस्यवंशस्यउत्पत्तिः ब्रह्मपुत्रात्· कुशात् ॥ उत्पत्तिःकी
र्त्तिता· देशस्यशोणाकूलीयगिरिव्रजदेशस्य· पृच्छसिपर्यपृच्छः ॥ तत्सर्वमुक्तमितिशेषः ॥१३॥
अतःपरंनप्रष्टव्यमित्याह· गतइति· ॥ विघ्नःगंतव्याध्वनिनिद्राभावप्रयुक्तजाड्यमूलः ॥१४॥ अ
र्धरात्रचिन्हान्याहनिष्पंदाइति ॥ [illegible] दिशिमावः ॥ नैशाह निलीनाइति ॥१५॥

अमृतवत्· अमृततुल्यं· पंचयज्ञाद्यवशिष्टमन्नं· यद्वाऽमृतवत्तत्सदृशं गंगाजलं· हविश्च प्राशु
क्तं प्राश्येत्यर्थः॥९॥ विष्ठिताः विशेषेण स्थिताः यथार्हतः॥ यथावस्थानमर्हन्तस्तथा स्थिता इत्यर्थः॥१०॥

हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः॥ विविशुर्जान्हवीतीरे शुभा मुदितमानसाः॥९॥
विश्वामित्रं महात्मानं परिवार्य समंततः॥ विष्ठिताश्च यथान्यायं राघवौ च यथार्हतः॥१०॥
संप्रहृष्टमना रामो विश्वामित्रमथाब्रवीत्॥ भगवन् श्रोतुमिच्छामि गंगां त्रिपथगां नदीं॥ त्रै
लोक्यं कथमाक्रम्य गता नदनदीपतिं॥११॥ चोदितो रामवाक्येन विश्वामित्रो महामुनिः॥ वृ
द्धिं जन्म च गंगाया वक्तुमेवोपचक्रमे॥१२॥ शैलेंद्रो हिमवान् राम धातूनामाकरो महान्॥
तस्य कन्याद्वयं राम रूपेणाप्रतिमं भुवि॥१३॥ या मेरुदुहिता राम तयोर्माता सुमध्यमा॥
नाम्ना मेना मनोज्ञा वै पत्नी हिमवतः प्रिया॥१४॥ तस्यां गंगेयमभवज्ज्येष्ठा हिमवतः
सुता॥ उमा नाम द्वितीयाभूत्कन्या तस्यैव राघव॥१५॥

गंगां श्रोतुं गंगाविषयं किंचित् श्रोतुमित्यर्थः श्रोतव्यं विषयमाह· त्रैलोक्यमित्यादि॥११॥ वृ
द्धिं त्रैलोक्यव्याप्तिरूपां॥१२॥ धातूनां स्वर्णादीनां॥१३॥ या मेरुदुहिता मेना नाम सा· तयोः क
न्ययोर्मातेत्यन्वयः॥१४॥ तस्यां मेनायां या ज्येष्ठा हिमवतः सुता कुटिला नाम स· इयं गंगाऽभवदि
त्यर्थः· तस्यैव हिमवतः॥१५॥

सर

115

सेवतेसेवतेस्म॥२३॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके बालकांडेचतुस्त्रिंशः सर्गः॥३४॥रात्रि
शेषंउपास्यनिद्रयाअतिवाह्य॥१॥गमनायगमनंकर्त्तुं॥२॥३॥अयंशोणइति·शोणोवंशोणइतिव्याप

रामोपिसहसौमित्रिः किंचिदागतविस्मयः॥प्रशस्यमुनिशार्दूलंनिद्रांसमुपसेवते॥२३॥
इत्यार्षेश्रीरामायणेबालकांडेचतुस्त्रिंशः सर्गः॥३४॥उपास्यरात्रिशेषंतुशोणाकूलेमह
र्षिभिः॥निशायांसुप्रभातायांविश्वामित्रोभ्यभाषत॥१॥सुप्रभातानिशारामपूर्वासंध्याप्र
वर्तते॥उत्तिष्ठोत्तिष्ठभद्रंतेगमनायाभिरोचय॥२॥तच्छ्रुत्वावचनंतस्यकृतपूर्वाह्णिक
क्रियः॥गमनंरोचयामासवाक्यंचेदमुवाचह॥३॥अयंशोणःशुभजलोगाधःपुलिनमं
डितः॥कतरेणपथाब्रह्मन्संतरिष्यामहेवयं॥४॥एवमुक्तस्तुरामेणविश्वामित्रोब्रवीदिदं
एषपंथामयोद्दिष्टोयेनयांतिमहर्षयः॥५॥तेगत्वादूरमध्वानंगतेर्धदिवसेतदा॥जान्ह
वींसरितांश्रेष्ठांददृशुर्मुनिसेवितां॥६॥तांदृष्ट्वापुण्यसलिलांहंससारससेवितां॥बभू
वुर्मुनयःसर्वेमुदिताःसहराघवाः॥७॥तस्यास्तीरेतदासर्वेचक्रुर्वासपरिग्रहं॥ततःस्ना
त्वायथान्यायंसंतर्प्यपितृदेवताः॥८॥

दिष्टाः कतरेणपथासंतरिष्यामहेइत्यन्वयः प्रश्नवी
जमाह·अगाधइति·॥अतलस्पर्शइत्यर्थः॥४॥उद्दिष्टःगंतव्यत्वेननिश्चितः॥५॥६॥सारसःपक्षिविशे
षः॥७॥वासपरिग्रहंसमार्जनादिना॥आवासस्थानंचक्रुरित्यर्थः॥८॥ ॥

ववीर्यं क्षिप्तमिति॥ विष्णुपद्भिणाप्रसरत्नाकराद्देभोदतंबरात्॥ कुटिलाविक्रमपादांतात्पपाता
कुत्सितातत:॥ तस्माहि ष्णपदी ख्यातेति वामनपुराणोक्ते रेवब्रह्मांडोर्ध्वकटाहेलग्नेत्सिन्नायते
पतनसमयेच ब्रह्मांडवाह्यजलेन सहैव पतितं तज्जलं ब्रह्मणा कमंडलौ धृतं वाह्यजलं
च शिवानंदवाष्पजातं॥ नारायणात्मकमिति स्कांदिकासंहितादौ स्पष्टं॥ ततो भगवता प
दाचरोपणे तेनैव कमंडलुजलेन तत्पादक्षालनं कृत्वा तज्जलं कमंडलावेव क्षिप्तं॥ शंकर
संहितोक्तरीत्या गौरीविवाहोत्तरं लीलया गौर्या पाणिभ्यां शिवनयनाच्छादने कृते शिवे
न ललाटनेत्रप्रकाशितं ततो भयाद्गौरीपाणिस्वेदजलं स्त्रुतं तदपि ब्रह्मणा कमंडलौ॥
स्थापितमित्यप्यत्रोह्यं॥ गौरीविवाहकथनेन सूचितं च॥ भगीरथप्रार्थनया च ब्रह्मरू
प:॥ सर्वपवित्रजलसमूहस्तस्मै दत्तः॥ सर्वमुक्तजलमुपक्रम्य पुराणेषु भगीरथसंव
धश्रवणात्॥ विस्तरस्त्वस्मत्कृतगंगामाहात्म्यप्रकाशेद्रष्टव्यः॥ १८॥

देवकार्यं वक्ष्यमाणं भववीर्यधारणम् ॥ त्रिपथगां ॥ स्वर्ग-भू-पातालमार्गगां ॥ इदं वर्तमानापदेशेन
वरणं च यस्याः शिवभार्यात्वाय ॥ १६ ॥ धर्मेण कन्यादानधर्मेण ॥ स्वच्छंदपथगामीत्यपि वर्त्तमा
नापदेशेन ॥ स्वेच्छामात्रेण ब्रह्मादिवायुमार्गगमनशीलां ॥ १७ ॥ त्रिलोकार्थे ॥ तारकतो भीतत्रि
लोकरक्षकपुत्रोत्पत्त्यर्थं ॥ अगच्छन्ब्रह्मलोकं ॥ तत्र ब्रह्मशापवशाज्जलरूपताप्राप्तिरित्या
दि वामनपुराणोक्त दिशा मध्ये ऽन्त्यं ॥ वामनपुराणवृत्तांतस्य त्रायेणात्रप्रत्यभिज्ञानात् ॥

अथ ज्येष्ठां सुराः सर्वे देवकार्यचिकीर्षया ॥ शैलेंद्रं वरयामासुर्गंगां त्रिपथगां नदीम् ॥ १६ ॥
ददौ धर्मेण हिमवांस्तनयां लोकपावनीं ॥ स्वच्छंदपथगां गंगां त्रैलोक्यहितकाम्यया ॥ १७ ॥
प्रतिगृह्य त्रिलोकार्थे त्रिलोकहितकांक्षिणः ॥ गंगामादाय तेऽगच्छन्कृतार्थेनांतरात्मना ॥ १८ ॥

एवं हि तत्राख्यायिका ॥ उमा ज्येष्ठा कुटिला नाम हिमवत्कन्या देवैः शिववीर्यधारणाय हि
मवंतं प्रार्थिता ॥ तेन दत्तया तया सह देवा ब्रह्मलोकं गत्वा ब्रह्मणे निवेदितवंतः ॥ ब्राह्म
णा चासमर्थेयं तद्धारणे इत्युक्ताऽवश्यं धारयामीति कथितवाक्याऽवज्ञानेन ब्रह्मणा ज
लरूपा भवेति शप्ता ॥ तत्रैव ब्रह्माण्डोर्ध्वकटाहे जलरूपेण लग्ना स्थिता ॥ तस्यामेवाग्निनाशि

श्रुश्रुषितं विस्तरमाह त्रीनित्यादि. भूर्भुवःस्वर्मार्गान्नित्यर्थः प्लावयेत्प्राप्नुयात् इत्येको विस्तरः द्वितीय
माह. कथमिति त्रिपथगेति प्रसिद्धिः किंनिबंधनेति द्वितीयः॥३॥ कर्मभिश्चरितैः कैः समन्वितेति तृ
तीयः द्वयोर्हिमवत्कन्ययोः प्रस्तावेपि स्ववंशोद्धारकत्वाद्गंगाविषयक एव भगवतः प्रश्न इत्यन्ये
४ निखिलेन कार्त्स्न्येन विस्तरेणेति यावत्. उद्वाहो विवाहः॥५॥ गतं क्रीडयेति शेषः॥६॥ समुद्युक्ताः

त्रीन्पथो हेतुना केन प्लावयेल्लोकपावनी॥ कथं गंगा त्रिपथगा विश्रुता सरिदुत्तमा॥३॥
त्रिषु लोकेषु धर्मज्ञ कर्मभिः कैः समन्विता॥ तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः॥४॥
निखिलेन कथां सर्वामृषिमध्ये न्यवेदयत्॥ पुरा राम कृतोद्वाहः शितिकंठो महातपाः॥५॥
दृष्ट्वा च भगवान्देवीं मैथुनायोपचक्रमे॥ तस्य संक्रीडमानस्य महादेवस्य धीमतः॥ शि
तिकंठस्य देवस्य दिव्यं वर्षशतं गतं॥६॥ एवं मन्मथयुद्धे तु तयोर्नासीत्पराजयः॥ न
चापि तनयो राम तस्यामासीत्परंतप॥ सर्वे देवाः समुद्युक्ताः पितामहपुरोगमाः॥७॥
यदिहोत्पद्यते भूतं कस्तत्प्रतिसहिष्यति॥ अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन्॥ ८
देवदेव महादेव लोकस्यास्य हिते रत॥ सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि॥९॥

सेनानीप्राप्त्यर्थं परमयत्नेन रुद्रोमयोः संयोजनं कृत्वा पितस्या रेत इति तेजसो मोचनं वारयितुं
समुद्युक्ता बभूवुरित्यर्थः समुद्विग्ना इति पाठस्तु सुगम एव॥७॥ पुत्रार्थसंयोजनोद्योगव
तां तन्निवारणोद्योगोनुचितस्तत्राह. यदिहेति. इह उमायां उत्पद्यते उत्पत्स्यते. अब्रुवन्. इ

कंन्या ग्रवत्तपतिः॥ अग्रेशिववीर्यस्खलनादिवक्तुंचैतद्दर्णानं उग्रंसुव्रतं पर्णभोजनस्यापित्यागसंक
ल्परूपं-तपःशिवध्यानरूपं॥१९॥२०॥२१ त्रिपथाच त्रिपथगामिनी गंगातथाप्रतिपादयतीतिशेषः

याचान्याशैलदुहिताकन्यासीद्रघुनंदन॥ उग्रंसुव्रतमास्थायतपस्तेपेतपोधना॥१९॥ उग्रे
णतपसायुक्तांददौशैलवरःसुतां॥ रुद्रायाप्रतिरूपायउमांलोकनमस्कृतां॥२०॥ एतेतेशै
लराजस्यसुतेलोकनमस्कृते॥ गंगाचसरितांश्रेष्ठाउमादेवीचराघव॥२१॥ एतत्तेसर्वमा
ख्यातंयथात्रिपथगामिनी॥ खंगताप्रथमंतात गतिंगतिमतांवर॥ सैषासुरनदीरम्याशै
लेंद्रस्यसुतातदा॥२२॥ सुरलोकंसमारूढाविपापाजलवाहिनी॥२३॥ इत्यार्षेश्रीरामायणेवा
ल्मीकीयेबालकांडेपंचत्रिंशःसर्गः॥३५॥ उक्तवाक्येमुनौतस्मिन्नुभौराघवलक्ष्मणौ॥ प्रति
नंद्यकथांवीरावूचतुर्मुनिपुंगवं॥१॥ धर्मयुक्तमिदंब्रह्मन्कथितंपरमंत्वया॥ दुहितुः
शैलराजस्यज्येष्ठायावक्तुमर्हसि॥ विस्तरंविस्तरज्ञोसिदिव्यमानुषसंभवं॥२॥

तदेवविवृणोति-खमित्यादि-प्रथमंखंगतिं-आकाशमार्गंगता॥२२॥ पश्चात्सुरलोकंसमारूढाऽभ
वत्-जलवाहिनीतत्स्वभावाजाता-विपापापासकलपापहंत्री॥२३॥ इतिश्रीटीकायांपंचत्रिंशःसर्गः
३५ उक्तवाक्येइति-उपरतेइत्यर्थः॥१॥ वक्तुमर्हसीत्यस्यविस्तरमित्यनेनान्वयःदिव्यमानुषसंभवं

वाल्मीकि रामायण ८२

दिव्यवर्षशतभोगवशात्स्थानतः च्युतस्य शुक्रांशस्य धारणासंभवेन तद्धारणासमर्थमो त्तस्थानं निरूप
यंत्वित्याह यदिदमिति स्थानात् हृदयपुंडरीकलक्षणात् क्षुभितं चिरकालभोगवशात्स्खलितं
अनुत्तमं देवकार्यार्हं सुतसमर्थत्वेन सर्वोत्तमं भवत्प्रार्थनया च उमागर्भानर्हं को धारयिष्यति
१४ ॥ उत्तरमाहुः एवमिति धराधारयिष्यतीति तस्या अशेषधारणाशक्तिमत्त्वादिति ॥१५॥१६

यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमं ॥ धारयिष्यति कस्तन्मे ब्रुवंतु सुरसत्तमाः ॥१४॥
एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम् ॥ यत्तेजः क्षुभितं ह्यद्य तद्धरा धारयिष्यति ॥१५
एवमुक्तः सुरपतिः प्रमुमोच महाबलः ॥ तेजसा पृथिवी येन व्याप्ता सगिरिकानना ॥१६॥
ततो देवाः पुनरिदमूचुश्चापि हुताशनम् ॥ आविश त्वं महातेजो रौद्रं वायुसमन्वितः ॥१७॥
तदग्निना पुनर्व्याप्तं संजातं श्वेतपर्वतं ॥ दिव्यं शरवणं चैव पावकादित्यसन्निभं ॥१८॥

पृथिव्यां मुक्तस्य तेजसो धारणार्थं अग्नेः पृथिव्यधिपतित्वेन पृथिव्यभिमानित्वात् तं नि
युंजते ततइति पुनः शब्दो वाक्यालंकारे हुताशनं देवीक्षेदांशरूपं अन्यादृशाग्नेः रौद्र
तेजःप्रवेशासंभवात् वायुसमन्वितइत्यनेन चालनलक्षणः प्रवेशोपायउक्तः ॥१७॥ त
दग्निनेति उक्ताग्निना चालनपूर्वकप्रवेशनेन तेजोवद्धंसक्ले केवलश्वेतपर्वतरूपं जातं तद्रू
पं तेजःप्रवेशप्रदेशे [illegible] शरवणं चाभवत् ॥१८॥

प्रसादविषयमाह-नलोकाइति-भूरादिलोकास्तत्स्थप्रजाश्चेत्यर्थः॥ब्राह्मेणतपसाब्रह्मानन्यतालक्ष
णेनतपसेत्यर्थः॥१०॥तेजोरेतः तेजसिश्चात्मनि-मत्तेजसिमयाधृतेकोलाभस्तत्राह-रक्षसर्वानि
ति-धृतेतिशेषः ननुरुद्रेणास्वतेजोधारणेकथंलोकरक्षेतिचेत्-श्रूयते-यदेतत्सुरुषेरेतोभवति-
आदित्यस्यतद्रूपंइतिश्रुतेः-तद्रेतोरूपतेजएवआदित्यमंडलंतद्धृतौसकलंजगद्धृतंभवति-

नलोकाधारयिष्यंतितववतेजः सुरोत्तम॥ब्राह्मेणतपसायुक्तोदेव्यासहतपेश्वर॥१०॥
त्रैलोक्यहितकामार्थतेजस्तेजसिधारय॥रक्षसर्वानिमांलोकान्नालोकंकर्तुमर्हसि॥११॥
देवतानांवचः श्रुत्वासर्वलोकमहेश्वरः॥वाढमित्यब्रवीत्सर्वानुपुनश्चेदमुवाचह॥१२॥
धारयिष्याम्यहंतेजस्तेसैवसहोमया॥त्रिदशाः पृथिवीचैवनिर्वाणमधिगच्छतु॥१३॥

विपर्ययेविपर्ययइत्याह-तदेवाह-नालोकमिति-आदित्यविनाशेहिसर्वलोकविनाशप्र
संगइतिभावः॥११॥१२॥धारयिष्यामीति-सहोमया-उमापिस्वरजोरूपंतेजोग्निंस्वस्वरूपेण
तेजसाधारयिष्यति-यदेतत्-स्त्रियांलोहितंभवति-अग्नेस्तद्रूपमितिश्रुतेः भोत्रिदशाः अ
नेनतेजोधारणेनपृथिवीचकारात्सर्वेलोकाः निर्वाणंसुखंप्राप्नोतु-अन्यथारोश्वरतेजो
जन्यस्यदुर्धार्यत्वेनदुर्दर्शत्वेनचपृथिव्याः लोकस्यचपीडास्यादितिभावः॥१३॥

जे४

रामा॰बा॰
११६

पीडितान् देवीशापदुःखितान् उपचक्रामपादन्यासंकृतवान् ॥२५॥ तस्यगिरेः हिमालयस्यउत्तरेपार्श्वेहि
मवत्प्रभवाख्येशृंगे ॥२६॥ उपसंहरति एषइति त्रिषुलोकेषुधर्मज्ञकर्मभिःकैः समन्वितेतिप्रश्नो
त्तरतयावक्तव्यस्यगर्भधारणरूपगंगाचरितस्यशेषतयाशैलपुत्र्याविस्तारोनिवेदितः प्रकृतं
प्रश्नोत्तरंवक्तुंप्रतिजानीते गंगायाइति प्रभवमितिच्छेदः सोन्हस्वः ऐशानतेजोधारणरूपंप्रभावमि

तान्सर्वान्पीडितान्दृष्ट्वासुरान्सुरपतिस्तदा ॥ गमनायोपचक्रामदिशंवरुणपालितां ॥२५॥
सगत्वातपआतिष्ठत्पार्श्वेतस्योत्तरेगिरेः ॥ हिमवत्प्रभवेशृंगेसहदेव्यामहेश्वरः ॥२६॥ एष
तेविस्तरोरामशैलपुत्र्यानिवेदितः ॥ गंगायाःप्रभवंचैवशृणुमेसहलक्ष्मणः ॥२७॥ इत्यार्षे
श्रीरामायणेवाल्मीकीयेबालकांडेषट्त्रिंशःसर्गः ॥३६॥ तप्यमानेतदादेवेसेंद्राःसाग्नि
पुरोगमाः ॥ सेनापतिमभीप्संतःपितामहमुपागमन् ॥१॥ ततोब्रुवन्सुराःसर्वेभगवंतंपिताम
हं ॥ प्रणिपत्यसुराःरामसेंद्राःसाग्निपुरोगमाः ॥२॥ येनसेनापतिर्देवदत्तोभगवतापुरा
सतपःपरमास्थायतप्यतेस्मसहोमया ॥३॥

त्पर्यः ॥२७॥ इतिश्रीरामाभिरामेश्रीरामीयेरा
मायणतिलकेबालकांडेषट्त्रिंशःसर्गः देवेशिवेसेंद्राःदेवाःइतिशेषः साग्निपुरोगमाः अ
ग्निनापुरोगमेननसहिताइत्यर्थः सेंद्राःसर्षिगणाःपुराइतिक्वचित्पाठः ॥१॥ अत्रसुराःसर्वे
इतिपुनरुक्तंअतःपाठांतरमन्वेषणीयं द्वितीयार्धेसुरारामेतिपाठः रामसंबोधनंचैतत् ॥२॥
येनरुद्रेणसेनापति [illegible] तपःतप्यतेअनुतिष्ठति ॥३॥

राम
११६

113

यत्रेति· किंचित्कालंधनत्वात् · कार्त्तिकेयत्ववदेव अग्निसंभवत्वंबोध्यं ॥१९॥ सुप्रीतमनसः लोकानुग्रहायमूल
तेजसोधनत्वाद्देवकार्यायस्कन्नतेजसश्चवदनत्वात्संतोषः क्रियमाणामपिपूजांउमादेवीनांगीकारो
तिस्म· प्रत्युतक्रुद्धैवाभूदित्याह· अथशैलेति· किमब्रवीत्तदाह शापदिति· शापरूपंवचोब्रवीदित्य
र्थः ॥२०॥ मन्युकारणमाह· यस्मादिति ॥२१॥ शापस्वरूपमाह· अपत्यमित्यादि ॥२२॥ एवमुक्त्वाशपथ

यत्रजातोमहातेजाः कार्त्तिकेयोऽग्निसंभवः ॥ अथयोमांचशिवंचैवदेवाः सर्षिगणास्तथा ॥१९॥ पू
जयामासुरत्यर्थंसुप्रीतमनसस्तदा ॥ अथशैलसुताराम त्रिदशानिदमब्रवीत् ॥२०॥ समन्यु
रशपत्सर्वान्क्रोधसंरक्तलोचना ॥ यस्मान्निवारिताचाहंसंगतापुत्रकाम्यया ॥२१॥ अपत्यंस्वे
षुदारेषुनोत्पादयितुमर्हथ ॥ अद्यप्रभृतियुष्माकमप्रजाः संतुपत्नयः ॥२२॥ एवमुक्त्वासु
रान्सर्वान्शशापपृथिवीमपि ॥ अवनेनैकरूपात्वंबहुभार्याभविष्यसि ॥२३॥ नचपुत्र
कृतांप्रीतिंमत्क्रोधकलुषीकृता ॥ प्राप्स्यसेत्वंसुदुर्मेधेममपुत्रमनिच्छती ॥२४॥

रूपंवचइतिशेषः· अवनेपृथिविनैकरूपाएकत्रैवक्षेत्रेऽनेकबीजफलजनकत्वात्· बहुभार्या
अनेकभूपतिभोग्या ॥२३॥ नचपुत्रकृतांप्रीतिं· वाराहादुत्पन्नस्यापिनरकासुरस्यकृष्णावतारेतेनै
वहननात्· सुदुर्मेधइति· नित्यमसिचप्रजामेधयोरित्यसिच्· सुष्ठुदुष्टामेधायस्यास्तत्संबोधनं त
सुदुर्मेधः ममपुत्रमनिच्छती [illegible] ानुमन्यतेतर्हिसपुत्रोममैवस
श

कैलासपर्वतंगत्वेत्यन्वयः॥१०॥समाधत्स्वहुतमहातेजइतिसंबुद्धिः शैलपुत्र्यांगंगायांपारेशंतेजउत्सृजेत्य
न्वयः॥११॥प्रतिज्ञायतथाकरोमीतिप्रतिज्ञाय इदंगर्भधारणंदेवतानांप्रियमित्यन्वयः॥१२॥दिव्यं
रूपंअधारयत् स्रोतोरूपंमुक्त्वेतिशेषः तस्यामहिमांदिव्यरूपवैभवं सः पारेश्वरतेजाराशिः पार
दः॥अवशीर्यतशीर्णः उत्तमस्त्रीदर्शनेश्वरस्पतस्यग्रहणायत्छलंहियोजनपर्यंतमितिसुप्र

तेगत्वापरमंरामंकैलासंधातुमंडितं॥अग्निंनियोजयामासुःपुत्रार्थंसर्वदेवताः॥१०॥दे
वकार्यमिदंदेवसंकः॥गर्भंधारयवैदेविदेवतानामिदंप्रियं॥१२॥इत्येतद्वचनंश्रुत्वादि
व्यंरूपमधारयत्॥सतस्यामहिमांदृष्ट्वासमंतादवशीर्यत॥१३॥समंततस्तदादेवीम
भ्यषिंचतपावकः॥सर्वस्रोतांसिपूर्णानिगंगायारघुनंदन॥१४॥तमुवाचततोगंगासर्व
देवपुरोगमं॥अशक्ताधारणेदेवतेजस्तवसमुद्धतं॥१५॥दह्यमानाग्निनातेनसंप्रव्यथि
तचेतना॥अथाब्रवीदिदंगंगासर्वदेवहुताशनः॥१६॥/॥२ समाधत्स्वहुताशन॥शैल
पुत्र्यांमहातेजोगंगायांतेजउत्सृज॥११॥देवतानांप्रतिज्ञायगंगामभ्येत्यपाव २)

सिद्धःयद्वासअग्निः अवशीर्यतपारेश्वरंतेजस्त्यक्तवानित्यर्थः॥१३॥अभ्यषिंचतेति रसेश्वरेणेतिशेषःस्रो
तांसिनाड्यः॥१४॥पुरोगमः पुरोयायीहितकरश्च तवअग्रेयेनतेजसासंबंधात् समुद्धतंअत्युग्रं
तेजः शैवंयतोतस्तस्यधारणेऽहमशक्तेत्यन्वयः॥१५॥संप्रव्यथितचेतनाअस्मीतिशेषःसर्वदेव
हुताशनसर्वदेवोद्देशेनहुतस्यभक्षक॥१६॥

अनंतरं वीजदानुरूपमानंतरं यत्कार्यं पुत्राकारसंपत्तये विधेयं तत्त्वं विधत्स्व॥४॥ सांत्वयन् इस्वकार्यान्न
भखिन्नानितिशेषः॥५॥ यत् यस्मात् शैलपुत्र्या अप्रजा भविष्यथेत्युक्तं तत्तस्मात् युष्माकं स्वासु सुप
त्निषु नप्रजाः संतीतिशेषः पत्निष्विति हस्वत्वं छांदसं। यतस्तस्या वचनमक्लिष्टं अमोघं एवं च प्रजा
स्पर्येति पाठकल्पना छांदसत्वकल्पनाच्च विफलैव॥६॥ तर्हि का गतिस्तत्राह इयमिति यस्यां हुताश

यदत्रानंतरं कार्यं लोकानां हितकाम्यया॥ संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः॥४॥ देवता
नां वचः श्रुत्वा सर्वलोकपितामहः॥ सांत्वयन्मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत्॥५॥ शैलपुत्र्याः
यदुक्तं तन्न प्रजाः स्वासु पत्निषु॥ तस्या वचनमक्लिष्टं सत्यमेव न संशयः॥६॥ इयमाकाशगंगा
च यस्यां पुत्रं हुताशनः॥ जनयिष्यति देवानां सेनापतिमरिंदमं॥७॥ ज्येष्ठा शैलेंद्रदुहिता मान
यिष्यति तं सुतं॥ उमायास्तद्बहुमतं भविष्यति न संशयः॥८॥ तच्छ्रुत्वा वचनं तस्य कृतार्था
रघुनंदन॥ प्रणिपत्य सुराः सर्वे पितामहमपूजयन्॥९॥

नः पुत्रं जनयिष्यति से यं आकाश
गंगा आस्ते इतिशेषः॥७॥ ज्येष्ठा उमा स्वकनिष्ठापत्यत्वात् स्वापत्यवन्मानयिष्यतीत्यर्थ इति कत
कस्तत्र गंगाया एव ज्येष्ठत्वोक्तातेन विरोधात् तस्माज्ज्येष्ठा गंगा स्वकनिष्ठोमापत्यत्वान्मानयि
ष्यतीत्यर्थः उमा शिवसंयोगेन च्युतरेतोरजोभ्यामुत्पत्तेरुमापत्यत्वं अत एवाह उमाया इति
स्वापत्यसंमाननं॥८॥९॥

तं कुमारमिति · ततः हरतेजसः जातं क्रमेण साकारतां प्राप्तं · क्षीरसंभावनार्थीय क्षीरपानप्रयोजनप्रसि
द्धये · कृत्तिकाः कृत्तिकाभिः यद्वा समयोजयन्नित्यस्य प्रेरयन्नित्यर्थः ॥२३॥ अथ ताः कृत्तिकाः अस्माकं
सर्वासां पुत्रो भवत्विति उत्तमं समयं कृत्वा निश्चिताः ॥ तद्विषयकनिश्चयवत्यः जातमात्रस्य तस्य
क्षीरं ददुरित्यन्वयः ॥२४॥ ततः सर्वे देवताः युष्माकमयं पुत्रः कार्त्तिकेय इति त्रैलोक्ये विख्यातो भ
विष्यति अत्र न संदेहः ॥ इति ब्रुवन् अब्रुवन्नित्यर्थः अडभाव आर्षः ॥२५॥ तेषां देवानां तत्स्वेष्टा

तं कुमारं ततो जातं सेन्द्राः सह मरुद्गणाः ॥ क्षीरसंभावनार्थीय कृत्तिकाः समयोजयन् ॥२३
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमं ॥ ददुः पुत्रोयमस्माकं सर्वासामिति निश्चिताः ॥२४
ततस्तु देवताः सर्वाः कार्त्तिकेय इति ब्रुवन् ॥ पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः ॥२५
तेषां तद्वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे ॥ स्नापयन् परया लक्ष्म्या दीप्यमानं यथानलं ॥२६॥
स्कंद इत्यब्रुवन् देवाः स्कन्नं गर्भपरिस्रवे ॥ कार्त्तिकेयं महाबाहुं काकुत्स्थ ज्वलनोपमम् ॥२७॥

उक्तं तद्वचनं श्रुत्वा · ॥ स्कन्नं आदौ ईश्वरयोः सकाशात् स्कन्नं · ॥ पश्चाद्गङ्गाया गर्भात्परिस्रवे सति
परया लक्ष्म्या दीप्यमानं अनलमिव दुःस्पर्शं दुःस्पर्शतानिवृत्तिप्रयोजनकशैत्यसिद्धये ताः
स्नापयन् अस्नापयन्नित्यर्थः ॥२६॥ ततः स्कन्नपरिस्रुतत्वहेतोः पूर्वं कार्त्तिकेयत्वेनोक्तं ।
स्कंद इत्यन्वर्थनाम्ना अब्रुवन्नित्यन्वयः स्कन्नपरिस्रुत इत्यर्थे स्कंद इति पृषोदरादित्वात्साधुः
॥२७॥

सन्निवेशपतांस्याप्यतां ॥१७॥ स्रोतोभ्य उत्कृष्यतत्तेजः हिमवत्पार्श्वे उत्ससर्जेत्यन्वयः यत् यस्मात् · अस्याः निर्गतं तत्तस्मात् गंगागर्भतो निर्गमात् तत्तेजः जांबूनदाकारसुमेरुकन्यापत्यत्वात् गंगायास्तप्तजांबूनदं सुवर्णं तेनसमप्रभं आसीदितिशेषः ॥१८॥ अनन्तरं वधरण्यां प्राप्तं सा तत्त्वसंबंधधरणीस्थंवस्तु कांचनमकरोत् · तत्समीपवर्तिभूतसस्थं अतुलप्रभं हिरण्यं रजतं अरोत् · तत्तेजः संबंधितैन्तापादेवत

इहहैमवतेपार्श्वे गर्भोयंसन्निवेश्यतां ॥ श्रुत्वात्वग्निवचोगंगातंगर्भमतिभास्वरं ॥१७॥ उत्ससर्जमहातेजः स्रोतोभ्योहितदानघ ॥ यदस्यानिर्गतंतस्मात्तप्तजांबूनदप्रभं ॥१८॥ कांचनंधरणीप्राप्तं हिरण्यमतुलप्रभं ॥ ताम्रंकार्ष्णायसंचैवतैक्ष्ण्यादेवाभिजायत ॥१९॥ मलंतस्याभवत्तत्र पुसीसकमेवच ॥ तदेतद्धरणींप्राप्यनानाधातुरवर्धत ॥२०॥ निक्षिप्तमात्रेगर्भेतु तेजोभिरभिरंजितं ॥ सर्वंपर्वतसन्नद्धं सौवर्णमभवद्वनं ॥२१॥ तंदेशंतुततोब्रह्मा संप्राप्यैनमभाषत ॥ जातस्यरूपंयत्तस्माज्जातरूपंभविष्यति ॥ जातरूपमितिख्यातंतदाप्रभृतिराघव ॥ सुवर्णंपुरुषव्याघ्रहुताशनसमप्रभम् ॥२२॥

धवहिनभूस्थंवस्तु जातंताम्रंकार्ष्णायसंलोहंच अभिजायत· अडभावआर्षः ॥१९॥ तत्तस्यगर्भस्यमलंत्रपुसीसंच अभवत्· अयंभावः तैक्ष्ण्यमलगंधसंयुक्तेनस्पर्शितो विद्धंस्वर्णंगंधयुक्तेन विद्धंरजतं· तैक्ष्ण्ययुक्तेनविद्धंताम्रंलोहंच· मलयुक्तेनविद्धंत्रपुसीसे इतिनानाधातुः तद्रूपं ॥२०॥ [illegible] वर्णोधितत्वमपीत्याह· निक्षिप्तमात्रे

३ अरिष्टनेमिः कश्यपः अस्यां सुपर्णभगिनीत्यनुपदप्रयोगात् ४ भृगुप्रस्रवणे भृग्वधिष्ठितं प्रस्रवणं प्रवाहो यस्मिन्गिरौ हिमवत्पादपर्वते ५ । ६ । ७ । तातेत्युपलालने जनयिता जनयिष्यति षष्टिमिति नि

वैदर्भदुहिता रामकेशिनी नाम नामतः । ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी ॥ ३ ॥ अरिष्टनेमिदुहिता सुपर्णभगिनी तु सा । द्वितीया सगरस्यासीत्पत्नी सुमतिसंज्ञिता ॥ ४ ॥ ताभ्यां सह महाराजपत्नीभ्यां तप्तवांस्तपः । हिमवन्तं समासाद्य भृगुप्रस्रवणे गिरौ ॥ ५ ॥ अथ वर्षशते पूर्णे तपसाराधितो मुनिः । सगराय वरं प्रादाद्भृगुः सत्यवतां वरः ॥ ६ ॥ अपत्यलाभः सुमहान् भविष्यति तवानघ । कीर्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ॥ ७ ॥ एका जनयिता तात पुत्रं वंशकरं तव । षष्टिं पुत्रसहस्राणि अपरा जनयिष्यति ॥ ८ ॥ भाषमाणं नरव्याघ्रं राजपुत्र्यौ प्रसाद्यतं । ऊचतुः परमप्रीते कृताञ्जलिपुटे तदा ॥ ९ ॥ एकः कस्याः सुतो ब्रह्मन्का बहून्जनयिष्यति । श्रोतुमिच्छावहे ब्रह्मन्सत्यमस्तु वचस्तव ॥ १० ॥ तयोस्तद्वचनं श्रुत्वा भृगुः परमधार्मिकः । उवाच परमां वाणीं स्वच्छन्दोऽत्र विधीयताम् ॥ ११ ॥ एको वंशकरो वास्तु बहवो वा महाबलाः । कीर्तिमन्तो महोत्साहाः का वा कं वरमिच्छति ॥ १२ ॥

त्येकवचनान्तत्वात्सहस्राणीत्यनेन सामानाधिकरण्यं ८ राजपुत्र्यावित्यत्र छत्रिन्यायेन प्रयोगः ९ इच्छावहे इच्छावः १० स्वच्छन्दः स्वेच्छा विधीयतां ज्ञाप्यतां स्वेच्छयैव एकपुत्रता वा बहुपुत्रता वा

122

ततः कृत्तिकानां क्षीरं प्रादुर्भूतं आसीदिति शेषः ततः षण्णामपि स्तनजं पयः क्षुधातिशयेन षडाननो भूत्वा जग्राह ॥२८॥ एवं तदा षड्भिर्मुखैः यावदपेक्षितं क्षीरं गृहीत्वा एकाह्ना एकदिनेनैव सुकुमारवपुरपि स्वतेजसैव दैत्यसैन्यगणान् अजयत् ॥२९॥ ततः सकलासुरजयाद्धेतोः सर्वेऽग्निपुरोगमा देवाः समे-

प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमं ॥ षण्णां षडाननो भूत्वा जग्राह स्तनजं पयः ॥२८॥ गृहीत्वा क्षीरमेकाह्ना सुकुमारवपुस्तदा ॥ अजयत्स्वेन वीर्येण दैत्यसैन्यगणान्विभुः ॥२९॥ सुरसेनागणपतिमभ्यषिंचन्महाद्युतिं ॥ ततस्तममराः सर्वे समेत्याग्निपुरोगमाः ॥३०॥ एष ते राम गंगाया विस्तरोऽभिहितो मया ॥ कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च ॥३१॥ भक्तश्च यः कार्त्तिकेये काकुत्स्थ भुवि मानवः ॥ आयुष्मान्पुत्रपौत्रैश्च स्कंदसालोक्यतां व्रजेत् ॥३२॥ इत्यार्षे श्रीरा० वा० सप्तत्रिंशः सर्गः ॥३७॥ तां कथां कौशिको रामे निवेद्य मधुराक्षरां ॥ पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ॥१॥ अयोध्याधिपतिर्वीरः पूर्वमासीन्नराधिपः ॥ सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजः ॥२॥

त्य सुरसेनागणपतिं तं अभ्यषिंचन्नित्यन्वयः ॥३०॥ उपसंहरति एष इत्यादि ॥३१॥ धन्यत्वपुण्यत्वे विवृणोति भक्तश्चेति ऐहलौकिकफलेन धन्यत्वमामुष्मिकेन पुण्यत्वं पुत्रपौत्रैश्चेत्यस्य युक्तः सन्निति शेषः ॥३२॥ इति बालकांडे सप्तत्रिंशः सर्गः ॥३७॥ अथ यज्ञीनृपयोर्हेतुना केनेत्यादि प्रश्नस्योत्तरं [illegible] अपरं वाक्यं वक्ष्यमाणं प्रश्नोत्तरं ॥१॥ य

निर्वासितो निष्कासितः तस्य असमंजस्य एतद्वाची असमंजशब्दोऽदंतः सांतश्चेति बोध्यं ॥२२॥ समभिजा
यत अश्व इ भाव आर्षः ॥२३॥२४॥ यज्ञकर्मणीत्यस्य निश्चयं कृत्वेति प्राक्तनेनान्वयः ॥२५॥ इति श्रीरा

पौरणामहिते युक्तः पित्रा निर्वासितः पुरात् ॥ तस्य पुत्रोंऽशुमान्नाम असमंजस्य वीर्यवान्
॥२२॥ संमतः सर्वलोकस्य सर्वस्यापि प्रियंवदः ॥ ततः कालेन महता मतिः समभिजायत
॥२३॥ सगरस्य नरश्रेष्ठ यजेयमिति निश्चिता ॥ स कृत्वा निश्चयं राजा सोपाध्यायगणस्त
दा ॥२४॥ यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे ॥२५॥ इत्यार्षे श्रीरामायणे बालकांडेऽ
ष्टत्रिंशः सर्गः ॥३८॥ विश्वामित्रवचः श्रुत्वा कथांते रघुनंदनः ॥ उवाच परमप्रीतो मुनिं
दीप्तमिवानलं ॥१॥ श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमां ॥ पूर्वजो मे कथं ब्रह्मन्
यज्ञं वै समुपाहरत् ॥२॥ तस्य तद्वचनं श्रुत्वा कौतूहलसमन्वितः ॥ विश्वामित्रस्तु काकु
त्स्थमुवाच प्रहसन्निव ॥३॥ श्रूयतां विस्तरो राम सगरस्य महात्मनः ॥ शंकरश्वशुरो ना
म्ना हिमवानिति विश्रुतः ॥४॥

माभिरामे श्रीरामीये रामायणतिलके बालकांडेऽष्टत्रिंशः सर्गः ॥३८॥ यज्ञांते यज्ञोपक्रमकथांते इत्यर्थः
इमां यज्ञसंबंधिनीं ॥२॥ प्रहसन्निव विकसितवदनः स्वपूर्वजवृत्तांतश्रवणकौतुकेन रामभद्र
स्यायं प्रश्नः अत एव मुनेर्हासः स्ववंश्य इति रामस्यापि लोकवत्स्नेहसंपन्न इति ॥३॥ सगरस्य सगरयज्ञस्येत्यर्थः

नपसन्निधावित्यनेनतस्यापिसान्निध्यमात्रंनतुवरणंनियमकर्तृतेतिसूचितं॥१३॥सुपर्णीगरुडः॥१४॥१५
व्यजायतप्रसूतवती॥१६॥गर्भंतुंबंतुंबफलाकारगर्भपिंडंव्यजायतप्रसूतवती कथंततःपुत्रोदय

मुनेस्तुवचनंश्रुत्वाकेशिनीरघुनंदन॥पुत्रंवंशकरंरामजग्राहनृपसंन्निधौ॥१३॥षष्टिं
पुत्रसहस्राणिसुपर्णीभगिनीतदा॥महोत्साहात्कीर्तिमतोजग्राहसुमतिःसुतान्॥१४॥
प्रदक्षिणमृषिंकृत्वाशिरसाभिप्रणम्यतं॥जगामस्वपुरंराजासभार्योरघुनंदन॥१५॥अथका
लेगतेतस्यज्येष्ठापुत्रंव्यजायत॥असमंजइतिख्यातंकेशिनीसगरात्मजं॥१६॥सुम
तिस्तुनरव्याघ्रगर्भतुंबंव्यजायत॥षष्टिःपुत्रसहस्राणितुंबभेदाद्विनिःसृताः॥१७॥
घृतपूर्णेषुकुंभेषुधात्र्यस्तान्समवर्धयन्॥कालेनमहतासर्वेयौवनंप्रतिपेदिरे॥१८॥
अथदीर्घेणकालेनरूपयौवनशालिनः॥षष्टिःपुत्रसहस्राणिसगरस्याभवंस्तदा॥१९॥
सचज्येष्ठोनरश्रेष्ठःसगरस्यात्मसंभवः॥बालान्गृहीत्वातुजलेसरय्वारघुनंदन॥२०॥
प्रक्षिप्यप्राहसन्नित्यंमज्जतस्तान्निरीक्ष्यवै॥एवंपापसमाचारःसज्जनप्रतिबाधकः॥२१॥

इत्यत आह षष्टिरित्यादि॥१७॥१८॥दीर्घेणकालेनयौवनशालित्वेहेतुत्वान्ततीया॥१९॥ज्येष्ठः अ
समंजः बालान्गृहीत्वाजले॥२०॥प्रक्षिप्यमज्जतःतान्समीक्ष्यनित्यंप्राहसत् प्रहसन्नित्यपा
ठेस्थितोभवतीतिशेषः सज्जनप्रतिबाधकः [illegible]॥२१॥ ॥

अछिद्र इति छेदः यज्ञायज्ञः अछिद्रो भवेदित्यन्वयः सोपाध्यायवचः उपाध्यायसहितर्त्विग्गणवचः ॥११
भो पुरुषर्षभाः पुत्रकाः मंत्रपूतैर्महाभागैः यद्यपि महाक्रतुः आस्थितः अधिष्ठितः तथापि रक्षसां मा
ययायदि छिद्रं स्यात्तदा आत्मनो गतिं न पश्यामि तस्माद्गच्छथ विचिन्वध्वं । अन्वेषयतेत्यर्थ इति केचि

१२५

तत्तथा क्रियतां राजन्यज्ञोऽछिद्रः कृतो भवेत् ॥ सोपाध्यायवचः श्रुत्वा तस्मिन्सदसि पार्थिवः ॥११
षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह ॥ गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ॥१२॥ मंत्रपूतै
र्महाभागैरास्थितो हि महाक्रतुः ॥ तद्गच्छथ विचिन्वध्वं पुत्रका भद्रमस्तु वः ॥१३॥ समुद्रमालि
नीं सर्वां पृथिवीमनुगच्छथ ॥ एकैकं योजनं पुत्रा विस्तारमभिगच्छथ ॥१४॥ यावत्तुरगसंदर्श
स्तावत्खनत मेदिनीं ॥ तमेव हयहर्तारं मार्गमाणा ममाज्ञया ॥१५॥ दीक्षितः पौत्रसहितः
सोपाध्यायगणस्त्वहं ॥ इह स्थास्यामि भद्रं वो यावत्तुरगदर्शनम् ॥१६॥ ते सर्वे हृष्टमनसो रा
जपुत्रा महाबलाः ॥ जग्मुर्महीतलं राम पितुर्वचनयंत्रिताः ॥१७॥

तु॰ परे तु आस्थितो हि नि पा
ठः हि यस्मात् ईदृशैर्महाभागैः अस्थितोऽहं क्रतुः अतः अतोत्रक्रतौ रक्षसां गतिं न पश्यामि । तत्तस्मा
त्केनापि देवेन हृत इति मन्वे घयतेत्यर्थ इत्याहुः ॥१२॥१३॥ अनुगच्छथ अन्वेषयत यस्य तादेशाभावश्रु
षत्वात् ॥१४॥ यदि भूमौ न लभ्यते तदा आह यावत्तुरगेत्यादि ॥१५॥ स्वस्य तुरगानुगमनमयुक्तमित्याह
दीक्षित इत्यादि । तस्य [illegible] ॥१६॥ यंत्रिता नियुक्ताः ॥१७॥

मध्येमहापर्वतनिरोधाभावाद्विंध्यपर्वतंहिमवान्तथाविंध्योपिहिमवंतंइत्येवंपरस्परमासाद्यअत्वंस
म्यंप्राप्यऔन्नत्यातिशयेनविन्नानिरोधकाभावात्‧परस्परंनिरीक्षेतेपश्यतइत्यर्थः॥तयोर्मध्येआर्यावर्तभूमौ
आर्यावर्तःपुण्यभूमिर्मध्यंविंध्यहिमालयोरितिवचनात्॥५॥प्रशस्तःप्रशस्तत्वेनप्रसिद्धःउक्तवचनात्

विंध्यपर्वतमासाद्यनिरीक्षेतेपरस्परं॥तयोर्मध्येसमभवद्यज्ञःसपुरुषोत्तम॥५॥सहिदेशोन
रव्याघ्रप्रशस्तोयज्ञकर्मणि॥तस्याश्वचर्यांकाकुत्स्थदृढधन्वामहारथः॥६॥अंशुमानकरोत्ता
तसगरस्यमतेस्थितः॥तस्यपर्वणितंयज्ञंयजमानस्यवासवः॥७॥राक्षसीतनुमास्थाययज्
ञियाश्वमपाहरत्॥ह्रियमाणेतुकाकुत्स्थतस्मिन्नश्वेमहात्मनः॥८॥उपाध्यायगणाःसर्वेय
जमानमथाब्रुवन्॥अयंपर्वणिवेगेनयज्ञियाश्वोपनीयते॥९॥हर्तारंजहिकाकुत्स्थहय
श्चैवोपनीयतां॥यज्ञच्छिद्रंभवत्येतत्सर्वेषामशिवायनः॥१०॥

अश्वचर्यारक्षार्थमश्वानुगम
नं॥६॥मतेशासने‧पर्वणिउक्थ्याहे‧॥अश्वमेधेउक्थसंस्थात्रयं‧॥तत्रद्वितीयेअश्वालंभनदिवसे
अश्वविशसनात्‧॥प्राक्॥तंयज्ञंविहंतुमितिशेषः॥७॥यज्ञियाश्वंयज्ञार्हमश्वं॥८॥अयंयज्ञियो
ऽश्वःपर्वणिवेगेनअपनीयते‧॥अपह्रियते॥९॥अतःहर्तारंअश्वहर्तारंजहि॥अश्वश्चशीघ्रमुप
नीयतां॥यज्ञच्छिद्रंयज्ञस्यविघ्नः॥१०॥

कृतांतबलमोहितान् कृतः सर्वलोकस्य अतो नाशो यैः तादृशानि यानि बलानि सगरसुतबलानि तैर्मोहितान् मूर्च्छितचित्तान् ॥१॥ एषा वसुधा ॥२॥ धारयति योगबलेनेति शेषः ॥३॥ पृथिव्या निर्भेदश्च सनातनः प्रतिकल्पमवश्यंभावी अतस्तस्मात् सागरादिशब्दैर्दृष्ट एव अतः तत्र न शोकः कार्य इति भावः एवं च दीर्घदर्शि

देवतानां वचः श्रुत्वा भगवान्वै पितामहः॥ प्रत्युवाच सुसंत्रस्तान् कृतांतबलमोहितान्॥१॥ यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः॥ महिषी माधवस्यैषा स एष भगवान्प्रभुः॥२॥ कापिलं रूपमास्थाय धारयत्यनिशं धरां॥ तस्य कोपाग्निना दग्धा भविष्यंतिनृपात्मजाः॥३॥ पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः॥ सगरस्य च पुत्राणां विनाशो दीर्घदर्शिनां॥४॥ पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदमाः॥ देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतं॥५॥ सगरस्य च पुत्राणां प्रादुरासीन्महास्वनः॥ पृथिव्यां भिद्यमानायां निर्घातसमनिःस्वनः॥६॥ ततो भित्वा महीं सर्वे कृत्वा चापि प्रदक्षिणं॥ सहिताः सगराः सर्वे पितरं वाक्यमब्रुवन्॥७॥ परिक्रांता मही सर्वा सत्ववंतश्च सूदिताः॥ देवदानवरक्षांसि पिशाचोरगपन्नगाः॥८॥

नां दीर्घदर्शिभिः सगरपुत्रविनाशोयं दृष्ट एव अतस्तत्रापि शोकोनुचितः शेषे षष्ठी यद्वा अदीर्घदर्शिनामिति पदच्छेदः॥४॥ त्रयस्त्रिंशत् अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः अश्विनौ च॥५॥ निर्घातसमनिःस्वनः निर्घातनिस्वनसम इत्यर्थः॥६॥ ततो भित्वेति पाठः॥७॥ सत्ववंतो बलवंतः॥८॥ ॥ राम ॥

125

श्रायामोदीर्घविस्तारोविशालत्वतानचुक्तं·धरणीतलमेकैकोन्वेषयामासेत्यर्थः विभिदुरितिपृथिव्याम
दृष्टेतिशेषः॥१८॥भिद्यमानासर्वतइतिशेषः॥१९॥२०॥अनुत्तमंरसातलंविचेतुमिवधरधीयोजना

गत्वातुपृथिवींसर्वांमदृष्ट्वाश्वंमहाबलाः॥योजनायामविस्तारमेकैकोधरणीतलं॥विभिदुःपुरु
षव्याघ्रवज्रस्पर्शसमैभुजैः॥१८॥शूलैरशनिकल्पैश्चहलैश्चापिसुदारुणैः॥भिद्यमानावसु
मतीननादरघुनंदन॥१९॥नागानांवध्यमानानामसुराणांचराघव॥राक्षसानांदुराधर्षसत्वा
नांनिनदोभवत्॥२०॥योजनानांसहस्राणिषष्टिंतुरघुनंदन॥विभिदुर्धरणींरामरसातलम
नुत्तमं॥२१॥एवंपर्वतसंबाधंजंबूद्वीपंनृपात्मजाः॥खनंतोनृपशार्दूलसर्वतःपरिचक्रमुः
॥२२॥ततोदेवाःसगंधर्वाःसासुराःसहपन्नगाः॥संभ्रांतमनसःसर्वेपितामहमुपागमन्॥२३॥
तेप्रसाद्यमहात्मानंविषण्णवदनास्तदा॥ऊचुःपरमसंत्रस्ताःपितामहमिदंवचः॥२४॥भगव
न्पृथिवीसर्वाखन्यतेसगरात्मजैः॥बहवश्चमहात्मानोवध्यंतेजलचारिणः॥२५॥अयंयज्ञ
हरोस्माकमनेनाश्वोपनीयते॥इतितेसर्वभूतानिहिंसंतिसगरात्मजाः॥२६॥इत्यार्षेश्रीरा॰बा॰ए
कोनचत्वारिंशःसर्गः॥

नांषष्टिसहस्राणिविभिदुरित्यन्वयः॥२१॥पर्वतसंबाधंपर्वतनिविडं॥२२॥२४
२४॥महात्मानःसिद्धगंधर्वादयः॥२५॥यज्ञहनइतिपाठेहंतीतिहनः॥अपनीयतेअपनीयतेस्म॥सर्वभू
तानितत्प्रसंगरहितान्यपि॥२६॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेबा॰एकोनचत्वारिंशःसर्गः॥

प्रदक्षिणं कृत्वा दिग्गजमिति शेषः ॥१९॥२०॥ निरामयं कुशलं सोमवती उदीची ॥२१॥ भद्रं भद्राख्यं ॥२२॥ समालभ्य स्पृष्ट्वा ॥२३॥ प्रागुत्तरां ऐशानीं प्रथितां सर्वकर्मार्हत्वेन प्रसिद्धां ॥२४॥ कपिलं कपिलरूपधारि

तेतं प्रदक्षिणं कृत्वा सगरस्य महात्मनः ॥ षष्टिः पुत्रसहस्राणि पश्चिमां विभिदुर्दिशं ॥१९॥
पश्चिमायामपि दिशि महान्तमचलोपमं ॥ दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥२०॥
तं ते प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयं ॥ खनन्तः समुपाक्रान्ता दिशं सोमवतीं तदा ॥२१॥
उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरं ॥ भद्रं भद्रेण वपुषा धारयन्तं महीमिमां ॥२२॥ समालभ्य ततः सर्वे कृत्वा चैनं प्रदक्षिणं ॥ षष्टिः पुत्रसहस्राणि बिभिदुर्वसुधातलं ॥२३॥ ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशं ॥ रोषादभ्यखनन्सर्वे पृथिवीं सगरात्मजाः ॥२४॥ ते तु सर्वे महात्मानो भीमवेगा महाबलाः ॥ ददृशुः कपिलं तत्र वासुदेवं सनातनं ॥२५॥ हयं च तत्र तस्य देवस्य चरन्तमविदूरतः ॥ प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन ॥२६॥ ते तं यज्ञहनं ज्ञात्वा क्रोधपर्याकुलेक्षणाः ॥ खनित्रलाङ्गलधरा नानावृक्षशिलाधराः ॥२७॥ अभ्यधावन्त संक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ॥ अस्माकं त्वं हि तुरगं यज्ञियं हृतवानसि ॥२८॥ दुर्मेधस्त्वं हि संप्राप्तान्विद्धि नः सगरात्मजान् ॥ श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ॥२९॥

णं ॥२५॥ तस्य कपिलस्य
२६॥ तं कपिलं हन्तीति हनः पचाद्यच् अविचारतस्तमेव अश्वापहारद्वारा यज्ञहन्तारं ज्ञात्वेत्यर्थः ॥२७॥२८॥२९॥

ते अस्मासु भद्रं अनुग्रहबुद्धिरस्तु । वयं किं करिष्यामस्सलोपश्छांदसः बुद्धिरुपायः ॥ ९ ॥ १० ॥ भूयो निर्भिंद्येत्यन्व
यः कृतार्थाश्चेत्तदा निवर्तध्वं निवर्तध्वं निवर्त्तध्वमित्यर्थे आर्षमेतत् अन्यथा न निवृत्तिरित्यर्थः ॥ ११ ॥ १२ ॥ ख

न च पश्यामहे श्वं ते अश्वहर्तारमेव च ॥ किं करिष्यामभद्रं ते बुद्धिरत्र विचार्यतां ॥ ९ ॥ तेषां तद्व
चनं श्रुत्वा पुत्राणां राजसत्तमः ॥ समन्युरब्रवीद्वाक्यं सगरो रघुनंदन ॥ १० ॥ भूयः खनत भद्रं वो
निर्भिद्य वसुधातलं ॥ अश्वहर्त्तारमासाद्य कृतार्थाश्च निवर्तथ ॥ ११ ॥ पितुर्वचनमासाद्य सगरस्य
महात्मनः ॥ षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् ॥ १२ ॥ खन्यमाने ततस्तस्मिन्ददृशुः प
र्वतोपमं ॥ दिशागजं विरूपाक्षं धारयंतं महीतलं ॥ १३ ॥ स पर्वतवनां कृत्स्नां पृथिवीं रघुनंदन
धारयामास शिरसा विरूपाक्षो महागजः ॥ १४ ॥ यदा पर्वणि काकुत्स्थ विश्रमार्थं महागजः खे
दाच्चालयते शीर्षं भूमिकंपस्तदा भवेत् ॥ १५ ॥ तं ते प्रदक्षिणं कृत्वा दिशापालं महागजं ॥ मान
यंतो हि ते राम जग्मुर्भित्वा रसातलं ॥ १६ ॥ ततः पूर्वां दिशं हित्वा दक्षिणां विभिदुः पुनः ॥ दक्षि
णस्यामपि दिशि ददृशुस्ते महागजं ॥ १७ ॥ महापद्मं महात्मानं सुमहापर्वतोपमं ॥ शिरसा
धारयंतं गां विस्मयं जग्मुरुत्तमं ॥ १८ ॥

न्यमाने इति षष्टियोजनसहस्रात्परमपीति शेषः दिशा
इत्यावृतं ॥ १३ ॥ कृत्स्नां तद्दिक्प्रदेशावच्छिन्नामिति शेषः ॥ १४ ॥ यदा पर्वणि यस्मिन्काले यस्मिन्क्षणे
तिथिभेदे क्षणे पर्व इत्यमरः ॥ १५ ॥ मानयंतः दिशा [illegible] इत्यर्थः ॥ १६ ॥ १७ ॥ महापद्मं तन्नामानं ॥ १८

आसमंजअसमंजपुत्र इतिसंबोधनं॥इजभावआर्षः॥९॥१०॥वाक्यंवक्तुमर्हः कालदेशोचितवक्तव्य
तत्वसैः॥ तदुचितवचनसमर्थश्चेत्यर्थः द्वितीयवाक्येकृत्यः सहयः आगतासीत्यभिचोदितश्चबोधित

दिशागजस्तेन्छ्रुत्वाप्रत्युवाचमहामतिः॥आसमंजकृतार्थस्त्वंसहाश्वःशीघ्रमेष्यसि॥९॥
तस्यतद्वचनंश्रुत्वासर्वानेवदिशोगजान्॥यथाक्रमंयथान्यायंप्रष्टुंसमुपचक्रमे॥१०॥तै
श्चसर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदैः॥पूजितःसहयश्चैवागंतासीत्यभिचोदितः॥११॥
तेषांतद्वचनंश्रुत्वाजगामलघुविक्रमः॥भस्मराशीकृतायत्रपितरस्तस्यसागराः॥१२॥
सदुःखवशमापन्नस्त्वसमंजसुतस्तदा॥चुक्रोशपरमार्त्तस्तुवधात्तेषांसुदुःखितः॥१३॥
यज्ञियंचहयंतत्रचरंतमविदूरतः॥ददर्शपुरुषव्याघ्रोदुःखशोकसमन्वितः॥१४॥स
तेषांराजपुत्राणांकर्तुकामोजलक्रियां॥सजलार्थीमहातेजानचापश्यज्जलाशयं॥१५॥
विसार्यनिपुणांदृष्टिंततोपश्यत्खगाधिपं॥पितृणांमातुलंरामसुपर्णमनिलोपमम्॥१६॥

श्च॥११॥यत्रपितरःसागराःभस्मराशीकृताःतत्रदेशेजगामेत्यन्वयः॥१२॥चुक्रोशभस्मीभूतपितृ
नितिशेषः॥१३॥१४॥१५॥विसार्यसंमतात्प्रसार्येत्यर्थः॥निपुणांदूरविवेचनसमर्थां॥पितृणांमा
तुलंसुपर्णभगिनीसुमतिभ्रातृकत्वात्॥अनिलोपमंवेगेनवायूपमं॥१६॥ ॥

127

३०॥इतिश्रीरामाभिरामेश्रीरा० रा० ति० बा० चत्वारिंशः सर्गः॥४०॥ चिरगतान् अपत्यागच्छतइतिशेषः न प्तारंपौत्रं॥१॥पूर्वैः पितृभिः गतिंवृत्तांतं येनचअश्वोपवाहितः देशांतरंप्रापितः तद्गतिंचअन्विच्छ

रोषेणमहताविष्टोहुंकारमकरोत्तदा॥ततस्तेनाप्रमेयेणकपिलेनमहात्मना॥भस्मराशीकृताः सर्वेकाकुत्स्थसगरात्मजाः॥३०॥इत्यार्षेश्रीरा० बा० चत्वारिंशः सर्गः॥४०॥पुत्रांश्चिरगता न्ज्ञात्वासगरोरघुनंदन॥नप्तारमब्रवीद्राजादीप्यमानंस्वतेजसा॥१॥शूरश्चकृतविद्य श्चपूर्वैस्तुल्योसितेजसा॥पितृणांगतिमन्विच्छयेनचाश्वोपवाहितः॥२॥अंतर्भौमानिस त्वानिवीर्यवंतिमहांतिच॥तेषांतुप्रतिघातार्थंसासिंगृह्णीष्वकार्मुकं॥३॥अभिवाद्याभि वाद्यांस्त्वंहत्वाविघ्नकरानपि॥सिद्धार्थःसन्निवर्तस्वममयज्ञस्यपारगः॥४॥एवमुक्तोंशु मान्सम्यक्सगरेणमहात्मना॥धनुरादायखड्गंचजगामलघुविक्रमः॥५॥सखातंपितृभिर्मा र्गमंतर्भौमंमहात्मभिः॥प्रापद्यतनरश्रेष्ठस्तेनराज्ञाभिचोदितः॥६॥देवदानवरक्षोभिःपिशा चपतगोरगैः॥पूज्यमानंमहातेजादिशागजमपश्यत॥७॥सतंप्रदक्षिणंकृत्वापृष्ट्वाचैव निरामयं॥पितॄन्सपरिपप्रच्छवाजिहर्तारमेवच॥८॥

अन्वेषय॥२॥अंतर्भौमानिभूमेरंतर्जाता निसत्वानिप्राणिनः॥३॥अभिवाद्यान्नमस्काराहान्॥ममयज्ञस्यपारगः पारप्रापकश्चभवेत्यर्थः॥४॥ ५॥पितृभिः खातंभूमेरंतर्विद्यमानंमार्गं॥ [illegible] प्राप्तः॥६॥७॥निरामयंकुशलं

अश्वंगृहीत्वानिर्गच्छनिर्वर्तयितुंसमापयितुं॥२१॥२२॥वृत्तंपितृव्यवृत्तं॰तथासुपर्णवचनंचयथातथान्यवेदयत॥
२३॥२४॥इष्टयज्ञइतिवृत्ति॥हि॰॥२५॥आगमेभूमावागमेनिश्चयंउपायविषयंनाध्यगच्छतेतितङार्षः॥२६॥

गंगामानयभद्रंतेदेवलोकान्महीतलं॥क्रियतांयदिशक्नोषिगंगायास्त्ववतारणं॥निर्गच्छाश्वंम
हाभागसंगृह्यपुरुषर्षभ॥यज्ञंपैतामहंवीरनिवर्तयितुमर्हसि॥२१॥सुपर्णवचनंश्रुत्वासोंशुमा
नतिवीर्यवान्॥त्वरितंहयमादायपुनरायान्महातपाः॥२२॥ततोराजानमासाद्यदीक्षितंरघुनंदन
न्यवेदयद्यथावृत्तंसुपर्णवचनंतथा॥२३॥तच्छ्रुत्वाघोरसंकाशंवाक्यमंशुमतोनृपः॥यज्ञंनिर्वर्त
यामासयथाकल्पंयथाविधि॥२४॥स्वपुरंत्वगमच्छ्रीमानिष्टयज्ञोमहीपतिः॥गंगायाश्चागमेरा
जानिश्चयंनाध्यगच्छत॥२५॥अगत्वानिश्चयंराजाकालेनमहतामहान्॥त्रिंशद्वर्षसहस्राणि॰
राज्यंकृत्वादिवंगतः॥२६॥इत्यार्षेश्रीरामायणेबालकांडेएकचत्वारिंशः सर्गः॥४१॥कालधर्मंग
तेरामसगरेप्रकृतीजनाः॥राजानंरोचयामासुरंशुमंतंसुधार्मिकं॥१॥सराजासुमहानासी
दंशुमानरघुनंदन॥तस्यपुत्रोमहानासीद्दिलीपइतिविश्रुतः॥२॥तस्मैराज्यंसमादिश्यदि
लीपेरघुनंदन॥हिमवच्छिखरेरम्येतपस्तेपेसुदारुणं॥३॥

इतिश्रीरामाभिरामेश्रीरामी
येरामायणतिलकेबालकांडेएकचत्वारिंशःसर्गः॥४१॥कालधर्मोमृत्युः॥प्रकृतीजनाःअमात्यवर्गादी
र्घःछांदसः॥रोचयामासुःन्यायप्राप्तत्वादेवाएच्छन्॥१॥२॥दिलीपेदिलीपाय॥तपस्तेपेपितृगतयेगंगा

लोकसंमतः लोकहितः एतन्मूलकतया सर्वलोकहितगंगयाभूलोके अवतारणात्॥१७॥ हि यस्मात्कपिलेनदग्धाः॥ यत
श्च महाबलाः महाबलत्वेन प्रायश्चित्तमर्यादातिक्रांतपापवंतोऽतो लौकिकं सलिलंदातुं नार्हसि· चंडालाद्यु
दकात् सर्पादिच्युतात्· ब्राह्मणादपि· दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणां· उदकं पिंडदानं च न तेषांतु वि
धीयते· इतिस्मृतेः॥ प्रकृते ब्राह्मणादग्धः महापापित्वं च॥१८॥१९॥ तर्हि देवलोकं गत्वा गंगोदकेन क्रिया
कार्येत्याह· भस्मेति· यदाप्लावयेत्॥ तदा गंगया क्लिन्नं सिक्तं इदं भस्म हे पुत्र षष्टिं सहस्राणि सागरान्

सचैनमब्रवीद्राजन्वैनतेयो महाबलः॥ माशुचः पुरुषव्याघ्र वधोयं लोकसम्मतः॥१७॥ कपिलेनाप्रमे
येन दग्धा हीमे महाबलाः॥ सलिलं नार्हसे प्राज्ञ दातुमेषां हि लौकिकं॥१८॥ गंगा हिमवतो ज्येष्ठा दुहि
ता पुरुषर्षभ॥ तस्यां कुरु महाबाहो पितॄणां सलिलक्रियां॥१९॥ भस्मराशीकृतानेताम्प्लावयेल्लोक
पावनी॥ तया क्लिन्नमिदं भस्म गंगया लोककांतया॥ षष्टिं पुत्रसहस्राणि स्वर्गलोकं गमिष्यति॥२०॥

स्वर्गलोकं गमिष्यति प्राप्स्यति प्लावयिष्यतीत्यर्थः॥ नयिष्यतीति पाठे नेष्यतीत्यर्थः अनेन सगरपुत्राणाम
न्यायुक्तप्रायश्चित्ताविषयत्वं सूचितं· तत्प्रायश्चित्तविषयाणामपि पापानां पुद्गलस्य गंगाजलस्पर्शः सर्वपाप
प्रायश्चित्तमिति सूचितं॥ अकृतप्रायश्चित्तानामपि महापातकिनामौर्ध्वदेहिकायोग्यानां गंगाजलस्पर्शपु
द्गलानं विना प्रायश्चित्तांतरं तत्काले एव सकलौर्ध्वदेहिकक्रियायोग्यत्वं च सूचितम्॥२०॥ ॥

पंचतपाः पंचाग्निमध्येतपोयस्य मासाहारः मासे गते आहारोयस्य॰ वर्षसहस्राणिअतीतानीत्यन्वयः॥१३॥ तस्यराज्ञः सुप्रीतइत्यन्वयः॥१४॥१५॥ तपसाचेति॰ चस्त्वर्थे॥१६॥१७॥ यद्यस्तीत्यादि॰ असंदिग्धेसंदिग्धवचनं

ऊर्ध्वबाहुः पंचतपामासाहारोजितेंद्रियः॥ तस्यवर्षसहस्राणिघोरेतपसितिष्ठतः॥१३॥ अतीतानिमहाबाहोतस्यराज्ञोमहात्मनः॥ सुप्रीतोभगवान्ब्रह्माप्रजानांप्रभुरीश्वरः॥१४॥ ततः सुरगणैः सार्धमुपागम्यपितामहः॥ भगीरथंमहात्मानंतप्यमानमथाब्रवीत्॥१५॥ भगीरथमहाराजप्रीतस्तेहंजनाधिप॥ तपसाचसुतप्तेनवरंवरयसुव्रत॥१६॥ तमुवाचमहातेजाः सर्वलोकपितामहं॥ भगीरथोमहाबाहुः कृतांजलिपुटः स्थितः॥१७॥ यदिमेभगवन्प्रीतः यद्यस्तितपसः फलं॥ सगरस्यात्मजाः सर्वेमत्तः सलिलमाप्नुयुः॥१८॥ गंगायाः सलिलक्लिन्नेभस्मन्येषांमहात्मनां॥ स्वर्गंगच्छेयुरत्यंतंसर्वेचप्रपितामहाः॥१९॥

वेदश्चेत्प्रमाणंस्युरितिवत्॰ सलिलंस्पर्शमात्रेणस्वर्गतिसाधनंसलिलं॥१८॥ अभीष्टोक्तगुणकसलिलप्राप्तिंदर्शयति॰ गंगायाइति एषांभस्मनिगंगायाः सलिलेनक्लिन्नेसति॰ एतेअत्यंतंअत्ययंयथाभवतितथास्वर्गंगच्छेयुर्नान्यथेत्यर्थः॥१९॥

४॥पितामहवधं·पितामहानांसागराणामपमृत्युं॥५॥निश्चयानधिगममभिनयति·कथमिति॥६॥धर्मेणवि
दितेति·धर्मेणप्रसिद्धइत्यर्थः॥७॥अकारयत्कृतवान्॥८॥व्याधिनापितॄणामुद्धरणालाभजन्यदुःखजे

द्वात्रिंशच्छतसाहस्रंवर्षाणिसुमहायशाः॥तपोवनगतोराजास्वर्गंलेभेतपोधनः॥४॥दिलीपस्तुम
हातेजाःश्रुत्वापैतामहंवधं॥दुःखोपहतयाबुध्यानिश्चयंनाध्यगच्छत॥५॥कथंगंगावतरणंकथं
तेषांजलक्रिया॥तारयेयंकथंचैतानितिचिंतापरोभवत्॥६॥तस्यचिंतयतोनित्यंधर्मेणवि
दितात्मनः॥पुत्रोभगीरथोनामजज्ञेपरमधार्मिकः॥७॥दिलीपस्तुमहातेजायज्ञैर्बहुभिरिष्ट
वान्॥त्रिंशद्वर्षसहस्राणिराजाराज्यमकारयत्॥८॥अगत्वानिश्चयंराजातेषामुद्धरणंप्रति
व्याधिनानरशार्दूलकालधर्ममुपेयिवान्॥९॥इंद्रलोकंगतोराजास्वार्जितेनैवकर्मणा॥राज्ये
भगीरथंपुत्रमभिषिच्यनरर्षभः॥१०॥भगीरथस्तुराजर्षिर्धार्मिकोरघुनंदन॥अनपत्योमहा
राजःप्रजाकामःसचाप्रजः॥११॥मंत्रिष्वाधायतद्राज्यंगंगावतरणेरतः॥तपोदीर्घंसमातिष्ठ
द्गोकर्णेरघुनंदन॥१२॥

तः।नाहल्लीपवंशजोरघुपुत्रकोदिलीपःकालिदासोक्तोऽन्यएवेतिबोध्यं
९॥१०॥सचाप्रजाइत्यस्यमंत्रिष्वाधायेइत्युत्तरेणान्वयः॥११॥प्रजास्तद्राज्यंचमंत्रिष्वाधायगंगावतर
णेकृतस्तपश्चानिश्चितः॥गोकर्णेहिमवत्पादविशेषः॥दक्षिणादिकस्थस्यतीर्थविशेषोवा॥१२॥

देवदेवेत्र्याजानामपिदेवानांदेवेपत्न्ये· अग्रगुह्याग्रेणानिपीडितां· समुपासतेत्यार्षंबहुवचनंसमुपास्तेत्य
र्थः उमापतिमितिशेषः॥१।२।३॥ तदासातीति· इश्वरेणाधारणांगीकारेकृते· गर्वादित्यर्थः॥४॥ शिवेशोभ

देवदेवेगतेतस्मिन्सोंगुष्ठाग्रनिपीडितां॥ कृत्वावसुमतीरामवत्सरंसमुपासत॥१॥ अथ
संवत्सरेपूर्णेसर्वलोकनमस्कृतः॥ उमापतिःपशुपतीराजानमिदमब्रवीत्॥२॥ प्रीतस्तेहं
नरश्रेष्ठकरिष्यामितवप्रियं॥ शिरसाधारयिष्यामिशैलराजसुतामहं॥३॥ ततोहैमवतीज्येष्ठा
सर्वलोकनमस्कृता॥ तदासातिमहद्रूपंकृत्वावेगंचदुःसहं॥४॥ आकाशादपतद्रामशिवे
शिवशिरस्युत॥ अचिंतयच्चसादेवीगंगापरमदुर्धरा॥५॥ विशाम्यहंहिपातालंस्रोतसागृ
ह्यशंकरं॥ तस्यावलेपनंज्ञात्वाक्रुद्धस्तुभगवान्हरः॥६॥ तिरोभावयितुंबुद्धिंचक्रेत्रि
नयनस्तदा॥ सातस्मिन्पतितापुण्यापुण्येरुद्रस्यमूर्धनि॥७॥ हिमवत्प्रतिमेरामजटा
मंडलगह्वरे॥ साकथंचिन्महींगंतुंनाशक्नोद्यत्नमास्थिता॥८॥ राम

नेतादृशरूपकरणेहेतुमाह· अचिंतयदित्यादि॥५॥ तस्यावलेपनमितिसंधिरार्षः॥ अवलेपनंस्वस्या
पिस्रोतसाअभिभवनचिंतनरूपंगर्वं॥६॥ तिरोभावयितुंजटामंडलेतिरोधानेन अभिभूतांकर्तुं॥७
जटामंडलेगह्वरेदुःप्रवेशेनिर्गमेयत्नमास्थितापिमहींगंतुंनाशक्नोदित्यन्वयः॥८॥

इक्ष्वाकूणां कुले जातस्य मम संततिर्देयायथा नः कुलं नावसीदेत् संतत्यै इति चतुर्थी प्रथमार्थे एष परो वरः द्वितीय
वर इत्यर्थः परे तु संतत्येतदर्थं नः कुलं नावसीदेदिति च याचे मत्कुले संततिः कोपि माभूदित्यर्थः ॥ उपसंह
रति इक्ष्वाकूणामिति तत्कुले जातस्य एष एव परो वरोस्तु नातोधिकं त्ततीयं वरांतरं याचे इत्यर्थः एतेन

देव याचेहं संतत्येनावसीदेत्कुलं च नः ॥ इक्ष्वाकूणां कुले देव एष मेस्तु वरः परः ॥ २० ॥ उक्तवाक्यं तु
राजानं सर्वलोकपितामहः ॥ प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षरां ॥ २१ ॥ मनोरथो महानेष भगी
रथ महारथ ॥ एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्द्धन ॥ २२ ॥ इयं हैमवती ज्येष्ठा गंगा हिमवतः सुता
तां वै धारयितुं राजन् हरस्तत्र नियुज्यतां ॥ २३ ॥ गंगायाः पतनं राजन् पृथिवी न सहिष्यते ॥ तां वै
धारयितुं राजन्नान्यं पश्यामि शूलिनः ॥ २४ ॥ तमेवमुक्त्वा राजानं गंगां चाभाष्य लोककृत् ॥ ज
गाम त्रिदिवं देवैः सर्वैः सह मरुद्गणैः ॥ २५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये बालकांडे द्विचत्वारिंशः स
र्गः ॥ ४२ ॥

पूर्वं परोपकारिता भगीरथस्य दर्शिनेत्याहुः ॥ २० ॥ २१ ॥ मनोरथः त्तावक इति शेषः ॥ २२ ॥ स्वसमीपे स्थि
तत्वादियमिति निर्देशः ॥ २३ ॥ हर नियोगे हेतुमाह गंगाया इति तां गंगां ॥ २४ ॥ गंगामाभाष्य राजानं
यथाकालमनुगृह्णीष्वेत्युक्त्वा देवै राजानजैः मरुद्गणैः कर्मदेवैः ॥ २५ ॥ इति श्रीरामाभिरामे श्री
रामीये रामायणतिलके बालकांडे द्विचत्वारिंशः सर्गः ॥ ४२ ॥ राम

राम·बा·
१३१

एतेनभगीरथस्यतपोहेतुकंत्रिपथगगमनमुक्तं अथचरितप्रश्नोत्तरमाह भगीरथोपीति॥१४॥अनुव्रजदित्यडभाव आर्षः॥१५॥तीव्रशब्दपुरस्कृतमित्यत्रहेतुर्गगनादित्यादिनाउक्तः शिशुमारः कच्छपाकारोजलचरविशेषः॥१६॥ १७॥गगनात् गांगतांरुद्रजटाकाशान्भुवमित्यर्थः विमानैरित्यादेश्चरंतइतिशेषः॥१८॥पारिप्लवगताः सं

सप्तमीचान्वगात्तांसांभगीरथरथंतदा॥भगीरथोपिराजर्षिर्दिव्यंस्यंदनमास्थितः॥१४॥प्रायाद ग्रेमहातेजागंगातंचाप्यनुव्रजत्॥गगनाच्छंकरशिरस्ततोधरणीमागता॥१५॥असर्पतजलंतत्र तीव्रशब्दपुरस्कृतं॥मत्स्यकच्छपसंघैश्चशिशुमारगणैस्तथा॥१६॥पतद्भिःपतितैश्चैवव्यरोचत वसुंधरा॥ततोदेवर्षिगंधर्वायक्षासिद्धगणास्तथा॥१७॥व्यलोकयंततेतत्रगगनाद्गांगतांतदा विमानैर्नगराकारैर्हयैर्गजवरैस्तदा॥१८॥पारिप्लवगताश्चापिदेवतास्तत्रविष्ठिताः॥तद द्भुतमिमंलोकेगंगावतरमुत्तमं॥१९॥दिदृक्षवोदेवगणाः समीयुरमितौजसः॥संपतद्भिःसु रगणैःतेषांचाभरणौजसा॥२०॥शतादित्यमिवाभातिगगनंगततोयदं॥शिंशुमारोरगगणैर्मी नैरपिरचंचलैः॥२१॥

भ्रमंगताःसंभ्रमंप्राप्ताइत्यर्थइत्येके॥पारिप्लवोयानभेदः॥शिविका दिरूपः शिविकादियानस्थाइत्यर्थइत्यन्ये॥१९॥देवगणावस्वादयःसंपतद्भिःआगच्छद्भिः॥२०॥ तन्मूलिकामुपमामाहशतादित्यमिवेति॥२१॥

राम·
१३१

राम

नैवेति॰ जटामंडलंभ्रांत्वाप्रांतमागत्यापि अतनतः तस्यांनभागतोपिनिर्गमनंलेभेप्रांतभागेपितन्मध्यत्वभ्रमस्यमायया भगवतोत्पादनात् यद्यपिब्रह्मैवमाययागंगाजलरूपमितिपुराणेतिहासादिषुप्रसिद्धं॰ तस्यचाहंममेत्यभिमानहीनस्यायमहंकारः॥ शिवस्यचतादृशस्यतत्पराभवाहंकारोत्पंतमनुचितंस्तथाप्यतादृशपागंगायाः प्रांतभागेमध्यत्वभ्रमोप्यत्यंतमनुचितः॥ अतएवोक्तमन्यत्रपरमात्माशिवोत्थन्यस्तस्मादस्याचजान्हवी। इतियः॥९॥

नैवंसानिर्गमंलेभेजटामंडलमंततः॥ तत्रैवाबंभ्रमद्देवीसंवत्सरगणान्बहून्॥९॥ नामपश्यत्पुनस्तंत्रतपःपरममास्थितः॥ सतेनतोषितश्चासीदत्यंतंरघुनंदन॥१०॥ विससर्जततोगंगांहरोबिंदुसरंप्रति॥ तस्यांविसृज्यमानायांसप्तस्रोतांसिजज्ञिरे॥११॥ ह्लादिनीपावनीचैवनलिनीचतथैवच॥ तिस्रःप्राचींदिशंजग्मुर्गंगाः शिवजलाःशुभाः॥१२॥ सुचक्षुश्चैवसीताचसिंधुश्चैवमहानदी॥ तिस्रश्चैतादिशंजग्मुःप्रतीचींतुदिशंशुभाः॥१३॥

वतेगंगांनसमेत्तस्यभाजनमिति॰ तथापिलीलामात्रत्वाददोषः। नशिवविष्णोः परस्परमुपास्योपासकभाववदितिवोध्यं॥ तर्हिकिंकृतवतीतत्राह तत्रैवेति॥ अबभ्रमत्॥ आर्षत्वात्सन्वदित्वंन॥९॥ अथतांजटाटवीतिरोहितांगंगांभगीरथः अपश्यत्॥ पुनश्चतत्रतत्प्राप्तिविषयेहरमुद्दिश्यपरमंतपआस्थितः॥ सहरःतेनतपसा॥१०॥ नतस्तुष्टःसन्हरः विंदुसरः॥ प्रतिहिमवत्स्थितब्रह्मनिर्मितसरोविशेषंप्रतिगंगांविससर्जेत्यन्वयः॥११॥१२॥१३॥

रामा॰बा॰
१३२

गतकल्मषः मुक्तशापाः अनेन ब्रह्मशापपरिहारोपि गंगास्नानफलमिति॰ कृतपापानां तज्जलस्पर्शोत्पाप नाशपूर्वकं स्वर्गप्राप्तिः कैमुतिकन्यायेनैव सिद्धेति बोध्यं ॥२८॥ मुदितः दर्शनमात्रेण ॥ मुमुदे स्नानपान

कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः ॥ धूतपापाः पुनस्तेन तोयेनाथ शुभान्विताः ॥२८॥ पुनराकाशमाविश्य स्वान्लोकान्प्रतिपेदिरे ॥ मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ॥२९॥ कृताभिषेको गंगायां बभूव गतकल्मषः ॥ भगीरथो हि राजर्षिर्दिव्यं स्पंदनमास्थितः ॥३०॥ प्रायादग्रे महाराजस्तं गंगा पृष्ठतोन्वगात् ॥ देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥३१॥ गंधर्वयक्षप्रवराः सकिन्नरमहोरगाः ॥ सर्पाश्चाप्सरसो राम भगीरथरथानुगाः ॥३२॥ गंगामन्वगमन्प्रीताः सर्वे जलचराश्च ये ॥ यतो भगीरथो राजा ततो गंगा यशस्विनी ॥३३॥ जगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी ॥ ततो हि यजमानस्य जन्होरद्भुतकर्मणः ॥३४॥ गंगा संप्लावयामास यज्ञवाटं महात्मनः ॥ तस्यावलेपनं ज्ञात्वा क्रुद्धो जन्हुश्च राघव ॥३५॥ अपिबच्च जलं सर्वं गंगायाः परमाद्भुतं ॥ ततो देवाः सगंधर्वाः ऋषयश्च सुविस्मिताः ॥३६॥

दिना ॥२९॥३०॥३१॥३२॥ भगीरथरथानुगाः संतो गंगामन्वगमन्नित्यन्वयः यतः येन मार्गेण ॥३३॥ अद्भुतकर्मणः वक्ष्यमाणगंगोपसंहाराभिप्रायमेतत् ॥३४॥ तस्यावलेपनं तस्या अवलेपनं गर्वमित्यर्थः ॥३५॥ अपिबत् अगस्त्यः समुद्रजलमिव॰ योगश

विक्षिप्तैः निरस्तैः विद्युच्छब्दः पुल्लिंगोपि एतन्मामाणपात् सलिलोत्पीडैः फेनैः सहस्राकारणं वा यद्वा द्युपाधितः ॥ आकाशमभवत् व्याप्तमितिशेषः ॥ २२ ॥ शारदाभ्रैरिवहंससंप्लवैर्हंससमूहैः संकीर्णं गगनं अभवत् इतिपूर्वेणान्वयः आयतं विस्तृतप्रवाहं ॥ २३ ॥ विनतं अग्रभागे अधोदेशे संकुचितं उद्धूतं पाषा

विद्युद्भिरिवविक्षिप्तैराकाशमभवत्तदा ॥ पांडुरैः सलिलोत्पीडैः कीर्यमाणैः सहस्रधा ॥ २२ ॥ शरदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः ॥ क्वचिद्द्रुततरं याति कुटिलं क्वचिदायतम् ॥ २३ ॥ विततं क्वचिदुद्धूतं क्वचिद्यातिशनैः शनैः ॥ सलिलेनैवसलिलं क्वचिदभ्याहतं पुनः ॥ २४ ॥ मुहुरूर्ध्वपथं गत्वा पपात वसुधां पुनः ॥ तच्छंकरशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ॥ २५ ॥ व्यरोचत तदातोयं निर्मलं गतकल्मषं ॥ तत्रर्षिगणगंधर्वा वसुधातलवासिनः ॥ २६ ॥ भवांगपतितं तोयं पवित्रमिति पस्पृशुः ॥ शापात्प्रपतिता ये च गगनाद्वसुधातलम् ॥ २७ ॥ ॥ ॥

णादियोगात् ॥ २४ ॥ मुहुरिति ऊर्ध्वपथगमने सलिलयोरभ्याघातो निमित्तं शंकरशिरसि भ्रष्टं ॥ २५ ॥ निर्मलं नैर्मल्यं प्राप्तं गुरुभ्रंशहृद्यं हेतुः गतकल्मषं स्वजलस्पर्शीवतां प्राणिनां नाशितपापं ॥ २६ ॥ भवांगं शिवमूर्ध्नि पस्पृशुः सस्नुः न केवलं पापसंहारमात्रं गंगायाः कृत्यमपि तु पुण्यलोकप्रापणमपीत्याह शापादित्यादि गगनात् उच्चस्थानात् ॥ २७ ॥

२ तारिताः प्रेतत्वात् देववत्स्वर्गं प्राप्ताश्च अनेन प्रेतत्वविमुक्तिः स्वर्गप्राप्ती भस्मनोपि गंगास्पर्शस्य फलं
किमुतास्थिपुद्गलादेरित्युक्तं ॥ ३ ॥ यावत्सागरस्य जलं तिष्ठास्यतीति तावद्दिवि स्थास्यंतीत्यर्थः तन्निमित्तम
पीतया गंगया तत्र खातस्य सागरस्य पूरणमिति भावः ॥ ४ ॥ ५ तत्कृतनामादि विश्रुतत्वमेव दर्शयति

भस्मन्यथाप्लुते राम गंगायाः सलिलेन वै ॥ सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ॥ २ ॥
तारिता नरशार्दूल दिवं याताश्च देववत् ॥ षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ॥ ३ ॥
सागरस्य जलं लोके यावत्स्थास्यति पार्थिव ॥ सगरस्यात्मजाः सर्वे दिवि स्थास्यंति देववत्
॥ ४ ॥ इयं च दुहिता ज्येष्ठा तव गंगा भविष्यति ॥ त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता ॥ ५ ॥
गंगा त्रिपथगा नाम दिव्या भागीरथीति च ॥ त्रीन्पथो भावयंतीति तस्मात्त्रिपथगा स्मृता ॥ ६ ॥
पितामहानां सर्वेषां त्वमत्र मनुजाधिप ॥ कुरुष्व सलिलं राजन्प्रतिज्ञामपवर्जय ॥ ७ ॥ पूर्व
केण हि ते राजंस्तेनातियशसा तदा ॥ धर्मिणां प्रवरेणाथ नैष प्राप्तो मनोरथः ॥ ८ ॥

गंगेत्यादि त्रिपथगेति नाम्नोऽन्वर्थकं दर्शयति त्रीनित्यादि अनेन कथं गंगा त्रिपथगेत्यस्य उत्तरं संव
त्तं ॥ ६ ॥ कुरुष्वेति गंगाजलसेकतः जातप्रायश्चित्तत्वात् सलिलदानयोग्यता संपत्तेः प्रतिज्ञां
सलिलप्रदानेन सागरांस्तारयेदित्येवं रूपां गरुत्मदुपदिष्टां अपवर्जय समाप्तां कुर्वित्य॥
र्थः ॥ ७ ॥ पूर्वकेण सगरेण एषः गंगालाभरूपः पूर्वकेति कप्रत्ययेनाणुषैव कुत्साद्योत्यते ॥ ८ ॥

पूजयंतिस्तोत्रादिनेतिशेषः अनुनयंतीतिपाठेशैलराजदुहितुःकथमन्यदुहितृत्वमितिविमतिवारणायगंगा
नुनयः॥३७॥तुष्टः गंगायाःदैवैःस्वदुहितृत्वप्रापणात् तस्मात्प्रयतःपीतां पुनरसृजत्तस्मादित्यर्थः॥३८॥
सागरंसगरसुतखातंसंप्राप्ता तत्प्रेरणायेतिशेषः द्वारत्वंतुनस्यागस्तेनपानोत्तरमित्यन्यत्रस्फुटं॥३६

पूजयंतिमहात्मानंजह्नुंपुरुषसत्तमं॥गंगांचापिनयंतिस्मदुहितृत्वेमहात्मनः॥३७॥ततस्तु
ष्टोमहातेजाःश्रोत्राभ्यामसृजत्प्रभुः॥तस्माज्जह्नुसुतागंगाप्रोच्यतेजाह्नवीतिच॥३८॥जगाम
चपुनर्गंगाभगीरथरथानुगा॥सागरंचापिसंप्राप्तासासरित्प्रवरातदा॥३९॥रसातलमुपागच्छ
त्सिध्यर्थंतस्यकर्मणः॥भगीरथोपिराजर्षिर्गंगामादाययत्नतः॥४०॥पितामहान्भस्मकृतानप
श्यद्गतचेतनः॥अथतद्भस्मनांराशिंगंगासलिलमुत्तमं॥४१॥प्लावयत्पूतपाप्मानःस्वर्गं
प्राप्तारघूत्तम॥४२॥इत्यार्षेश्रीरामायणेबालकांडेत्रिचत्वारिंशःसर्गः॥४३॥सगत्वासागरंरा
जागंगायानुगतस्तदा॥प्रविवेशतलंभूमेर्यत्रतेभस्मसात्कृताः॥१॥ राम

तस्यकर्मणः सिध्यर्थंभगीरथस्यस्ववंशोद्धारकर्मणःप्रयत्नतःप्रागुक्तयत्नैः॥४०॥भस्मसात्कृता
नः कपिलकोपाग्निनाभस्मभावंप्राप्तान्॥४१॥प्लावयसेचयतिस्म॥अतएवपूतपाप्मनः॥४२॥इ
तिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेबालकांडेत्रिचत्वारिंशःसर्गः॥४३॥उक्तमेवविस्त
रेणाह सगत्वेति॥भस्मसात्कृताः [illegible] यातात्तं॥१॥ ॥

सागराणांजातप्रायश्चित्तत्वसंदेहापनुत्तये गंगाजलसंबंधस्य सर्वपापप्रायश्चित्तत्वबोधनाय च पुनस्तेषां
सलिलकार्यमित्यादि पितामहानामित्यादि॰ स्वंलोकं ब्रह्मलोकं गम्यतां कृतोदकक्रियेणास्वपुरमिति शेषः
अयंनियोगो राजधर्मपरिपालनाय॥१५॥ यथा आगतमिति छेदः देवलोकं ब्रह्मलोकं॥१६॥ यथाक्रमं

पितामहानांसर्वेषांकुरुष्व सलिलक्रियां॥ स्वस्तिनेस्तु गमिष्यामि स्वंलोकंगम्यतांनृप॥१५॥ इत्येव
मुक्त्वा देवेशः सर्वलोकपितामहः॥ यथाऽगतंतथागच्छ द्देवलोकं महायशाः॥१६॥ भगीरथस्तु
राजर्षिः कृत्वासलिलमुत्तमं॥ यथाक्रमंयथान्यायंसागराणां महायशाः॥१७॥ कृतोदकः शु
चीराजा स्वपुरं प्रविवेशह॥ समृद्धार्थो नरश्रेष्ठ स्वराज्यं प्रशशासह॥१८॥ प्रमुमोदच लोकस्तं
नृपमासाद्य राघव॥ नष्टशोकः समृद्धार्थो वभूव विगतज्वरः॥१९॥ एष ते राम गंगाया विस्तरो
भिहितो मया॥ स्वस्ति प्राप्नुहि भद्रं ते संध्याकालोऽतिवर्तते॥२०॥ धन्यंयशस्यमायुष्यं पुत्र्यं
स्वर्ग्यमथापि च॥ यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च॥२१॥ प्रीयंते पितरस्तस्य प्रीयंते दे
वतानि च॥ इदमाख्यानमायुष्यं गंगावतरणं शुभं॥२२॥

ज्येष्ठक्रमेण यथान्यायं स्मृत्युक्तक्रमेण॰
उत्तमं लोकप्रापकं॥१७॥ कृतोदक इति॰ अन्येषामपीति शेषः॥१८॥ नष्टशोकः नष्टतद्वियोगजशो
कः विगतज्वरः कथमस्मत्पालनं भविष्यतीति विगतचिंतः॥१९॥ उपसंहरति॰ एष इति॰ स्वस्ति
भद्रयोः तत्प्रीत्यादरसूचनार्थं ग्रहणं॥२०॥ आख्यानश्रवणफलमाह॰ धन्यमित्यादि॥२१॥२२॥

गंगां नेतुं भूर्लोकं प्रापयितुं प्रार्थयता प्रतिज्ञान अपवर्जिनफलपर्यवसायिनी कृता ९ मतुल्येति ब्रह्मतुल्ये त्यर्थः १० गंगां नेतुं प्रार्थयता सा गंगा नेतुं न शकितेत्यर्थः यत्तु गंगामानेतुं न शकिता न विचारिता प्रतिज्ञेति शेषः चिंताविषयमपि न प्रापितेत्यर्थ इति तत्प्रार्थयतेति पदस्वरसविरोधाच्चिंत्यं ११ समतिक्रांता

तथैवांशुमता वत्स लोके प्रतिमतेजसा गंगां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ९ राजर्षिणा गुणवता महर्षिसमतेजसा मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च १० दिलीपेन महाभाग तव पित्रातितेजसा पुनर्न शकिता नेतुं गंगां प्रार्थयतानघ ११ सा त्वया समतिक्रांता प्रतिज्ञा पुरुषर्षभ प्राप्तोसि परमं लोके यशः परमसंमतं १२ तच्च गंगावतरणं त्वया कृतमरिंदम अनेन च भवान्प्राप्तो धर्मस्यायतनं महत् १३ प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते सलिले पुरुषश्रेष्ठ शुचिः पुण्यफलो भव १४ ॥ ॥

निस्तीर्णा परमसम्मितं परमश्रुत्कृष्टं च तत्संमतं सर्वलोकसंमतमित्यर्थः १२ धर्मस्यायतनं धर्मप्राप्यस्थानं महत् ब्रह्मलोकरूपं १३ यथास्याब्रह्मलोकप्रापकत्वं तदाह प्लावयस्वेति आत्मानं स्वदेहं सदोचिते सिंहकर्कटयोर्मध्येपि स्नानादिव्यवहारोचिते भूप्रवहनदीनामेव तत्काले भौमत्वम्लरजः स्नानायनर्हत्वं पुण्यफल इति मत्वर्थीयाजंतो बहुव्रीहिर्वा अनेन स्नानमात्रेण गंगा ब्रह्मलोकप्राप्ति

रामा॰बा॰
१३५

संपूज्यऋषिगणंतत्तीरस्थमितिशेषः॥९॥विशालांजगामपूर्वंदृष्टामितिशेषः।१०॥विशालांपप्रच्छविशालाविषयेप्रश्नंकृतवानित्यर्थः॥११॥विशालायांसंप्रतिवर्त्ततइतिशेषः।१२॥विशालायाःपुरातनमितिपाठःपुरातनंतत्पुरीनिर्मितःप्राक्तनंवृत्तांतंविशालस्येतिपाठेतन्नगरीनिर्मातराजाविशालोनाम॥

उत्तरंतीरमासाद्यसंपूज्यर्षिगणंततः॥गंगाकूलेनिविष्टास्तेविशालांददृशुःपुरीं॥९॥ततोमुनिवरस्तूर्णंजगामसहराघवः॥विशालांनगरींरम्यांदिव्यांस्वर्गोपमांतदा॥१०॥अथरामोमहाप्राज्ञोविश्वामित्रंमहामुनिं॥पप्रच्छप्रांजलिर्भूत्वाविशालामुत्तमांपुरीं॥११॥कतमोराजवंशोयंविशालायांमहामुने॥श्रोतुमिच्छामिभद्रंतेपरंकौतूहलंहिमे॥१२॥तस्यतद्वचनंश्रुत्वारामस्यमुनिपुंगवः॥आख्यातुंतत्समारेभेविशालस्यपुरातनं॥१३॥श्रूयतांरामशक्रस्यकथांकथयतःश्रुतां॥अस्मिन्देशेहियद्वृत्तंशृणुतत्त्वेनराघव॥१४॥पूर्वंकृतयुगेरामदितेःपुत्रामहाबलाः॥अदितेश्चमहाभागावीर्यवंतःसुधार्मिकाः॥१५॥ततस्तेषांनरव्याघ्रबुद्धिरासीन्महात्मनां॥अमराविजराश्चैवकथंस्यामोनिरामयाः॥१६॥

135

यद्वाविशालस्यविशालानगर्यधिष्ठानदेशस्येत्यर्थः॥१३॥शक्रस्यकथांविशालावैभवप्रतिपादकांकथांकथयतःसकाशात्मयाश्रुतांअस्मिन्देशेविशालानगर्यधिष्ठानदेशेयद्वृत्तंपुरातनंतद्विषयंतत्त्वेनशृण्वितियोजना॥१४॥सुधार्मिकाइत्यादितिपुत्रविशेषणं॥आसन्नितिशेषः॥१५॥अमराअमर

राम॰
१३५

२३॥इतिश्रीरामाभिरामेश्रीरा॰ रा॰ ति॰ वाल॰॥ चतुश्चत्वारिंशः सर्गः॥४४॥ अब्रवीत्तरामंतेइतिशेषः॥१॥ पूरणं
गंगायेतिशेषः॥२॥इमांतवकथांत्वदुक्तांकथांचिंतयतोममरामस्यरात्रिःक्षणभूतेवसंवृताअतीता॥एव

यःशृणोतिचकाकुत्स्थसर्वान्कामानवाप्नुयात्॥सर्वेपापाःप्रणश्यंतिआयुःकीर्तिश्चवर्धते॥२३॥इ
त्यार्षेश्रीरामायणेवालकांडेचतुश्चत्वारिंशःसर्गः॥४४॥विश्वामित्रवचःश्रुत्वाराघवःसहलक्ष्म
णः॥विस्मयंपरमंगत्वाविश्वामित्रमथाब्रवीत्॥१॥अत्यद्भुतमिदंब्रह्मन्कथितंपरमंत्वया॥
गंगावतरणंपुण्यंसागरस्यापिपूरणं॥२॥क्षणभूतेवनौरात्रिःसंवृत्तेयंपरंतप॥इमांचिंतयतः
सार्वानिखिलेनकथांतव॥३॥तस्यसाशर्वरीसर्वाममसौमित्रिणासह॥जगामचिंतयानस्य
विश्वामित्रकथांशुभां॥४॥ततःप्रभातेविमलेविश्वामित्रंतपोधनं॥उवाचराघवोवाक्यंकृता
ह्निकमरिंदमः॥५॥गताभगवतीरात्रिःश्रोतव्यंपरमाद्भुतं॥तरामसरितांश्रेष्ठांपुण्यांत्रिप
थगांनदीं॥६॥नौरेषाहिसुखास्तीर्णाऋषीणांपुण्यकर्मणां॥भगवंतमिहप्राप्तंज्ञात्वात्वरि
तमागता॥७॥तस्यतद्वचनंश्रुत्वाराघवस्यमहात्मनः॥संतारंकारयामाससर्षिसंघस्यकौशिकः॥८

माश्चर्यभूतात्वदुक्तागंगाकथेतिभावः॥३॥विश्वामित्रेतिसंबोधनंउक्तस्यैवार्थस्यआदरातिशयबोध
नायपुनरुपादानं॥४॥५॥भगवतीगंगाकथाश्रवणान्पुण्या॥६॥सुखास्तीर्णासुखंशुभंआस्तीर्णं
यस्यांसा त्वरितमागता [illegible]॥७॥कारयामासनाविकैरितिशेषः॥८॥

मंथानः पर्वतोत्तमः मंदरः ॥२७॥२८॥ कामरूपं कामरूपं ॥२९॥ शिखरे स्थितवान् जलाशयइत्यादौ स्थित्य र्थस्पतेर्दर्शनात् ॥३०॥ ममंथ पुरुषोत्तमः ॥ अनेन शक्तिवैचित्र्यं प्रकटीकृतं ॥३१॥ धन्वंतरिरुदतिष्ठ

ततो देवासुराः सर्वे ममंथू रघुनंदन ॥ प्रविवेशाथ पातालं मंथानः पर्वतोत्तमः ॥२७॥ ततो देवाः सगंधर्वास्तुष्टुवुर्मधुसूदनं ॥ त्वं गतिः सर्वभूतानां विशेषेणा दिवौकसां ॥२८॥ पालयास्मान्महाबाहो गिरिमुद्धर्तुमर्हसि ॥ इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः ॥२९॥ पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः ॥ पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः ॥३०॥ देवानां मध्यतः स्थित्वा ममंथ पुरुषोत्तमः ॥ अथ वर्षसहस्रेण आयुर्वेदमयः पुमान् ॥३१॥ उदतिष्ठत्सुधर्मात्मा सदंडः सकमंडलुः ॥ अथ धन्वंतरिर्नाम अप्सराश्च सुवर्चसः ॥३२॥ अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः ॥ उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन् ॥३३॥ षष्टिः कोट्यो भवंस्तासामप्सराणां सुवर्चसां ॥ असंख्येयास्तु काकुत्स्थ यास्तासां परिचारिकाः ॥३४॥

दित्यन्वयः ॥ अप्सरा इत्यार्षं उदतिष्ठन्नुकर्षः ॥३२॥ अप्सु क्षीररूपासु तस्मात् क्षीरोदसारभूतादित्यर्थः ॥३३॥ षष्टिः कोट्यः षष्टिकोटिसंख्याः प्रधाना अप्सरसामभवत् ॥ अपरिमितपरिचारिकोपेताः ॥ षष्टिकोट्यप्सरसो जाता इत्यर्थः ॥३४॥

136

रसं अमृतरूपं रसायनं ॥१७॥ योक्त्रं मथनरज्जं ॥१८॥ योक्त्रं सर्पः मथनरज्जुभूतः सर्पः वमं तद् इति पुंस्त्वमार्षं अतिअतिशयितं विषं ॥१९॥ उत्पपातेति ततः उत्पादिः शिलादशनादित्यर्थः दृष्टशिलाखंडा एवमहाविष

तेषां चिंतयतां तत्र बुद्धिरासीद्विपश्चितां ॥ क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै ॥१७॥ ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिं ॥ मंथानं मंदरं कृत्वा ममंथुरमितौजसः ॥१८॥ अथ वर्षसहस्रेण योक्त्रं सर्पशिरांसि च ॥ वमंतोति विषं तत्र ददंशुर्दशनैः शिलाः ॥१९॥ उत्पपाताग्निसंकाशं हालाहलमहाविषं ॥ तेन दग्धं जगत्सर्वं सदेवासुरमानुषं ॥२०॥ अथ देवा महादेवं शंकरं शरणार्थिनः ॥ जग्मुः पशुपतिं रुद्रं त्राहि त्राहीति तुष्टुवुः ॥२१॥ एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः प्रादुरासीत्ततोत्रैव शंखचक्रधरो हरिः ॥२२॥ उवाचैनं स्मितं कृत्वा रुद्रं शूलधरं हरिः ॥ दैवतैर्मथ्यमाने तु यत्पूर्वं समुपस्थितं ॥२३॥ तत्त्वदीयं सुरश्रेष्ठ सुराणामग्रतो हि यत् ॥ अग्रपूजामिह स्थित्वा गृहाणेदं विषं प्रभो ॥२४॥ इत्युक्त्वा च सुरश्रेष्ठस्तत्रैवांतरधीयत ॥ देवतानां भयं दृष्ट्वा श्रुत्वा वाक्यं तु शार्ङ्गिणः ॥२५॥ हालाहलं विषं घोरं संजग्राहामृतोपमं ॥ देवान्विसृज्य देवेशो जगाम भगवान्हरः ॥२६॥

रूपं भूत्वा उत्पपात ॥२०॥२१॥ प्रभुर्महादेवः ततः महादेवप्रादुर्भावानंतरं ॥२२॥ स्मितं कृत्वा छलेन विषदानात् स्मितं ॥२३॥ यत् यतो भवान् सुराणामग्रतः तेषां मध्ये श्रेष्ठ इत्यर्थः ॥२४॥ सुरश्रेष्ठः विष्णुः ॥२५॥ अमृतोपमं यथा भवति तथा संजग्राह हेतुना यः पूर्वं देवेषु मथनसहायतया स्थितोपि विषयानानंतरं तत्पीडयातां स्तप

सर्वपरस्परप्रहारेण देवासुरात्मकं क्षयं गतं क्षयप्रायं गतं॰ तदा दैत्या राक्षसैरेकत्वेन बलवत्त्वात्॰ माहारं
त्विति वुध्या मोहिनीकामममोहजननीं मायां मायामास्थाय तत्क्षणे शीघ्रं अमृतमहरत ४२ गता
भिमुखमिति संधिरार्षः ये सुरा असुरा वा मायामूर्त्या गृहीतामृतं विष्णुं अमृतं जिघृक्षया अभि
मुखं गताः प्राप्ताः ते सर्वे मूर्त्यंतरास्थानेन प्रभविष्णुना विष्णुना युद्धे संपिष्टाः ॥४३॥ दितेः पुत्रान्

यदा क्षयं गतं सर्वं तदा विष्णुर्महाबलः ॥ अमृतं सोऽहरत्तूर्णं मायामास्थाय मोहिनीं ॥४२॥ ये ग
ताभिमुखं विष्णुमक्षरं पुरुषोत्तमं ॥ संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना ॥४३॥ अदिते
रात्मजा वीरा दितेः पुत्रान्निजघ्निरे ॥ अस्मिन् घोरे महायुद्धे दैतेयादित्ययोर्भृशं ॥४४॥ निहत्य
दितिपुत्रांस्तु राज्यं प्राप्य पुरंदरः ॥ शशास मुदितो लोकान् सर्षिसंघान् सचारणान् ॥४५॥
इत्यार्षे श्रीरामायणे बालकांडे पंचचत्वारिंशः सर्गः ॥४५॥

निजघ्निरे॰ धार्मिकत्वात्॰ विष्णवनुग्र
हाच्च दैत्येयादित्ययोः सुरासुरवर्गयोः ॥४४॥ तु अर्थे राज्यमित्यनंतरं योऽस्यः राज्यममृतं च प्राप्ये
त्यर्थः ॥४५॥ अत्र ममंथुरमितौजस इति श्लोकानंतरं अथ वर्षेत्यादि॰ आयुर्वेदमयः पुमानित्यं
तत्र योदश श्लोकाः प्रक्षिप्ता इति बहवः अमृतप्रदानराहुशिरश्छेदाद्यवर्णनवत्त्वात्तालाहल्लो
त्पत्त्याद्यवर्णनमिति तदाशयः ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे पंचच

ताः अप्सरसः न प्रतिगृह्णंति ममैवेमाः नाम्यस्येति नांगीकुर्वंति। सर्वे देवा दानवाश्चेत्यर्थः। तासां विशिष्टपत्न्यनिरूपणेन एवं संमुग्धाकारतया स्थितत्वात्तासां विशिष्टप्रतिग्रहाभावः अत एव तासां साधारण्यं ३५ वारुणी सुराधिदेवतापरिग्रहं केनचित्साधारण्येनांगीकारं ३६ अदितिसुतांगीकारे हेतुर

नतास्मप्रतिगृह्णंति सर्वे तेदेवदानवाः। अप्रतिग्रहणादेवं ता वै साधारणाः स्मृताः ३५ वरुणस्य ततः कन्या वारुणी रघुनंदन। उत्पपात महाभागा मार्गमाणा परिग्रहं ३६ दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजां। अदितेस्तु सुता वीर जगृहुस्तामनिंदितां ३७ असुरास्तेन दैतेयाः सुरास्तेनादितेः सुताः। हृष्टाः प्रमुदिताश्चासन्वारुणीग्रहणात्सुराः ३८ उच्चैःश्रवा हयः श्रेष्ठो मणिरत्नं च कौस्तुभं। उदतिष्ठन्नरश्रेष्ठ तथैवामृतमुत्तमं ३९ अथ तस्य कृते राम महानासीत्कुलक्षयः। अदितेस्तु ततः पुत्रा दितिपुत्रानयोधयन् ४० एकतामगमन्सर्वे असुरा राक्षसैः सह। युद्धमासीन्महाघोरं वीर त्रैलोक्यमोहनं ४१

निंदितामिति। निषेधशास्त्रं तु मानुषविषयं। शास्त्रे देवतानामनधिकारात् ३७ असुराः सुरापरिग्रहराहित्यात्। सुराः सुरापरिग्रहसत्वात् ३८ ३९ तस्य अमृतस्य कृते ग्रहणनिमित्ते ४० कलहप्रवृत्त्यनंतरं असुरा राक्षसैः सह एकतां अगमन् बलसिध्यर्थमिति शेषः। वीरेति संबुद्धिः परमिति क्वचित्पाठः ४१

गुणसंपदा शुश्रूषोपयोगिगुणसंपदा॥९॥नामेवगुणसंपदमाह-अग्निमित्यादि॥१०॥पुत्रत्वाद्गात्रसं
वाहनादि-॥सर्वेषुकालेषु-तस्या अशुचित्वप्रतीतयेतिभावः ननुतद्वृत्तपुत्रत्रयमेषोदितेःक

तपस्तस्यांहिकुर्वत्यांपरिचर्यांचकारह॥सहस्राक्षोनरश्रेष्ठपरयागुणसंपदा॥९॥
अग्निंकुशान्काष्ठमपःफलंमूलंतथैवच॥न्यवेदयत्सहस्राक्षोयच्चान्यदपिकांक्षितं॥१०॥
गात्रसंवाहनैश्चैवश्रमापनयनैस्तथा॥शक्रःसर्वेषुकालेषुदितिंपरिचचारह॥११॥
पूर्णेवर्षसहस्रेसादशोनेरघुनंदन॥दितिःपरमसंहृष्टासहस्राक्षमथाब्रवीत्॥१२॥
तपश्चरंत्यावर्षाणिदशवीर्यवतांवर॥अवशिष्टानिभद्रंतेभ्रातरंद्रक्ष्यसेततः॥१३॥
यमहंत्वत्कृतेपुत्रतमाधास्येजयोत्सुकं॥त्रैलोक्यविजयंपुत्रसहभोक्ष्यसिविज्वरः॥१४॥
याचितेनसुरश्रेष्ठपित्रातवमहात्मना॥वरोवर्षसहस्रांतेममदत्तःसुतंप्रति॥१५॥

यंतत्परिचर्यागीकारइतिचेनदेवमाययैवेतिग्राह्यम्॥११॥दशोनेदशभिर्न्यूने॥१२॥१३॥हेपुत्रयंपुत्रं
अहंत्वत्कृतेत्वन्नाशार्थंयाचितवती-तंजयोत्सुकंआधास्येविगतवैरंभ्रातृस्नेहवंतमेवक-
रिष्येइत्यन्वयः॥त्रैलोक्यविजयंभ्रातृकृतंसहतेनभ्रात्रासह॥१४॥१५॥ ॥

139

किंततइत्यत्राह॥हतेष्वित्यादि॥मारीचंमरीचेरपत्यं॥१॥दीर्घेणात्तपसाऽर्जितं॥२॥ईश्वरंत्रैलोक्यनाथंईदृशमि
तिपाठांतरं॥तत्रईदृशमित्यस्यैवविवरणंशक्रहंतारमिति॥३॥४॥शुचिर्भवपुत्रोत्पत्तिंयावदितिशेषः॥५॥
पूर्णेवर्षसहस्रेत्विति॥जनयिष्यसीत्यनेनान्वयः॥शुचिर्यदिभविष्यसीतिवत्सरसहस्रमपीतिशेषः

हतेषुतेषुपुत्रेषुदितिःपरमदुःखिता॥मारीचंकश्यपंनामभर्तारमिदमब्रवीत्॥१॥हतपुत्रा
स्मिभगवंस्तवपुत्रैर्महाबलैः॥शक्रहंतारमिच्छामिपुत्रंदीर्घतपोर्जितं॥२॥साहंतपश्चरि
ष्यामिगर्भमेदातुमर्हसि॥ईश्वरंशक्रहंतारंत्वमनुज्ञातुमर्हसि॥३॥तस्यास्तद्वचनंश्रुत्वा
मारीचःकश्यपस्तदा॥प्रत्युवाचमहातेजादितिंपरमदुःखितां॥४॥एवंभवतुभद्रंतेशुचिर्भव
तपोधने॥जनयिष्यसिपुत्रंत्वंशक्रहंतारमाहवे॥५॥पूर्णेवर्षसहस्रेतुशुचिर्यदिभविष्यसि
पुत्रंत्रैलोक्यहंतारंमत्तस्त्वंजनयिष्यसि॥६॥एवमुक्त्वामहातेजाःपाणिनासंममार्जतां॥ता
मालभ्यततःस्वस्तीत्युक्त्वातपसेययौ॥७॥गतेतस्मिन्नरश्रेष्ठदितिःपरमहर्षिता॥कुश
प्लवंसमासाद्यतपस्तेपेसुदारुणम्॥८॥

त्रैलोक्यहंतारंतदधिपशक्रहंतारं॥६॥पाणिनासंम
मार्जनादृष्टपुत्रप्रतिबंधहेतुपापक्षयार्थमितिशेषः॥अथतांआलभ्यस्पृष्ट्वा॥स्वस्तिगर्भभद्रंतवास्तु
इत्युक्त्वासकश्यपः॥तपसेययाविति॥अन्वयः॥७॥कुशप्लवंविशालाख्यंपूर्वदेशस्थतपोवनम्॥८॥

शतपर्वणा शतकोटिना॥ अबुध्यत भिद्यमानगर्भस्य रुरोदशब्देनेत्यर्थः॥१९॥२०॥ नहंतव्यमिति॰ विभागे
पिप्राणा वियोजनंमाकुर्विति इत्यर्थः॥२१॥२२॥ तदंतरं छिद्रं॰ आहवे शक्रस्य मम हंतारं॥ अंकुरछेद

भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा॥ रुरोद सुस्वरं राम ततो दितिरबुध्यत॥१९॥ मा रुदो
मा रुदश्चेति गर्भं शक्रोऽभ्यभाषत॥ बिभेद च महातेजा रुदंतमपि वासवः॥२०॥ न हंतव्यं
न हंतव्यमित्येवं दितिरब्रवीत्॥ निष्पपात ततः शक्रो मातुर्वचनगौरवात्॥२१॥ प्रांजलिर्व
ज्रसहितो दितिं शक्रोऽभ्यभाषत॥ अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजाः॥२२॥ तदंतर
महं लब्ध्वा शक्रहंतारमाहवे॥ अभिदं सप्तधा देवि तन्मे त्वं क्षंतुमर्हसि॥२३॥ इत्यार्षे श्री
रामायणे वाल्मीकीये बालकांडे षट्चत्वारिंशः सर्गः॥४६॥ सप्तधा तु कृते गर्भे दितिः पर
मदुःखिता॥ सहस्राक्षं दुराधर्षं वाक्यं सानुनयाब्रवीत्॥१॥ ममापराधाद्गर्भोऽयं सप्तधा श
कली कृतः॥ नापराधो हि देवेश तवात्र बलसूदन॥२॥ राम

नन्याये नाभिदं॰ तन्मे अपराधकर्म त्वं क्षंतुमर्हसि॰ पूर्ववत निंसे वास्मत्वेति शेषः॥२३॥ इति श्रीरामा
भिरामे श्रीरामीये रामायणतिलके बालकांडे षट्चत्वारिंशः सर्गः॥४६॥ सप्तधात्विति॰ दुराध
र्षं॰ न्याय्योपायेन जेतुं त्वादिसाशयः॥१॥ ममापराधात् अशुचित्वरूपात्॥२॥ ॥

दिनेश्वरे सूर्ये मध्यं प्राप्ते सति शय्यायां शीर्षस्थाने पादौ कृत्वा दितिः निद्रयापहृता निद्रयापहृता गृहीतेत्यर्थः ॥ अनेन दिवास्वापरूपपापेन शय्यापदस्थाने मस्तककरणेन चाशुचित्वं सूचितं ॥ केचित्तु
पवित्रायाएवमकृतयापादपर्यंतं शिरःसंबंधेन शीर्षपादसंबंधः ॥ तेन ब्राह्मणस्याशुद्धस्पर्शइव
शिरसः पादस्पर्शे अशुचित्वं सूचितं ॥ तपसि स्थितायाः शय्यासंबंधाभावेन पूर्वव्याख्यायाअयुक्त
दित्याहुः परेतु ॥ भूशयनेपि दक्षिणपूर्वदिशोः शिरःस्थापनयोग्यतायाः स्मृतिप्रोक्तेः तद्वैपरीत्येन श

इत्युक्त्वा च दितिस्तत्र प्राप्ते मध्यं दिनेश्वरे ॥ निद्रयापहृता देवी पादौ कृत्वाश शीर्षतः ॥१६॥
दृष्ट्वा तामशुचिं शक्रः पादयोः कृतमूर्धजां ॥ शिरःस्थाने कृतौ पादौ जहास समुमोद च ॥१७॥
तस्याः शरीरविवरं प्रविवेश पुरंदरः ॥ गर्भं च सप्तधा राम चिच्छेद परमात्मवान् ॥१८॥

यनस्याशुचित्वसूचकत्वमस्त्येवेत्याहुः ॥१६॥ पादयोः तत्स्थापनदेशे कृतमूर्धजां मूर्धजसंबंधे मूर्ध
संबंधोपि जात एव ॥ अत एवाशुचिं तथा शिरःस्थाने तदा पादौ कृतावनस्तामशुचिं दृष्ट्वेत्यर्थः ॥ अ
त्रेकेनैवोमयलाभे उभयोपादानं स्पष्टार्थं वस्तुतो वक्रग्रीवतया वक्रपादतया वा शयने परस्प
रस्थानव्यत्ययाभावेन न तथा अशुचित्वमित्यत्यंताशुचित्वप्रतिपादनायोभयोपादानमिति बोध्यं ॥
मुमोद प्राप्तच्छिद्रत्वादिति भावः मोदवशादेव जहास च ॥१७॥ शरीरविवरं योनिविवरं आत्मवान् सावधान

वर्णितिं इच्चरितस्य प्रकृतशेषत्वमाह एष इति। सा एष इत्यन्वयः॥ १०॥ एवं प्रागुक्तरीत्या एवंभूते देशे विशालो
त्पत्तिप्रकारमाह इक्ष्वाकोस्त्विति॥ ११॥ विशालेति कृता आसीदित्यन्वयः॥ १२॥ कतरो त्र वंश इति प्रश्नस्य

जग्मतुस्त्रिदिवं रामकृतार्थाविति नः श्रुतं॥ एष देशः स काकुत्स्थ महेन्द्राध्युषितः पुरा॥ १०॥
दितिर्यत्र तपः सिद्धा मेवं परिचचार सः॥ इक्ष्वाकोस्तु नरव्याघ्र पुत्रः परमधार्मिकः॥ ११॥ अलं
बुसायामुत्पन्नो विशाल इति विश्रुतः॥ तेन चासीदिह स्थाने विशालेति पुरी कृता॥ १२॥ विशा
लस्य सुतो राम हेमचंद्रो महाबलः॥ सुचंद्र इति विख्यातो हेमचंद्रादनंतरः॥ १३॥ सुचंद्रतन
यो राम धूम्राश्व इति विश्रुतः॥ धूम्राश्वतनयश्चापि संजयः समपद्यत॥ १४॥ संजयस्य सुतः
श्रीमान्सहदेवः प्रतापवान्॥ कुशाश्वः सहदेवस्य पुत्रः परमधार्मिकः॥ १५॥ कुशाश्वस्य
महातेजाः सोमदत्तः प्रतापवान्॥ सोमदत्तस्य पुत्रस्तु काकुत्स्थ इति विश्रुतः॥ १६॥ तस्य पु
त्रो महातेजाः संप्रत्येष पुरीमिमां॥ आवसत्परमप्रख्यः सुमतिर्नाम दुर्जयः॥ १७॥ इक्ष्वा
कोस्तु प्रसादेन सर्वे वैशालिका नृपाः॥ दीर्घायुषो महात्मानो वीर्यवंतः सुधार्मिकाः॥ १८॥
इहाद्य रजनीमेकां सुखं स्वप्स्यामहे वयं॥ श्वः प्रभाते नरश्रेष्ठ जनकं द्रष्टुमर्हसि॥ १९॥

उत्तरमाह विशालस्येत्यादि॥ १३॥ १४॥ १५॥ १६॥ इमां पुरीं संप्रत्यावसतीत्यन्वयः॥ १७॥ वैशालिकाः वि
शालानिवासो येषां ते इत्यर्थः अनेन त्वत्समानवंश्यो यमिति सूचितं॥ १८॥ अत एवाह इहाद्येति॥ १९॥

गर्भविपर्ययेगर्भविपत्तौ॰यत्वयाकृतंकर्मतत्तचचममचयथाप्रियंभवनितथाइच्छामितु॰तत्प्रकारमाह॰
मारुतामिति॰॥सप्तानांमरुतांवातस्थानविशेषाणांसप्तइमेतेत्वदधीनाः स्थानपालालोकरक्षिणोभवंत्वित्य
न्वयः॥३॥तदर्थमेवइहेपुत्रकमारुताइतिनाम्नाप्रसिद्धाः दिव्यरूपाममपुत्राः येइमेवातस्कंधाइतिसप्त
प्रसिद्धाःतेषुचरंत्वित्यन्वयः॥४॥एकइति॰एकोगणइत्यर्थः॥प्रथमंसप्तधाविभक्तस्यपुनरेकशःसप्तधाकर

प्रियंत्वत्कृतमिच्छामिममगर्भविपर्यये॥मरुतांसप्तसप्तानांस्थानपालाभवंतुते॥३॥वातस्कंधाइ
मेसप्तचरंतुदिविपुत्रक॥मारुताइतिविख्यातादिव्यरूपाममात्मजाः॥४॥ब्रह्मलोकंचरत्वेकइंइ
लोकंतथापरः॥दिव्यवायुरितिख्यातस्ततीयोपिमहायशाः॥५॥चत्वारस्तुसुरश्रेष्ठदिशोवैतव
शासनात्॥संचरिष्यंतिभद्रंतेकालेनहिममात्मजाः॥६॥त्वत्कृतेनैवनाम्नावैमारुताइतिविश्रुताः॥
तस्यास्तद्वचनंश्रुत्वासहस्राक्षःपुरंदरः॥७॥उवाचप्रांजलिर्वाक्यमितीदंबलसूदनः॥सर्वमेत
द्यथोक्तंतेभविष्यतिनसंशयः॥८॥विचरिष्यंतिभद्रंतेदेवरूपास्तवात्मजाः॥एवंतौनिश्चयंकृत्वा
मातापुत्रौतपोवने॥९॥

एमित्यस्यार्थस्यपुराणांतरेस्पष्टमुक्तत्वात्॰इहापिविभेदचमहातेजाहृदं
तमपीत्यादिनाध्वनितत्वाच्चेतिबोध्यं॰एवमपरइत्याद्यपिव्याख्येयं॰॥इंद्रलोकमिति॰इंद्रलोकमितिप्र
चुरःपाठःदिव्यवायुःदिविअंतरिक्षेभवइत्यर्थः॥५॥दिशःपूर्वादिमहादिशः॥६॥त्वत्कृतेनमाहृदोमारु
दइतिवचनमूलेन॥७॥यथोक्तंब्रह्मादिस्थानपालकत्वं॥८॥मातापुत्रौदितीद्रौ॥९॥

भूषयंतौस्वतेजसेतिशेषः प्रमाणांशरीरोन्नत्यादि·इंगितंज्ञातराशयबोधकं चेष्टितंवचनगमनादि·तैस्ता
दृशपुरुषांतराभावात्परस्परसदृशौ ॥५॥ आदरातिशयात्पुनः ॥ किमर्थंचेत्यादि· दुर्गमेकांतारसंबंधात्
६॥ यथावत्तन्यवेदयत्· दशरथकुमारावस्मद्यज्ञविघ्ननिवारणायमदाकारणान्मदुपलालना

भूषयंताविमंदेशंचंद्रसूर्याविवांबरं ॥ परस्परेणसदृशौप्रमाणेंगितचेष्टितैः ॥ ५ ॥ किमर्थंच
नरश्रेष्ठौसंप्राप्तौदुर्गमेपथि ॥ वरायुधधरौवीरौश्रोतुमिच्छामितत्वतः ६ ॥ तस्यतद्वचनं
श्रुत्वायथावत्तन्यवेदयत् ॥ विश्वामित्रवचः श्रुत्वाराजापरमविस्मितः ॥ ७ ॥ अतिथीपरमं
प्राप्तौपुत्रौदशरथस्यतौ ॥ पूजयामासविधिवत्सत्कारार्हौमहाबलौ ॥ ८ ॥ ततःपरमस
त्कारंसुमतेःप्राप्यराघवौ ॥ उष्यतत्रनिशामेकांजग्मतुर्मिथिलांततः ॥ ९ ॥ तांदृष्ट्वामुनयः
सर्वेजनकस्यपुरींशुभां ॥ साधुसाध्वितिशंसंतोमिथिलांसमपूजयन् ॥ १० ॥ मिथिलोप
वनेतत्रआश्रमंदृश्यराघवः ॥ पुराणंनिर्जनंरम्यंपप्रच्छमुनिपुंगवम् ॥ ११ ॥

त्सिद्धाश्रमंप्राप्यतत्रविघ्नकर्तृराक्षसादीन्हत्वा· पथिताटिकांचहत्वाजनकदिदृक्षयाएतद्देशा
मागताविति न्यवेदयत् ॥ ७ ॥ परममत्यंतमादरणीयौप्राप्तावतिथीतौपूजयामासेत्यन्वयः ॥ ८ ॥ सु
मतेरितिपंचमी· उष्यउषित्वा आर्षमेतत् ॥ ९ ॥ पूजाप्रकारःसाधुसाध्वितिशंशसनम् ॥ १० ॥ मिथि
लोपवनेमिथिलासमीपवनेदृश्यदृष्ट्वा· पुराणमित्यादित्रयमाश्रमविशेषणं ॥ ११ ॥

२०॥२१॥ममम त्तइत्पर्थः॥२२॥इतिश्रीरामाभिरामे श्रीरा० रा० बाल० सप्तचत्वारिंशः सर्गः॥४७॥पृष्ट्वेति सुमतिर्नामविशालाराजा महामुनिं विश्वामित्रं कथांते विश्वामित्रेण कथ्यमानकथांते॥१॥गजसिंहगती गजवद्वीरमंदगती सिंहवद्दप्तनिहतगती यद्वा प्रभुत्वाद्व जगतीरामोऽन्यातिर्लक्ष्मणः तथाशार्दूलाकृती

सुमतिस्तु महातेजा विश्वामित्रमुपागतं॥श्रुत्वा नरवरश्रेष्ठः प्रत्यागच्छन्महायशाः॥२०॥पूजांच परमां कृत्वा सोपाध्यायः सबांधवः॥प्रांजलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवीत्॥२१॥धन्योस्म्यनुगृहीतोस्मि यस्य मे विषयं मुने॥संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मम॥२२॥इत्यार्षे श्रीरामायणे बालकांडे सप्तचत्वारिंशः सर्गः॥४७॥पृष्ट्वा तु कुशलं तत्र परस्परसमागमे॥कथांते सुमतिर्वाक्यं व्याजहार महामुनिं॥१॥इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ॥गजसिंहगती वीरौ शार्दूलवृषभोपमौ॥२॥पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ॥अश्विनाविव रूपेण समुपस्थितयौवनौ॥३॥यदृच्छयेव गां प्राप्तौ देवलोकादिवामरौ॥कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने॥४॥

रामो वृषभाकृतिर्लक्ष्मणः॥२॥पद्मपत्रविशालाक्षा वित्यनेन भाग्यसंपत्सूचिता वीरधर्मसूचकं खड्गत्यादि॥३॥यदृच्छयादेववशात् संपन्ननिमित्तविशेषेण यया कयाचित्त्वेच्छयेत्यर्थो वा देवलोकाद्गां भुवं प्राप्तौ अवतीर्णौ अमराविव स्थितौ किमर्थं किं वा प्रयोजनमुद्दिश्य कथं अतिसुकुमारचरणत्वात् केन प्रकारेण पद्भ्यामिह प्राप्तौ क स्यवा सुतौ इति शेषः॥४॥

सहस्राक्षंविज्ञाय॰ ऋतुकालंप्रतीक्षंतेनार्थिनइतिवचनात्॰ तपसाचाश्रमवर्त्तिसर्वप्राणिजातस्यशंका
भावाद्यगौतमस्वेषोयमिंद्रइतिज्ञात्वेत्यर्थः॰ देवराजकुतूहलात्॰ सममामभिलषतीतिकौतुकात्॰ दिव
रतिकौतुकाच्चेत्यर्थः॰ दुर्मेधा अहल्यातेनसहरत्यर्थं॰ मतिंचकारेत्यन्वयः॥१९॥ कृतार्थत्वाद्दशपुरुष
लाभात्प्राप्ततपःफल॥२०॥ शीघ्रगमनेहेतुर्ममअहल्यायाआत्मनइंद्रस्यचशापतोरक्षणं॰नद

मुनिवेषंसहस्राक्षंविज्ञायरघुनंदन॥मतिंचकारदुर्मेधादेवराजकुतूहलात्॥१९॥अथाब्र
वीत्सुरश्रेष्ठंकृतार्थेनांतरात्मना॥कृतार्थास्मिसुरश्रेष्ठगच्छशीघ्रमितःप्रभो॥२०॥आत्मानंमां
चदेवेशसर्वथारक्षगौतमात्॥इंद्रस्तुप्रहसन्वाक्यमहल्यामिदमब्रवीत्॥२१॥सुश्रोणिप
रितुष्टोस्मिगमिष्यामियथागतं॥एवंसंगम्यतुतदानिश्चक्रामोटजात्ततः॥२२॥ससंभ्रमात्वर
न्रामशंकितोगौतमंप्रति॥गौतमंसंददर्शाथप्रविशंतंमहामुनिं॥२३॥देवदानवदुर्धर्षंत
पोबलसमन्वितं॥तीर्थोदकपरिक्लिन्नंदीप्यमानमिवानलं॥२४॥गृहीतसमिधंतत्रसकुशंमु
निपुंगवं॥दृष्ट्वासुरपतिस्त्रस्तोविषण्णवदनोभवत्॥२५॥

हः॰ आत्मनमित्यादि॰ प्रहसन्निति॰ विशिष्ट
स्त्रीचरितेनप्रहासः॰ रक्षणस्यदुर्लभत्वाद्वागौतमतयोर्भंगस्यस्वेच्छस्यकरणेन अग्रिमशापादिभयम
ल्पमितिवा॥२१॥संगम्य अहल्ययासहेतिशेषः॥२२॥सइंद्रः॰ संभ्रमात्गौतमभयात्॰ त्वरन्निश्चक्रामेत्य
न्वयः॰ निर्गमसमयेगौतमंप्रतितदागमनंप्रतिशंकितश्चासीदितिशेषः॰ अथनिष्क्रमणासमनंतरमेव॥२३॥
२४॥२५॥

मुनिराहित्यादाश्रमवादस्याशक्यमतामाश्रमसंकाशमाश्रमवदवभासमानं अतइदं किन्नुतस्यैवविवरणं कस्यायंपूर्वः पूर्वस्वभूतः॥१२॥१३॥ अहल्यानुग्रहहेतुकालस्मृतिजसंतोषेहंतेतियस्यैतदाश्रमपदंभवति महात्मनः कोपाद्यथाशप्तंप्राप्तशापंतत्तेकथयिष्यामीत्यन्वयः॥१४॥ दिव्यसंकाशःसु

इदमाश्रमसंकाशंकिंन्विदंमुनिवर्जितं॥ श्रोतुमिच्छामिभगवन्कस्यायंपूर्वआश्रमः॥१२॥
तच्छ्रुत्वाराघवेणोक्तं वाक्यंवाक्यविशारदः॥ प्रत्युवाचमहातेजा विश्वामित्रोमहामुनिः॥१३॥
हंततेकथयिष्यामिशृणुतत्वेनराघव॥ यस्यैतदाश्रमपदंशप्तंकोपान्महात्मनः॥१४॥
गौतमस्यनरश्रेष्ठ पूर्वमासीन्महात्मनः॥ आश्रमोदिव्यसंकाशःसुरैरपिसुपूजितः॥१५॥
सचात्रतपआतिष्ठदहल्यासहितःपुरा॥ वर्षपूगान्यनेकानिराजपुत्रमहायशः॥१६॥
कदाचिद्दिवसेरामततोदूरगतेमुनौ॥ तस्यांतरंविदित्वाचसहस्राक्षःशचीपतिः॥ मुनिवेषधरोभूत्वा अहल्यामिदमब्रवीत्॥१७॥ ऋतुकालंप्रतीक्षंतेनार्थिनःसुसमाहिते॥ संगमंत्वहमिच्छामित्वयासहसुमध्यमे॥१८॥

मच्चाश्रमतुल्यः॥१५॥ अनेकानितिवर्षपूगानिअनेकवर्षसमूहान्॥१६॥ तस्य आश्रमस्य अंतरं मुनिसन्निधानरहितंकालं-शचीपतिरित्यनेनशचीतोपिसौंदर्यमहल्यायाध्वनितं॥ मुनिवेषधरःगौतमवेषधरः ममरूपंसमास्थायेतिवक्ष्यमाणत्वात्॥१७॥ ऋतुकालंशास्त्रोक्तरतिकालं-अर्थिनोरत्यर्थिनःसुसमाहितेसंगमोचितरूपप्रसाधन

शापांतमाह यदेति-घोरमित्यनेनमुनिरा हित्यसूचनं-॥ रामोयदात्रागमिष्यतितदात्रागमनकालेजाय
मानचरणविन्यासेनानायासतस्तत्पादस्पर्शात् पूता-व्यभिचारकृतपापनाशेनपवित्राभविष्यसि-
पावित्र्योणंचतपस्विनांदृश्याभविष्यसि॥३१ततोमत्सकाशंमत्सान्निध्यंप्राप्ता स्ववपुः पूर्ववत्सदृश्यंप्र
स्मनावृत्तंधारयिष्यसिप्राप्स्यसीत्यर्थः इतरत्स्पष्टं॥३२॥३३॥३४॥कतककारस्तु-यदात्वित्यादिशा

यदेतच्चवनंघोरंरामोदशरथात्मजः॥आगमिष्यतिदुर्धर्षस्तदापूताभविष्यसि॥३१॥ तस्यातिथ्ये
नदुर्वृत्तेलोभमोहविवर्जिता॥मत्सकाशंमुदायुक्तास्ववपुर्धारयिष्यसि॥३२॥एवमुक्त्वामहाते
जागौतमोदुष्टचारिणीं॥इममाश्रममुत्सृज्यसिद्धचारणसेविते॥३३॥हिमवच्छिखरेरम्येत
पस्तेपेमहातपाः॥३४॥इत्यार्षेश्रीरामायणेबालकांडेऽष्टचत्वारिंशः सर्गः॥४८॥अफलस्तु
ततःशक्रोदेवानग्निपुरोगमान्॥अब्रवीत्त्रस्तनयनःसिद्धगंधर्वचारणान्॥१॥कुर्वतातप
सोविघ्नंगौतमस्यमहात्मनः॥क्रोधमुत्पाद्यहिमयासुरकार्यमिदंकृतम्॥२॥

पांतप्रतिपादकंस्ववपुर्धारयिष्यसीत्यंतंश्लोकद्वयंप्रक्षिप्तमित्याह-एवमुक्तेसार्द्धश्लोकस्तु
प्रामाणिकएव-एवंद्वात्रिंशतश्लोकाएवात्रेत्याहुः-इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेबाल
कांडेऽष्टचत्वारिंशःसर्गः॥४८॥धर्मधुरंधरस्यापिशक्रस्याधर्मेप्रवृत्तौबीजंदर्शयितुमाह-अफलइति-
अवृषणइत्यर्थः-त्रस्तेति-त्रासेनस्वकारणंदैन्यंव्यंजयति॥१॥सुरकार्यमिति-अन्यथात्युग्रतपसासक

२६ ममगौतमस्परूतवानसिमद्भार्यामोगरूपमकार्यंतस्मात्त्वविफलः विगतदर्षणः ॥ २७ ॥ २८ ॥ २९ ॥ शापस्वरूपं वातभक्षेत्यादिः ॥ तप्यंती स्वकृताकार्यस्मरणेनपीडिता ॥ पुराणादिप्रसिद्धशिलारूपप्राप्तिः ॥ शापस्तुकल्पांतराण्इतिनविरोधः अत्रशिलारूपत्वेतात्पर्यंकल्पनेवातभक्षेत्यनेनविरोधः ॥ स्पष्टएवेतिकेचित्ः वस्तुतस्तु अदृश्येत्यस्यस्वरूपेणादृश्याशिलाप्रतिमारूपेणसर्वदृश्येत्यर्थः ॥ नचतावता

अथदृष्ट्वासहस्राक्षंमुनिवेषधरंमुनिः ॥ दुर्वृत्तंवृत्तसंपन्नोरोषाद्वचनमब्रवीत् ॥ २६ ॥ ममरूपंसमास्थायकृतवानसिदुर्मते ॥ अकर्तव्यमिदंयस्माद्विफलस्त्वंभविष्यसि ॥ २७ ॥ गौतमेनैवमुक्तस्तु सरोषेणमहात्मना ॥ पेततुर्वृषणौ भूमौसहस्राक्षस्यतत्क्षणात् ॥ २८ ॥ तथाशप्त्वाचवैशक्रं भार्यामपिचशप्तवान् ॥ इहवर्षसहस्राणि बहूनिनिवसिष्यसि ॥ २९ ॥ वातभक्षानिराहारातप्यंती भस्मशायिनी ॥ अदृश्यासर्वभूतानामाश्रमेस्मिन्वसिष्यसि ॥ ३० ॥

चैतन्यहानिरितिक्षुधादिपीडास्यादेवेत्यतोवातभक्षादतिरिक्ताहाराभावाच्च निराहारातप्यंतीस्वकर्मणेतिशेषः तादृश्यपिभस्मशायिनीनतुस्थिताइतिनकश्चिद्विरोधः ॥ इंद्रशापोप्युपलक्षणमत्र अनंतभगत्वशापस्यतदुक्तं पाद्मे शापदग्धापुत्रा रामश्रीरामशक्राप्रराधतः ॥ अहल्याख्याशिलाजज्ञेशतष्लिंगः ॥ कृतः स्वराडिति शिलाततप्रतिमाकारा शतशब्दोऽनंतवाची ॥ लिंगशब्देनभगाकारं चिह्नं स्वराट् इंद्रः ॥ ३० ॥

अफलान् षंढानन्तरं शरीरहितान्वा· यतस्तेषां फलैः फलाभ्यां वृषणाभ्यामिंद्रमयोजयन् ९ तदाप्रभृतिततो
हेतोः इंद्रो मेषवृषणः इत्यन्वयः ॥ तपसाप्रभावेन तपःकृतप्रभावेन च स्वापचारेण च ॥ १० ॥ महातेजः इति राम
संबोधनं· पुण्यकर्मणो गौतमस्य· ननु तादृशकाण्व घोररूपयाऽहल्ययाऽवष्टब्धमाश्रमं कथं गच्छेयमतः अ
ह· देवरूपिणीमिति· । शापस्यैतदवधिकत्वात्· । अद्य त्वत्पादस्पर्शनान्मुक्तशापतया देवरूपिणीमित्य

तदाप्रभृति काकुत्स्थ पितरो देवाः समागताः ॥ अफलान्भुंजते मेषान् फलैस्तेषामयोजयन् ॥ ९ ॥
इंद्रस्तु मेषवृषणस्तदाप्रभृति राघव ॥ गौतमस्य प्रभावेन तपसा च महात्मनः ॥ १० ॥ तदागच्छ
महातेजः आश्रमं पुण्यकर्मणः ॥ तारयैनां महाभागामहल्यां देवरूपिणीं ॥ ११ ॥ विश्वामित्रवचः
श्रुत्वा राघवः सहलक्ष्मणः ॥ विश्वामित्रं पुरस्कृत्य आश्रमं प्रविवेश ह ॥ १२ ॥ ददर्श च महाभा
गां तपसाद्योतितप्रभां ॥ लोकैरपि समागम्य दुर्निरीक्ष्यां सुरासुरैः ॥ १३ ॥

र्थः एनां तारय भर्तृप्रत्यापत्तिफ
लकमांनि ग्रंगृहीत्वा भर्तृप्रापणेनैनामनुगृहाण ॥ ११ ॥ १२ ॥ ददर्शेति· आश्रमप्रवेशकालेऽनयाऽसतः
स्वचरणस्पर्शात्· व्यभिचारकृतपापनाशेन शापनिवृत्त्या· शापवशात्· सुरासुरैः समागम्य मि
लित्वापि सर्वलोकैर्दुर्निरीक्ष्यां· विश्वामित्रो यथावत् देवरूपिणीमिति· । तथा ददर्शेत्यर्थः न दु
क्तं· तपसाद्योतितप्रभामिति· । एवं दर्शनं तत्समये रामलक्ष्मणविश्वामित्राणामेव· । सर्वदृश्यत्वं तु
भगवदातिथ्यकार्यमिति बोध्यं ॥ १३ ॥

साऽहल्या दुश्चारित्रेति निराकृता उक्तशापपर्यन्तं स्पष्टं । एवमपि सुरकार्यनिष्पत्तिः कथं तत्राह-शापेति-स्वस्मिन् गौत
मकर्तृकशापमोक्षणेनास्य तपो मयाऽपहृतं । महतः शापेन विना तपोऽव्ययमिति भाव तपोव्ययसंपादकक्रोधोत्पा
दनमेव कार्यं मया कृतमिति तात्पर्यं ॥३॥ सफलं मां सवृषणं सर्वे इत्यस्य चारद्वयं पाठे हे सर्वे सुरवराः सर्वे यू
यमित्यन्वयो ज्ञेयः परत्र यूयमित्येव पाठः प्रायेण ॥४॥ पितृदेवाः कव्यवाहनादयः तानुपेत्य कव्यवाहनाग्नि

अफलोऽस्मि कृतस्तेन क्रोधात्सा च निराकृता ॥ शापमोक्षेण महता तपोऽस्यापहृतं मया ॥३॥ तन्मां सुरवराः
सर्वे सर्षिसंघाः सचारणाः ॥ सुरकार्यकरं यूयं सफलं कर्तुमर्हथ ॥४॥ शतक्रतोर्वचः श्रुत्वा देवाः सा
ग्निपुरोगमाः ॥ पितृदेवानुपेत्याहुः सर्वे सह मरुद्गणैः ॥५॥ अयं मेषः सवृषणः शक्रो ह्यवृषणः कृतः
मेषस्य वृषणौ गृह्य शक्रायाशु प्रयच्छत ॥६॥ अफलस्तु कृतो मेषः परां तुष्टिं प्रदास्यति ॥ भवतां ह
र्षणार्थं च ये च दास्यन्ति मानवाः ॥ अक्षयं हि फलं तेषां यूयं दास्यथ पुष्कलं ॥७॥ अग्नेस्तु वचनं श्रु
त्वा पितृदेवाः समागताः ॥ उत्पाट्य मेषवृषणौ सहस्राक्षे न्यवेशयन् ॥८॥

मुखेनाहुः अग्नेस्तु वचनं श्रु
त्वेति वक्ष्यमाणत्वात् ॥५॥ अयं मेषः यो भवतां हविश्छेदनकल्पितः गृह्य गृहीत्वा ॥६॥ अफलस्त्विति-नन्वि
दमयुक्तं-न हि मेषाश्च वृषणादर्शनं तद्दृश्यते-भवद्देशेन कृतो हविश्छेदनकल्पितो योऽफलः षण्ढो मे
षः । यद्वा-वृषणाभिन्नो यो मेषो मेषावयवो भवद्धविश्छेदनकल्पितः स भवतां परां तुष्टिं दास्यतीत्यन्वयात्
ये वा फलं मेषं भवतां हर्षणार्थं तोषाय भवद्भ्यो दास्यन्ति तेषामक्षयं फलं । यूयं दास्यथेत्यन्वयः ॥७॥ समागताः मिलि

तोमुनिरब्रवीत्. शिलातन्मंत्रि माकारासोपि रामः सुविस्मितः ॥ स एवासीन्न तथाभूतं तं दृष्ट्वा मुनिर
वददित्यर्थः शापदग्धा पुरा भर्त्रा रामशक्रापराधतः ॥ अहल्याख्या शिला जज्ञे शतलिंगीकृतः स्वव
राट् ॥ त्वदंघ्रिस्पर्शनात्तस्याः शापं प्राह गौतमः ॥ तस्मादियं ते पादाब्जस्पर्शाच्छुद्धा भवत्प्रभोऽइ
ति । यदुद्धारार्थं त्वं मयेहानीतः ॥ सैषेवेति शेषः एवं मदुक्तरीत्या सर्वेषाम विरोधे संभवति ।
कल्पांतरपरत्वेनाविरोधवर्णनं कतकाद्युक्तं चिंत्यं । यदपि नेनधूमेनेत्यादि सार्धश्लोकेता मि
व दुर्निरीक्ष्यामिति शेषं पूरयित्वा दुर्निरीक्ष्यत्वे हेतुमाह । साहीति । ते षां दर्शनमित्यत्र तेषां
त्रयाणां लोकानामिति व्याख्यातं । तदपि क्लिष्टं ॥१७॥ तदास्य पदस्पर्शमात्रेण शिलारूपतापरि
त्यागे गौतमवचः स्मरंती ॥ मदाश्रमप्राप्तराघवं पूजया पुनर्मत्संबंध इत्येवं तद्वचः ॥ स्म
रंतीत्यर्थः ॥ स्वस्य शिलारूपपरित्यागमात्रेण तु तस्मिन् रामत्वनिश्चयोऽस्याः । तौ रामपादौ
प्रतिजग्राह स्पृष्ट्वा प्रणनाम ॥ यत्तु तौ रामलक्ष्मणौ प्रतिजग्राहेति ॥ पूज्यत्वबुद्धिमकरो
दितितन्नः ॥ अग्रेकाकुत्स्थ इत्येकवचनप्रयोगात् ॥१८॥

राम

प्रयत्नादित्यादिना दिव्यरूपत्वमुक्तं ॥१४॥ रामादेरपि दर्शनं नात्यंतस्य सत्तया किं त्वेवंरूपेण भर्तृसंतोष
करस्य भर्तृसान्निध्य शापांतकरणस्वाभावादित्याह। धूमेनेति। धूमेनाभिपरीतानि व्याप्तान्यंगानि य
स्याः सा। उपमात्रयं। भस्मावृतत्वेन अंभसः लक्षणायातद्युक्तमेघस्य मध्यस्थार्कविप्रभामिव ददर्श।
दुराधर्षा। स्प्रष्टुमशक्या ॥१५॥ तस्या दर्शने हेतुमाह। साहीति। त्रयाणामपि लोकानां दुर्निरीक्ष्यत्ववशा

प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव ॥ धूमेनाभिपरीतांगीं दीप्तामग्निशिखामिव ॥१४॥
सतुषारावृतां साभ्रां पूर्णचंद्रप्रभामिव ॥ मध्येंभसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥१५॥ सा
हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ॥ त्रयाणामपि लोकानां यावद्रामस्य दर्शनं ॥१६॥ शापस्यांत
मुपागम्य तेषां दर्शनमागता ॥१७॥ राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा ॥ स्मरंती गौतम
वचः प्रतिजग्राह सा हि तौ ॥१८॥

पवशाद्रामादीनामप्येवं दर्शनविषया जाता। अन्येषां त्वदृश्यैव। रामादीनां तु दुःखदृश्येत्यर्थः ॥१६॥
शापस्यांतं। तदंतस्यावधिकालं प्राप्य। तेषां रामादीनां दर्शनपूर्वोक्तप्रकारेण दर्शनविषयत्वं प्रा
प्तेत्यर्थः ॥ तथा च पाद्मे। ॥ गच्छतस्तस्य रामस्य पादस्पर्शान्महाशिला। काचिद्योषा भवत्सा पि विस्मि

बहूनीतिदृश्यंतइतिशेषः॥३॥शाकटीशतं अग्निहोत्रसंभारवाहकं ऋषिवाटाः यज्ञार्थमागतानांसाग्निहोत्र
ऋषीणांनिवासाः एवंनैविद्यात्स्वावासदेशविचारः देशइत्यादि देशोनिवासस्थानंविधीयतांविचार्यतां॥४॥
विविक्तेसलिलान्वितेइत्यनेनानुष्ठानसौकर्यं॥५॥६॥ऋत्विजोपीत्यत्रपुरस्कृत्येत्यनुकर्षः महात्मानं

बहूनीहसहस्राणिनानादेशनिवासिनां॥ब्राह्मणानांमहाभागवेदाध्ययनशालिनां॥३॥ऋ
षिवाटाश्चदृश्यंतेशकटीशतसंकुलाः॥देशोविधीयतांब्रह्मन्यत्रवत्स्यामहेवयं॥४॥राम
स्यवचनंश्रुत्वाविश्वामित्रोमहामुनिः॥निवासमकरोद्देशेविविक्तेसलिलान्विते॥५॥विश्वा
मित्रमनुप्राप्तंश्रुत्वानृपवरस्तदा॥शतानंदंपुरस्कृत्यपुरोहितमनिंदितः॥६॥ऋत्विजोपि
महात्मानस्त्वर्घ्यमादायसत्वरं॥प्रत्युज्जगामसहसाविनयेनसमन्वितः॥७॥विश्वामित्रा
यधर्मेणाददौधर्मपुरस्कृतं॥प्रतिगृह्यतुतांपूजांजनकस्यमहात्मनः॥८॥पप्रच्छकुशलं
राज्ञोयज्ञस्यचनिरामयं॥सतांश्चाथमुनीन्पृष्ट्वासोपाध्यायपुरोधसः॥९॥

इतिद्वितीयार्थेल्यप्प्रत्ययेनप्रथमा॥७॥धर्मेणशास्त्रमार्गेणाददौअर्घ्यमितिशेषः धर्मपुरस्कृतमित्य
र्घ्यविशेषणं महाजंवामहोक्षंवाश्रोत्रियायोपकल्पयेदितिशास्त्रोक्तेनधर्मसाधनेनपुरस्कृतं
तत्सहितमितियावत्॥८॥राज्ञः कुशलंनिरामयंयज्ञस्यनिरामयंकुशलंनिर्विघ्नत्वमविकलत्वं
वायज्ञस्यकुशलंसविश्वामित्रःतान्॥अर्घ्यदातॄन्पृष्ट्वाकुशलमितियावत्॥९॥

सुसमाहिता अप्रमत्ता काकुत्स्थो रामः तस्यैव मुख्यतया पूजनात् ॥१९॥ देवदुंदुभिनिःस्वनैः सहपुष्प
वृष्टिरासीत् रामस्य अहल्यायाश्चेत्यर्थः ॥२०॥ रामपूजया निष्पापत्वादहल्यायाः पूजा तपोबलविशु
द्धांगी तद्वल्लक्ष्य रामस्पर्शेन शुद्धांगी अत एव गौतमस्य वशां तद्गतचित्ता अत एव पूर्वं परत्र का

पाद्यमर्घ्यं तथातिथ्यं चकार सुसमाहिता ॥ प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा ॥१९॥ पुष्पव
ष्टिर्महत्यासीद्देवदुंदुभिनिःस्वनैः ॥ गंधर्वाप्सरसां चैव महानासीत्समुत्सवः ॥२०॥ साधुसाध्विति
देवास्तामहल्यां समपूजयन् ॥ तपोबलविशुद्धांगीं गौतमस्य वशानुगां ॥२१॥ गौतमोपि महाते
जा अहल्यासहितः सुखी ॥ रामं संपूज्य विधिवत्तपस्तेपे महातपाः ॥२२॥ रामोपि परमां पूजां गौ
तमस्य महामुनेः ॥ सकाशाद्विधिवत्प्राप्य जगाम मिथिलां ततः ॥२३॥ इत्यार्षे श्रीरामायणे वा
ल्मीकीये बालकांडे एकोनपंचाशः सर्गः ॥४९॥ ततः प्रागुत्तरां गत्वा रामः सौमित्रिणा सह ॥ वि
श्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् ॥१॥ रामस्तु मुनिशार्दुलमुवाच सहलक्ष्मणः ॥ सा
ध्वी यज्ञसमृद्धिर्हि जनकस्य महात्मनः ॥२॥

व ५

त्वेशरीरेणापितदनुगां ॥२१॥ अहल्यासहितः सु
खीत्यनेनयोगबलाद्रामागमनं ज्ञात्वा तद्वलदेवज्ञटिति तदाश्रमप्राप्तिर्गौतमस्य बोधितं ॥२२॥
॥२३॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे एकोनपंचाशः सर्गः ॥४९॥ प्रागुत्तरां

ततः गौतमाश्रमात्

रामा-बा-
१४७

पद्भ्यांवाहनरहिताभ्यां॥पद्मपत्रकोमलत्वात्कथमेतद्दूरंप्राप्ताविति विस्मयः॥किमर्थमितिप्रयोजनप्रश्नः कस्यवेतिपुत्राविति शेषः उत्तरश्लोकोयदि प्रमाणांतेत्थंस्पेवविवरणांबोध्यं केचित्तुकस्येत्यस्यपुरुषस्यकार्यंसाधयितुमिति शेषः माहुः तन्नप्रयोजनप्रश्नेनेवगतार्थं॥१९॥२०॥२१॥निवेदयदितिपाठः

यदृच्छयेवगांप्राप्तौदेवलोकादिवामरौ॥कथंपद्भ्यामिहप्राप्तौ किमर्थंकस्यवामुने॥१९॥वरायुधधरौवीरौकस्यपुत्रौमहामुने॥भूषयंतामिमंदेशंचंद्रसूर्याविवांबरं॥२०॥परस्परस्यसदृशौप्रमाणेंगितचेष्टितैः॥काकपक्षधरौवीरौश्रोतुमिच्छामितत्वतः॥२१॥तस्यतद्वचनंश्रुत्वाजनकस्यमहात्मनः॥निवेदयदमेयात्मापुत्रौदशरथस्यतौ॥२२॥सिद्धाश्रमनिवासंचराक्षसानांवधंतथा॥तत्रागमनमव्यग्रंविशालायाश्चदर्शनं॥२३॥अहल्यादर्शनंचैवगौतमेनसमागमं॥महाधनुषिजिज्ञासांकर्तुमागमनंतथा॥२४॥एतत्सर्वंमहातेजाजनकाय महात्मने॥निवेद्यविररामाथविश्वामित्रोमहामुनिः॥२५॥इत्यार्षेश्रीरा॰वाल॰पंचाशःसर्गः॥५०॥

147

ड भावश्चार्षः॥२२॥तत्रअव्यग्रमागमनंरक्षःसमाक्रांतेपिमार्गेभयरहितमागमनं॥२३॥महाधनुषिजिज्ञासांतद्विषयांरामस्यदिदृक्षां ज्ञानमिहदर्शनरूपं यद्वाधनुर्निष्ठसारजिज्ञासां तथादृष्ट्वास्यतस्यसज्जीकरणादिकंचकर्तुमागमनमित्येतत्सर्वंनिवेद्यविरराम तदेतिपाठेर्थश्चित्यः॥२४॥२५॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेवालकांडेपंचाशःसर्गः॥५०॥

राम
१४७

यथार्हं यथान्यायं प्रत्युद्ययुः प्रहर्षवत् तोषसहितं यथा भवति तथेत्यर्थः समागच्छत संतोषसहितमालिंगनं यथा भवति तथा सर्वैः संगतो बभूवेत्यर्थः ॥१०॥११॥१२॥ यज्ञसमृद्धिरंगवैकल्यराहित्यं साद्गुण्यं च॥

यथार्हमृषिभिः सर्वैः समागच्छत्प्रहृष्टवत् ॥ अथ राजा मुनिश्रेष्ठं कृतांजलिरभाषत ॥१०॥ आसने भगवानास्तां सहैभिर्मुनिपुंगवैः ॥ जनकस्य वचः श्रुत्वा निषसाद महामुनिः ॥११॥ पुरोधा ऋत्विजश्चैव राजा च सह मंत्रिभिः ॥ आसनेषु यथान्यायमुपविष्टाः समंततः ॥१२॥ दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् ॥ अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ॥१३॥ अद्य यज्ञफलं प्राप्तं भगवद्दर्शनान्मया ॥ धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुंगव ॥१४॥ यज्ञोपसदनं ब्रह्मन्प्राप्तोसि मुनिभिः सह ॥ द्वादशाहं तु ब्रह्मर्षे दीक्षामाहुर्मनस्विनः ॥१५॥ ततो भागार्थिनो देवान् द्रष्टुमर्हसि कौशिक ॥ इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवदनस्तदा ॥१६॥ पुनस्तं परिपप्रच्छ प्रांजलिः प्रयतो नृपः ॥ इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥१७॥ गजतुल्यगती वीरौ शार्दूलवृषभोपमौ ॥ अश्विनाविव रूपेण समुपस्थितयौवनौ ॥१८॥

अत एव सफला कृता इष्टिरिति शेषः ॥१३॥
१४॥ तत्र हेतुमाह यज्ञोपसदनमिति यज्ञस्थानं द्वादशाहं द्वादश दिनानि दीक्षां कर्त्तव्यत्वेनाहुः दीक्षायास्तावंति दिनान्यवशिष्टानि ऋत्विज आहुः ॥१५॥ विश्वामित्रस्य योगेन सर्वसामर्थ्यादाह देवान्द्रष्टुमर्हसीति ॥१६॥ इमौ कुमाराविति [illegible] ॥१७॥१८॥

महातेजारामः मद्गुरोः सकाशात्पूजां प्राप्य इह हयज्ञभूमावागत इति पृष्टस्यैवार्थस्य भंग्यंतरेण प्रश्नः ॥८॥ शांते
न मनसा उपलक्षितो मे गुरुरिहागतेन गौतमाश्रमे आगतेन गौतम पूजितेन रामेणाभिवादितः न तु म
न्मातृदोषात्तिरस्कृत इति प्रश्नांतरं पूजांगीकार वदने अतिरस्कार चिन्हमिति भावः ॥९॥१०॥ यत्कर्त्त

अपि मे गुरुणा रामः पूजितः कुशिकात्मज ॥ इहागतो महातेजाः पूजां प्राप्य महात्मनः ॥८॥ अ
पि शांतेन मनसा गुरुर्मे कुशिकात्मज ॥ इहागतेन रामेण पूजितेनाभिवादितः ॥९॥ तच्छ्रुत्वा
वचनं तस्य विश्वामित्रो महामुनिः ॥ प्रत्युवाच शतानंदं वाक्यज्ञो वाक्यकोविदं ॥१०॥ नातिक्रांतं
मुनिश्रेष्ठ यत्कर्तव्यं कृतं मया ॥ संगता मुनिना पत्नी भार्गवेणेव रेणुका ॥११॥ तच्छ्रुत्वा वचनं त
स्य विश्वामित्रस्य धीमतः ॥ शतानंदो महातेजा रामं वचनमब्रवीत् ॥१२॥ स्वागतं ते नरश्रेष्ठ दि
ष्ट्या प्राप्तोसि राघव ॥ विश्वामित्रं पुरस्कृत्य महर्षिमपराजितं ॥१३॥ अचिंत्यकर्मा तपसा ब्र
ह्मर्षिरमितप्रभः ॥ विश्वामित्रो महातेजा वेत्स्येनं परमां गतिं ॥१४॥

140

व्यं तन्नातिक्रांतं न विस्मृतं किं
तु मया कृतमेवेत्यर्थः भार्गवो जमदग्निः तत्कोपहता रेणुका परशुराममाता यथा जमदग्निना संगता
तात इदित्यर्थः ॥११॥१२॥ दिष्ट्या भाग्येन ॥१३॥ विश्वामित्र यत्न एव तेन सह प्राप्तिस्तत एव च मातुः शापो
द्धार इति तं स्तौति अचिंत्येत्यादिना मनसाप्यन्येनाशक्यचिंतनमतिसृष्ट्यादिकर्ता परमां गतिं जग

तस्येति·हृष्टरोमास्वमातुःशापोद्धारश्रवणाज्जसंतोषेणजातरोमांचः॥१॥परंविस्मयमिति·भगवद्दर्शनस्य
त्यासुलभत्वात्॥२॥निषण्णावासने॥३॥उक्तमप्यर्थमुत्कंठातिशयेनःपृच्छति·दार्शीय·अपितेइति·अपिः
प्रश्ने·तेत्वया॥४॥रामेरामविषये·पूजार्हेइति·रामविशेषणं॥५॥दैवेनइंद्रेणादुरनुष्ठितंगौतमवेषधा

तस्यतद्वचनंश्रुत्वाविश्वामित्रस्यधीमतः।हृष्टरोमामहातेजाःशतानंदोमहातपाः॥१॥गौतम
स्यसुतोज्येष्ठस्तपसाद्योतितप्रभः॥रामसंदर्शनादेवपरंविस्मयमागतः॥२॥एतौनिषण्णौसंप्रे
क्ष्यशतानंदोनृपात्मजौ॥सुखासीनौमुनिश्रेष्ठंविश्वामित्रमथाब्रवीत्॥३॥अपितेमुनिशार्दू
लममातायशस्विनी॥दर्शिताराजपुत्रायतपोदीर्घमुपागता॥४॥अपिरामेमहातेजाःमम
मातायशस्विनी॥वन्यैरुपाहरत्पूजांपूजार्हेसर्वदेहिनां॥५॥अपिरामायकथितंयथावृत्तंत
त्पुरातनं॥ममसातुर्महातेजोदैवेनदुरनुष्ठितं॥६॥अपिकौशिकभद्रंतेगुरुणाममसंगता॥म
ममातामुनिश्रेष्ठरामसंदर्शनादितः॥७॥

रणपूर्वकंतत्कर्तृकंदुरनुष्ठानरूपं·मातुर्यद्वृत्तंच
रितंपुरातनंतद्रामायकथितमित्यन्वयः॥महातेजइतिविश्वामित्रसंबोधनम्॥६॥ममगुरुणाम
ममातेत्यन्वयः·अत्रवारद्वयंममेतिप्रयोगोहर्षातिशयात्·रामसंदर्शनादितइत्यस्यगत
शापेतिशेषः·आदिनापूजापादस्पर्शौ॥७॥

रामा॰बा॰
१४६

ज्ञानमात्राधिकृता नारदाद्या देवलोकसंचारिणो देवर्षयः ॥ ज्ञानकर्मोभयाधिकृता ब्रह्मर्षयो भृग्वादयः ॥ अ
ग्नितुल्यैः ऋषिभिः संकुलं व्याप्तमित्यन्वयः ॥ २५ ॥ तथा ब्रह्मकल्पैः चतुर्मुखतुल्यैः ॥ तस्यैव सहजतपो
वैभवात् अब्भक्षैस्तन्मात्रभक्षैः संकुलं ॥ २६ ॥ ब्रह्मरोमनखजा बालखिल्या वैखानसाश्च येन खवा

ब्रह्मर्षिगणसंकीर्णं देवर्षिगणसेवितं ॥ नष्टाश्रमासंसिद्धैरग्निकल्पैर्महात्मभिः ॥ २५ ॥ सततं संकुलं
श्रीमद्ब्रह्मकल्पैर्महात्मभिः ॥ अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ॥ २६ ॥ फलमूलाशनैर्दां
तैर्जितदोषैर्जितेंद्रियैः ॥ ऋषिभिर्बालखिल्यैश्च जपहोमपरायणैः ॥ २७ ॥ अन्यैर्वैखानसैश्चै
व समंतादुपशोभितं ॥ वसिष्ठस्याश्रमपदं ब्रह्मलोकमिवापरं ॥ २८ ॥ ददर्श जयतां श्रेष्ठो वि
श्वामित्रो महाबलः ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये बालकांडे एकपंचाशः सर्गः ॥ ५१ ॥
तं दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ॥ प्रणतो विनयाद्वीरो वसिष्ठं जपतां वरं ॥ १ ॥ स्वाग
तं तव चेत्युक्तो वसिष्ठेन महात्मना ॥ आसनं चास्य भगवान्वसिष्ठो व्यादिदेश ह ॥ २ ॥

स्ते वैखानसाः ये बालास्ते बालखिल्याः इति श्रुतेरिति कतकः ॥ २७ ॥ परमकल्याणस्वभावत्वात् ब्र
ह्मलोकोपमाश्रमस्य ॥ जयतां श्रेष्ठ्राणां ॥ २८ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकां
डे एकपंचाशः सर्गः ॥ ५१ ॥ वसिष्ठं प्रणतो वसिष्ठेन स्वागतमित्युक्तिश्चेति योजना ॥ १ ॥ व्यादिदेश आदापयत् ॥ २ ॥

राम
१४६

गोसाश्वस्त्रदानादिना॥१५॥वलोतपोवलंयथायादृशंनत्त्वंब्रह्मर्षित्वंचयथातत्प्राप्तवत्पर्यःवृत्तमितिक्वचि
पाठःवृत्तंचरितं॥१६॥१७॥सराजाकस्यपुत्रस्तत्राह-प्रजापतीत्यादि॥१८॥१९॥अकारयत्स्वार्थेणिः॥२०॥

नास्तिधन्यतरोरामत्वत्तोन्योभुविकश्चन॥गोप्ताकुशिकपुत्रस्तेयेनतप्तंमहत्तपः॥१५॥श्रूयतां
चाभिधास्यामिकौशिकस्यमहात्मनः॥यथाबलंयथातत्त्वंतन्मेनिगदतःशृणु॥१६॥राजासीदे
षधर्मात्मादीर्घकालमरिंदमः॥धर्मज्ञःकृतविद्यश्चप्रजानांचहितेरतः॥१७॥प्रजापतिसुतस्त्वा
सीत्कुशोनाममहीपतिः॥कुशस्यपुत्रोबलवान्कुशनाभःसुधार्मिकः॥१८॥कुशनाभसुतस्त्वा
सीद्गाधिरित्येवविश्रुतः॥गाधेःपुत्रोमहातेजाविश्वामित्रोमहामुनिः॥१९॥विश्वामित्रोमहाते
जाःपालयामासमेदिनीं॥बहुवर्षसहस्राणिराजाराज्यमकारयत्॥२०॥कदाचित्तुमहातेजा-
योजयित्वावरूथिनीं॥अक्षौहिणीपरिवृतःपरिचक्राममेदिनीं॥२१॥नगराणिचराष्ट्राणिसरि
तश्चमहागिरीन्॥आश्रमान्क्रमशोराजाविचरन्नाजगाम्ह॥२२॥वसिष्ठस्याश्रमपदंनानापु
ष्पलताद्रुमं॥नानामृगगणाकीर्णंसिद्धचारणसेवितं॥२३॥देवदानवगंधर्वैःकिन्नरैरुपशो
भितं॥प्रशांतहरिणाकीर्णंद्विजसंघनिषेवितं॥२४॥

वरूथिनींचतुरंगवलंयोजयित्वासमु
पास्थाप्यतद्रूपाऽक्षौहिणीसंख्यसेनापरिवृतोभूत्वा॥२१॥२२॥२३॥नपोतिशयात्प्रशांतहरिणत्वं॥२४॥

५२

प्रहसन्निवउक्तमातिथिलाभजहर्षेणा॥१२॥संप्रतीछ मेमत्कृतमातिथ्यमंगीकुरु॥१३॥हेतुगर्भविशेषणमतिथिश्रेष्ठइति॥१४॥पूजावाक्येन-आतिथ्यंकरिष्यामीत्येवंरूपेणत्वममपूजनंकृतमितिराजाब्रवीत्॥१५॥

ततोवसिष्ठोभगवान्कथांतेरघुनंदन।विश्वामित्रमिदंवाक्यमुवाचप्रहसन्निव॥१२॥आतिथ्यंकर्तुमिछामिबलस्यास्यमहाबल।तवचैवाप्रमेयस्ययथार्हंसंप्रतीछमे॥१३॥सत्क्रियांहिभवानेतांप्रतीछतुमयाकृतां।राजंस्त्वमतिथिश्रेष्ठःपूजनीयःप्रयत्नतः॥१४॥एवमुक्तोवसिष्ठेनविश्वामित्रोमहामुनिः।कृतमित्यब्रवीद्राजापूजावाक्येनमेत्वया॥१५॥फलमूलेनभगवन्विद्यतेयत्तवाश्रमे।पाद्येनाचमनीयेनभगवद्दर्शनेनच॥१६॥सर्वथाचमहाप्राज्ञपूजार्हेणसुपूजितः।गमिष्यामिनमस्तेस्तुमैत्रेणेक्षस्वचक्षुषा॥१७॥एवंब्रुवंतंराजानंवसिष्ठःपुनरेवहि।न्यमंत्रयतधर्मात्मापुनःपुनरुदारधीः॥१८॥बाढमित्येवगाधेयोवसिष्ठंप्रत्युवाचह।यथाप्रियंभगवतस्तथास्तुमुनिपुंगव॥१९॥एवमुक्तस्तथातेनवसिष्ठोजपतांवरः।आजुहावततःप्रीतःकल्माषींधूतकल्मषाम्॥२०॥

विद्यतेयत्तवाश्रमेफलमूलंतेनपूजितइत्यनेनराजभोग्य(?)प्रभावादनेनैवव्वयंसंतुष्टाइतिध्वनितः॥१६॥पूजार्हेणत्वयेतिशेषः मैत्रेणस्नेहयुक्तेनमत्पृथ्वीयाज्ञं(?)तं॥१७॥निमंत्रणंभोजनांगीकारायप्रार्थनं॥१८॥बाढमित्यस्यविवरणंयथाप्रियमित्यादि॥१९॥तेनविश्वामित्रेण।कल्माषींचित्रवर्णांहोमधेनु॥२०॥ ॥

फलमूलमितिजातित्वादेकवचनं॥३॥४॥वनस्पतिशब्देन वृक्षमात्रं नतु विनापुष्पं फलवतएव न हि षष्ठ्येपि कु
शलंपर्यपृच्छत सर्वत्रं तत्पृष्टसर्वविषये॥५॥जपतांतपस्विनां॥६॥कच्चिदितिप्रश्ने हे धार्मिक धर्मेणानदनुशने
न प्रजारंजयन् राजवृत्तेन न्यायेनार्जितमर्थस्यवर्धनंपालनं तथासत्पात्रेप्रतिपत्तिश्च राजवृत्तंचतुर्विध

उपविष्टाय च तदा विश्वामित्राय धीमते॥यथान्यायंमुनिवरःफलमूलमुपाहरत्॥३॥प्रतिगृह्य
तुतांपूजांवसिष्ठाद्राजसत्तमः॥तपोग्निहोत्रशिष्येषुकुशलंपर्यपृच्छत॥४॥विश्वामित्रोमहाते
जावनस्पतिगणेतदा॥सर्वत्रकुशलंप्राहवसिष्ठोराजसत्तमं॥५॥सुखोपविष्टंराजानंविश्वा
मित्रंमहातपाः॥पप्रच्छजपतांश्रेष्ठोवसिष्ठोब्रह्मणःसुतः॥६॥कच्चित्तेकुशलंराजन्कच्चिद्धर्मे
णरंजयन्॥प्रजाःपालयसेराजन्राजवृत्तेनधार्मिक॥७॥कच्चित्तेसंभृताभृत्याःकच्चित्तिष्ठंतिशा
सने॥कच्चित्तेविजिताःसर्वेरिपवोरिपुसूदन॥८॥कच्चिद्बलेषुकोशेषुमित्रेषुचपरंतप॥कुश
लंतेनरव्याघ्रपुत्रपौत्रेतथानघ॥९॥सर्वत्रकुशलंराजावसिष्ठंप्रत्युदाहरत्॥विश्वामित्रोमहातेजा
वसिष्ठंविनयान्वितं॥१०॥कृत्वातौसुचिरंकालंधर्मिष्ठौताःकथास्तदा॥मुदापरमयायुक्तौप्रीयेतां
तौपरस्परं॥११॥

मित्युक्तेन राजवृत्तेन पालयसे इत्यन्वयः॥७॥संभृताः वेतनदानादिना॥८॥बलेषु चतुरंगेषु कोशेषु अर्थसमू
हेषु पुत्रपौत्रे गवाश्वाप्रभृतित्वादेकवत्त्वं॥९॥को वसिष्ठशब्दो वरिष्ठवाची॥१०॥तौ उक्तविशेषेण
कौ वसिष्ठविश्वामित्रौ ताः कथाः क्षेमोपकुशलप्रश्नोत्तरादिरूपाः प्रीयेतां अडभावश्चार्षो लङि॥११॥

तदेवप्रपंचयति॰ इक्षूनिति॰ सविकारानिक्षून्॰॥मधून्क्षौद्रादि॰ मैरेयं च॰।धात्रीधातकी गुडवारिभिः कृतम
द्यं॰ भक्ष्यानपूपादीन्॰ उच्चावचान्॰ अनेकविधान्॥२॥उत्तमा सउक्ष्मत्वगुणयुक्तस्य॰ राशयः आसन्निति शे
षः॥मृष्टान्नपन्नानि पायसभेदाः॥दधिकुल्याइत्यत्र पल्वलानां दुग्धादेरपि॥३॥अनेकविधिस्वादुरसयु

इक्षून्मधूंस्तथा लाजान्मैरेयांश्च वरासवान्॥पानानि च महार्हाणि भक्ष्यांश्चोच्चावचानपि॥२॥
उत्तमाढ्यस्यौदनस्यात्र राशयः पर्वतोपमाः॥मृष्टान्नपन्नानि सूपांश्च दधिकुल्यास्तथैव च॥३॥
नानास्वादुरसानां च खांडवानां तथैव च॥भोजनानि सुपूर्णानि गौडानि च सहस्रशः॥४॥
सर्वमासीत्सुसंतुष्टं हृष्टपुष्टजनायुतं॥विश्वामित्रबलं राम वसिष्ठेन सुतर्पितं॥५॥वि
श्वामित्रो हि राजर्षिर्हृष्टपुष्टस्तदाभवत्॥सांतःपुरवरो राजा सब्राह्मणपुरोहितः॥६॥
सामात्यो मंत्रिसहितः सभृत्यः पूजितस्तदा॥युक्तः परेण हर्षेण वसिष्ठमिदमब्रवीत्॥७॥

तानां खांडवानां भक्ष्यविशेषाणां पूर्णानि शेषेषष्ठीतेः पूर्णानि भोजनानि भोजनपात्राणि॰ गौडानि
राजतानि॰ आसन्निति शेषः॰ रजते गुड इत्यभिधानमिति कतककृत्॥४॥हृष्टश्चित्तसंतोषः पुष्टि
र्देहपुष्टिस्ताभ्यां युक्तजनैरासमंताद्युक्तं॥५॥अंतःपुरश्रेष्ठैः सहितः॥६॥अमात्याः कर्मसचिवाः॰
मंत्रिणो मंत्रस्पसचिवाः॥पूजिताः आतिथ्येन सत्कृताः॥७॥

शबलेत्वामे अस्य राजर्षेर्महार्हेण भोजनेन सत्कारं कर्तुं व्यवसितोस्मि उद्युक्तोस्मि तमेव व्यवसायं विधत्स्व सं
पादयतदुपयोगिपदार्थदानेनेत्तिशेषः॥२१॥ षड्रसेषु मधुरादिषु यस्य यस्य यदभिपूजितं अभीष्टं॥२२
तत्सर्वं यथाकामं तस्मीत्प्सनतिक्रमेण मम कृते मत्तोषार्थं रसेनान्नेन रसयुतान्नेन। भक्ष्यशष्कुल्यादि

एवं युक्ते हि शबले दिव्ये कामधुक् चापि वचो मम॥ सबलस्यास्य राजर्षेः कर्तुं व्यवसितोस्म्यहं॥२१॥
भोजनेन महार्हेण सत्कारं संविधत्स्व मे॥ यस्य यस्य यथाकामं षड्रसेष्वभिपूजितं॥२२॥
तत्सर्वं कामधुक् दिव्ये अभिवर्ष कृते मम॥ रसेनान्नेन पानेन लेह्यचोष्येण संयुतं॥२३॥
अन्नानां निचयं सर्वं सृजस्व शबले त्वर॥२३॥ इत्यार्षे श्रीरामायणे वाल्मीकीये बालकांडे द्विपं
चाशः सर्गः॥५२॥ एवमुक्ता वसिष्ठेन शबला शत्रुसूदन॥ विदधे कामधुक् कामान्यस्य यस्येप्सि
तं यथा॥१॥

ना रसेनेति सर्वान्वयि पानेन पानकरसादिना लेह्यं जिव्हाग्रास्यं दौग्धादि चोष्यं अधरपुटग्रास्यं
आम्रफलादि अन्नानां शाल्यन्नादीनां निचयं राशिं॥२३॥ इति श्रीरामाभिरामे श्रीरामीये रामायण
तिलके बालकांडे द्विपंचाशः सर्गः॥५२॥ यस्य यस्य यथेप्सितं तथा तथा सर्वान् कामान् विदधे इत्यर्थः
॥१

एतत्सर्वमातिथ्यादि॰ एतत्तच्छबलारूपमेव सर्वस्वं॰ सत्येन शपयेइतिशेषः॥ तथा दर्शनादिना मम तुष्टिकरी च
१५॥ कारणौरुक्तैः साभिप्रायं चैतद्बोध्यं॥१६॥ संरब्धतरमत्यागग्रहयुक्तं॰ हैरण्याः हिरण्यविकाराः कक्षाः घं
टापि तमध्यबंधनार्थश्चरवलाः ग्रैवेयं ग्रीवालंकारश्चरवलादि॥१७॥ श्वेताश्वानां चतुर्युजां चतुःसंख्याक

आयत्तमत्र राजर्षे सर्वमेतन्न संशयः॥ सर्वस्वमेतत्सत्येन मम तुष्टिकरी तथा॥१५॥ कारणैर्बहुभी
राजन्न दास्ये शबलां तव॥ वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीत्तदा॥१६॥ संरब्धतरमत्यर्थं
वाक्यं वाक्यविशारदः॥ हैरण्यकक्ष्याग्रैवेयान्सुवर्णांकुशभूषितान्॥१७॥ ददामि कुंजराणां ते सह
स्राणि चतुर्दश॥ हैरण्यानां रथानां च श्वेताश्वानां चतुर्युजां॥१८॥ ददामि ते शतान्यष्टौ किंकिणी
कविभूषितान्॥ हयानां देशजातानां कुलजानां महौजसां॥१९॥ सहस्रमेकं दश च ददामि
तव सुव्रत॥ नानावर्णविभक्तानां वयस्थानां तथैव च॥२०॥ ददाम्येकां गवां कोटिं शबला
दीयतां मम॥ यावदिच्छसि रत्नानि हिरण्यं वा द्विजोत्तम॥२१॥ राम

श्वेताश्वयुतानामित्यर्थः॥ आर्षः समासः॥ रथानां चेति पाठः॥१८॥ किंकिणीकविभूषितानिति षष्ठ्य
र्थे द्वितीया॰ रथानां विशेषणमेतत्॰ देशो वाल्हीकादिः॥ कुलमुच्चैःश्रवादीनां गंधर्वकुलं वा॰ गंधर्वकु
लजातस्त्वमिति पुराणवचनात्॥१९॥ अनेकवर्णैर्विभक्तानां प्राप्तभेदानां॰ वयस्थानां तरुणीनां॰ व
यस्थस्तरुणो युवा इति कोशात्॥२०॥ एकां कोटिमित्यन्वयः॰ यावदिति॰ इतोऽप्यधिकं यावदिच्छसीत्यर्थः
॥२१

पूजार्हेण मादृश पूजाकरणयोग्येन पूजित इत्यस्यैव विवरणमादरातिशयद्योतनाय सुसत्कृत इति दृर्ढीकृ पुनरुक्तिः अदोषः ॥८॥ शतसहस्रेण निष्क्रयभूतेनेति शेषः ॥९॥ धर्मतो न्यायतः पार्थिवस्य रत्नस्वामित्वात् रत्नहरत्वात्स्व ममेषा योग्येति शेषः ॥१०॥११॥१२॥ कुत इयं परित्यागानार्हेत्यत्राह शाश्वतीति यथात्मवतो

पूजितोऽहं त्वया ब्रह्मन् पूजार्हेण सुसत्कृतः ॥ श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ॥८॥ गवां शतसहस्रेण दीयतां शबला मम ॥ रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः ॥९॥ तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥ एवमुक्तस्तु भगवान्वसिष्ठो मुनिपुंगवः ॥१०॥ विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिं ॥ नाहं शतसहस्रेण नापि कोटिशतैर्गवां ॥११॥ राजन्दास्यामि शबलां राशिभी रजतस्य वा ॥ न परित्यागमर्हेयं मत्सकाशादरिंदम ॥१२॥ शाश्वती शबला मह्यं कीर्तिरात्मवतो यथा ॥ अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ॥१३॥ आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥ स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ॥१४॥

राज्ययोगवतो विद्यादिता कीर्तिः शाश्वती नित्यसंबद्धा एवं मत्यंत्र इदत्ता शबला नित्यं मत्संबद्धा ॥ एवमादरे बीजमाह हव्यं देवं कव्यं पित्र्यं प्राणयात्रा जीवनं ॥१३॥ आयत्तमधीनं बलिर्भूतबलिः होमो वैश्वदेवादिः आयत्त इत्यस्य सर्वत्रानुकर्षः स्वाहाकारवषट्कारौ तत्साध्ययज्ञौ विद्या इति एतत्पयः प्राशनेन चित्तशुद्धेः प्राणात्प्रतेर्देहपाटवाच्चतत्साध्यविद्यानामेतदायत्तत्वं ॥१४॥

अपकृतं॰ अपराद्धं॰ दृष्ट्वा ज्ञात्वापि भक्तां सेवापरां ॥४॥५॥ शतशो भृत्यान्स्वकर्षकान्॰ ॥ पादमूलं पादसमीपं॰ ॥ महात्मनो वसिष्ठस्य ॥६॥ रोदनमश्रुपातः ॥ क्रोशनमार्तशब्दः ॥ रुदंत्या एव ऋषिसमीपगम

किं मयापकृतं तस्य महर्षेर्भावितात्मनः ॥ यन्मामनागसं दृष्ट्वा भक्तां त्यजति धार्मिकः ॥४॥
इति संचिंतयित्वा तु निःश्वस्य च पुनः पुनः ॥ जगाम वेगेन तदा वसिष्ठं परमौजसं ॥५॥
निर्धूय तांस्तदा भृत्यांछतशः शत्रुसूदन जगामानिलवेगेन पादमूलं महात्मनः ॥६॥
शवला सा रुदंती च क्रोशंती चेदमब्रवीत् ॥ वसिष्ठस्याग्रतः स्थित्वा रुदंती मेघनिःस्वना ॥७॥
भगवान्किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ॥ यस्माद्राजभटा मां हि नयंते त्वत्सकाशतः ॥८॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् ॥ शोकसंतप्तहृदयां स्वसारमिव दुःखितां ॥९॥
न त्वां त्यजामि शवले नापि मे पकृतं त्वया ॥ एष त्वां नयते राजा बलान्मत्तो महाबलः ॥१०॥

नं रुदंत्यैव वक्तव्यकथनमित्येतदर्थं द्वी रुदंतीति ॥७॥८॥ सकाशं समीपं॰ ॥ स्वसा भगिनी ॥९॥ बलान्मत्तात्रा
न् मत्तोऽविवेकी ॥१०॥

२२॥ एतच्छबलारूपं वस्तु॥२३॥ आप्तदक्षिणाः इत्यनेन हव्यादि वद्दक्षिणाप्येतदधीनेति सूचितं॥२४॥ एतदेव क्रिया इत्यस्यैव विवरणं॥ अतोमूलाः एतन्मूला इत्यर्थः॥२५॥ सर्वथा दानाभावे हेतुगर्भं विशेषणं॥ कामदोहिनीं इच्छाविषयदोहनशीलां काव्यलिंगमलंकारः॥२६॥ इति श्री रामाभिरामे श्रीरामीये रामायण

तावद्ददामि ते सर्वं दीयतां शबला मम॥ एवमुक्तस्तु भगवान्विश्वामित्रेण धीमता॥२२॥ न दास्यामीति शबलां प्राह राजन्कथंचन॥ एतदेव हि मे रत्नमेतदेव हि मे धनं॥२३॥ एतदेव हि सर्वस्वमेतदेव हि जीवितं॥ दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः॥२४॥ एतदेव हि मे राजन् विविधाश्च क्रियास्तथा॥ अतोमूलाः क्रियाः सर्वाः मम राजन्न संशयः॥२५॥ बहुना किं प्रलापेन न दास्ये कामदोहिनीं॥२६॥ इत्यार्षे श्रीरामायणे बालकांडे त्रिपंचाशः सर्गः॥५३॥ कामधेनुं वसिष्ठोपि यदा न त्यजते मुनिः॥ तदास्य शबलां राम विश्वामित्रोन्वकर्षत॥१॥ नीयमाना तु शबला राम राज्ञा महात्मना॥ दुःखिता चिंतयामास रुदती शोककर्षिता॥२॥ परित्यक्ता वसिष्ठेन किमहं सुमहात्मना॥ याहं राजभृत्यैर्दीना ह्रियेय भृशदुःखिता॥३॥

तिलके बालकांडे त्रिपंचाशः सर्गः॥५३॥ अथ दंडोपायप्रवृत्तिमाह कामधेनुमिति। न त्यजते नात्यजत्। अन्वकर्षत बलादिति शेषः॥१॥२॥ राजभृत्तै राजसेवकैः भृत्यैरिति क्वचित्पाठः। ह्रियेय कर्मणि लिङ्। भृशदुःखिता भृशेनातिशयेन दुःखितास्मीति शेषः। भृशशब्दोव्ययपर्यायो वा॥३॥

ननुत्वमेवतस्यबलंनाशयतत्राह॥ नियुंक्ष्वेति॰ कामधेनुत्वान्नियोगापेक्षा॰ परकामपार्थसद्भावेवतस्याः सामर्थ्यात्॰ ब्रह्मबलसंभृतां॰ तादृशकार्यसमर्थत्वेनमांध्यायस्वेत्यर्थः॥१६॥१७॥ हुंभानामगवांशब्दः

नियुंक्ष्वमांमहातेजस्त्वंब्रह्मबलसंभृतां॥ तस्यदर्पबलंयत्तन्नाशयामिदुरात्मनः॥१६॥ इत्युक्तस्तुतयारामवसिष्ठस्तुमहायशाः॥ सृजस्वेतितदोवाचबलंपरबलार्दितं॥१७॥ तस्यतद्वचनंश्रुत्वासुरभीसासृजत्तदा॥ तस्याहुंभारवोत्सृष्टाः पल्हवाः शतशोनृप॥१८॥ नाशयंतिबलंसर्वंविश्वामित्रस्यपश्यतः॥ सराजापरमक्रुद्धः क्रोधविस्फारितेक्षणः॥१९॥ पल्हवान्नाशयामासशस्त्रैरुच्चावचैरपि॥ विश्वामित्रार्दितान्दृष्ट्वापल्हवान्शतशस्तदा॥२०॥ भूयएवासृजन्घोरांश्छकान्यवनमिश्रितान्॥ तैरासीत्संवृताभूमिः शकैर्यवनमिश्रितैः॥२१॥ प्रभावद्भिर्महावीर्यैः हेमकिंजल्कसन्निभैः॥ तीक्ष्णासिपट्टिशधरैर्हेमवर्णांबरावृतैः॥२२॥ निर्दग्धंतद्बलंसर्वंप्रदीप्तैरिवपावकैः॥ ततोस्त्राणिमहातेजाविश्वामित्रो मुमोचह॥२३॥ तैस्तैर्य वनकांबोजाबर्बराश्चाकुलीकृताः॥२४॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेबालकांडेचतुःपंचाशः सर्गः॥५४॥

पल्हवशकयवनकांबोजबर्बराम्लेच्छजातिविशेषाः॥१८॥ पश्यतइत्यनादरेषष्ठी॰ विस्फारितंविवृतं॥१९॥ अर्दिताः पीडिताः॥२०॥२१॥ प्रभाद्युर्निरीक्ष्यंतेजः हेम्नः किंजल्कस्यचसदृशैः हेमवर्णांबरपीतांबरैः॥२२॥२३॥२४॥ इतिश्रीरामाभिरामेश्रीरामीयेबालकांडेचतुःपंचाशःसर्गः॥५४॥

मत्यं मम॰ नहितद्बलेन तुल्यमित्यर्थः तपोबलेनन्तर्हिदंअतांतत्राह॰ राजात्वित्यादि॰ राजत्वात्तपोबलेननदं

अइतिभावः तद्वस्यानिकिंचिंधायां॰ दुर्लभस्यधर्मस्यजीवितस्यशुभस्यच॰ राजानोवानरश्रेष्ठप्रदा

तारोतसंशयः॥ तत्रहिंस्यान्नचाक्रोशेन्नाक्षिपेन्नाप्रियंवदेत्॰ देवमानुषरूपेण चरंत्येतेमहीतलइति॰

अद्यविशेषतः॥ अवध्यइति शेषः अद्यकृतातिथ्यके दिनेतेनातिथित्वात्॥ विशेषतोऽवध्यइतिभा

नहितुल्यंबलंमत्यं राजात्वद्यविशेषतः॥ बलीराजाक्षत्रियश्चपृथिव्याः पतिरेवच॥११॥ इयम

क्षौहिणीपूर्णागजवाजिरथाकुला॥ हस्तिध्वजसमाकीर्णा तेनासौबलवत्तमः॥१२॥ एवमुक्ता

वसिष्ठेनप्रत्युवाचविनीतवत्॥ वचनंवचनज्ञासाब्रह्मर्षिमतुलप्रभं॥१३॥ नबलंक्षत्रिय

स्याहुर्ब्राह्मणाबलवत्तराः॥ ब्रह्मन्ब्रह्मबलंदिव्यंक्षात्राच्चबलवत्तरं॥१४॥ अप्रमेयंबलंतु

भ्यंनत्वयाबलवत्तरः॥ विश्वामित्रोमहावीर्यस्तेजस्त्वदुरासदम्॥१५॥

वः बलीराजेत्यनेन

युद्धाजेयत्वमुक्तं॰ पृथिवीपतिक्षत्रियत्वेनतद्वधस्यमहापातकसमतावोधिता॥११॥ बलित्वमे

वउपपादयति॰॥ इयमिति॰॥ हस्तिस्थैर्ध्वजैः॥ समाकीर्णा॥१२॥ विनीतवत्विनयोपेतं॥१३॥ नव

लंअल्पंबलं॰ बलवत्तराः क्षत्रियादिभ्यः॥ क्षात्रात्क्षत्रियबलादपिबलवत्तरं अधिकं॥१४॥ तुभ्यंत

व॰॥ नत्वयासदृशोपीतिशेषः बलवत्तरइतिदूरेइतिशेषः महावीर्यः॥ महावीर्योपि॰ तत्रहेतु

स्तेजसावेत्यादि॥१५॥

निर्वेगत्वे समुद्रोपमा॰ निष्पन्नत्वे इतरे उपमे॥ उपरक्तो राहुग्रस्तः॥९॥ हतसर्वबलोत्साहः सर्वाणि बला
नि शारीरबौद्धास्त्रादीनि तज्जन्योत्साहहीनः निर्वेदं सर्वत्र निष्फलत्वबुद्धिजं चित्तखेदं॥१०॥एकं

समुद्र इव निर्वेगो भग्नदंष्ट्र इवोरगः॥उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः॥९॥हतपुत्रब
लो दीनो लूनपक्ष इव द्विजः॥ हतसर्वबलोत्साहो निर्वेदं समपद्यत॥१०॥स पुत्रमेकं राज्या
य पालयेति नियुज्य च॥ पृथिवीं क्षत्रधर्मेण वनमेवाभ्यपद्यत॥११॥स गत्वा हिमवत्पार्श्वे
किंनरोरगसेविते॥ महादेवप्रसादार्थं तपस्तेपे महातपाः॥१२॥केनचित्त्वथ कालेन देवे
शो वृषभध्वजः॥ दर्शयामास वरदो विश्वामित्रं महामुनिं॥१३॥किमर्थं तप्यसे राजन्ब्रूहि
यत्ते विवक्षितं॥ वरदोऽस्मि वरो यस्ते कांक्षितः सोऽभिधीयतां॥१४॥एवमुक्तस्तु देवेन विश्वा
मित्रो महातपाः॥ प्रणिपत्य महादेवं विश्वामित्रोऽब्रवीदिदं॥१५॥यदि तुष्टो महादेव धनुर्वे
दो ममानघ॥ सांगोपांगोपनिषदः सरहस्यः प्रदीयतां॥१६॥यानि देवेषु चास्त्राणि दानवेषु म
हर्षिषु॥ गंधर्वयक्षरक्षःसु प्रतिभांतु ममानघ॥१७॥

155

वसिष्ठमिति शेषः राज्याय राज्यं रक्षितुं पृथि
वीं क्षत्रधर्मेण पालयेति नियुज्येत्यन्वयः॥११॥१२॥ दर्शयामास आत्मानमिति शेषः॥१३॥१४॥१५॥साक्षादु
पकारकाणि अंगानि। आरादुपकारकाणि उपांगानि मंत्रा उपनिषदः समाहारद्वंद्वः द्वंद्वाद्धनुर्वेदे तिष्ठच्
तेन सहितो धनुर्वेद इत्यर्थः रहस्यं [illegible] विद्या [illegible]॥१६॥१७॥

आकुलानपलायमानान्· कामधुगिति संबोधनं· योगतः योगमहिम्ना ॥१॥ २ रोमकूपेषु रोमकुपेभ्यः म्लेच्छहारितकिरात जातिविशेषाः ॥३॥ विश्वामित्रस्य ततसैन्यं ॥४॥ विश्वामित्रसुतानांशतं· ऋषिरेवधेनोर्वक्तमतोऽ

ततस्तानाकुलान् दृष्ट्वा विश्वामित्रास्त्रमोहितान् ॥ वसिष्ठश्चोदयामास कामधुक्सृजयोगतः ॥१॥ तस्याहुंकारतोजाताः कांबोजा रविसन्निभाः ॥ ऊधसश्चाथसंभूतावर्बराः शस्त्रपाणयः ॥२॥ योनिदेशाच्चयवनाः शकृद्देशाच्छकाः स्मृताः ॥ रोमकूपेषु म्लेच्छाश्च हारीताः सकिरातकाः ॥३॥ तैस्तन्निषूदितंसर्वं विश्वामित्रस्यतत्क्षणात् ॥ सपदातिगजंसाश्वं सरथं रघुनंदन ॥४॥ दृष्ट्वा निषूदितं सैन्यं वसिष्ठेन महात्मना ॥ विश्वामित्रसुतानांतु शतं नानाविधायुधं ॥५॥ अभ्यधावत्सुसंक्रुद्धं वसिष्ठं जपतांवरं ॥ हुंकारेणैव तान्सर्वान्निर्ददाह महानृषिः ॥६॥ ते साश्वरथपादाता वसिष्ठेन महात्मना ॥ भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्तथा ॥७॥ दृष्ट्वा विनाशितान् सर्वान् बलं च सुमहायशाः ॥ सव्रीडं चिंतयाविष्टो विश्वामित्रोभवत्तदा ॥८॥ राम

यमेव नाशनीयइत्याशयेन वसिष्ठं अभ्यधावत ॥५॥ हुंकारेणतपोवलसंभृतेन· क्षत्रियत्वेपिपृथिवीपतित्वाभावात्तद्वधे अल्पप्रायश्चित्तं आततायित्वाच्चेतिभावः ॥६॥ मुहूर्तेनभस्मीकृताइत्यपवर्गेततीया· मासेनानुवाकोऽधीतइतिवत् ॥७॥ सर्वान्पुत्रान्· सव्रीडमितिक्रियाविशेषणं ॥८॥

एवमुक्त्वापलायमानप्राणिजातंप्रतीतिशेषः इत्यवंक्ष्पमाणं॥२६॥ यत्तु यस्मान्मेआश्रमंविनाशितवानसि·य
त्तयस्मात्त्वहिंमसिद्दुराचारोमूढतस्मान्नभविष्यसिनंदपसीत्यर्थः॥२७॥ विधूमःकालाग्निरिवक्रोधाद्

एवमुक्त्वामहातेजावसिष्ठोजपतांवरः॥विश्वामित्रंतदावाक्यंसरोषमिदमब्रवीत्॥२६॥
आश्रमंचिरसंवृद्धंयद्विनाशितवानसि॥दुराचारोहियन्मूढतस्मात्त्वंनभविष्यसि॥२७॥
इत्युक्त्वापरमक्रुद्धोदंडमुद्यम्यसत्वरः॥विधूमइवकालाग्निर्यमदंडमिवापरं॥२८॥
इत्यार्षेश्रीरामायणेवाल्मीकीयेवालकांडेपंचपंचाशःसर्गः॥५५॥ एवमुक्तोवसिष्ठेन
विश्वामित्रोमहाबलः॥आग्नेयमस्त्रमुद्दिश्यतिष्ठतिष्ठेतिचाब्रवीत्॥१॥ब्रह्मदंडं
समुद्यम्यकालदंडमिवापरं॥वसिष्ठोभगवान्क्रोधादिदंवचनमब्रवीत्॥२॥क्षत्र
बंधोस्थितोस्म्येषयद्बलंतद्विदर्शय॥नाशयाम्यद्यतेदर्पंशस्त्रस्यतवगाधिज॥३॥क्व
चतेक्षत्रियबलंक्वचब्रह्मबलंमहत्॥पश्यब्रह्मबलंदिव्यंममक्षत्रियपांसन॥४॥

सिष्ठोऽपरंयमदंडमिवदंडमुद्यम्यतस्थावितिशेषः॥२८॥इतिश्रीरामाभिरामेश्रीरामीयेरामा
यणतिलकेवालकांडेपंचपंचाशःसर्गः॥५५॥ एवमुक्तो·नभविष्यसीत्युक्तः॥१॥२॥ तिष्ठतिष्ठभी
षयंतंप्रतिस्वभीत्यभावमाह·स्थितोस्म्येषइति·तवशस्त्रस्यदर्पं·त्वयालब्धंयत्अस्त्ररूपंशस्त्रं

प्रसादात् नत्वपदेशापेक्षेतिभावः ॥१५॥ क्षत्रियत्वात्सहजाऽवदर्पस्तस्य पूर्त्तिरस्त्रलाभात् ॥१९॥२०॥ यैरस्त्रैर
स्त्रतेजसा स्वीयतेजसा तपोवनं निर्दग्धं भवेतान्यस्त्राणि मुमुचेत्यन्वयः ॥२१॥ विश्वामित्रस्य शेषे षष्ठी ॥ ते

तव प्रसादाद्भवतु देवदेव ममेप्सितं ॥ एवमस्त्विति देवेशो वाक्यमुक्त्वा गतस्तदा ॥१८॥ प्राप्य चा
स्त्राणि देवेशात् विश्वामित्रो महाबलः ॥ दर्पेण महता युक्तो दर्पपूर्णोऽभवत्तदा ॥१९॥ विवर्द्धमानो वी
र्येण समुद्र इव पर्वणि ॥ हतं मेने तदा रामं वसिष्ठमृषिसत्तमं ॥२०॥ ततो गत्वाश्रमपदं मुमोच चा
स्त्राणि पार्थिवः ॥ यैस्तत्तपोवनं नाम निर्दग्धं चास्त्रतेजसा ॥२१॥ उदीर्यमाणमस्त्रं तद्विश्वामित्र
स्य धीमतः ॥ दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः ॥२२॥ वसिष्ठस्य च ये शिष्या ये च वै मृ
गपक्षिणः ॥ विद्रवन्ति भयाद्भीता नानादिग्भ्यः सहस्रशः ॥२३॥ वसिष्ठस्याश्रमपदं शून्यमा
सीन्महात्मनः ॥ मुहूर्तमिव निःशब्दमासीदीरिणसन्निभम् ॥२४॥ वदतो वै वसिष्ठस्य माभैरि
ति मुहुर्मुहुः ॥ नाशयाम्यद्य गाधेयं नीहारमिव भास्करः ॥२५॥ राम

नोदीर्यमाणं विसृज्यमानं ॥२२॥ भयात् भयहेतोरस्त्रजालात् नानादिग्भ्यः ॥ व्यत्ययेन द्वितीयार्थे चतु
र्थी पंचमी वा ॥२३॥ शून्यं सर्वप्राणिपलायनात् अत एव निःशब्दमिव ईरिणमूषरं निर्वृक्षनिर्मानु
षकांतारसदृशमिति यावत् । वदतो वै वदतोपीत्यर्थः तादृशस्यापि वसिष्ठस्य वचनमनादृत्य दुद्रुवुरित्यर्थः ॥

रामा·बा
१५७

ब्राह्मेणतेजसा· ब्रह्मविद्याभ्यासजेनतेजसायुक्तेनब्रह्मदंडेनकरधृतेनग्रसतेस्मेत्यन्वयः ब्राह्मेणेव
तेजसाब्राह्मतेजः शमनस्पसाध्यत्वादितिभावः १६ त्रैलोक्यमोहनं· भयात्त्रिलोकीचित्तमूर्छाकरं
रौद्रंस्मरणेपिभयदं। सुदारुणाम्। नारसिंहवीरभद्रादिवत्घोरमितिपाठांतरंतुल्योऽर्थः १७ रौद्रदारु

तदप्यस्त्रंमहाघोरंब्राह्मंब्राह्मेणतेजसा॥ वसिष्ठोग्रसतेसर्वंब्रह्मदंडेनराघव॥१६॥ ब्र
ह्मास्त्रेग्रसमानस्पवसिष्ठस्पमहात्मनः॥ त्रैलोक्यमोहनंरौद्रंरूपमासीत्सुदारुणं॥१७॥रोम
कूपेषुसर्वेषुवसिष्ठस्पमहात्मनः॥मरीच्यइवनिष्पेतुरग्नेर्धूमाकुलार्चिषः॥१८॥प्राज्वलत्ब्र
ह्मदंडश्चवसिष्ठस्पकरोद्यतः॥ विधूमइवकालाग्निर्यमदंडइवापरः॥१९॥ततोस्तुवन्मु
निगणावसिष्ठंजपतांवरं॥ अमोघंतेबलंब्रह्मंस्तेजोधारयतेजसा॥२०॥ ॥

१५७

णत्वेउपपादयति· रामेत्यादि· रोमकूपेषुरोमकुपेभ्यः मरीच्योविस्फुलिंगः ऋषेर्विश्वामित्रब्रह्मा
कुलत्वात्· धूम्राकुलार्चिस्त्वामग्नेर्विशेषणं॥१८॥ विधूमःकालाग्निरिवब्रह्मदंडश्च·प्राज्वलत्· तत्सम
र्पितब्रह्मतेजसेतिभावः॥१९॥ ततोऽस्तुवन्साधुसाधित्युपश्लोकितवंतः हेब्रह्मन्तेबलंअमोघम
स्त्र· अरातावविसर्जनिनादीणामस्त्र· प्रतिब्रह्मास्त्रमाप्रयुंक्ष्वेतियावत्· पारक्यंतेजः स्वतेजसासहजे

रामः
१५७

वा॰रा॰बाल॰ स॰ ५६ टी॰ ४०

त्त्रियपांसनेत्युक्तास्थितस्यतस्यवसिष्ठस्यब्रह्मदंडेनगाधिपुत्रस्याग्नेयंशांतमासीत्॥४॥५॥६॥७॥८

तस्यास्त्रंगाधिपुत्रस्यघोरमाग्नेयमुत्तमं॥ब्रह्मदंडेनतच्छांतमग्नेर्वेगइवांभसा॥५॥वारु
णंचैवरौद्रंचऐंद्रंपाशुपतंतथा॥ऐषीकंचापिचिक्षेपकुपितोगाधिनंदनः॥६॥मानवं
मोहनंचैवगांधर्वंस्वापनंतथा॥जृंभणंमोहनंचैवसंतापनविलापने॥७॥शोषणंदा
रणंचैववज्रमस्त्रंसुदुर्जयं॥ब्रह्मपाशंकालपाशंवारुणंपाशमेवच॥८॥पिनाक
मस्त्रंदयितंशुष्कार्द्रेअशनीतथा॥दंडास्त्रमथपैशाचंक्रौंचमस्त्रंतथैवच॥९॥धर्म
चक्रंकालचक्रंविष्णुचक्रंतथैवच॥वायव्यंमथनंचैवअस्त्रंहयशिरस्तथा॥१०॥
शक्तिद्वयंचचिक्षेपकंकालंमुसलंतथा॥वैद्याधरंमहास्त्रंचकालास्त्रमथदारुणं॥११॥
त्रिशूलमस्त्रंघोरंचकापालमथकंकणं॥एतान्यस्त्राणिचिक्षेपसर्वाणिरघुनंदन॥१२॥
वसिष्ठेजपतांश्रेष्ठेतदद्भुतमिवाभवत्॥तानिसर्वाणिदंडेनग्रसतेब्रह्मणःसुतः॥१३॥
तेषुशांतेषुब्रह्मास्त्रंक्षिप्तवान्गाधिनंदनः॥तदस्त्रमुद्यतंदृष्ट्वादेवाःसाग्निपुरोगमाः॥१४॥
देवर्षयश्चसंभ्रांतागंधर्वाःसमहोरगाः॥त्रैलोक्यमासीत्संत्रस्तंब्रह्मास्त्रेसमुदीरिते॥१५॥

यितंशिवस्येतिशेषः॥९॥१०॥११॥१२॥ग्रसतेस्म॥१३॥अग्निपुरोगमोवायुःतत्सहिताःअग्निसहितोवायुःपुरोग
मोयेषांतेइत्यर्थः॥१४॥समुदीरितेप्रयुक्ते॥१५॥

५॥६॥ देवैः सहत्रिविष्टपं स्वर्गं गत्वा तदनुस्वं लोकं गतः लोकानां भूरादीनां॥७॥ समन्युः सदैन्यः संप्रत्येवेदं व
चः सुमहत्तितपः सिक्तेपि सर्षिगणा देवा मां राजर्षिरित्येव विदुः॥ अवगच्छंतितस्मादस्पतपसः तद्दा
ह्मणत्वं फलं नास्तिन भवती तिमन्ये॥८॥९॥ परमाप्तवान् परमात्मध्यानवान् परमधीरश्च॥१०॥११

अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनं॥ जिताराजर्षिलोकास्तेतपसाकुशिकात्मज॥५॥
अनेनतपसात्वां हिराजर्षिरिति विद्महे॥ एवमुक्त्वा महातेजाजगामसहदैवतैः॥६॥ त्रिवि
ष्टपं ब्रह्मलोकं लोकानां परमेश्वरः॥ विश्वामित्रोपितच्छ्रुत्वा ह्रियाकिंचिदवाङ्मुखः॥७॥ दुःखे
नमहताविष्टः समन्युरिदमब्रवीत्॥ तपश्चसुमहत्तप्तंराजर्षिरितिमां विदुः॥८॥ देवाः सर्षिगणाः
सर्वेनास्तिमन्येतपः फलं॥ एवं निश्चित्यमनसाभूयएव महातपाः॥९॥ तपश्चचारधर्मात्माका
कुत्स्थपरमात्मवान्॥ एतस्मिन्नेवकालेतुसत्यवादी जितेंद्रियः॥१०॥ त्रिशंकुरितिविख्यातइक्ष्वा
कुकुलनंदनः॥ तस्यबुद्धिःसमुत्पन्नायजेयमितिराघव॥११॥ गच्छेयंस्वशरीरेण देवतानांपरां
गतिं॥ वसिष्ठंससमाहूयकथयामासचिंतितं॥१२॥ अशक्यमितिचाप्युक्तोवसिष्ठेनमहा
त्मना॥ प्रत्याख्यातोवसिष्ठेनसययौदक्षिणां दिशं॥१३॥ ततस्तत्कर्मसिध्यर्थं पुत्रांस्तस्यगतो
नृपः॥ वासिष्ठादीर्घतपसस्तपोयत्राहितेपिरे॥१४॥

गच्छेयंयज्ञबलेनेतिशेषः देवतानांपराग
तिः स्वर्गः॥१२॥ अशक्यत्वकथनपूर्वकं प्रत्याख्यानबीजं प्रसिद्धं त्रिशंकुत्वमेवेतिपुराणेषुस्पष्टं॥१३॥
तत्कर्मसशरीरस्वर्गप्रापक [illegible] तिशेषः॥१४॥

नन्वरौ स्थितेकथमप्रतियोगो ऽतत्राह निगृहीतइति ब्रह्मास्त्रग्रासेननष्टसामर्थ्यः स्वतएवमतप्रायोजात इत्यर्थः ॥२१॥ शमंचक्रेप्रतियोगितो ऽरातिनाशनादुपरतइत्यर्थः विनिकृतः निरस्तसर्वशक्तिः ॥२२॥ क्षत्रियब लंधिक् केवलंनिंद्यंबलमित्यर्थः ब्रह्मतेजोबलंप्रशस्तंबलं ॥२३॥ प्रसन्नेंद्रियमानसः परित्यक्तक्षत्रस्वभा

निगृहीतस्त्वयाब्रह्मन्विश्वामित्रोमहाबलः ॥ अमोघंतेबलंश्रेष्ठंलोकाःसंतुगतव्यथाः ॥२१॥ एव मुक्तोमहातेजाःशमंचक्रेमहातपाः ॥ विश्वामित्रोविनिकृतोविनिश्वस्येदमब्रवीत् ॥२२॥ धिग्बलंक्ष त्रियबलंब्रह्मतेजोबलंबलं ॥ एकेनब्रह्मदंडेनसर्वास्त्राणिहतानिमे ॥२३॥ तदेतत्प्रसमीक्ष्याहंप्र सन्नेंद्रियमानसः ॥ तपोमहत्समास्थास्येयद्वैब्रह्मत्वकारणं ॥२४॥ इत्यार्षेश्रीरा० बा० षट्पंचाशः सर्गः ॥५६॥ ततःसंतप्तहृदयःस्मरन्निग्रहमात्मनः ॥ विनिश्वस्यविनिश्वस्यकृतवैरोमहात्मना ॥१॥ सदक्षिणांदिशंगत्वामहिष्यासहराघव ॥ ततापपरमंघोरंविश्वामित्रोमहातपाः ॥२॥ फलमूलाश नोदांतश्चचारपरमंतपः ॥ अथास्यजज्ञिरेपुत्राःसत्यधर्मपरायणाः ॥३॥ हविष्पंदोमधुष्पंदोदृढनेत्रो महारथः ॥ पूर्णेवर्षसहस्रेतुब्रह्मालोकपितामहः ॥४॥

वइतियावत् ॥२४॥ इति षट्पंचाशःसर्गः ॥५६॥ ततइति कृतवैरइति इदमेवतपोनाशकमस्य ॥१॥ ततापतपश्चकारेत्यर्थः ॥२॥ तपसोघोरत्वंदर्शयति फलेत्यादि दांतोजितेंद्रियः पुत्राहविष्पंदादयः ॥३॥ ब्रह्मर्षित्वायब्रह्मविद्ययातपःकरणात्तदधिदेवतत्वात्

क्रोधसमन्वितमिति-ऋषिपुत्रशतविशेषणं ॥१॥ दुर्मेधः दुर्बुद्धे शाखांतरं याजनादिनास्मदन्यं कांतरं ॥२॥ न चातिक्रमितुं शक्यमिक्ष्वाकुभिरितिशेषः ॥३॥ सोवाचेति-सोचिलोपेचेदितिसाधुः तं क्रतुं यमशक्य मित्युवाच तं यष्टुमित्यर्थः ॥ कथं च कथमपि न शक्ता इत्यर्थः ॥४॥ बालिशोऽज्ञः ॥ त्रैलोक्यस्यापि सिध्य

ततस्त्रिशंकोर्वचनं श्रुत्वा क्रोधसमन्वितं ॥ ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥१॥
प्रत्याख्यातोसि दुर्मेधो गुरुणा सत्यवादिना ॥ तं कथं समतिक्रम्य शाखांतरमुपेयिवान् ॥२॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ॥ न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥३॥ अश
क्यमिति सोवाच वसिष्ठो भगवानृषिः ॥ तं वयं वै समाहर्तुं क्रतुं शक्ताः कथं च न ॥४॥ बालिश
स्त्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः ॥ याजने भगवान् शक्तस्त्रैलोक्यस्यापि पार्थिव ॥५॥ अवमा
नं कथं कर्तुं तस्य शक्ष्यामहे वयं ॥ तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरं ॥६॥ स राजा पुनरे
वैतानिदं वचनमब्रवीत् ॥ प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि ॥७॥ अन्यां गतिं गमि
ष्यामि स्वस्ति वोस्तु तपोधनाः ॥ ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितं ॥८॥

र्थं याजने इत्यर्थः ॥ भगवान् वसिष्ठः ॥५॥ अवमानं तेनासाध्यतयोक्तार्थस्य साधनरूपं ॥६॥ एता न् वासिष्ठान् ॥७॥ अन्यां गतिं याजकांतरं ॥ घोराभिसंहितं घोराभिप्रायसंयुक्तं ॥ कुलगुर्वतिक्रम णोऽन्याश्रयस्य कुलनाशहेतुतया तदभिप्रायस्य घोरत्वं ॥८॥

शतशब्देनस्वावयवगतवहुत्वेनवहुवचनं अनभिधानात्॥ अतः वसिष्ठपुत्रा नित्यनेन च सामानाधिकरण्यं
१५ ह्रियातत्पितृकृतप्रत्याख्यानजया महात्मन इति द्वितीयार्थे महात्मान इत्यार्षं॥१६॥ शरणापान् रक्ष
णसमर्थान् शरणं गतः अन्येषां रक्षणं शरणं गतो पि शरणत्वं प्राप्तो पीत्यर्थः॥१७॥१८॥ ब्राह्मणान् अन्व

त्रिशंकुस्तु महातेजाः शतं परमभास्वरं॥ वसिष्ठपुत्रान्ददृशे तप्यमानान्मनस्विनः॥१५॥ सो भिगम्य
महात्मानः सर्वानेव गुरोः सुतान्॥ अभिवाद्यानुपूर्व्येण ह्रिया किंचिदवाङ्मुखः॥१६॥ अब्रवीत्सम
हात्मानः सर्वानेव कृतांजलिः॥ शरणं वः प्रपन्नो हं शरणापान्शरणं गतः॥१७॥ प्रत्याख्यातो हि भद्रं वो व
सिष्ठेन महात्मना॥ यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ॥१८॥ गुरुपुत्रानहं सर्वान्नमस्कृत्य प्रसा
दये॥ शिरसा प्रणतो याचे ब्राह्मणांस्तपसिस्थितान्॥१९॥ ते मां भवंतः सिध्यर्थं याजयंतु समाहि
ताः॥ सशरीरो यथाहं वै देवलोकमवाप्नुयां॥२०॥ प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः॥ गु
रुपुत्रानृते सर्वान्नाहं पश्यामि किंचन॥२१॥ इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः॥ तस्माद
नंतरं सर्वे भवंतो दैवतं मम॥२२॥ इत्यार्षे श्रीरा॰ बा॰ सप्तपंचाशः सर्गः॥५७॥ राम

र्थं ब्राह्मणान्॥१९॥ सिध्यर्थं सशरीरस्वर्गगमनसिध्यर्थं॥२०॥ गुरुपुत्रानृते तान्विना अन्यां कां च गनगति
महं न पश्यामीत्यन्वयः॥२१॥ अयं श्लोकः प्रक्षिप्त इति कतकस्वरसः॥ तस्मादिक्ष्वाकुणां परमगतिरू
पात् पुरोधसो वसिष्ठादनंतरमित्यर्थः॥२२॥ इति सप्तपंचाशः सर्गः॥५७॥ ॥

१७ यं काममुद्दिश्य गतस्तं काममनवाप्य नैनावदेव। अपितु विपर्ययो जातिभ्रंशो वंवेषरूपः काममाह सशरीर इत्यादि इतीत्थमस्य काम इति शेषः सौम्यदर्शनेति संबोधनं॥ १८ नत्वनयापि तत्फलं सशरीरस्वर्गप्राप्तिरूपं नाप्तमित्यन्वयः॥ अनुक्तं न कृतं त्वयेति चेन्नेत्याह॥ अनृतमिति॥ १९॥ कृच्छ्रेष्वपि गतोऽ। न तं नव

अब्रवीत्प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम्॥ प्रत्याख्यातोस्मि गुरुणा गुरुपुत्रैस्तथैव च॥१७॥
अनवाप्यैव तं काममया प्राप्तो विपर्ययः॥ सशरीरो दिवं यायामिति मे सौम्यदर्शन॥१८॥
मया चेष्टं क्रतुशतं तच्च नावाप्यते फलं॥ अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन॥१९॥
कृच्छ्रेष्वपि गतः सौम्य क्षत्रधर्मेण ते शपे॥ यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः॥२०॥
गुरवश्च महात्मानः शीलवृत्तेन तोषिताः॥ धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः॥२१॥
परितोषं न गच्छन्ति गुरवो मुनिपुंगव॥ दैवमेव परं मन्ये पौरुषं तु निरर्थकम्॥२२॥

त्येइत्यन्वयः॥ क्षत्रधर्मेणान्तसाक्षितया॥२०॥ शीलं सद्गुणाः वृत्तमाचारः इच्छतो ममेति शेषः॥२१॥ नगच्छन्ति नगच्छन्तिस्म॥ यदेवमतो दैवमेव प्रारब्धफलमदृष्टमेव॥ परं श्रेष्ठं हिताहितप्रापणे। पौरुषं इदानीतनधर्मानुष्ठानं निरर्थकं॥ प्रारब्धतिरस्कारे दुर्बलमित्यर्थः॥२२॥

चंडालत्वंगमिष्यसीतिशेपुरितियोजना· तादृशापापिष्ठदर्शनस्यपापजनकत्वात्· स्वस्वाश्रमप्रवेशस्ते
षां॥९॥ परुषोरूत्तांगः ध्वस्तमूर्धजः रूक्षकेशः॥१०॥ चिताश्मशानेतत्रभवंपुष्पभस्मादिमाल्यांग
रागोयस्य· अयोविकारआयसंतदाभरणःत्यजपत्यक्ता॥११॥ अनुगामिनः सहगतः प्राङ्वन्त

शेपुः परमसंक्रुद्धाश्चंडालत्वंगमिष्यसि॥इत्युक्त्वातेमहात्मानोविविशुःस्वंस्वमाश्रमं॥९॥
अथरात्र्यांव्यतीतायांराजाचंडालतांगतः॥नीलवस्त्रधरोनीलः पुरुषोध्वस्तमूर्धजः॥१०॥ चि
त्यमाल्यांगरागश्चआयसाभरणोभवत्॥तं दृष्ट्वामंत्रिणः सर्वेत्यज्यचंडालरूपिणं॥११॥ प्रा
इवन्सहितारामपौरायेस्यानुगामिनः॥एकोहिराजाकाकुत्स्थजगामपरमात्मवान्॥१२॥
दह्यमानोदिवारात्रंविश्वामित्रंतपोधनं॥विश्वामित्रस्तुतंदृष्ट्वाराजानंविफलीकृतं॥१३॥
चंडालरूपिणंरामसुनिःकारुण्यमागतः॥कारुण्यात्सम्महातेजावाक्यंपरमधार्मिकः॥१४॥
इदंजगादभद्रंतेराजानंघोरदर्शनं॥किमागमनकार्यंतेराजपुत्रमहाबल॥१५॥ अयो
ध्याधिपतेवीरशापाच्चंडालतांगतः॥अथतद्वाक्यमाकर्ण्यराजाचंडालतांगतः॥१६॥

त्यक्तागताः परमाप्तवान्धीरः॥१२॥ दह्यमानइत्यस्यदुःखेत्यादिः विश्वामित्रंजगामेतिपूर्वेणान्वयः
वसिष्ठवैरित्वात्· विफलीकृतंवसिष्ठतत्पुत्रैर्विनाशितेहिकामुष्मिकार्ये॥१३॥१४॥ यस्त्वंशापा
त्चंडालतांगतस्तस्यतेइहागमनकारणंकिमित्यन्वयः॥१५॥१६॥

शिष्याणांच ध्यानयने आज्ञा॥७॥ सुहृदः स्वस्य॰ स्वस्व ऋत्विक्सहितान्॰ तद्विशेषणं सुबहुश्रुतानिति॰ यदि
ति॰ आहुतोन्योवा॰ अनादृतं उपेक्षारूपं॰ चंडालयाजनरूपनिंदात्मकं वा॰ यद्वाक्यं ब्रूयात्तत्सर्वमुक्तमखि
लेन ममाख्येयं॥८॥९॥१०॥ तितव॥११॥ सर्वदेशेषु इत्यस्य स्थिता इतिशेषः॰ आगच्छन्नित्यस्य केचिदितिशे

सर्वान्शिष्यान्समाहूय वाक्यमेतदुवाच ह॥ सर्वान्षीन्सवासिष्ठानानयध्वं ममाज्ञया॥७॥
सशिष्यान्सुहृदश्चैव सऋत्विजः सुबहुश्रुतान्॥ यदन्यो वचनं ब्रूयान्मद्वाक्यबलचोदितः॥८॥
तत्सर्वमखिलेनोक्तं ममाख्येयमनादृतं॥ तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया॥९॥ आज
ग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः॥ ते च शिष्याः समागम्य मुनिं ज्वलिततेजसं॥१०॥ ऊचु
श्च वचनं सर्वं सर्वेषां ब्रह्मवादिनां॥ श्रुत्वा ते वचनं सर्वे समायांति द्विजातयः॥११॥ सर्वदेशे
षु चागच्छन्वर्जयित्वा महोदयं॥ वासिष्ठं यच्छतं सर्वं क्रोधपर्याकुलाक्षरं॥१२॥ यथाह वच
नं सर्वं शृणु त्वं मुनिपुंगव॥ क्षत्रियो याजको यस्य चंडालस्य विशेषतः॥१३॥ कथं सदसि भो
क्तारो हविस्तस्य सुरर्षयः॥ ब्राह्मणा वा महात्मानो भुक्त्वा चांडालभोजनम्॥१४॥

षः महोदयं तन्नामनमषिं॰ वासिष्ठं यच्छतं सर्वं तच्च वर्जयित्वेति योजना॰ तद्वाशिष्ठशतं क्रोधपर्या
कुलाक्षरं॰ यथा येन प्रकारेण वचनमाह तत्सर्वं शृणु इत्यर्थः॰ क्षत्रिय इत्यादि॰ ब्राह्मणस्यैव याजनाधि
कारात्॰ चंडालस्य यज्ञेऽनधिकाराच्च॥१२॥१३॥ सुराणां देवतात्वेन भोक्तृत्वं॰ ऋषीणां ऋत्विक्त्वेन यज्ञ

दैवमुक्तं आक्रम्यते अभिभूयते। परमा गतिः साक्षादितरतिरस्कारेण हि कसुखदुःखदं प्रसादं दैवानुकूल्यसमर्थं त्वदीयं प्रसादमिच्छतो मे प्रसादं कर्त्तुमर्हसि। दैवेनोपहतं तिरस्कृतमिहानुष्ठीयमानं कर्म यस्य॥२३॥२४॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डेऽष्टपंचाशः सर्गः॥५८॥ उक्तेति

दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः॥ तस्य मे परमार्तस्य प्रसादमभिकांक्षतः॥ कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः॥२३॥ नान्यां गतिं गमिष्यामि नान्यच्छरणमस्ति मे॥ दैवं पुरुषकारेण निवर्तयितुमर्हसि॥२४॥ इत्यार्षे श्रीरा० बाल० अष्टपंचाशः सर्गः॥५८॥ उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः॥ अब्रवीन्मधुरं वाक्यं साक्षाच्चंडालतां गतं॥१॥ इक्ष्वाको स्वागतं वत्स जानामि त्वां सुधार्मिकं॥ शरणं ते प्रदास्यामि मा भैषीर्नृपपुंगव॥२॥ अहमामंत्रये सर्वान्महर्षीन्पुण्यकर्मणः॥ यज्ञसाह्यकरान्राजंस्ततो यक्ष्यसि निर्वृतः॥३॥ गुरुशापकृतं रूपं यदिदं त्वयि वर्तते॥ अनेन सह रूपेण सशरीरो गमिष्यसि॥४॥ हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप॥ यस्त्वं कौशिकमागम्य शरण्यं शरणागतः॥५॥ एवमुक्त्वा महातेजाः पुत्रान्परमधार्मिकान्॥ व्यादिदेश महाप्राज्ञान्यज्ञसंभारकारणात्॥६॥

॥१॥२॥ यज्ञसाह्यं यज्ञसाहाय्यं॥३॥ अनेन रूपेण गुरुशापकृतेन च चंडालरूपेण। ऋषिशापस्यान्यथाकर्तुमशक्यत्वात्। गमिष्यसि स्वर्गमिति शेषः। जातिचांडालत्वाभावाच्च। यज्ञप्रवृत्तिः॥४॥ हस्तप्राप्तं अनायासलभ्यं। तत्र हेतुः यस्त्वमित्यादि॥५॥ यज्ञसंभारकारणात्।

वर्तयिष्यतिप्राप्स्यति॥ अत्रेदं बोध्यं क्षत्रियत्वेयाजनेप्रवृत्तिः तत्रापिशापदूषितचंडालयाजनेप्रवृत्तिः ब्राह्म
णेषुवासिष्ठेषुवधादिकृच्छापकृत्पापप्रवृत्तिः एतत्सर्वब्राह्मण्येकृयाप्रवर्त्तमानतपसोविनाशायदे
वकृतमितिबोध्यं॥ २२॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेबालकांडएकोनषष्ठितमःस

दीर्घकालंममक्रोधाद्दुर्गतिंवर्त्तयिष्यति॥ एतावदुक्त्वावचनंविश्वामित्रोमहातपाः॥ विररा
ममहातेजाऋषिमध्येमहामुनिः॥ २२॥ इत्यार्षेश्रीरामायणेबालकांडएकोनषष्ठितमःसर्गः॥
तपोबलहतान्ज्ञात्वावासिष्ठान्समहोदयान्॥ ऋषिमध्येमहातेजाविश्वामित्रोऽभ्यभाषत॥ १॥
अयमिक्ष्वाकुदायादस्त्रिशंकुरितिविश्रुतः॥ धर्मिष्ठश्चवदान्यश्चमांचैवशरणंगतः॥ २॥
स्वेनानेनशरीरेणदेवलोकजिगीषया॥ यथायंस्वशरीरेणदेवलोकंगमिष्यति॥ ३॥ तथा
प्रवर्त्यतांयज्ञोभवद्भिश्चमयासह॥ विश्वामित्रवचःश्रुत्वासर्वएवमहर्षयः॥ ४॥ ऊचुःस
मेताःसहसाधर्मज्ञाधर्मसंहितं॥ अयंकुशिकदायादोमुनिःपरमकोपनः॥ ५॥ यदाहव
चनंसम्यगेतत्कार्यंनसंशयः॥ अग्निकल्पोहिभगवान्शापंदास्यतिरोषतः॥ ६॥

र्गः॥ ५९॥ ज्ञात्वायोगबलेन॥ १॥ इक्ष्वाकुदायादःतद्वंश्यः एवमादिगुणैर्योगाधिकारित्वंसूचितं॥ २॥ स्वंप्र
तिशरणागमनेहेतुमाह स्वेनेत्यादि॥ ३॥ प्रवर्त्यतांआरभ्यतां॥ ४॥ धर्मसंहितमितिक्रियाविशेषणं॥ ऊ
चुरित्यस्यअन्योन्यमितिशेषः यदाहेत्यादि यदाहसम्यगित्यादि॥ ५॥ अग्निकल्पः अजितकामक्रोधत्वात्

पालिता इति व्यंगोक्तिः वचननैष्ठुर्यं अर्थ आद्यजंतनैष्ठुर्यं वद्वचनमित्यर्थः ॥१५॥ वासिष्ठा इत्याद्यर्थं पूर्वा
न्वयि समहोदयाः महोदयेन सहिताः ॥१६॥ अदुष्टत्वे हेतुः तपउग्रमिति तपस्तेजसा क्षत्रियस्य चं
डालयाजनमपि न दोषायेति ज्ञात्वापि यत् दूषयंति स्म ॥१७॥ तस्माद्भस्मीभूता इत्यादि ॥१८॥ सप्तजाति

कथं स्वर्गं गमिष्यंति विश्वामित्रेण पालिताः एतद्वचनं नैष्ठुर्यम् ऊचुः संरक्तलोचनाः ॥१५॥ वासि
ष्ठा मुनिशार्दूल सर्वे सहमहोदयाः तेषां तद्वचनं श्रुत्वा सर्वेषां मुनिपुंगवः ॥१६॥ क्रोधसंर
क्तनयनः सरोषमिदमब्रवीत् ॥ यद्दूषयंत्यदुष्टं मां तपउग्रं समास्थितं ॥१७॥ भस्मीभूता
दुरात्मानो भविष्यंति न संशयः ॥ अद्य ते कालपाशेन नीता वैवस्वतक्षयं ॥१८॥ सप्तजातिश
तान्येव मृतपाः संभवंतु ते ॥ श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः ॥१९॥ विकृताश्च विरूपा
श्च लोकाननुचरंत्विमान् ॥ महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत् ॥२०॥ दूषितः सर्वलोकेषु
निषादत्वं गमिष्यति ॥ प्राणातिपातनिरतो निरनुक्रोशतां गतः ॥२१॥ राम

शतानि सप्तजन्मशतानि मृतपाः शववस्त्रादिहारिणः ॥ मुष्टिका नाम तन्नामानः ॥ इदानीं डोंबा
इति प्रसिद्धाः ॥१९॥ विकृताः विकृतव्यापाराः ॥ विरूपाः विकृताकाराः अदूष्यं त्वा दूषयन्निति
प्राग्वत् ॥२०॥ प्राणातिपातनिरतः प्राणिनां प्राणनाशोद्यतः ॥ अनुक्रोशो दया ॥२१॥

स्वशरीरेणादुष्प्रापमित्यन्वयः स्वियदियास्वार्जितंस्वार्थमर्जितंयत्किंचिदपितपसःफलंसुकृतमस्ति ॥१४॥ नदाहः हेराजन्त्वंतस्यतेजसावैभवेनसशरीरोदिवंगच्छ ॥ कृत्वात्वासुनरुक्तमादिनदोषः ॥१५॥ मुनीनांपश्यतांमुनिषुपश्यत्सु ॥१६॥ स्वर्गकृतालयःस्वर्गेनिजपुण्यकर्मणाकृतआलयोयस्यतादृशः स्वर्गवासार्होनासीत्यर्थः

दुःप्रापंस्वशरीरेणस्वर्गंगच्छनरेश्वर ॥ स्वार्जितंकिंचिदप्यस्तिमयाहितपसःफलं ॥१४॥ राजंस्त्वंतेजसातस्यसशरीरोदिवंव्रज ॥ उक्तवाक्येमुनौतस्मिन्सशरीरोनरेश्वरः ॥१५॥ दिवंजगामकाकुत्स्थमुनीनांपश्यतांतदा ॥ स्वर्गलोकंगतंदृष्ट्वात्रिशंकुंपाकशासनः ॥१६॥ सहसर्वैःसुरगणैरिदंवचनमब्रवीत् ॥ त्रिशंकोगच्छभूयस्त्वंनासिस्वर्गकृतालयः ॥१७॥ गुरुशापहतोमूढपतभूमिमवाक्शिराः ॥ एवमुक्तोमहेंद्रेणत्रिशंकुरपतत्पुनः ॥१८॥ विक्रोशमानस्त्राहीतिविश्वामित्रंतपोधनं ॥ तच्छ्रुत्वावचनंतस्यक्रोशमानस्यकौशिकः ॥१९॥ रोषमाहारयत्तीव्रंतिष्ठतिष्ठेतिचाब्रवीत् ॥ ऋषिमध्येसतेजस्वीप्रजापतिरिवापरः ॥२०॥ सजनद्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः ॥ नक्षत्रवंशमपरमसृजत्क्रोधमूर्छितः ॥२१॥

टी॰ ॥१७॥ तत्रहेतुः गुरुशापेत्यादि ॥१८॥ ॥१९॥ आहारद्दत्अकरोत् २०॥ सजन्निति यथाउत्तरतोध्रुवःअनस्तिष्ठति एवंत्रिशंकुस्तिष्ठतुतस्यपरितोयथासप्तर्षिमंडलंतथाअस्यापिभवत्वितिप्राशयःसजन्निति हेतौशतृप्रत्ययःसृष्टिंकुर्वन्नतद्धेतोःदक्षिणमार्गस्थानअपरानसजत्पुनःसप्तविंशतिनक्षत्रमालामसृजत् ॥२१॥ ॥ राम ॥

तस्मादिति ॥७ ततः सशरीरस्य स्वर्गगमनाय यज्ञः प्रवर्त्यतां · सर्वे भवंतः स्वस्वकल्पं अधितिष्ठत प्रारब्धं ताः क्रियाः स्वस्वार्त्विज्यकर्माणि ॥८ याजकः अध्वर्युरिति यावत् · अत एव वक्ष्यति · स्रुवमुद्यम्येति ॥९ यथाकल्पं शास्त्रानुसारेण यथाविधि यथासंप्रदायानुष्ठानं · कल्पशास्त्रे नानापक्षोपन्यासस्थले अनुष्ठेयांशे

तस्मात्प्रवर्त्यतां यज्ञः सशरीरो यथा दिवि । गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥७॥
ततः प्रवर्त्यतां यज्ञः सर्वे समधितिष्ठत । एवमुक्त्वा महर्षयः संजगृहुस्ताः क्रियास्तदा ॥८॥ याजकश्च महातेजा विश्वामित्रोऽभवत्क्रतौ । ऋत्विजश्चानुपूर्व्येण मंत्रवन्मंत्रकोविदाः ॥९॥
चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि । ततः कालेन महता विश्वामित्रो महातपाः ॥१०॥
चकारावाहनं तत्र भागार्थं सर्वदेवताः । नाभ्यागमंस्तदा तत्र भागार्थं सर्वदेवताः ॥११॥ ततः कोपसमाविष्टो विश्वामित्रो महामुनिः । स्रुवमुद्यम्य सक्रोधस्त्रिशंकुमिदमब्रवीत् ॥१२॥
पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर । एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ॥१३॥

संप्रदायस्यैव शरणत्वात् · महता कालेन अधिककालसाध्ययत्नपूर्वकमंत्रपाठेन ॥१०॥ सर्वदेवताः प्रतीति शेषः तदा तथापि अनधिकारिणा याजनाद्यजनाच्च ॥११॥ उद्यम्य ऊर्ध्वं क्रोधेन प्रक्षिप्य कोपस्यैवाधिकावस्था क्रोधः ॥१२॥ पश्य मे इति · भागार्थं देवानामनागमनेन असाध्यत्वेऽपि स्वतपोत्पयेन त्वामभीष्टं स्वर्गं नयामीति भावः ॥१३॥

वैश्वानरपथात् ज्योतिःशास्त्रप्रसिद्धानादिज्योतिश्चक्रमार्गाद्बहिः ॥ बहिर्देशे एतानितानिनक्षत्राणितिष्ठंत्वि
तिपूर्वेणान्वयः ॥ ३० ॥ तेषुत्वदीयेषुज्योतिःषुनक्षत्रेषुजाज्वलन् भृशंज्वलन् ॥ ३१ ॥ अवाक्शिराः अस्मदुक्त्वा
वाक्शिरस्त्वेवानेनत्रिशंकुःदेवतुल्यसुखवान् तिष्ठतु एतानितवज्योतींषितंअनुयास्यंतिच स्वर्ग

एवंभवतुभद्रंतेतिष्ठंत्वेतानिसर्वशः ॥ गगनेतान्यनेकानिवैश्वानरपथाद्बहिः ॥ ३० ॥ नक्षत्राणि
मुनिश्रेष्ठतेषुज्योतिःषुजाज्वलन् ॥ अवाक्शिरास्त्रिशंकुश्चतिष्ठत्वमरसन्निभः ॥ ३१ ॥ अनुयास्यं
तिचैनानिज्योतींषिनृपसत्तमं ॥ कृतार्थंकीर्तिमंतंचस्वर्गलोकगतंयथा ॥ ३२ ॥ विश्वामित्रस्तुध
र्मात्मासर्वदेवैरभिष्टुतः ॥ ऋषिमध्येमहातेजाबाढमित्येवदेवताः ॥ ३३ ॥ ततोदेवामहात्मानःऋ
षयश्चतपोधनाः ॥ जग्मुर्यथागतंसर्वेयज्ञस्यांतेनरोत्तम ॥ ३४ ॥ इत्यार्षेश्रीरामायणेवाल्मीकीये॰
बालकांडेषष्टितमःसर्गः ॥ ६० ॥ विश्वामित्रोमहातेजाः ॥ प्रस्थितान्वीक्ष्यतानृषीन् ॥ अब्रवीन्न
रशार्दूलसर्वांस्तान्वनवासिनः ॥ १ ॥

लोकगतंयथास्वर्गलोकगतमिवेत्यंतंपूर्वान्वयि ॥ ३२ ॥ बाढ
मित्येवआहेतिशेषः ॥ दुराग्रहस्यानर्थहेतुतांप्रतिसंधायदेवतावचनमंगीचकार ॥ ३३ ॥ ३४ ॥ इतिश्रीरा
माभिरामेश्रीरामीयेरामायणतिलकेबालकांडेषष्टितमःसर्गः ॥ ६० ॥ वनवासिनः ॥ तपोवनवासिनः
तान्स्वाश्रयायज्ञार्थमागतान्प्रस्थितान्वीक्ष्यसर्वान्तानब्रवीदित्यन्वयः ॥ वनवासिनइत्यस्यस्था
नेविनयान्वितानितिपाठांतरं ॥ १ ॥

नक्षत्रवंशं तु इन नक्षत्रगणं ॥२२॥ अन्यमिंद्रं स्वस्रज्यमानस्वर्गस्येतिशेषः ॥ अथवामयास्रज्यमानस्वर्गः अनिंद्रावास्तु ॥ त्रिशंकुरेवतत्रेंद्रोभवत्वित्याशयः एवमिंद्रस्थाने त्रिशंकुं प्रतिष्ठाप्य तस्य परिवारभूतदैवतानि स्रष्टुमुपचक्रमे ॥२३॥ ततइति देवप्रतिसर्गवत्स्वस्यापिप्रतिसर्गं कुर्यात् ॥ इतिहेतोः सुराश्चासुराश्च संभ्रांताः प

दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः ॥ सृष्ट्वा नक्षत्रवंशं च क्रोधेन कलुषीकृतः ॥२२॥ अन्यमिंद्रं करिष्यामि लोकोवा स्यादनिंद्रकः ॥ दैवतान्यपि स क्रोधात्स्रष्टुं समुपचक्रमे ॥२३॥ ततः परमसंभ्रांताः सर्षिसंघाः सुरासुराः ॥ विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥२४॥ अयं राजा महाभाग गुरुशापपरिक्षतः ॥ सशरीरो दिवं यातुं नार्हत्येव तपोधन ॥२५॥ तेषां तद्वचनं श्रुत्वा देवानां मुनिपुंगवः ॥ अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥२६॥ सशरीरस्य भद्रं वस्त्रिशंकोरस्य भूपतेः ॥ आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे ॥२७॥ स्वर्गोस्तु सशरीरस्य त्रिशंकोरस्य शाश्वतः ॥ नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥२८॥ यावल्लोका धरिष्यंति तिष्ठंत्वेतानि सर्वशः ॥ मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुंगवम् ॥२९॥

२व

र्याकुलचिताइत्यर्थः ॥२४॥ अनुनयप्रकारमाह अयंराजेत्यादि गुरुशापेन परिक्षितः चंडालत्वप्राप्तः दिवं ब्रह्मसदनं त्वत्स्रष्टस्वर्गं वा स्वर्गं ॥२५॥२६॥ भद्रंव इत्यनेन अनुनयः ॥२७॥ स्वर्गोस्तु स्वर्गपदवाच्यसुखविशेषानुभवोस्तु ॥२८॥ लोकाः भुवरादि सप्तलोकाः ॥२९॥

सहस्रशो गोभिर्निष्क्रयभूताभिरित्यर्थः ॥९॥१०॥ सपुत्रेति सह इति पृथक् । यदं सोंबरीषः भृगुतुंगं पर्वतशृंगविशेषः ॥११॥१२॥ तं प्रसिद्धतपसमृचीकं इदं वक्ष्यमाणं वचो ब्रवीदिति शेषः । यदि विक्रीणीषे तदा कृतकृत्यो

उपाध्यायवचः श्रुत्वा स राजा पुरुषर्षभ ॥ अन्वियेष महाबुद्धिः पशुं गोभिः सहस्रशः ॥९॥ देशान् जनपदांस्तांस्तान्नगराणि वनानि च ॥ आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः ॥१०॥ स पुत्रसहितं तात सभार्यं रघुनंदन ॥ भृगुतुंगे समासीनमृचीकं संददर्श ह ॥११॥ तमुवाच महातेजाः प्रणम्याभिप्रसाद्य च ॥ ब्रह्मर्षिं तपसा दीप्तं राजर्षिरमितप्रभः ॥१२॥ पृष्ट्वा सर्वत्र कुशलमृचीकं तमिदं वचः ॥ गवां शतसहस्रेण विक्रीणीषे सुतं यदि ॥१३॥ पशोरर्थे महाभाग कृतकृत्योस्मि भार्गव ॥ सर्वे परिगता देशा यज्ञियं न लभे पशुं ॥१४॥ दातुमर्हसि मूल्येन सुतमेकमितो मम ॥ एवमुक्तो महातेजा ऋचीकस्त्वब्रवीद्वचः ॥१५॥ नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन ॥ ऋचीकस्य वचः श्रुत्वा तेषां माता महात्मनां ॥१६॥ उवाच नरशार्दूलमंबरीषमिदं वचः ॥ अविक्रेयं सुतं ज्येष्ठं भगवानाह भार्गवः ॥१७॥ ममापि दयितं विद्धि कनिष्ठं शुनकं प्रभो ॥ तस्मात्कनीयसं पुत्रं न दास्ये तव पार्थिव ॥१८॥

स्मि भवेयं । यतो यज्ञियं यज्ञे पूर्वं परिकल्पितं पशुं क्वापि न लभे ॥१३॥१४॥ इतः एतेषु सार्वविभक्तिकस्तसिः ॥१५॥ कथंचन बहुनापि मूल्येन । अनेनेतरयोरनुमतिः सूचिता । अप्रतिषिद्धमनुमतमिति न्यायात् ॥१६॥१७॥ शुनक इति कनिष्ठपुत्रनाम ॥१८॥

165

दक्षिणां दिशमासमंताद्व्याप्य स्थितोयं त्रिशंकुरूपो महाविघ्नोस्माकं तपोनाशकत्वात्प्रवृत्तस्तच्छापाक्रांतत्वाच्च
यं देशोतः परंतपोऽयोग्य इति भावः ॥२॥ विशालायां विशालतपोवनवत्यां पश्चिमायां वर्तमानेषु पुष्करेषु त
त्तीरतपोवनेष्वित्यर्थः ॥ महात्मन इति महात्मान इत्यर्थकं ॥ ऋषिसंबोधनमदीर्घत्वमार्षं ॥३॥४॥५॥ विप्र पु

महान्विघ्नः प्रवृत्तोयं दक्षिणामास्थितो दिशं ॥ दिशमन्यां प्रपत्स्यामस्तत्र तप्स्यामहे तपः ॥२॥
पश्चिमायां विशालायां पुष्करेषु महात्मनः ॥ सुखं तपश्चरिष्यामः सुखं तद्धि तपोवनं ॥३॥ एवमु
क्त्वा महातेजाः पुष्करेषु महामुनिः ॥ तप उग्रं दुराधर्षं तेपे मूलफलाशनः ॥४॥ एतस्मिन्नेव काले
तु अयोध्याधिपतिर्महान् ॥ अंबरीष इति ख्यातो यष्टुं समुपचक्रमे ॥५॥ तस्य वै यजमानस्य प
शुमिंद्रो जहार ह ॥ प्रणष्टे तु पशौ विप्रो राजानमिदमब्रवीत् ॥६॥ पशुरभ्याहृतो राजन्प्रणष्ट
स्तव दुर्नयात् ॥ अरक्षितारं राजानं घ्नंति दोषा नरेश्वर ॥७॥ प्रायश्चित्तं महद्ध्येतन्नरं वा पुरुषर्ष
भ ॥ आनयस्व पशुं शीघ्रं यावत्कर्म प्रवर्तते ॥८॥

रोहितः ॥६॥ अभ्याहृत इदानीमस्माभिरानीतः प
शुस्तव दुर्नयात्त्वत्पापवशात् नावकरक्षिणां प्रमादाद्वा प्रनष्ट इत्यन्वयः ॥ राजपापमाह ॥ अरक्षितारं
प्रजानामिति शेषः ॥७॥ एतत्पशुनाशरूपं महत्प्रायश्चित्तं महतः प्रायश्चित्तस्य कारणं प्रक्रांतं ॥ कर्म या
वत्प्रवर्तते तावत् ततः प्रागेव नष्टपशुमन्विष्यानयः तत्प्रतिनिधित्वेन क्रीत्वा नरं वा पशुमानयेत्यर्थः
॥८॥

रामा॰ बा॰
१६६

तृष्णया पिपासया जिजीविषया च ॥ श्रमेण चेति विषण्णवदनत्वे परमातुरत्वे च हेतुः ॥ ३ ॥ अंके उत्संगे मातुल
त्वात्तत्र पातः बांधवाः कुतो दूरादेव सर्वथा न संत्येवेत्यर्थः ॥ ४ ॥ धर्मेणास्वार्जितेन सर्वेषां शरणं गतानां भा
वनः सर्वेष्टसाधनं एको हि त्वमेवे ॥ ५ ॥ यथा च राजा कृतकार्यः स्यात् ॥ अहं च अव्ययो धर्मलोपाभाववा

166

श्लो ४

तप्यंतमृषिभिः सार्धं मातुलं परमातुरः ॥ विषण्णवदनो दीनस्तृष्णया च श्रमेण च ॥ ३ ॥ पपातांके
मुने राम वाक्यं चेदमुवाच ह ॥ न मेऽस्ति माता न पिता ज्ञातयो बांधवाः कुतः ॥ ४ ॥ त्रातुमर्हसि मां सौ
म्य धर्मेण मुनिपुंगव ॥ त्राता त्वं हि नरश्रेष्ठ सर्वेषां त्वं हि भावनः ॥ ५ ॥ राजा च कृतकार्यः स्यादहं
दीर्घायुरव्ययः ॥ स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमं ॥ ६ ॥ स मे नाथो ह्यनाथस्य भव भव्ये
न चेतसा ॥ पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्विषात् ॥ ७ ॥ तस्य तद्वचनं श्रुत्वा विश्वामित्रो
महातपाः ॥ सांत्वयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ ८ ॥ यत्कृते पितरः पुत्रान् जनयंति शु
भार्थिनः ॥ परलोकहितार्थाय तस्य कालोऽयमागतः ॥ ९ ॥ राम

न॰ दीर्घायुस्तपस्तप्त्वा स्वर्गं प्राप्नुयां तथा कुर्विति शेषः ॥ ६ ॥ किल्विषात् जीवविपत्तिरूपात् भव्येन प्रस
न्नेन पुत्रं औरसं ॥ ७ ॥ ८ ॥ यत्कृते यत्प्रयोजनाय ॥ न देवप्रयोजनमाह ॥ परलोकहितार्थाय परलोकहि
तरूपप्रयोजनाय ॥ तस्य प्रयोजनस्य ॥ ९ ॥

राम
१६६

पितृषुपितॄणांरक्षिष्यामीत्यर्थेरक्ष्येइत्यार्षं ॥१९॥ रामेतिसंबुद्धिः ॥२०॥ मध्यमंमध्यमपुत्रंविक्रेयं ॥ मातापित्रोर्विक्रे
यत्वेनसंमतमन्येर्थादितिशेषः ॥२१॥ ब्रह्मवादिनः मध्यमपुत्रस्य ॥२२॥ गृहीत्वाक्रीत्वा॰ यद्यप्यपत्यस्यदानक्र
यौशास्त्रनिषिद्धौतथापिअनेनकुलह्रानौधर्मार्थमपत्यदानमिवक्रयज्ञायापत्यक्रयोनविगीतइतिसूचि

प्रायेणहिनरश्रेष्ठज्येष्ठाःपितृषुवल्लभाः ॥ मातृणांचकनीयांसस्तस्माद्रक्ष्येकनीयसं ॥१९॥ उक्तवा
क्येमुनौतस्मिन्मुनिपत्न्यांतथैवच ॥ शुनःशेपःस्वयंराममध्यमोवाक्यमब्रवीत् ॥२०॥ पिताज्येष्ठम
विक्रेयंमाताचाहकनीयसं ॥ विक्रेयंमध्यमंमन्येराजपुत्रनयस्वमां ॥२१॥ अथराजामहाबाहोवा
क्यांतेब्रह्मवादिनः ॥ हिरण्यस्यसुवर्णस्यकोटिभीरत्नराशिभिः ॥२२॥ गवांशतसहस्रेणशुनःशेपं
नरेश्वरः ॥ गृहीत्वापरमप्रीतोजगामरघुनंदन ॥२३॥ अंबरीषस्तुराजर्षिरथमारोप्यसत्वरः ॥ शु
नःशेपंमहातेजाजगामाशुमहायशाः ॥२४॥ इत्यार्षेश्रीरामायणेवा॰ एकषष्ठितमः सर्गः ॥६१॥
शुनःशेपंनरश्रेष्ठगृहीत्वातुमहायशाः ॥ व्यश्रमत्पुष्करेराजामध्यान्हेरघुनंदन ॥१॥ तस्यवि
श्रममाणस्यशुनःशेपोमहायशाः ॥ पुष्करेज्येष्ठमागम्यविश्वामित्रंददर्शह ॥२॥

तं॰ पुत्रस्यचैवं
पित्रधीनतोचितेतिचबोधितं ॥२३॥ शुनःशेपंरथमारोप्येत्यन्वयः ॥२४॥ इतिश्रीरामाभिरामेश्रीरामीयेरा
मायणतिलके बालकांडे एककषष्ठितमःसर्गः ॥६१॥ व्यश्रमत्व्यश्राम्यदितिपाठांतरं ॥१॥ विश्रममाणस्येतिवि
श्राम्यतइत्यर्थेआर्षं ॥२॥

जातिषु मुष्टिकजातिषु ॥१७॥ निरामयं सर्वदुःखनाशिकां रक्षां कृत्वा शुनःशेपमुवाच ॥१८॥ वाक्यमाह· पवित्रे
ति· पवित्रपाशाः दर्भरशनाः वैष्णवं विष्णुदेवत्यं· वैष्णवौ वैदेवतयाय्यूपइतिश्रुतेः ॥ वाग्भिराग्नेयमंत्रै

श्वमांसभोजिनः सर्वे वासिष्ठा इव जातिषु ॥ पूर्णां वर्षसहस्रं तु पृथिव्यामनुवत्स्यथ ॥१७॥ कृ
त्वा शापसमायुक्तान्पुत्रान्मुनिवरस्तदा ॥ शुनःशेपमुवाचार्तं कृत्वा रक्षां निरामयां ॥१८॥ पवि
त्रपाशैराबद्धो रक्तमाल्यानुलेपनः ॥ वैष्णवं यूपमासाद्य वाग्भिरग्निमुदाहर ॥१९॥ इंद्रा वि
ष्णू सुरश्रेष्ठौ तौ नौ हि त्वं मुनिपुंगव ॥ इमे च गाथे द्वे दिव्ये गायेथा मुनिपुत्रक ॥ अंबरीषस्य
यज्ञेस्मिंस्ततः सिद्धिमवाप्स्यसि ॥२०॥ शुनःशेपो गृहीत्वा ते द्वे गाथे सुसमाहितः ॥ त्वरया
राजसिंहं तमंबरीषमुवाच ह ॥२१॥ राजसिंह महाबुद्धे शीघ्रं गच्छावहे वयं ॥ निवर्तय
स्व राजेंद्र दीक्षां च समुपाहर ॥२२॥ तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमन्वितः ॥ जगाम नृप
तिः शीघ्रं यज्ञवाटमतंद्रितः ॥२३॥ सदस्यानुमते राजा पवित्रकृतलक्षणं ॥ पशुं रक्तांबरं
कृत्वा यूपे तं समबंधयत् ॥२४॥

रग्निमुदाहरस्तुहि ॥१९॥ इमे मयोपदिश्यमाने इंद्रोपेंद्र
देवत्ये· सिद्धिं जीवितसिद्धिं ॥२०॥२१॥ गच्छावहे इत्यार्षस्तङ्· निवर्तय स्वयज्ञमिति शेषः ॥
समुदाहर कुरु ॥२२॥२३॥ पवित्रैर्दर्भैः रज्जुभिः कृतपशुत्वज्ञापनं· ॥ पशुं कृत्वा यज्ञपशुत्वेन सं
पाद्य स्तंबं बंधयत् राजेति शेषः ॥२४॥

परलोकहितं प्रयोजनमाह· अयमिति· शरणं रक्षणं जीवितमात्रेण जीवितप्रदानमात्रेण प्रियमित्यस्य ममस्व
स्य जीवतो वाक्यकरणादिति स्मृतेः ॥ शुनकवत् परलोकसाधनत्वेन प्रियमित्यर्थः ॥ १० ॥ तत्र प्रवृत्त्यर्थं स्तौति
सर्वे इति· पशुभूता· अस्य राज्ञा पशुत्वेन ग्रहणादेतत्प्रति निधित्वे पशुभूतान् नरेन्द्रस्य यज्ञेऽग्नेस्तर्पितं प्रप

अयं मुनिसुतो बालो मत्तः शरणमिच्छति ॥ अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥ सर्वे सु
कृतकर्माणः सर्वे धर्मपरायणाः ॥ पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छथ ॥ ११ ॥ नाथवांश्च शुनःशे
पो यज्ञश्चाविघ्नतो भवेत् ॥ देवतास्तर्पिताश्च स्युर्मम चापि कृतं वचः ॥ १२ ॥ मुनेस्तद्वचनं श्रुत्वा म
धुच्छन्दादयः सुताः ॥ साभिमानं नरश्रेष्ठ सलीलमिदमब्रुवन् ॥ १३ ॥ कथमात्मसुतान् हित्वा त्राय
सेऽन्यसुतं विभो ॥ अकार्यमिव पश्याम श्वमांसमिव भोजने ॥ १४ ॥ तेषां तद्वचनं श्रुत्वा पुत्रा
णां मुनिपुंगवः ॥ क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ॥ १५ ॥ निःसाध्वसमिदं प्रोक्तं धर्मादपि
विगर्हितं ॥ अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणम् ॥ १६ ॥

च्छथेत्यर्थः ॥ ११ ॥ नाथवान् मया रक्षकवान्
मम युष्मत्पितुः जीवतो वाक्यकरणान्न वचः कृतं भवति ॥ १२ ॥ साभिमानं साहंकारं सलीलं सपरिहासं ॥ १३ ॥
लोकतः शास्त्रतश्चानुचितानुष्ठानत्वेद दृष्टांतः श्वमांसमिवेति ॥ १४ ॥ १५ ॥ साध्वसं भयं पितृत्वप्रयुक्तभी
तिरहितं· जीवतो वाक्यकारणात् धर्मादपि विगर्हितं निरूपणं एवं मद्वाक्यमतिक्रम्य यतो दारुणं पुरुषं
रोमहर्षणं रोमांचरूपविकारजनकं मत्कृतं स्मारितं विशेषः ॥ १६ ॥ राम ॥

३ ॥ परमा रूपादिभिः सर्वोत्तमा ॥ अप्सरा इत्यार्षं ॥ ४ ॥ तत्र सरसि जलदे विद्युतमिव ॥ ५ ॥ कंदर्पकृतो दर्पो मदः

तमेवमुक्त्वादेवेशस्त्रिदिवंपुनरभ्यगात्॥विश्वामित्रोमहातेजाभूयस्तेपेमहत्तपः॥३॥
ततःकालेनमहतामेनकापरमाप्सरा॥पुष्करेषुनरश्रेष्ठस्नातुंसमुपचक्रमे॥४॥
तांददर्शमहातेजामेनकांकुशिकात्मजः॥रूपेणाप्रतिमांतत्रविद्युतंजलदेयथा॥५॥
कंदर्पदर्पवशगोमुनिस्तामिदमब्रवीत्॥अप्सरःस्वागतंतेस्तुवसचेहममाश्रमे॥६॥
अनुगृह्णीष्वभद्रंतेमदनेनविमोहितं॥इत्युक्तासावरारोहातत्रावासमथाकरोत्॥७॥
तपसोहिमहाविघ्नोविश्वामित्रमुपागमत्॥तस्यांवसंत्यांवर्षाणिपंचपंचचराघव॥८॥
विश्वामित्राश्रमेसौम्येसुखेनव्यतिचक्रमुः॥अथकालेगतेतस्मिन्विश्वामित्रोमहामुनिः॥९॥
सव्रीडइवसंवृत्तश्चिंताशोकपरायणः॥बुद्धिर्मुनेःसमुत्पन्नासामर्षारघुनंदन॥१०॥
सर्वंसुराणांकर्मैतत्तपोपहरणंमहत्॥अहोरात्रापदेशेनगताःसंवत्सरादश॥११॥का
ममोहाभिभूतस्यविघ्नोयंसमुपस्थितः॥सनिःश्वसन्मुनिवरःपश्चात्तापेनदुःखितः॥१२॥

६ ॥ अनुगृह्णीष्व भोगदानेनेति शेषः ॥ वरारोहा श्रेष्ठजघना ॥ ७ ॥ पंचपंच दशवर्षाणि ॥ ८ ॥ ९ ॥ सामर्षा देवेषु विघ्नस्य तत्कृतत्वज्ञानात् ॥ १० ॥ तदाह सर्वमिति ॥ अहोरात्रापदेशेन ॥ एकाहोरात्रतुल्यतया ॥ ११ ॥ १२ ॥

इंद्रानुजो विष्णुर्यूपदेवः ॥ अत्र पूर्वमग्निस्तुत्वात्तत्र तौ उपदेशकालेन तथोक्तत्वात् ॥ २५ ॥ सहस्राक्ष इत्युपल
क्षणं विष्णोरपि रहस्यस्तुतिर्विश्वामित्रोपदिष्टा ॥ २६ ॥ समाप्तवान् फलं सम्प्रगाप्तवानित्यर्थः यद्य
पि बन्धुर्बाह्मणो हरिश्चंद्रो हवैधसो त्वाको राजेत्यादिना हरिश्चंद्रयज्ञे शुनःशुक्रस्याजीगर्तिक्षितस्य

सबद्धो पावाग्भिरग्र्याभिरभितुष्टाव वै सुरौ ॥ इंद्रमिंद्रानुजं चैव यथावन्मुनिपुत्रकः ॥ २५ ॥
ततः प्रीतः सहस्राक्षो रहस्यस्तुतितोषितः ॥ दीर्घमायुस्तदा प्रादाच्छुनःशेपाय वासवः ॥ २६ ॥
स च राजा नरश्रेष्ठ यज्ञस्य च समाप्तवान् ॥ फलं बहुगुणं राम सहस्राक्षप्रसादजं ॥ २७ ॥ वि
श्वामित्रोपि धर्मात्मा भूयस्तेपे महातपाः ॥ पुष्करेषु नरश्रेष्ठ दश वर्षशतानि च ॥ २८ ॥ इत्या
र्षे श्रीरा॰ वा॰ द्विषष्टितमः सर्गः ॥ ६२ ॥ पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिं ॥ अभ्यगच्छ
न्सुराः सर्वे तपः फलचिकीर्षवः ॥ १ ॥ अब्रवीत्सुमहातेजा ब्रह्मा सुरुचिरं वचः ॥ ऋषिस्त्व
मसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ २ ॥

पशुत्वं प्राजापत्यादिस्तुत्या च मोक्षः श्रूयते तथा
पि अंबरीषविषयमप्येतत् एतन्नामा एतान्मन्त्रलक्ष्मनिश्चान्वेष्येति बहवः केचित्तु हरिश्चंद्रप
दं सादृश्यादंबरीषपरत्वप्रयुक्तं ॥ अजीगर्तिपदं च ऋचीके प्रयुक्तं ऋतावस्मादेवोपवर्हणा दित्य
हुः ॥ २७ ॥ भूयः पूर्वतपसः पुत्रेषु क्रोधेन नाशात् क्रोधेन करिष्यामीति संकल्प्य पुनस्तपोकरोत् ॥ २८ ॥
इति श्री द्विषष्टितमः सर्गः ॥ ६२ ॥ व्रतस्नातं समाप्तव्रतं तपफलचिकीर्षवः तपःफलं दातुकामाः ॥ १ ॥

प्रत्युवाचेति पितामहमितिशेषः अतुलं सर्वोत्तमं ब्रह्मर्षिशब्दं मदभीष्टं स्वार्जितैः कर्मभिः प्राप्य यदि यतो भगवा
नाह नवदतितनोमन्येऽहं विजितेंद्रियः अत्र काकुः न विजितेंद्रिय इत्यर्थः। नतावदिति विकारहेतुसन्नि

प्रांजलिः प्रणतो भूत्वा प्रत्युवाच पितामहं॥ ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः॥२०॥
यदि मे भगवानाह ततोऽहं विजितेंद्रियः॥ तमुवाच ततो ब्रह्मा न तावत्त्वं जितेंद्रियः॥२१॥ यतस्व मु
निशार्दूलइत्युक्त्वा त्रिदिवं गतः॥ विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः॥२२॥ ऊर्ध्वबाहुर्नि
रालंबो वायुभक्षस्तपश्चरन्॥ घर्मे पंचतपा भूत्वा वर्षास्वाकाशसंश्रयः॥२३॥ शिशिरे सलिलेशा
यी रात्र्यहानि तपोधनः॥ एवं वर्षसहस्रं हि तपो घोरमुपागमत्॥२४॥ तस्मिन्संतप्यमाने तु वि
श्वामित्रे महामुनौ॥ संतापः सुमहानासीत्सुराणां वासवस्य च॥२५॥ रंभामप्सरसं शक्रः सर्वैः
सह मरुद्गणैः॥ उवाचात्महितं वाक्यमहितं कौशिकस्य च॥२६॥ इत्यार्षे श्री रा॰ बा॰ त्रिषष्टित
मः सर्गः॥६३॥ सुरकार्यमिदं रंभे कर्तव्यं सुमहत्त्वया॥ लोभनं कौशिकस्येह काममोहसमन्वितम्॥१॥

धाने विकाराभावे दृढितत्वमिति भावः नतावदिति लोकोक्तौ॥२०॥२१॥२२॥ घर्मे ग्रीष्मे॥ आकाश निरावर
णदेशे॥२३॥२४॥ आत्महितं आत्मा इंद्रः॥२६॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बा
लकांडे त्रिषष्टितमः सर्गः॥६३॥ लोभनं प्रतारणं॥ काममोहनकाम ज्वलितचित्तवैवश्येन समन्वितं युक्तं॥१॥

वेपंतीवेपमानां॰ मधुरैः मत्प्रार्थनयास्थितासीति॰ ॥ नवनकश्चनदोषइत्यादिवाक्यैः ॥ क्रोधस्यसंकल्पपूर्वत्पत्कत्वादत्रशापादानंतेनास्यक्रोधजयोजातइत्यफलं ॥ १३ ॥ ततस्तत्रबहुविघ्नदर्शनादुत्तरगमनंभै

भीतामप्सरसंदृष्ट्वावेपंतींप्रांजलिंस्थितां ॥ मेनकांमधुरैर्वाक्यैर्विसृज्यकुशिकात्मजः ॥ १३ ॥
उत्तरंपर्वतंरामविश्वामित्रोजगामह ॥ सकृत्वानैष्ठिकींबुद्धिंजेतुकामोमहायशाः ॥ १४ ॥
कौशिकीतीरमासाद्यतपस्तेपेदुरासदं ॥ तस्यवर्षसहस्राणिघोरंतपउपासतः ॥ १५ ॥ उत्त
रेपर्वतेरामदेवतानामभूद्भयं ॥ अमंत्रयन्समागम्यसर्वेसर्षिगणाःसुराः ॥ १६ ॥ महर्षिशब्दं
लभतांसाध्वयंकुशिकात्मजः ॥ देवतानांवचःश्रुत्वासर्वलोकपितामहः ॥ १७ ॥ अब्रवीन्मधु
रंवाक्यंविश्वामित्रंतपोधनं ॥ महर्षेस्वागतंवत्सतपसोग्रेणतोषितः ॥ १८ ॥ महत्त्वमृषिमुख्य
त्वंददामितवकौशिक ॥ ब्रह्मणस्तुवचःश्रुत्वाविश्वामित्रस्तपोधनः ॥ १९ ॥ राम

ष्ठिकींकामस्याप्यकरणसंकल्प्य अत्युत्कटब्रह्मचर्यविषयांबुद्धिंदृढनिश्चयंजेतुंकामः कामंमितिशेषः
१४ ॥ कौशिकीविश्वामित्रभगिनीनदी ॥ १५ ॥ उत्तरेपर्वतेइत्येतत्पूर्वान्वयि॰ समागम्यब्रह्मणेतिशेषः ॥ १६ ॥
लभतांभगवन्नितिशेषः ॥ १७ ॥ देवप्रार्थनयामहर्षिशब्देनैवसंबोधयति॰ महर्षेइति ॥ १८ ॥ महत्त्वस्यविवरणमृ
षिमुख्यत्वमिति ॥ १९ ॥

रामा-बा
१७०

तत्सर्वं रंभागमनं तत्कृतप्रलोभनं च - सहस्राक्षप्रेरणामूलमिति युक्त्याध्यानेन च विज्ञाय निश्चित्य रंभां श
शापेत्यन्वयः ॥११॥ शैली शिलाप्रतिमारूपा ॥१२॥ यद्यपि स्वामिनियोगतः प्रवृत्तायां रंभायां शाप
दानमनुचितं इंद्रे एवं तद्दानमुचितं तथापि क्रोधावेशेन युक्तायुक्तविवेकाभावः अत एव पश्चा
द्विवेकं लब्ध्वा मन्युं गृह्णाति ब्राह्मण इति वसिष्ठ इत्यर्थ इति कतकः एतेन कामादपि क्रोधो दुर्जे

सहस्राक्षस्य तत्सर्वं विज्ञाय मुनिपुंगवः ॥ रंभां क्रोधसमाविष्टः शशाप कुशिकात्मजः ॥११॥
यन्मां लोभयसे रंभे कामक्रोधजयैषिणं ॥ दशवर्षसहस्राणि शैली स्थास्यसि दुर्भगे ॥१२॥
ब्राह्मणः सुमहातेजास्तपोबलसमन्वितः ॥ उद्धरिष्यति रंभे त्वां मत्क्रोधकलुषीकृतां ॥१३॥
एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः ॥ अशक्नुवन्धारयितुं कोपं संतापमात्मनः ॥१४॥
तस्य शापेन महता रंभा शैली तदाभवत् ॥ वचः श्रुत्वा च कंदर्पो महर्षेः स च निर्गतः ॥१५॥
कोपेन च महातेजास्तपोपहरणे कृते ॥ इंद्रियैरजितै राम न लेभे शांतिमात्मनः ॥१६॥

यद्वा तिसूचितं ॥१३॥ आत्मनः कोपं धारयितुं अशक्नुवन्नाशाद्धातपोव्ययजन्यदुःखेन संतापं प
आत्तापमुपागत इति शेषः ॥१४॥ महर्षेर्वचः श्रुत्वा कंदर्पः स च इंद्रश्च निर्गत इत्यन्वयः ॥१५॥ कोपेन चा
त्कामेन च तपोपहरणे कृते सति कामक्रोधहतत्वाद्देवाजितैरिंद्रियैरित्यन्वयः आपाततो रंभाद
र्शनप्रवृत्तकामेनापि तपः क्षयः आत्मनो मनसः शांतिं दुःखोपशमं ॥१६॥ राम

राम
१७०

व्रीडिता असामर्थ्यवचननिमित्ताव्रीडा ॥२॥ उत्स्रक्ष्यते इति पाठे पि उत्स्रक्ष्यतइत्येवार्थः ॥३॥ ह्रियतोऽतः प्रसादं एवं
नियोगाभावरूपं ॥४॥ ॥५॥ माधवे वसंते कोकिलोभूत्वाहमित्यन्वयः ॥६॥ बहुगुणं हावभावादिगुणोपेतं रूपं

तथोक्तासाप्सरारामसहस्राक्षेण धीमता ॥ व्रीडिताप्रांजलिर्वाक्यं प्रत्युवाचसुरेश्वरं ॥२॥ अयंसु
रपतेघोरोविश्वामित्रोमहामुनिः ॥ क्रोधमुत्स्रक्ष्यते घोरं मयिदेव न संशयः ॥३॥ ततो हि मे भयं
देवप्रसादं कर्तुमर्हसि ॥ एवमुक्तस्तयाराम सभयं भीतया तदा ॥४॥ तामुवाचसहस्राक्षोवे
पमानां कृतांजलिं ॥ माभैषीरंभे भद्रंते कुरुष्व मम शासनं ॥५॥ कोकिलोहृदयग्राही माधवे
रुचिरद्रुमे ॥ अहं कंदर्पसहितः स्थास्यामितवपार्श्वतः ॥६॥ त्वं हि रूपं बहुगुणं कृत्वा परम
भास्वरं ॥ तमृषिं कौशिकं भद्रे भेदयस्वतपस्विनं ॥७॥ साश्रुत्वावचनं तस्य कृत्वारूपमनुत्त
मं लोभयामासललिता विश्वामित्रं शुचिस्मिता ॥८॥ कोकिलस्य तु शुश्राव वल्गुव्याहरतः स्वनं
संप्रहृष्टेन मनसा सचैनामन्ववैक्षत ॥९॥ अथ तस्य च शब्देन गीतेनाप्रतिमेन च ॥ दर्शनेन च रं
भायाः मुनिः संदेहमागतः ॥१०॥

रूपपरिष्कारं ॥ भेदयस्वस्वकामोत्पादनेन च तपसश्चालय ॥७॥ ल
लिताललिता रम्यभावयुक्ता ॥८॥ वल्गुमनोहरं ॥ कमनीयविषयत्वाभावाच्चेतसोहर्षः ॥९॥ तस्यकोकिलस्य
गीतेन रंभायाः इति शेषः संदेहः स्वतपो वास्यात् यदृच्छया आगमनं ॥ उपेंद्रप्रेरितया मत्तपोभंगार्थमित्येवं रूपं

रामा॰ बा॰ तस्मिन्कालेव्रतपारणकाले॥५॥ सिद्धं पक्कं निःशेषिते निरवशेषतोदत्ते॰ अभुक्त्वैव पुनः पाकाकरणादभु
१७१ क्त्वैव॥६॥ मौनं कृत्वा आसीदित्यन्वयः॥७॥ नोच्छ्वसन् श्वासोच्छ्वासरहितः॥धूमइति॰॥धूमकेतुरित्यर्थः
अग्निरिति यावत्॥ अतएवाग्रे आतापित मिवेति वक्ष्यति॰ अयं शुद्धसत्वगुणप्रभवोग्निरितरेषां रज

भोक्तुमारब्धवानन्नं तस्मिन्कालेरघूत्तम॥इंद्रो द्विजातिर्भूत्वान्नं सिद्धमन्नमयाचत॥५॥तस्मै
दत्वा तदा सिद्धं सर्वं विप्राय निश्चितः॥ निःशेषितेन्ने भगवानभुक्त्वैव महातपाः॥६॥ न किं॰
चिदवदद्विप्रं मौनव्रतमुपास्थितः॥ तथैवासीत्पुनर्मौनमनुच्छ्वासं चकार ह॥७॥ अथ वर्ष
सहस्रं च नोच्छ्वसन्मुनिपुंगवः॥ तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत॥८॥ त्रैलोक्यं ये
न संभ्रांतमातापितमिवाभवत्॥ ततो देवर्षिगंधर्वाः पन्नगोरगराक्षसाः॥९॥ मोहितास्तप
सा तस्य तेजसा मंदरश्मयः॥ कश्मलोपहताः सर्वे पितामहमथाब्रुवन्॥१०॥ बहुभिः कारणै
र्देव विश्वामित्रो महामुनिः॥ लोभितः क्रोधितश्चैव तपसा चाभिवर्धते॥११॥

स्तमः प्रधानानां तन्मिश्रसत्वप्रधानानां च देवादीनां तापजनक इति वोध्यं॥८॥ येन वह्निना यथाता
पितः पुमान् संभ्रांतो व्याकुलो भवति तद्वत्॥ त्रैलोक्यं संभ्रांतमभूदित्यर्थः॥९॥ तपसा तेजसा तपो
रूपेण तेजसा॥ मोहिताः विषयाग्राहिचित्ताः रताः॥ मंदरश्मयः क्षीणतेजसः कश्मलं दुःखं॥१०॥ रामः
ततद्विषयैर्लोभितः क्रोधितोपि निर्विघ्नमेव तौत्पत्कात पसाभिवर्धत इत्यन्वयः॥११॥ श्रीरामा १७१

नचवक्ष्येशापादिवचनमितिशेषः ॥१७॥ आत्मानंशरीरं ॥१८ यावत् यावताकालेन ब्राह्मण्यंप्राप्तंभवेत्तता
वच्छाश्वतीःसमाःबहून्वत्सरान् ॥१९॥ मूर्त्तयःशरीरावयवाःतपोर्थत्वादनुच्छासाभोजनयोःतद्बलेनस्या

बभूवास्यमनश्छिंनातपोपहरणेकृते ॥ नैवंक्रोधंगमिष्यामिनचवक्ष्येकदाचन ॥१७॥ अथ
वानोच्छ्वसिष्यामिसंवत्सरशतान्यपि ॥ अहंहिशोषयिष्यामिआत्मानंविजितेंद्रियः ॥१८॥ या
वद्यावद्धिमेप्राप्तंब्राह्मण्यंतपसार्जितं ॥ अनुच्छ्वसन्नभुंजानस्तिष्ठेयंशाश्वतीःसमाः ॥१९॥ न
हिमेतप्यमानस्यक्षयंयास्यंतिमूर्त्तयः ॥ एवंवर्षसहस्रस्यदीक्षांसमुनिपुंगवः ॥२०॥ चका
राप्रतिमांलोकेप्रतिज्ञांरघुनंदन ॥२०॥ इत्यार्षश्रीरामायणेबालकांडेचतुःषष्टितमःसर्गः
॥६४॥ अथहैमवतींराम दिशंत्यक्तामहामुनिः ॥ पूर्वांदिशमनुप्राप्यतपस्तेपेसुदारुणं ॥१॥
मौनंवर्षसहस्रस्यकृत्वाव्रतमनुत्तमं ॥ चकाराप्रतिमंरामतपःपरमदुष्करं ॥२॥ पूर्णेव
र्षसहस्रेतुकाष्ठभूतंमहामुनिं ॥ विघ्नैर्बहुभिराधूतंक्रोधोनांतरमाविशत् ॥३॥ सकृत्वा
निश्चयंरामतपआतिष्ठताव्ययम् ॥ तस्यवर्षसहस्रस्यव्रतेपूर्णेमहाव्रतः ॥४॥

स्यंत्स्येवेतिभावः ॥ दीक्षां अनुच्छासाभोजनेउद्दिश्य ॥ अप्रतिमां प्रतिज्ञांसर्वथैवंकरिष्यइत्यध्यवसायं ॥१०॥
इतिश्रीचतुःषष्टितमःसर्गः ॥६४॥ अथप्रतिज्ञोत्तरं ॥ हैमवतीमुत्तरां ॥१॥ मौनरूपंव्रतंवर्षसहस्रसंबंधि
मौनंचात्रकाष्ठमौनं ॥२॥ आधूतमाकुलीकृतमपि ॥ आंतरमंतःकरणं ॥३॥ निश्चयंक्रोधाकरणविषय

दीर्घायुर्दानं स्वदर्शनफलं ॥२०॥ स्वस्ति सुखं यथासुखं॰ तपस उपरते इति शेषः ॥२१॥ यदि इत्यस्य संदिग्धे सं
दिग्धवचनं वेदाः प्रमा चेदिति वत् ॥२२॥ ओमिति ब्राह्मज्ञानसाधनं॰ ॥ वषडितियज्ञसाधनं॰ ॥ वेदाश्च तदुप
त्तिनांगोपांगोदिप्रतिपादकाः ॥ पशंपतुवसिष्ठादीनस्ह जब्राह्मणान्वरयं तितथा वराणां चाध्यापनयाज
नयोरनुमतिः ब्रह्माद्यनुग्रहे पि जातिब्राह्मण्याभावात् ॥ तथा वसिष्ठेनानंगीकारे व्यर्थमेव सर्वमत

ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥ दीर्घमायुश्च ते ब्रह्मन् ददामि समरुद्गणाः ॥२०॥
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य यथासुखं ॥ पितामहवचः श्रुत्वा सर्वेषां त्रिदिवौकसां ॥२१॥
कृत्वा प्रणाममुदितो व्याजहार महामुनिः ॥ ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ॥२२॥
ओंकारोथ वषट्कारो वेदाश्च वरयंतु मां ॥ तत्र वेदविदां श्रेष्ठो ब्रह्मवेदविदामपि ॥२३॥
ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः ॥ यद्येवं परमः कामः कृतो यांतु सुरर्षभाः ॥२४॥

आह ॥ तत्रेत्यादि॰ सूर्यवंशानां पुरोहितत्वात्तदध्यापकत्वाच्च तेषां युद्धजयादिप्रयोजनसंपत्तये
तत्र वेदविदां उक्तप्रयोजन धनुर्वेदविदां श्रेष्ठः ब्रह्मवेदा वेदचतुष्टयी॰ ब्रह्मप्रतिपादकोपनि
षद्भागवत्वात् ॥२३॥ अन्यदपि श्रेयस्य बीजं ब्रह्मपुत्र इति॰ एवं ब्रह्मर्षे इति॰ एवं वसिष्ठमुखे
न ब्रह्मर्षित्ववाद रूपे॰ मम परमः कामो मनोरथो यदि कृतस्तदा मद्विषये कृतकृत्याः सुरर्षभा
यांतु नान्यथेति भावः अन्यथा पुनः स्तपश्चरिष्यामीति तात्पर्यम् ॥२४॥ राम

स्त्स्वमपि वर्जितं · अल्पमपि कामक्रोधरूपं · यदभीप्सितं ब्रह्मर्षित्वं ॥१२॥ अन्यथा लोकनाश इत्याह · विनाशय
तीति · तैलघृतरपाठान्तरं छंदोभंगः ॥ नाशप्रकारमाह ॥ व्याकुला इति ॥१३॥१४॥ प्रतिजानीमः प्रतिक्रियां न
जानीम इत्यर्थः नास्ति को जायते जगत् · लोभवशान्नास्तिक इव कर्मानुष्ठानशून्य इत्यर्थः ॥ तदाहुसंमू

नत्वस्य वर्जितं किंचिद्दृश्यते सूक्ष्ममप्युत ॥ न दीयते यदि त्वस्य मनसा यद्यभीप्सितं ॥१२॥ विना
शयति त्रैलोक्यं तपसा सचराचरं ॥ व्याकुलाश्च दिशः सर्वा न च किंचित्प्रकाशते ॥१३॥ सागराः
क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः ॥ प्रकंपते च पृथिवी वायुर्वाती ह संकुलः ॥१४॥ ब्रह्मन्न प्रति
जानीमो नास्तिको जायते जनः ॥ संमूढमिव त्रैलोक्यं संप्रक्षुभितमानसं ॥१५॥ भास्करो निष्प्र
भश्चैव महर्षेस्तस्य तेजसा ॥ बुद्धिं न कुरुते यावन्नाशे देव महामुनिः ॥१६॥ तावत्प्रसाद्यो भ
गवानग्निरूपो महाद्युतिः ॥ कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यतेऽखिलं ॥१७॥ देवराज्यं चिकी
र्षेत दीयतामस्य यन्मनः ॥ ततः सुरगणाः सर्वे पितामहपुरोगमाः ॥१८॥ विश्वामित्रं महात्मानं
वाक्यं मधुरमब्रुवन् ॥ ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ॥१९॥ राम

ढमिवेति · संप्रक्षुभितमानसं व्याकुलचित्तं · नाशे जगन्नाशे ॥१५॥१६॥ पूर्वं युगांतकाले ॥१७॥ यद्यसौ
देवराज्यमपि चिकीर्षेत तदा तदप्यस्य दीयतामित्यर्थ इति केचित् · यद्यस्य अभीष्टं न दीयते तदा
सौ देवराज्यं चिकीर्षेत ततोऽस्य यन्मनः स्वलक्ष्यं ब्रह्मर्षित्वं तद्दीयतामित्यर्थ इत्यन्ये ॥१८॥ स्वागतं भद्रं स्मेति

पावितः पवित्रः कृतः ॥ ३२ ॥ गुणाः कर्मश्रेष्ठसत्तातिश्रेष्ठसलक्षणाः ॥ ३३ ॥ महातेजइति संबुद्धिः मयाजनकेन रामेण च सदःप्राप्यस्थितैः सदस्यैश्चतेगुणाः श्रुताः ॥ ३४ ॥ तुभ्यमितितवेत्यर्थे· अप्रमेयं इयत्ताज्ञा

यत्त्वं काकुत्स्थसहितः प्राप्तवानसि कौशिक ॥ पावितोहं त्वया ब्रह्मन्दर्शनेन महामुने ॥ ३२ ॥
गुणाः बहुविधाः प्राप्तास्तव संदर्शनान्मया ॥ विस्तरेण च वै ब्रह्मन्कीर्त्यमानं महत्तपः ॥ ३३ ॥ श्रुतं मया महातेजो रामेण च महात्मना ॥ सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः ॥ ३४ ॥ अप्रमेयं तपस्तुभ्यमप्रमेयं च ते बलं ॥ अप्रमेया गुणाश्चैव नित्यं ते कुशिकात्मज ॥ ३५ ॥ तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो ॥ कर्मकालो मुनिश्रेष्ठ लंबते रविमंडलं ॥ ३६ ॥ श्वः प्रभाते महातेजो द्रष्टुमर्हसि मां पुनः ॥ स्वागतं जपतां श्रेष्ठ मामनुज्ञातुमर्हसि ॥ ३७ ॥ एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभं ॥ विससर्जाशु जनकं प्रीतं प्रीतमनास्तदा ॥ ३८ ॥ एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ॥ प्रदक्षिणां चकाराशु सोपाध्यायः सबांधवः ॥ ३९ ॥ विश्वामित्रोपि धर्मात्मा सहरामः सलक्ष्मणः ॥ स्ववासमभिचक्राम पूज्यमानो महात्मभिः ॥ ४० ॥ इत्यार्षे श्रीरा॰ वा॰ पंचषष्ठितमः सर्गः ॥ ६५ ॥

नाविषयं ॥ ३५ ॥ कथानामिति श्रवणइति शेषः कर्मकालइति· अतिवर्तनइतिशेषः तदेवाह ॥ ३६ ॥ स्वागतं भद्रं· अनुज्ञातुं कर्मणेइतिशेषः ॥ ३७ ॥ ३८ ॥ ३९ ॥ स्ववासं स्वनिवेशं· स्ववाटमिति पाठेप्ययमेवार्थः ॥ ४० ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे पंचषष्ठितमः सर्गः ॥ ६५ ॥

ततो विश्वामित्रोक्त्यनंतरं प्रसादितो विश्वामित्रस्य ब्रह्मर्षित्वानुमतये। एवं ब्रह्मर्षित्वं सख्यं विश्वामित्रेण
२५॥ सर्वब्राह्मण्यप्रयोजकं ब्राह्मण्यं जन्मतत्संस्कारादि संपद्यते संपन्नं अनेन त्रिपुरुषपर्यंतं वि
श्वामित्रस्य ब्राह्मण्यलाभः सूचितः एतच्चानघ्यानंतर्ययोरिति सूत्रे महाभाष्ये स्पष्टमिति॥ वसि

ततः प्रसादितो देवैर्वसिष्ठो जपतां वरः। सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत्॥२५॥
ब्रह्मर्षिस्त्वं न संदेहः सर्वं संपद्यते तव। इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतं॥२६॥
विश्वामित्रोपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमं। पूजयामास ब्रह्मर्षिं वसिष्ठं जपतां वरं॥२७॥
कृतकामो महीं सर्वां चचार तपसि स्थितः। एवं त्वनेन ब्राह्मण्यं प्राप्तं राम महात्मना॥२८॥
एष राम मुनिश्रेष्ठ एष विग्रहवांस्तपः। एष धर्मपरो नित्यं वीर्यस्यैव परायणं॥२९॥ एव
मुक्त्वा महातेजा विरराम द्विजोत्तमः। शतानंदवचः श्रुत्वा रामलक्ष्मणसंनिधौ॥३०॥ जन
कः प्रांजलिर्वाक्यमुवाच कुशिकात्मजं। धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुंगव॥३१॥

ष्ठोक्तं देवताश्चापि उक्त्वा जग्मुरित्यन्वयः॥२६॥ पूजयामास सपरिवारस्य मम सत्कारकरणेन ब्रह्म
र्षितापादकसाधनोन्मुख्यसंपादनेन कृतार्थीकृतोस्मि। भगवतेति पूजयामासेत्यर्थः॥२७॥ चचा
रेति विश्वामित्र इति शेषः। अथ प्रकृतशतानंदवचनमेवं त्वित्यादि॥२८॥ नित्यमिदानीमपि वीर्यस्य

निमिः कूटस्थः तस्यज्येष्ठः पुत्रो देवरातः॥न्यासो निक्षेपः अयंधनुरूपः अपरेतु निनरामास्तेदेवतात्रये
तिस्युत्पत्यान्यासोदेवपूजास्थानंतत्पूजार्थंशत्रुवधार्थंचदत्तइत्यर्थः निक्षेपपरतयाव्याख्यानेतुनि
क्षेपस्यशुल्कीकरणमनुचितंभगवतानङ्गेचनिक्षेपार्पणप्रयुक्तदोषभागितापादनकस्यादितिप्रा

देवरातइतिख्यातोनिमेःज्येष्ठोमहीपतिः॥न्यासोयंतस्यभगवन्हस्तेदत्तोमहात्मनः॥८॥द
क्षयज्ञवधेपूर्वंधनुरायम्यवीर्यवान्॥विध्वस्यत्रिदशान्रोषात्सलीलमिदमब्रवीत्॥९॥य
स्माद्भागार्थिनोभागान्नाकल्पयतमेसुराः॥वरांगानिमहार्हाणिधनुषाशातयामिवः॥१०॥त
तोविमनसःसर्वेदेवावैमुनिपुंगव॥प्रसादयंतदेवेशंतेषांप्रीतोभवद्भवः॥११॥प्रीतियु
क्तस्सर्वेषांददौतेषांमहात्मनां॥तदेतद्देवदेवस्यधनूरत्नंमहात्मनः॥१२॥

हुः॥८॥कैर्दत्तस्तत्राह· दक्षेत्यादि· दक्षयज्ञवधेइतिनिमित्तसप्तमी·॥आयम्य·॥नमनसज्जीकरण
पूर्वमारुह्य·॥सलीलमितिवधविषयाऽप्रयासोद्योत्यते॥९॥भागार्थिनःस्वस्वरूढादियज्ञभा
गार्थिनोममभागंयतोनाकल्पयंतसुराअतोवरांगानिशिरांसि॥अकल्पयतेत्येकवचनमार्षं·म
हार्हाणिमहापूजायोग्यानि॥१०॥विमनोदीनाः भवोरुद्रः॥११॥ददौसंहारार्थंगृहीतंधनुरितिशेषः॥दे
वदेवस्यरुद्रस्य·दैवेलब्धंधनुरत्नं॥१२॥

कृतकर्मा कृतनित्यक्रियः॥१॥ कर्मणा अर्घपाद्यादिलक्षणेन। राघवौ च संपूज्य वाक्यमुवाच विश्वामित्रं प्रति॥२॥ आज्ञाप्यः आज्ञापयितुं योग्यः भवतेति कृत्यानां कर्तरि षष्ठी। विकल्पात्तृतीया॥ आगमनप्रयो

ततः प्रभाते विमले कृतकर्मा नराधिपः॥ विश्वामित्रं महात्मानमाजुहाव सराघवम्॥१॥ तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा॥ राघवौ च महात्मानौ तदा वाक्यमुवाच ह॥२॥ भगवन् स्वागतं तेऽस्तु किं करोमि तवानघ॥ भवानाज्ञापयतु मामाज्ञाप्यो भवता ह्यहं॥३॥ एवमुक्तः स धर्मात्मा जनकेन महात्मना॥ प्रत्युवाच मुनिश्रेष्ठो वाक्यं वाक्यविशारदः॥४॥ पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ॥ द्रष्टुकामौ धनुःश्रेष्ठं यदेतत्त्वयि तिष्ठति॥५॥ एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ॥ दर्शनादस्य धनुषो यथेष्टं प्रतियास्यतः॥६॥ एवमुक्तस्तु जनकः प्रत्युवाच महामुनिं॥ श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति॥७॥ रामा

जनं बोधनीयं इति तात्पर्यं॥३॥४॥ द्रष्टुकामौ आगताविति शेषः॥५॥ कृतकामौ प्राप्तकामौ॥६॥ ततो धनुर्वृत्तान्तमाह॥ जनकः एवमिति॥ अस्य दिदृक्षितस्य धनुषः श्रूयतामागमनादिवृत्तान्तं इति शेषः॥ यदर्थं यत्प्रयोजनाय तिष्ठति तत्त्वं श्रूयतां॥७॥

नददामि॰ नप्रादां ॥१७॥ वीर्यं धनुषः सारं॰ जिज्ञासवइत्यस्याभव न्निति शेषः ॥ उपाहृतं दर्शितमानीये
त्यर्थः ॥१८॥ ग्रहणं धारणं॰ तोलनं भारपरिज्ञानार्थं हस्तेन चालनं ॥१९॥ प्रत्याख्याताकन्या न दत्तेति
यावत्॰ ॥ नदित्यव्ययं॰ ॥ तं तोनंतरं यद्वृत्तं तन्निबोध जानीहि॰ ॥ ततइति ॥२०॥ अरुंधन्नुपरुद्धवंतः

वीर्यशुल्केति भगवन्नददामि सुतामहं ॥ ततः सर्वे नृपतयः समेत्य मुनिपुंगव ॥१७॥ मि
थिलामभ्युपागम्य वीर्यं जिज्ञासवस्तदा ॥ तेषां जिज्ञासमानानां शैवं धनुरुपाहृतं ॥१८॥ न
शेकुर्ग्रहणे तस्य धनुषस्तोलनेपि वा ॥ तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा महामुने ॥१९॥
प्रत्याख्याता नृपतयस्तन्निबोध तपोधन ॥ ततः परमकोपेन राजानो मुनिपुंगव ॥२०॥ अ
रुंधन् मिथिलां सर्वे वीर्यसंदेहमागताः ॥ आत्मानमवधूतं मे विज्ञाय नृपपुंगवाः ॥२१॥
रोषेण महताविष्टाः पीडयन्मिथिलां पुरीं ॥ ततः संवत्सरे पूर्णे क्षयं याता नि सर्वशः ॥२२॥
साधनानि मुनिश्रेष्ठ ततोहं भृशदुःखितः ॥ ततो देवगणान् सर्वांस्तपसाहं प्रसादयं ॥२३॥

वीर्यसंदेहं॰ धनुरारोपणलक्षणवीर्यविषये न्येषां संदेहविषयत्वं गताः ॥ अनो बलेनैव कन्यां ग
हीष्याम इत्यरुंधन्नित्यर्थः ॥ ते च सर्वे नृपा आत्मानं॰ मे मया वधूतवीर्यशुल्ककरणेन तिरस्कृ
तं विज्ञाय ॥२१॥ रोषेण विश्वामित्र मिथिलामपीडयन् अडभाव आर्षः ॥ क्षयं याता नि॰ दुर्गस्थित्युपायुद्ध
वशादिति शेषः ॥२२॥ साधना नि दुर्गरक्षणसाधनानि॰ प्रसादयं प्रसादितवान्॰ लङ्यडभाव आर्षः ॥२३॥

अस्मत्पूर्वजे देवराते तैः शिवसहितैर्देवैर्न्यासभूतं देवपूजास्थानभूतं न्यस्तं दत्तं तदुक्तं कौर्मे एकविं
शोध्याये ॥ प्रीतश्च भगवानीशः स्त्र्यम्बकः लीनीलकंठो हितः प्रददौ शत्रुनाशार्थं जनकाय महद्धनुरिति ।
पाद्मेपि चापं शंभोर्दययादत्तं कन्याशुल्कीकृतं ममेति ॥ यदर्थं मिह निर्ष्वती त्यस्याप्युत्तरं न्यासभूतमि
त्यं तेन जातं पूजास्थानत्वेन पूजार्थमित्यर्थलाभात् अयेति कृषत इति अग्निचयनार्थमिति शेषः ष
डंगवेगेन कृषती त्यादि शास्त्रात् लांगलात् लांगलपद्धते ॥ उत्थिता कन्येति शेषः ॥१३॥ यतः क्षेत्रं शो

न्यासभूतं तदा न्यस्तमस्माकं पूर्वजे विभौ ॥ अथ मे कृषतः क्षेत्रं लांगलादुत्थिता ततः ॥१३॥
क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ॥ भूतलादुत्थिता सा तु व्यवर्द्धत ममात्मजा ॥१४॥
वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा ॥ भूतलादुत्थितां तां तु वर्द्धमानां ममात्मजां ॥१५॥
वरयामासुरागत्य राजानो मुनिपुंगव ॥ तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षितां ॥१६॥

धयता सीतायाः ॥ लांगलपद्धतेर्मया लब्धा ऽतो नाम्ना सीतेति प्रसिद्धा ॥ भूतलात् यज्ञियात् । व्यवर्ध
त वृद्धिं प्राप्ता । पाद्मेपि ॥ अथ लोकेश्वरी लक्ष्मीर्जनकस्य पुरे स्वतः ॥ शुभक्षेत्रे हलोत्खाते तारे चोत्त
रफाल्गुने ॥ अयोनिजा पद्मकरा बालार्कशतसन्निभा ॥ सीतामुखे समुत्पन्ना बालभावेन सुंदरी
सीतामुखोद्भवात्सीतेत्यस्या नाम चाकरोत् ॥ ततो भूदेवरसीतस्य ऊर्मिलानाम कन्यके ति ॥१४॥ वी
र्यशुल्का धनुः सज्जीकरणादि तमेव वीर्यमेव शुल्कं मूल्यं यस्याः ॥१५॥ १६॥ ॥

शतानिपंचाशत्पंचसहस्राणीत्यर्थः॥अनेनधनुषोदुर्ग्रहत्वादिदर्शितं॥आयताःदीर्घाः महात्मानो दृढपुरुष
रीराः अष्टचक्राःरथाःगाश्चयुक्ताः॥नातिद्वढतरत्वेनप्रसिद्धाः कथंचनततन्संख्याअपिमहतापयत्नेनेत्यर्थः
४॥आयसीं अष्टलोहनिर्मितां सुरोपममिति जनकविशेषणम्॥५॥यदिदर्शनीयमिति ह्रसितदा

नृणांशतानिपंचाशत्व्यायतानांमहात्मनां॥मंजूषामष्टचक्रांतांसमूहुस्तेकथंचन॥४॥तामा
दायसुमंजूषामायसींयत्रतद्धनुः॥सुरोपमंतेजनकमूचुर्नृपतिमंत्रिणः॥५॥इदंधनुर्वरंरा
जन्पूजितंसर्वराजभिः॥मिथिलाधिपराजेंद्रदर्शनीयंयदीच्छसि॥६॥तेषांनृपोवचःश्रु
त्वाकृतांजलिरभाषत॥विश्वामित्रंमहात्मानंतावुभौरामलक्ष्मणौ॥७॥इदंधनुर्वरंब्रह्मन्
जनकैरभिपूजितं॥राजभिश्चमहावीर्यैरशक्तैःपूरितुंतदा॥८॥नैतत्सुरगणाःसर्वेसा
सुरानचराक्षसाः॥गंधर्वयक्षप्रवराःसकिन्नरमहोरगाः॥९॥

दर्शयेत्यर्थः॥६॥उभौरामलक्ष्मणौ तदाश्रयंधनुःप्रदर्शनमुद्दिश्यविश्वामित्रमभाषतेतियोजना॥७॥पूरितंअशक्तैः
स्तोलनादिवक्ष्यमाणव्यापाराशक्तैः॥राजभिस्तुजनकैर्देवरातातिरिक्तैःपूजितं ऐश्वरत्वादी
श्वरवदेवकेवलंपूजितमित्यर्थः॥८॥नैतदिति॥ एतद्धनुः॥सुरादयोनसज्जीकर्तुंशक्ताइतिशेषः॥९॥

सुरादद्दुः जगन्मातुः रक्षणार्थं स्वकार्यसिध्यर्थं चेदं बलदानं दिशोययुः सम्यगुहं विसज्येतिशेषः॥२४
अवीर्याः॥ अल्पवीर्याः स्ववीर्यसंदिग्धाः संदिग्धवीर्याः॥ आहिताग्न्यादित्वान्निष्ठायाः परनिपातः त

ददुश्च परमप्रीताश्चतुरंगबलं सुराः॥ ततो भग्नान्पतयो हन्यमाना दिशो ययुः॥२४॥ अवी
र्या वीर्यसंदिग्धाः सामात्याः पापकारिणः॥ तदेतन्मुनिशार्दूल धनुः परमभास्वरम्॥२५॥
रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत॥ यद्यस्य धनुषो रामः कुर्यादारोपणं मुने॥२६॥
सुतामयोनिजां सीतां दद्यां दाशरथेरहं॥२७॥ इत्यार्षे श्रीरामायणे बालकांडे षट्षष्टितमः स
र्गः॥६६॥ जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः॥ धनुर्दर्शय रामाय इति होवाच पार्थि
वम्॥१॥ ततः स राजा जनकः सचिवान्व्यादिदेश ह॥ धनुरानीयतां दिव्यं गंधमाल्यानुलेपितं॥२॥
जनकेन समादिष्टाः सचिवाः प्राविशन्पुरं॥ तद्धनुः पुरतः कृत्वा निर्जग्मुरमितौजसः॥३॥

देतद्वृत्तवृत्तांतकं॥२५॥२६॥२७॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे षट्ष
ष्टितमः सर्गः॥६६॥ रामयद्दति हे त्यसंधेरे छिकः आरोपयिष्यति सीतां गृहीष्यति चेति भावः॥१॥
सचिवान् समीपे विद्यमानान् अनुलेपितं युक्तं॥२॥ प्राविशन्पुरं यज्ञवाटमित्यर्थः॥३॥

पश्यतामनादरेषष्ठी॥१६॥पूरणमाकर्षणं॥१७॥निर्घातोशनिस्तन्निस्वनसमःशब्दआसीत्दीर्यतः
पर्वतस्यसमीपदेशेयथाभूमिकंपस्तथाभूकंपंआसीत्॥१८॥मुनिवरोविश्वामित्रःराजाजनकः॥

पश्यतांनृसहस्राणांबहूनांरघुनंदनः॥आरोपयत्सधर्मात्मासलीलमिवतद्धनुः॥१६॥
आरोपयित्वामौर्वींचपूरयामासतद्धनुः॥तद्बभंजधनुर्मध्येनरश्रेष्ठोमहायशाः॥१७॥
तस्यशब्दोमहानासीन्निर्घातसमनिस्वनः॥भूमिकंपश्चसुमहान्पर्वतस्येवदीर्यतः॥१८॥
निपेतुश्चनराःसर्वेतेनशब्देनमोहिताः॥वर्जयित्वामुनिवरंराजानंतौचराघवौ॥१९॥
प्रत्याश्वस्तेजनेतस्मिन्राजाविगतसाध्वसः॥उवाचप्रांजलिर्वाक्यंवाक्यज्ञोमुनिपुंगवं॥२०॥
भगवन्दृष्टवीर्योमेरामोदशरथात्मजः॥अत्यद्भुतमचिंत्यंचअतर्कितमिदंमया॥२१॥
जनकानांकुलेकीर्त्तिमाहरिष्यतिमेसुता॥सीताभर्तारमासाद्यरामंदशरथात्मजं॥२२॥
ममसत्याप्रतिज्ञासावीर्यशुल्केतिकौशिक॥सीताप्राणैर्बहुमतादेयारामायमेसुता॥२३॥
भवतोनुमतेब्रह्मन्शीघ्रंगच्छंतुमंत्रिणः॥ममकौशिकभद्रंतेअयोध्यांत्वरितारथैः॥२४॥

१९॥विगतसाध्वसः॥रामेणधनुरारोपणेकन्याऽविवाहितैवस्थास्यतीतिःस्थितासागतेत्यर्थः॥२०॥
अतर्कितमिदंमयाएतदारोपणमित्यर्थः॥२१॥आहारिष्यतिसंपादयिष्यति॥२२॥ममप्रतिज्ञास
त्याजातेतिशेषः॥प्राणैः॥प्राणेभ्यः॥२३॥ममंत्रिणइत्यन्वयः॥अनुमतेअनुमतंकृत्यसाधननि
मितमित्यर्थः॥भवतोनुमतेत्यर्थः॥२४॥

गतिः शक्तिः सामर्थ्यं वस्त्वर्थे प्रपूरणं आकर्णाकर्षणं ॥ आरोपणं सज्जीकरणं समायोगः शरेणायोजनं वेपनं ज्यास्फालनं तोलनमुक्तं ॥१०॥ आनीतं अथ पित्वदाज्ञयेत्यादि ॥११॥१२॥ यत्र धनुस्तिष्ठतितां मंजूषां अपावृत्य अपगतावरणां कृत्वा ॥१३॥ स्पृशामीति ॥ दर्शनोत्सुकस्य निवृत्तेः ॥ वा चार्थः ॥ यत्नवान्भविष्यामि किमित्यब्रवीदपृच्छदित्यर्थः ॥१४॥ तं राजा मुनिश्च वाढमित्येव अब्रवीत् ॥ समभाषतेति प्र

क्र गतिर्मानुषाणां च धनुषोस्य प्रपूरणे ॥ आरोपणे समायोगे वेपने तोलने तथा ॥१०॥ तदेतद्धनुषां श्रेष्ठमानीतं मुनिपुंगव ॥ दर्शयेतन्महाभाग अनयो राजपुत्रयोः ॥११॥ विश्वामित्रः सरामस्तु श्रुत्वा जनकभाषितं ॥ वत्स राम धनुः पश्य इति राघवमब्रवीत् ॥१२॥ महर्षेर्वचनाद्रामो यत्र तिष्ठति तद्धनुः ॥ मंजूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत् ॥१३॥ इदं धनुर्वरं दिव्यं संस्पृशामीह पाणिना ॥ यत्नवांश्च भविष्यामि तोलने पूरणेपि वा ॥१४॥ वाढमित्यब्रवीद्राजा मुनिश्च समभाषत ॥ लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ॥१५॥

त्येकम न्वयः मध्ये मध्यप्रदेशे लीलया अनायासेनः ॥ जग्राह पादांगुलेनोन्नतं कृत्वा करेण जग्राह ॥ तदुक्तं पाद्मे ॥ रामो पितद्धनुः ॥ कोटिस्थस्य पादांगुल्यात ततः ॥ उन्नतं चापमारोप्य बभंजे मोहिता जना इति ॥ अतिभारवत्वस्तुनः पादांगुल्या मध्यभागपर्यंतमुन्नमनं मध्ये गृहीत्वोद्धारश्च महाबलसाध्य इति महाबलत्वमनेन सूचितम् ॥१५॥

साग्निहोत्रपुरस्कृतः पुरस्कृता अग्निहोत्रसहिताः। आहिताग्न्यादिः पुरस्कृता मंत्र्यादयः अग्निहोत्रपदेन तत्साधनऋत्विजस्तैः सहित इत्यर्थ इत्यन्ये ॥४॥ कुशलं क्षेमं अव्ययमनपायं क्षेमं हे महाराज आपृच्छते आङि नुप्रच्छोरित्यात्मनेपदं पुरःसरा भृत्यास्तत्सहितं ॥५॥ अनुमते अनुमतक्रतुसाधननिमित्तं ॥६॥ वीर्यशु

मैथिलो जनको राजा साग्निहोत्रपुरस्कृतः॥ मुहुर्मुहुर्मधुरया स्नेहसंरक्तया गिरा ॥४॥ कुशलं चाव्ययं चैव सोपाध्यायपुरोहितं॥ जनक त्वां महाराजा पृच्छते सपुरःसरं ॥५॥ पृष्ट्वा कुशलमव्यग्रं वैदेहो मिथिलाधिपः॥ कौशिकानुमते वाक्यं भवंतमिदमब्रवीत् ॥६॥ पूर्वं प्रतिज्ञा विदिता वीर्यशुल्का ममात्मजा॥ राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥७॥ सेयं मम सुता। राजन्विश्वामित्रपुरस्कृतैः॥ यदृच्छयागतैराजन्निर्जिता तव पुत्रकैः॥८॥ तच्च रत्नं धनुर्दिव्यं मध्ये भग्नं महात्मना॥ रामेण हि महाबाहो महत्यां जनसंसदि ॥९॥ अस्मै देया मया सीता वीर्यशुल्का महात्मने॥ प्रतिज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥१०॥

ल्केति प्रतिज्ञा पूर्वं युष्माकं विदितेत्यन्वयः विमुखीकृता इत्यपि विदितं ॥७॥ तव पुत्रकैरिति। तव पुत्रेण रामेणेत्यर्थः कप्रत्यये नाल्पार्थकेन वाल्पद्योतनं जामातृबुध्या महावलत्वेनेश्वरबुध्या च पूज्यत्वेन बहुवचनप्रयोगः ॥८॥ तच्च पूर्वं दक्षाध्वरध्वंससमये रुद्रेण यद्दत्तात् ब्रह्मादिपुरःसरसकलसुरजयः कृतः तच्चेत्यर्थः रत्नं धनुरुत्तमधनुः ॥९॥ प्रतिज्ञां वीर्यशुल्कतया सीतादानप्रतिज्ञां तर्तुं पूरयितुं ॥१०॥

प्रश्रितैर्विनयसहितैः सर्वशश्च सर्वमप्यवृत्तंतमित्यर्थः॥२५॥गुप्तौरक्षितौ प्रीतियुक्तमितिक्रियाविशेषणं॥२६॥आभाष्य आहूय कृतशासनात् दत्तकल्याणसंदेशपत्रान्॥२७॥२८॥इतिश्रीरामाभिरामेश्रीरामी येरामायणतिलकेबालकांडेसप्तषष्ठितमः सर्गः॥६७॥त्रिरात्रंरात्रित्रयं उषित्वामार्गेकृतवासाः॥ना

राजानंप्रश्रितैर्वाक्यैरानयंतुपुरंमम॥प्रदानंवीर्यशुल्कायाःकथयंतुचसर्वशः॥२५॥मुनिगुप्तौ चकाकुत्स्थौकथयंतुनृपायवै॥प्रीतियुक्तंतुराजानमानयंतुसुशीघ्रगाः॥२६॥कौशिकस्त तथेत्याहराजाचाभाष्यमंत्रिणः॥अयोध्यांप्रेषयामासधर्मात्माकृतशासनात्॥२७॥यथावृत्तंस माख्यातुमानेतुंचनृपंतथा॥२८॥इत्यार्षेश्रीरामायणेबालकांडेसप्तषष्ठितमःसर्गः॥६७॥जन केनसमादिष्टादूतास्तेक्लांतवाहनाः॥त्रिरात्रमुषितामार्गेतेयोध्यांप्राविशन्पुरीं॥१॥तेराज वचनाद्गत्वाराजवेश्मप्रवेशिताः॥ददृशुर्देवसंकाशंवृद्धंदशरथंनृपं॥२॥बद्धांजलिपुटाःस र्वेदूताविगतसाध्वसाः॥राजानंप्रश्रितंवाक्यमब्रुवन्मधुराक्षरम्॥३॥

वद्दासकरणेनिमित्तं लां तवाहनत्वंन्तेदूताकर्मणिनियुक्तामंत्रिणः नदनंतरंते ऽयोध्यांप्राविशन्॥१॥राजावचनात् जनको स्मान्निहप्रेषितवानिति स्वराजनामसंकीर्तनात् राजवेश्मदशरथवेश्मप्रवेशितास्तदीर्यद्वा रपालैरितिशेषः॥२॥विगतसाध्वसाः सहाराजदूतत्वेनतद्रूपवचनत्संनिधौभयरहिताः॥३॥

ततइति॥१॥धनाध्यक्षाः कोशरक्षाधिकारिणः पुष्कलंबहु अर्थंच सुविहिताःसुरक्षिताःसुसंपादितकल्प
णोचितकर्मणोवा॥२॥यानंशिबिकादि युग्यमश्वादि॥अनुत्तमानिश्रेष्ठानियुग्यानिचयांतुवसिष्ठ

ततोरात्र्यांव्यतीतायांसोपाध्यायःसबांधवः॥राजादशरथोहृष्टःसुमंत्रमिदमब्रवीत्॥१॥
अद्यसर्वेधनाध्यक्षाःधनमादायपुष्कलं॥व्रजंत्वग्रेसुविहितानानारत्नसमन्विताः॥२॥
चतुरंगबलंचापिशीघ्रंनिर्यातुसर्वशः॥ममाज्ञासमकालंचयानंयुग्यमनुत्तमं॥३॥व
सिष्ठोवामदेवश्चजाबालिरथकश्यपः॥मार्कंडेयस्तुदीर्घायुरृषिःकात्यायनस्तथा॥४॥
एतेद्विजाःप्रयांत्वग्रेस्यंदनंयोजयस्वमे॥यथाकालात्ययोनस्याद्दूताहित्वरयंतिमां॥५॥
वचनाच्चनरेंद्रस्यसेनाचचतुरंगिणी॥राजानमृषिभिःसार्धंव्रजंतंपृष्ठतोन्वगात्॥६॥ग
त्वाचतुरहंमार्गंविदेहानभ्युपेयिवान्॥राजाचजनकःश्रीमान्श्रुत्वापूजामकल्पयत्॥७॥
८ ततोराजानमासाद्यवृद्धंदशरथंनृपं॥मुदितोजनकोराजाप्रहर्षंपरमंययौ॥८॥

द्यर्थमितिशेषः॥३।४॥अग्रेद्विजप्रयाणंप्रयाणेकल्याणायप्रयांतु उक्तयानयुग्यैरितिशेषः दूताज
नकदूताः॥५॥इयंचिंत्यफलंपादपूरणमात्रार्थं॥६॥दूतानांत्रिदिनगम्योपिमार्गश्चतुरंगबलोपेतप्र
याणत्वाच्चतुर्दिनेवासोमध्ये कृत्वादशरथागमनं॥७॥राजानमासाद्यमुदितोहर्षंययौ मोदस्य
वाधिकावस्थाहर्षइतिभेदः॥८॥

११॥उभयोरेवउभयोरपिपुत्रयोः नकेवलंरामस्यैवेत्यर्थः॥प्रीतिंविवाहजां एतेनलक्ष्मणायोर्मिलाप्रदानंसूचितं॥१२॥अभ्यनुज्ञातः अभ्यनुज्ञातकन्याप्रदानकृत्यः॥१३॥एवंवक्ष्यमाणं॥१४॥विदेहेषुविदेहा

सोपाध्यायोमहाराजपुरोहितपुरस्कृतः॥शीघ्रमागच्छभद्रंतेद्रष्टुमर्हसिराघवौ॥११॥प्रतिज्ञांममराजेंद्रनिर्वर्तयितुमर्हसि॥पुत्रयोरुभयोरेवप्रीतिंत्वमुपलप्स्यसे॥१२॥एवंविदेहाधिपतिर्मधुरंवाक्यमब्रवीत्॥विश्वामित्राभ्यनुज्ञातःशतानंदमतेस्थितः॥१३॥तद्वाक्यंतुतच्छ्रुत्वाराजापरमहर्षितः॥वसिष्ठंवामदेवंचमंत्रिणश्चैवमब्रवीत्॥१४॥गुप्तःकुशिकपुत्रेणकौसल्यानंदवर्धनः॥लक्ष्मणेनसहभ्रात्राविदेहेषुवसत्यसौ॥१५॥दृष्टवीर्यस्तुकाकुत्स्थोजनकेनमहात्मना॥संप्रदानंसुतायास्तुराघवेकर्तुमिच्छति॥१६॥यदिवोरोचतेवृत्तंजनकस्यमहात्मनः॥पुरींगच्छामहेशीघ्रंमाभूत्कालस्यपर्ययः॥१७॥मंत्रिणोबाढमित्याहुःसहसर्वैर्महर्षिभिः॥सुप्रीतश्चाब्रवीद्राजाश्वोयात्रेतिचमंत्रिणः॥१८॥मंत्रिणस्तुनरेंद्रस्यरात्रिंपरमसत्कृताः॥ऊषुःप्रमुदिताःसर्वेगुणैःसर्वैःसमन्विताः॥१९॥इत्यार्षेश्रीरा०वा० अष्टषष्टितमःसर्गः॥६८॥

नांनिवासभूतेजनपदे॥१५॥१७॥यदिवोरोचतेवृत्तं येनसंबंधयोग्यमित्यर्थः॥पर्ययोऽतिक्रमः॥१७॥श्वोयात्रेतिमंत्रिणोब्रवीदित्यन्वयःतदर्थंउद्यमःक्रियतामितिशेषः॥१८॥मंत्रिणोजनकमंत्रिणःगुणैःसत्कारातिशयैः नरेंद्रश्वेतिपाठेसचमुदितउवासेतिविपरिणामः

यज्ञस्यावसिष्टाः क्रियाः सुताभ्यां दुहितॄोः कन्यादानशेषतयायत्कर्तव्यमंकुरार्पणादिलौकिकं तत्सर्वं कृत्वो
वास॥१५॥ इति एकोनसप्ततितमः सर्गः॥६९॥ अथ ब्राह्मसंबंधसदृशेयौनसंबंधे वध्वपेक्षितः परस्परकु
लविचारः सर्गाभ्यां· ततइति· कृतकर्मा कृतनित्यक्रियः॥१॥ पुरीमध्यवसत्॥ उपान्वध्याङि· तिकर्मत्वं॥
परबलं वारयितुं महीं वार्यः प्राकारः तत्स्थाः॥ आफलका यंत्रफलकास्तद्युतः पर्यंतः परिसरो यस्याः

उवास परमप्रीतो जनकेनाभिपूजितः॥ जनकोपि महातेजाः क्रियाधर्मेण तत्त्ववित्॥ यज्ञस्य च
सुताभ्यां च कृत्वा रात्रिमुवास ह॥१८॥ इत्यार्षे श्रीरामायणे बालकांडे एकोनसप्ततितमः सर्गः॥६९॥
ततः प्रभाते जनकः कृतकर्मा महर्षिभिः॥ उवाच वाक्यं वाक्यज्ञः शतानंदं पुरोहितं॥१॥ भ्राता मम
महातेजाः वीर्यवानतिधार्मिकः॥ कुशध्वज इति ख्यातः पुरीमध्यवसच्छुभां॥२॥ वार्याफलकप
र्यंतां पिबन्निक्षुमतीं नदीं॥ सांकाश्यां पुण्यसंकाशां विमानमिव पुष्पकं॥३॥ तमहं द्रष्टुमिच्छामि·
यज्ञगोप्ता स मे मतः॥ प्रीतिं सोपि महातेजा इमां भोक्ता मया सह॥४॥

सातथा॥ इक्षुमतीं पिबन् तज्ज
लं पिबन्॥ सांकाश्यां तदाख्यां नगरीं वार्यामल्लकपर्यंतामिति पाठे वार्यामल्लका आमल्लविशेषाः पर्यंतेषु
यस्या इत्यर्थः॥ पुण्यसंकाशां पुण्यशब्देन तत्फलं स्वर्गो न तत्संकाशां· तदुपमामित्यर्थः पुष्पकं विमा
नं कौबेरं प्रसिद्धं॥३॥ तमुक्तपुरवासिनं यज्ञगोप्ता· मिथिलायां क्रियमाणयज्ञस्य सांकाश्यायामेव
स्थित्वाऽस्मद्यज्ञापेक्षितसामग्रीसंपादकत्वेन रक्षिता॥ इमां प्रीतिं जानकीपरिणयजां॥४॥

ध वीर्यशौर्यौ ॥१०॥ वसिष्ठेइं इ साद्दश्यं पूर्णं धर्मत्वेन विघ्नाः कन्यादानप्रतिबंधाः ॥११॥ राघवैः सह संबंधः प्राप्यप
जितं मे कुलं नरेंद्र सर्वं ण । नश्रेष्ठ संवर्तयितुं निवर्तयितुं विवाहमित्यग्निमेण । न्वयः ॥१२॥ यज्ञांते श्रव
भयो ॥१३॥ प्रतिग्रहः कन्यागवादीनां दातृवशः यद्दिदाता ददाति तदा प्रतिग्राह्यं प्रतिग्रहीत्रे ति स्थि

उवाच वचनं श्रेष्ठो नरश्रेष्ठं मुदान्वितं ॥ स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोसि राघव ॥९॥ पुत्रयोरुभयोः प्री
तिं लप्स्यसे वीर्यनिर्जितां ॥ दिष्ट्या प्राप्तो महातेजा वसिष्ठो भगवानृषिः ॥१०॥ सह सर्वैर्द्विजश्रेष्ठैर्देवै
रिव शतक्रतुः ॥ दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलं ॥११॥ राघवैः सह संबंधाद्वीर्यश्रेष्ठैर्म
हाबलैः ॥ श्वः प्रभाते नरेंद्र त्वं संवर्तयितुमर्हसि ॥१२॥ यज्ञस्यांते नरश्रेष्ठ विवाहमृषिसत्तमैः ॥ तस्य
तद्वचनं श्रुत्वा ऋषिमध्ये नराधिपः ॥१३॥ वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिं ॥ प्रतिग्रहो
दातृवशः श्रुतमेतन्मया पुरा ॥१४॥ यथा वक्ष्यसि धर्मज्ञ तत्करिष्यामहे वयं ॥ तद्धर्मिष्ठं यशस्यं च वच
नं सत्यवादिनः ॥१५॥ श्रुत्वा विदेहाधिपतिः परं विस्मयमागतः ॥ ततः सर्वे मुनिगणाः परस्परसमाग
मे ॥१६॥ हर्षेण महता युक्तास्तां रात्रिमवसन्सुखं ॥ राजा च राघवौ पुत्रौ निशाम्य परिहर्षितः ॥१७॥

निः एतद्वाक्यं मया श्रुतं क्षत्रियतया प्रतिग्रहधर्मस्याप्यज्ञानमेव संपन्नमेवानुभवो भविष्यतीति श्रु
तमित्युक्तं ॥१४॥ अतो यथा त्वं वक्ष्यसि तद्वयं करिष्यामहे ॥१५॥ विस्मयं कन्याया वीर्येण शुल्केन जितत्वात्म
दनुमत्यनपेक्षायामपि राज्ञो विनयेन तादृश वचनाद्विस्मयः ॥१६॥ निशाम्य दृष्ट्वा ॥१७॥

१५॥ इदंवाक्यंवक्ष्यमाणं॰ वसिष्ठमुखेनकं म्यां वरयितुं॰॥ इक्ष्वाकुकुलदैवतंभगवान्वसिष्ठः॥ इक्ष्वाकूणांस
र्वेषुकृत्येषुवक्तेतितेविदितमित्यन्वयः॥ अतोविश्वामित्राभ्यनुज्ञयाऋषिभिःसहकुलप्रभवधर्मक

सर्वंधुर्यगमत्तत्रजनकोयत्रवर्तते॥ राजाचमंत्रिसहितःसोपाध्यायःसबांधवः॥१५॥ वाक्यंवा
क्यविदांश्रेष्ठोवैदेहमिदमब्रवीत्॥ विदितंतेमहाराजइक्ष्वाकुकुलदैवतं॥१६॥ वक्तासर्वे
षुकृत्येषुवसिष्ठोभगवानृषिः॥ विश्वामित्राभ्यनुज्ञातःसहसर्वैर्महर्षिभिः॥१७॥ एषवक्ष्य
तिधर्मात्मावसिष्ठोमेयथाक्रमं॥ तूष्णींभूतेदशरथेवसिष्ठोभगवानृषिः॥१८॥ उवाचवाक्यं
वाक्यज्ञोवैदेहंसपुरोधसं॥ अव्यक्तप्रभवोब्रह्माशाश्वतोनित्यअव्ययः॥१९॥ तस्मान्मरीचिः
संजज्ञेमरीचेःकश्यपःसुतः॥ विवस्वान्कश्यपाज्जज्ञेमनुर्वैवस्वतःस्मृतः॥२०॥ ॥
मनुःप्रजापतिःपूर्वमिक्ष्वाकुश्चमनोःसुतः॥ तमिक्ष्वाकुमयोध्यायांराजानंविद्धिपूर्वकं॥२१॥ इ
क्ष्वाकोस्तुसुतःश्रीमान्कुक्षिरित्येवविश्रुतः॥ कुक्षेरथात्मजःश्रीमान्विकुक्षिरुदपद्यत॥२२॥
विकुक्षेस्तुमहातेजाबाणःपुत्रःप्रतापवान्॥ बाणस्यतुमहातेजाअनरण्यःप्रतापवान्॥२३॥

ममनतिक्रम्य॰॥ क्रमंज्येष्ठानुक्रमंचानतिक्रम्यदशपुरुषविख्यातादितिन्यायेनयौनसंबंधापेक्षितवंशपारंपर्य
मेषवक्ष्यति॥१६॥१७॥१८॥ अव्यक्तशब्देनमायाशबलंब्रह्म॰ ब्रह्माचतुर्मुखःशाश्वतत्वनित्यत्वाव्ययत्वा
न्यस्यआपेक्षिकाणिइक्ष्वाकूणि॥१९॥२०॥ मनोःप्रजापतित्वं॰प्रजासर्गाधिकारत्वेन॰ पूर्वकं आद्यं॥२१॥२२॥२३॥

अग्रगाः समर्थाः समादिशत् शतानन्देन गन्तुं प्रेरयत्। ५। नरेन्द्रशासनात् शतानन्दप्रेरिताः प्रययुर्दूताः इति शेषः ६। ७। नृपतिः कुशध्वजः। ८। पूर्वं शतानन्दमभिवाद्य ततो जनकं चाभिवाद्येत्यर्थः। ९। अध्यारोहत पुरो

एवमुक्ते तु वचने शतानन्दस्य सन्निधौ। आगताः केचिदव्यग्राः जनकस्तान्समादिशत्। ५।
शासनात्तु नरेन्द्रस्य प्रययुः शीघ्रवाजिभिः। समानेतुं नरव्याघ्रं विष्णुमिन्द्रमिवाज्ञया। ६।
सांकाश्यां ते समागम्य ददृशुश्च कुशध्वजं। न्यवेदयन्यथावृत्तं जनकस्य च चिन्तितं। ७। तद्वृ
त्तं नृपतिः श्रुत्वा दूतश्रेष्ठैर्महाजवैः। आज्ञया तु नरेन्द्रस्य आजगाम कुशध्वजः। ८। स ददर्श
महात्मानं जनकं धर्मवत्सलं। सोभिवाद्य शतानन्दं जनकं चातिधार्मिकं। ९। राजार्हं परमं
दिव्यमासनं सोध्यरोहत। उपविष्टावुभौ तौ तु भ्रातरावमितद्युती। १०। प्रेषयामासतुर्वीरौ
मन्त्रिश्रेष्ठं सुदामनं। गच्छ मन्त्रिपते शीघ्रमैक्ष्वाकुममितप्रभं। ११। आत्मजैः सह दुर्धर्षमान
यस्व समन्त्रिणं। औपकार्यां स गत्वा तु रघूणां कुलवर्धनं। १२। ददर्श शिरसा चैनमभिवाद्ये
दमब्रवीत्। अयोध्याधिपते वीर वैदेहो मिथिलाधिपः। १३। स त्वां द्रष्टुं व्यवसितः सोपाध्या
यपुरोहितं। मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तथा। १४।

हित जनकयोरनुमत्येति शेषः। १०।

सुदामानं सुदामनाख्यं। औपकार्यां उपकार्याशब्दात्स्वार्थेण्। दशरथशिबिरसन्निवेशमित्यर्थः। १२। १३। १४।

पुत्रजन्मनितद्विषयेऽभ्यवदत् उक्तवान् ॥३४॥ गरेणसहितोजनिष्यतीत्यन्वयः माशुचः पतिमरणजंगरदानजं
चशोकंत्यज पुत्रेणैवसुखिनीभविष्यसीतिभावः ॥३५॥ पतिनारहितेतिपाठेनाभावआर्षः ॥ तस्मात् च्यवनप्रसा

सतामभ्यवदद्विप्रः पुत्रेप्सुं पुत्रजन्मनि ॥ तवकुक्षौ महाभागे सुपुत्रः सुमहाबलः ॥३४॥ महावीर्यो
महातेजा अचिरात्संजनयिष्यसि ॥ गरेण सहितः श्रीमान्माशुचः कमलेक्षणे ॥३५॥ च्यवनं च न
मस्कृत्य राजपुत्री पतिव्रता ॥ पतिनारहिता तस्मात्पुत्रं देवी व्यजायत ॥३६॥ सपत्न्या तु गरस्तस्यै
दत्तो गर्भजिघांसया ॥ सह तेन गरेणैव संजातः सगरोऽभवत् ॥३७॥ सगरस्यासमंजस्तु असमं
जादथांशुमान् ॥ दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगीरथः ॥३८॥ भगीरथात्ककुत्स्थश्च ककु
त्स्थाच्च रघुस्तथा ॥ रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥३९॥ कल्माषपादोऽप्यभवत्तस्मा
ज्जातस्तु शंखणः ॥ सुदर्शनः शंखणस्य अग्निवर्णः सुदर्शनात् ॥४०॥ शीघ्रगस्त्वग्निवर्णस्य
शीघ्रगस्य मरुः सुतः ॥ मरोः प्रशुश्रुकस्त्वासीदंबरीषः प्रशुश्रुकात् ॥४१॥ अंबरीषस्य पुत्रोऽभून्न
हुषश्च महीपतिः ॥ नहुषस्य ययातिस्तु नाभागस्तु ययातिजः ॥४२॥ नाभागस्य बभूवाजः ॥
अजाद्दशरथोऽभवत् ॥ अस्माद्दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ॥४३॥

दात् व्यजायत प्रसू
ना ॥३६॥ यतो गरेण सहितोऽतः सगरो नाम्नाऽभवत् ॥३७॥ ३८॥ प्रवृद्धस्तन्नामा पुरुषादकः वसिष्ठशाप
वशाद्राक्षसोऽभवत् । वसिष्ठाय प्रतिशापं दातुमुद्धृतं जलं स्वपत्न्यनुनयेन स्वपादयोर्विसृष्टवान्
ततः कल्माषवर्णपादत्वात्कल्माषपादोऽभवत् ॥३९॥ ४०॥ ४१॥ ४२॥ ४३॥

२४॥२५॥२६॥२७॥यस्य अ्सितस्य प्रतिराजानः शत्रुभूता राजानः॥२८॥ सोसितः प्रतियुध्यन् प्रतिपक्षतयायुध्य
न् प्रवासितः राज्यान्निर्वासितः॥२९॥ इति श्रुतिः पुरातनकथा इत्यर्थः॥३०॥ सागरं गरसहितं भव्यं शैलवरे हि

अनरण्यात्पृथुर्जज्ञे त्रिशंकुस्तु पृथोरपि॥ त्रिशंकोरभवत्पुत्रो धुंधुमारो महायशाः॥२४॥ धुंधुमारा
न्महातेजा युवनाश्वो महारथः॥ युवनाश्वसुतश्चासीन्मांधाता पृथिवीपतिः॥२५॥ मांधातुस्तु सु
तः श्रीमान्सुसंधिरुदपद्यत॥ सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित्॥२६॥ यशस्वी ध्रुवसंधे
स्तु भरतो नाम नामतः॥ भरतात्तु महातेजा असितो नाम जायत॥२७॥ यस्यैते प्रतिराजान उदप
द्यंत शात्रवः॥ हैहयास्तालजंघाश्च शूराश्च शशबिंदवः॥२८॥ तांश्च संप्रतियुध्यन्वै युद्धे राजा प्र
वासितः॥ हिमवंतमुपागम्य भार्याभ्यां सहितस्तदा॥२९॥ असितोल्पबलो राजा कालधर्ममुपेयि
वान्॥ द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः॥३०॥ एका गर्भविनाशार्थं सपत्न्यै सगरं ददौ॥ त
तः शैलवरे रम्ये बभूवाभिरतो मुनिः॥३१॥ भार्गवश्च्यवनो नाम हिमवंतमुपाश्रितः॥ तत्र चैका
महाभागा भार्गवं देववर्चसं॥३२॥ ववंदे पद्मपत्राक्षी कांक्षती सुतमुत्तमं॥ तमृषिं साभ्युपाग
म्य कालिंदी चाभ्यवादयत्॥३३॥

मवत्य॥ भिरतो बभूव॥३१॥ तत्र हिमवती एका प्राशितगरा॥३२॥ कालिं
दी तितस्या नाम॥ अभ्युपागम्य शरणं गत्वा॥ अभ्यवादयच्च चेनशुश्रूषणमप्यकरोत्॥३३॥

६।७।८।९।१०।११।१२। तस्य ह्रस्वरोमाणः ज्येष्ठोऽहं ममानुजः।१३। समम पिता मां ज्येष्ठं राज्ये भिषिच्य कुश
ध्वजं भारं भरणीयं। यद्वा कुशध्वजं भारं राज्यभारं च मयि समावेश्य स्थापयित्वा वनं गत इत्यन्वयः।१४

ध

सुकेतोरपि धर्मात्मा देवरातो महाबलः। देवरातस्य राजर्षेर्बृहद्रथ इति स्मृतः।६। बृहद्रथ
स्य शूरोऽभून्महावीरः प्रतापवान्। महावीरस्य धृतिमान्सुधृतिः सत्यविक्रमः।७। सुधृतेरपि
धर्मात्मा धृष्टकेतुः सुधार्मिकः। धृष्टकेतोश्च राजर्षेर्हर्यश्व इति विश्रुतः।८। हर्यश्वस्य मरोः पु
त्रो मरोः पुत्रः प्रतीन्धकः। प्रतीन्धकस्य धर्मात्मा राजा कीर्त्तिरथः सुतः।९। पुत्रः कीर्त्तिरथस्यापि दे
वमीढ इति स्मृतः। देवमीढस्य विबुधो विबुधस्य महीध्रकः।१०। महीध्रकसुतो राजा कीर्त्ति
रातो महाबलः। कीर्त्तिरातस्य राजर्षेर्महारोमा व्यजायत।११। महारोम्णस्तु धर्मात्मा स्वर्ण
रोमा व्यजायत। स्वर्णरोम्णस्तु राजर्षेर्ह्रस्वरोमा व्यजायत।१२। तस्य पुत्रद्वयं राज्ञो धर्मज्ञ
स्य महात्मनः। ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः।१३। मां तु ज्येष्ठं पिता राज्ये सोऽभिषि
च्य पिता मम। कुशध्वजं समावेश्य भारं मयि वनं गतः।१४। वृद्धे पितरि स्वर्याते धर्मेण धुर
मावहं। भ्रातरं देवसंकाशं स्नेहात्पश्यन्कुशध्वजं।१५। कस्यचित्त्वथ कालस्य सांकाश्यादा
गतः पुरात्। सुधन्वा वीर्यवान्राजा मिथिलामवरोधकः।१६।

धुरं राज्यभारं। स्नेहात्पश्यन्पा
लयन्।१५। सांकाश्यमिति। सुधन्वनगरनाम अवरोधकोऽगमत्। अवरोद्धुमागतवानित्यर्थः।१६।

यद्यपि वंशपरंपरा पुराणादिष्वन्यथा दृश्यते तथापि तत्र कल्पभेदेन विरोधपरिहारः एकस्यानेकनामकत्वाद्वा ॥ आ
दीति ॥ आदितो ब्रह्मण आरभ्य वंशेन शुद्धानां वीराणां सत्यवादिनां संबंधिनो रामलक्ष्मणयोरित्यर्थः ॥ ४४ ॥ ४५ इति
श्रीरामाभिरामे श्रीरामीये रामायणतिलके बालकांडे सप्ततितमः सर्गः ॥ ७० ॥ अथ जनकः कन्यापितृत्वात्

आदिवंशविशुद्धानां राज्ञां परमधर्मिणां ॥ इक्ष्वाकुकुलजातानां वीराणां सत्यवादिनां ॥ ४४ ॥ रामल
क्ष्मणयोरर्थे त्वत्सुते वरयेन्नृप ॥ सदृशाभ्यां नरश्रेष्ठ सदृशे दातुमर्हसि ॥ ४५ ॥ इत्यार्षे श्रीरामायणे
बालकांडे सप्ततितमः सर्गः ॥ ७० ॥ एवं ब्रुवाणं जनकः प्रत्युवाच कृतांजलिः ॥ श्रोतुमर्हसि भद्रं
ते कुलं नः परिकीर्तितं ॥ १ ॥ प्रदाने हि मुनिश्रेष्ठ कुलं निरवशेषतः ॥ वक्तव्यं कुलजातेन तन्निबो
ध महामते ॥ २ ॥ राजाभूत्त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा ॥ निमिः परमधर्मात्मा सर्वसत्त्वव
तां वरः ॥ ३ ॥ तस्य पुत्रो मिथिर्नाम जनको मिथिपुत्रकः ॥ प्रथमो जनको राजा जनकादप्युदाव
सुः ॥ ४ ॥ उदावसोस्तु धर्मात्मा जातो वै नंदिवर्धनः ॥ नंदिवर्धसुतः शूरः सुकेतुर्नाम नामतः ॥ ५ ॥

जामातृवर्गे प्रभुतायाः अनौचित्येन स्ववंशं स्वयमेवाह ॥ एवमिति ॥ वसिष्ठं ॥ अस्माभिः ॥ परिकीर्तितं नो
स्माकं कुलं श्रोतुमर्हसि ॥ १ ॥ कुलजातेन सत्कुलप्रसूतेन प्रदाने कन्यादानविषये कुलं वक्तव्यमि
त्यन्वयः ॥ २ ॥ ३ ॥ तस्य निमेः मिथिनाम्ना च मिथिलेति ॥ प्रथमो जनकः ॥ सर्वेषामस्माकं जनकशब्द
व्यवहार्यत्वे मूलभूतः ॥ ४ ॥ नामप्रसिद्धं ॥ नामतः सुकेतुरित्यर्थः ॥ ५ ॥

अथ तृतीयदिवसे नवमिथिलाप्रवेशात्तृतीयदिवसे यज्ञसमाप्तेस्तृतीयदिवसे वा अद्य मघानक्षत्रं फा
ल्गुन्यां पूर्वफाल्गुनीनक्षत्रे उत्तरे श्वः इति ॥ अत एव भगो यत्र प्रजापतिरित्यनेन न विरोधः ॥ भगो हि पूर्व
फाल्गुनीदेवः उत्तरफल्गुन्यास्त्वर्यमेति बोध्यम् ॥ वैवाहिकं विवाहे विनादित्वाट्ठक् ॥ मघानक्षत्रं
पितरो देवता फल्गुनीनक्षत्रमर्यमा देवता ॥ फल्गुनीनक्षत्रं भगो देवतेति तैत्तिरीयसंहितायां ॥
अर्यमाणः भगः पूर्वफल्गुनी भगस्योत्तरे इति ॥ तद्ब्राह्मणे चोक्तत्वेन यथाश्रुतमेव सम्यगिति तत्त्वं

माघान्ह्यद्य महाबाहो तृतीयदिवसे प्रभो ॥ फल्गुन्यामुत्तरे राजंस्तस्मिन्वैवाहिकं कुरु ॥ २४ ॥
रामलक्ष्मणयोरर्थे दानं कार्यं सुखोदयं ॥ २५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये वालका
ण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥ तमुक्तवन्तं वैदेहं विश्वामित्रो महामुनिः उवाच वचनं
वीरं वसिष्ठसहितो नृपम् ॥ १ ॥

उत्तरे इति पुंस्त्वमार्षं ॥ यद्यप्युत्तराफल्गुनी सीतायाः जन्मर्क्षं
तथापि तद्देहे प्रथमचरणं विहाय तज्जन्मसत्त्वेन तस्याः ॥ कन्याराशित्वात् ॥ तृतीयैकादशरूपभकू
टशुद्धेस्तत्र न दोषः ॥ भकूटशुद्धौ नक्षत्रदुष्टमिति ज्योतिःशास्त्रे प्रसिद्धं ॥ किंच पूर्वासु तस्या द्वादश
र्क्षं इति ॥ तत्र विवाहोऽनुचित एव ॥ एकनाडीदोषेण च रामसीतयोर्वियोग इति ध्येयम् ॥ २४ ॥ रा
मलक्ष्मणयोरर्थे तदभ्युदयाय सुखोदयं सुखोदर्कं दानं ॥ गोभूतिलहिरण्यादेर्दानं कार्यमित्यये
तिशेषः ॥ २५ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वालकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥
वीरं जनकम् ॥ १ ॥

शैवं धनुः सीता च कन्या मन्द्वेदी यतामिति दूतान्प्रेषयामास मे इत्यन्वयः ॥१७॥ तस्य उक्तवस्तु द्वय विमु
खो युद्धविमुखः ॥१८॥ सांकाश्ये सुधन्वनगरे ॥१९॥२०॥ ऊर्मिलां यो निजां निजपुत्री ॥२१॥ त्रिर्वदामि

सच मे प्रेषयामास शैवं धनुरनुत्तमं ॥ सीता च कन्या पद्माक्षी मन्द्वेदी यतामिति ॥१७॥
तस्या प्रदानान्महर्षे युद्धमासीन्मया सह ॥ सहतो विमुखो राजा सुधन्वा तु मया रणे ॥१८॥
निहत्य तं मुनिश्रेष्ठ सुधन्वानं नराधिपम् ॥ सांकाश्ये भ्रातरं शूरमभ्यषिंचं कुशध्वजम् ॥१९॥
कनीयानेष मे भ्राता अहं ज्येष्ठो महामुने ॥ ददामि परमप्रीतो वध्वौ ते मुनिपुंगव ॥२०॥ सी
तां रामाय भद्रं ते ऊर्मिलां लक्ष्मणाय वै ॥ वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमां ॥२१॥
द्वितीयामूर्मिलां चैव त्रिर्वदामि न संशयः ॥ ददामि परमप्रीतो वध्वौ ते मुनिपुंगव ॥२२॥
रामलक्ष्मणयो राजन्गोदानं कारयस्व ह ॥ पितृकार्यं च भद्रं ते ततो वैवाहिकं कुरु ॥२३॥

उक्तमपि दार्ढ्यायेत्याशयः ॥२२॥ गोदानं समावर्त्तनं चैवाहिकं विवाहादौ कर्त्तव्यं पितृकार्यं नांदी
मुखश्राद्धं ॥२३॥

९॥ स्वयंनतु शिष्यादिमुखतोयत्नयस्मादाज्ञापयतस्तस्मादिदंकुलंधन्यमन्ये॥१०॥ सहितौः नित्यसहचरौ अवक्रमेणतात्पर्यं॥११॥ एकान्हेति॥ टजभावोनित्याः॥ समासांताइतिसप्तम्यर्थेतृतीया॥ एकदिवसेइत्यर्थः च तस्रणांमितिदीर्घत्वमार्षं॥१२॥ फल्गुनीभ्यामुत्तरफल्गुभ्यामुपलक्षितेउत्तरेदिवसेद्वितीयेदिवसे

विश्वामित्रवचः श्रुत्वावसिष्ठस्यमतेतदा॥ जनकःप्रांजलिर्वाक्यमुवाचमुनिपुंगवौ॥९॥ कुलंधन्यमिदंमन्येयेषांतौमुनिपुंगवौ॥ सदृशंकुलसंबंधंयदाज्ञापयतःस्वयं॥१०॥ एवंभवतुभद्रंवः कुशध्वजसुतेइमे॥ पत्न्यौभजेतांसहितौशत्रुघ्नभरतावुभौ॥११॥ एकान्हाराजपुत्रीणांचतसृणांमहामुने॥ पाणीन्गृह्णंतुचत्वारोराजपुत्रामहाबलाः॥१२॥ उत्तरेदिवसेब्रह्मन्फल्गुनीभ्यांमनीषिणः॥ वैवाहिकंप्रशंसंतिभगोयत्रप्रजापतिः॥१३॥ एवमुक्त्वावचःसौम्यंप्रत्युत्थायकृतांजलिः॥ उभौमुनिवरौराजाजनकोवाक्यमब्रवीत्॥१४॥ परोधर्मःकृतोमत्तःशिष्योस्मिभवतोस्तथा॥ इमान्यासनमुख्यानिआस्यतांमुनिपुंगवौ॥१५॥

प्रजापतिर्देवताप्राशस्त्यंच विवाहप्रजोत्पत्तिसाधनयोनिलिंगाधिष्ठातभगदेवतत्वेनेतिकतकः॥१२॥ प्रत्युत्थायआसनादुत्थाय॥१५॥ परोधर्मःकन्यादानरूपः॥ अहंभवतःशिष्योस्मि॥ तथाययादशरथश्चयुवयोःशिष्याःस्वस्यशिष्यत्वेकनीयसः॥ कुशध्वजस्यशिष्यत्वमर्थसिद्धं॥ आसनमुख्यानित्रयाणांत्रीणिसिंहासनानि॥ आस्यतामित्यार्षं॥ परिपालयेनामित्यर्थकं राज्यत्रयमपियुष्मदीयमित्यर्थः॥१५

185

एषांतुल्यः परस्परव्यतिरेकेण परो नास्ति ॥ २ ॥ धर्मसंबंधो युवयोर्विवाहसंबंधः सदृशोऽनुरूपः किंचोर्मि
लायासह वर्तमानायासीतातस्याः ॥ यथायोग्पयो रामलक्ष्मणयोर्यः संबंधः स्वरूपसंपदा सदृशः सी
तयोर्मिलयेति पाठस्तु सुगम एव ३ ॥ किंचिदन्यद्वक्तव्यमस्ति तत् ॥ श्रूयतामित्यन्वयः ॥ ४ ॥ ५ ॥ कयोः

अचिंत्यान्यप्रमेयानि कुलानि रघुनंदन । इक्ष्वाकूणां विदेहानां नैषां तुल्योऽस्ति कश्चन ॥ २ ॥
सदृशो धर्मसंबंधः सदृशो रूपसंपदा । रामलक्ष्मणयो राजन् सीता चोर्मिलया सह ॥ ३ ॥
वक्तव्यं च नरश्रेष्ठ श्रूयतां वचनं मम । भ्राता यवीयान् धर्मज्ञ एष राजा कुशध्वजः ॥ ४ ॥ अस्य
धर्मात्मनो राजन् रूपेणाप्रतिमं भुवि ॥ सुताद्वयं नरश्रेष्ठ पत्न्यर्थं वरयामहे ॥ ५ ॥ भरतस्य कु
मारस्य शत्रुघ्नस्य च धीमतः ॥ वरयेते सुते राजंस्तयोरर्थे महात्मनोः ॥ ६ ॥ पुत्रा दशरथस्येमे रू
पयौवनशालिनः ॥ लोकपालसमाः सर्वे देवतुल्यपराक्रमाः ॥ ७ ॥ उभयोरपि राजेंद्र संबंधेना
नुबध्यतां । इक्ष्वाकुकुलमव्यग्रं भवतः पुण्यकर्मणः ॥ ८ ॥

पत्नीत्वार्थं तत्राह ॥ भरतस्येत्यादि ॥
अत्रचार्धे पूर्वान्वयि तत्र याते सुते ॥ सीतोर्मिले तयोरर्थे राम लक्ष्मणयोरर्थे ॥ ६ ॥ दशरथपुत्रेषु नक
स्मिन्नपि वरगुणान्यूनतेत्याह ॥ पुत्रा इति ॥ ७ ॥ उभयोर्भ्रात्रोः संबंधेनेक्ष्वाकुकुलं संबध्यतां ॥ तत्र च
संबंधे पुण्यकर्मणो भवतोऽव्यग्रचित्तं भवत्विति शेषः । कथमीदृशेन महाराजेन युगपन्मेयासंबं
धंचतुरर्थकार्यमालब्धमग्नतामास्थितमर्थः ॥ ८ ॥

रामा॰बा॰
१८६

संपन्नाबहुदुग्धा ई दृश्यो याः गावस्तासां गवां चत्वारिलक्षाणि ददौ वित्युत्तरेणान्वयः ॥२३॥ गोदानं तदाख्यक
र्मविशेषं गोदानं चौलवत्कार्यं षोडशेऽब्दे तदुच्यते ॥ अंको पवेशनं नास्ति श्मश्रूणां मुंडनं भवेत् । स्ना
त्वा च वाग्यतास्तिष्ठन्नहः शेषं नयेदथ ॥ आदित्ये चास्तमितेवाचं विसृजेतां तिके गुरोः ॥ अहं वरं द

सुवर्णशृंगीः संपन्नाः सवत्साः कांस्यदोहनाः ॥ गवां शतसहस्राणि चत्वारि पुरुषर्षभः ॥२३॥
वित्तमन्यच्च सुबहु द्विजेभ्यो रघुनंदनः ॥ ददौ गोदानमुद्दिश्य पुत्राणां पुत्रवत्सलः ॥२४॥ स
सुतैः कृतगोदानैर्वृतः सन्नृपतिस्तदा ॥ लोकपालैरिवाभाति वृतः सौम्यः प्रजापतिः ॥२५॥ इ
त्यार्षे श्रीरामायणे बालकांडे द्विसप्ततितमः सर्गः ॥७२॥ यस्मिंस्तु दिवसे राजा चक्रे गोदा
नमुत्तमं ॥ तस्मिंस्तु दिवसे वीरो युधाजित्समुपेयिवान् ॥१॥ पुत्रः केकयराजस्य साक्षाद्भर
तमातुलः ॥ दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥२॥ केकयाधिपती राजा स्नेहात्कु
शलमब्रवीत् ॥ येषां कुशलकामोऽसि तेषां संप्रत्यनामयम् ॥३॥

दामीतिदद्याज्ज्ञो मिथुनं तत
इत्याश्वलायनकारिकायां इदं समावर्तन पूर्वांगं देवव्रतानि वापारंनीत्वा त्युभयमेव वा गुरवेतु
वरं दत्वा स्नायीततनदनुज्ञयेतिया ज्ञवल्क्यात् ॥२४॥ सौम्यः सोम इव सौम्यः सोम्य एव सौम्यः ॥२५॥ इ
ति श्रीरामा॰ बाल॰ द्विसप्ततितमः सर्गः ॥७२॥ समुपेयिवान् दशरथमिति शेषः ॥१॥२॥ केकयाधि
पतिर्युधाजित्पिता कुशलमब्रवीदिति युष्मान् प्रतीति शेषः येषामस्माकं कुशलकामोऽसि तेषां

186

राम
१८६

ऋषिविवाहादिविवाहसंबन्धिनामस्यपुनरेपे (margin, partly legible)

नन्नु दशरथस्य सिंहासनं कथं त्वया शक्यदानमत आह ॥ यथेति ॥ यथयं मिथिला दशरथस्य यथेष्ठविनियो
गार्हा एवमयोध्यापुरी मम । अतो युष्माकं त्रिसिंहासनप्रभुत्वे नास्ति संदेहः ॥ अतो यथा यागं पप्रभुत्वं क
र्तुमर्हथ ॥ पूजायां बहुवचनं । वयं सर्वे भवदधीनाः इत्याशयः ॥ १६ ॥ त्वदृष्ठः एवमेकवादेनेतिशेषः ॥ १७

यथा दशरथस्येयं तथायोध्यापुरी मम ॥ प्रभुत्वे नास्ति संदेहो यथार्हं कर्तुमर्हथ ॥ १६ ॥ तथा ब्रु
वति वैदेहे जनके रघुनंदनः ॥ राजा दशरथो हृष्टः प्रत्युवाच महीपतिं ॥ १७ ॥ युवामसंख्येयगु
णौ भ्रातरौ मिथिलेश्वरौ ॥ ऋषयो राजसंघाश्च भवद्भ्यामभिपूजिताः ॥ १८ ॥ स्वस्ति प्राप्नुहि भद्रं ते ग
मिष्यामः स्वमालयं ॥ श्राद्धकर्माणि विधिवद्विधास्य इति चाब्रवीत् ॥ १९ ॥ तमापृच्छ्य नरपतिं राजा
दशरथस्तदा ॥ मुनींद्रौ तौ पुरस्कृत्य जगामाशु महायशाः ॥ २० ॥ स गत्वा निलयं राजा श्राद्धं कृ
त्वा विधानतः ॥ प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमं ॥ २१ ॥ गवां शतसहस्रं च ब्राह्मणेभ्यो
नराधिपः ॥ एकैकशो ददौ राजा पुत्रानुद्दिश्य धर्मतः ॥ २२ ॥

ऋषिरूपा भवद्वंश्या ॥ राजसंघास्ते
भवद्भ्यामभिपूजिताः अनेन विनयेन सर्वोत्कर्षं प्रापिताः ॥ भवद्वंश एवैवं विनीतो नायमपूर्वोऽर्थे
स्त्वयीति भावः ॥ १८ ॥ क्षत्रियत्वेपि प्रतिग्रहीत्वात् दातरि जनके आशीः ॥ स्वस्तीत्यादि ॥ १९ ॥ आपृच्छ्य
आपृच्छ्य ॥ २० ॥ प्रभाते उत्थाय काल्यं प्रातः कालकर्तव्यं । गोदानाख्यं कर्म चक्रे ॥ २१ ॥ तदंगत्वेन प्रसि
द्धं गोदानमाह ॥ गवामित्यादि ॥ एकैकशः मिथ्यार्थे ॥ २२ ॥

प्रतिहारोद्वारपालःयेनराजागमनंप्रतिबध्यतेइतिशेषःयथेदंममराज्यंतथातव·अत्रस्वगृहेप्रवेशेको
विचारइत्यर्थः॥१४॥अपिचकृतस्वकर्तव्येनमयैवयुष्मत्प्रतीक्षाक्रियतइत्याहकृतेति।कृतंकौतुकस
र्वस्वंवैवाहिककृत्स्नमंगलानुष्ठानंयासांताःवेदिमूलंवेदिसमीपं॥१५॥सद्यःअस्मिन्कालेत्वांप्रती

कःस्थितःप्रतिहारोमेकस्याज्ञांसंप्रतीक्षते॥स्वगृहेकोविचारोस्तियथाराज्यमिदंतव॥१४॥
कृतकौतुकसर्वस्वावेदिमूलमुपागताः॥ममकन्यामुनिश्रेष्ठदीप्तावह्नेरिवार्चिषः॥१५॥
सद्योहंत्वत्प्रतीक्षोस्मिवेद्यामस्यांप्रतिष्ठितः॥अविघ्नंक्रियतांसर्वंकिमर्थंहिविलंब्यते॥१६॥
तद्वाक्यंजनकेनोक्तंश्रुत्वादशरथस्तदा॥प्रवेशयामाससुतान्सर्वानृषिगणानपि॥१७॥
ततोराजाविदेहानांवसिष्ठमिदमब्रवीत्॥कारयस्वऋषेसर्वामृषिभिःसहधार्मिक॥१८॥
रामस्यलोकरामस्यक्रियांवैवाहिकींप्रभो॥तथेत्युक्त्वातुजनकंवसिष्ठोभगवानृषिः॥१९॥
विश्वामित्रंपुरस्कृत्यशतानंदंचधार्मिकं॥प्रपामध्येतुविधिवद्वेदिंकृत्वामहातपाः॥२०॥

ततइतित्वत्प्रतीक्षःअविघ्नमविलंबंयथातथासर्वंविवाहकर्मभवताक्रियतांकिमर्थंद्वार्यव
स्थानेनविलंब्यतेभवतेतिशेषः॥१६॥श्रुत्वावसिष्ठमुखात्॥१७॥सर्वांवैवाहिकीमित्युत्तरेणान्व
यः॥१८॥लोकरामस्यलोकप्रियस्येतियावत्॥१९॥प्रपामध्येयज्ञशालामध्येइतिकतकः प्रपा
मंडपइत्यन्ये·तृष्णाशामकत्वेनप्रपात्वारोपः वेदिं·विवाहवेदिं·॥इयंवेदिरग्न्यर्थी॥२०॥

ऽऽगमनप्रयोजनमाह-स्वस्त्रीयंभरतं।।४।।५।।ऽयोध्यायामदृष्ट्वाभरतं इक्ष्वाकुमङ्गलाभ्युपयातइत्यन्वयः।।६
७।।यज्ञवाटंयज्ञशालाद्वारं।।८।। युक्ते न्मादिसार्धश्लोकस्योपागमदिति पूर्वेणान्वयः युक्ते शुभलग्ना

स्वस्त्रीयंममराजेंद्र इक्ष्वाकुमोमहीपतिः।।तदर्थमुपयानोऽहमयोध्यांरघुनंदन।।४।।श्रुत्वात्वह
मयोध्यायांविवाहार्थंतवात्मजान्।।मिथिलामुपयांतांस्तत्वयासहमहीपते।।५।।त्वरयाभ्युप
यातोऽहं इक्ष्वाकुः स्वसुः सुतं।।अथराजादशरथःप्रियातिथिमुपस्थितं।।६।।दृष्ट्वापरमसत्का
रैः पूजनार्हमपूजयत।।ततस्तामुषितोरात्रिंसहपुत्रैर्महात्मभिः।।७।।प्रभाते पुनरुत्थायकृ
त्वाकर्माणितत्त्ववित्।।ऋषींस्तदापुरस्कृत्ययज्ञवाटमुपागमत्।।८।।युक्ते मुहूर्ते विजयेस
र्वाभरणभूषितैः।।भ्रातृभिःसहितोरामःकृतकौतुकमंगलः।।९।।वसिष्ठंतुपुरस्कृत्वामहर्षी
नपरानपि।।वसिष्ठोभगवानेत्यवैदेहमिदमब्रवीत्।।१०।।राजादशरथोराजन्कृतकौ
तुकमंगलैः।।पुत्रैर्नरवरश्रेष्ठोदातारमभिकांक्षते।।११।।दातृप्रतिगृहीतृभ्यांसर्वार्थाःसंभवं
तिहि।।स्वधर्मंप्रतिपद्यस्वकृत्वावैवाह्यमुत्तमं।।१२।।इत्युक्तःपरमोदारोवसिष्ठेनमहात्मना।।
प्रत्युवाचमहातेजावाक्यंपरमधर्मवित्।।१३।।

दियुक्ते-विजयेतदाख्ये।।९।।तत्ययज्ञवाटांतर्वर्ति
नंवैदेहं।।१०।।दातारं-दातुस्त्ववाज्ञां प्रवेशुमाकांक्षते।।११।।दातृप्रतिग्रहीतृभ्यांयोगोऽइतिशेषः-सर्वार्थादा
नधर्माःदियतोतः उत्तमवैवाह्यश्राधयोग्यविवाहोपयोगिसोचितधर्मादिकंसमर्मकृत्वाततःस्वधर्मंप्रव

श्राज्ञादानरूपं प्रतिपद्यस्वनात्रनन्वहायैर्वतिष्ठाम
इतिभावः।।१२परमोदारःपरमदाता।।१३।।

मंत्रपूतं कन्यादानमंत्रेणपूतं जलं प्राक्षिपत्तु रामहस्तेइतिशेषः॥२८॥दानीयमंत्रोदकाभ्यांपुरस्कृतां॥
२९॥उद्यतांदातुंकृतनिश्चयां॥३०॥पतीकैत्यादिप्राग्व्याख्यातं॥ज्येष्ठाङ्क्रतात्पूर्वंलक्ष्मणपाणिग्रहण॥

इत्युक्त्वा प्राक्षिपद्राजा मंत्रपूतं जलं तदा॥ साधुसाध्विति देवानामृषीणां वदतां तदा॥२८॥ देवदुं
दुभिनिर्घोषः पुष्पवर्षो महानभूत्॥ एवं दत्वा सुतां सीतां मंत्रोदकपुरस्कृतां॥२९॥ अब्रवीज्ज
नको राजा हर्षेणाभिपरिप्लुतः॥ लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतां मया॥३०॥ प्रतीच्छ पाणिं
गृह्णीष्व माभूत्कालस्य पर्ययः॥ तमेवमुक्त्वा जनको भरतं चाभ्यभाषत॥३१॥ गृहाण पाणिं
मांडव्याः पाणिना रघुनंदन॥ शत्रुघ्नं चापि धर्मात्मा अब्रवीन्मिथिलेश्वरः॥३२॥ श्रुतकी
र्त्या महाबाहो पाणिं गृह्णीष्व पाणिना॥ सर्वे भवंतः सौम्याश्च सर्वे सुचरितव्रताः॥३३॥ पत्नीभिः
संतु काकुत्स्था माभूत्कालस्य पर्ययः॥ जनकस्य वचः श्रुत्वा पाणीन्पाणिभिरस्पृशन्॥३४॥
चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः॥ अग्निं प्रदक्षिणं कृत्वा वेदिं राजानमेव च॥३५॥
ऋषींश्चापि महात्मानः सह भार्या रघूद्वहाः॥ यथोक्तेन ततश्चक्रुर्विवाहं विधिपूर्वकं॥३६॥
पुष्पवृष्टिर्महत्यासीदंतरिक्षात्सुभास्वरा॥ दिव्यदुंदुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः॥३७॥

स्तभिन्नोदरत्वान्नदोषाय॥३१॥३२॥सुचरितंव्रतंब्रह्मचर्यादियैः॥३३॥पत्नीभिःसहिताःसंतुभवंतुइत्यप्य
र्थः॥३४॥वेदिंविवाहवेदिं॰राजानंजनकं॥३५॥ऋषींश्चापिप्रदक्षिणंकृत्वेतिशेषः॥यथोक्तेनशास्त्रोक्ते

न॰प्रकारेणविवाहंतत्कृत्यशेषंहोमादि॥३६॥३७॥

१९९

सुवर्णपालिकाभिः सांकुराभिरित्यनुकर्षः चित्रकुंभैः नानावर्णादियुतकुंभैः अच्छिद्रकुंभैरितिपाठेस्फुटना
दिदोषरहितैः स्वर्णकुंभैरित्यर्थइतिकतकः छिद्रकुंभैः करकैरितितीर्थः ॥ २१ ॥ अर्घ्यादिपूजितैस्तद्युक्तैः ॥
२२ लाजपूर्णैश्चपात्रीभिरित्यार्षं संस्कृतैर्हरिद्रालेपादिसंस्कारवद्भिः समैः समप्रमाणैः समास्ती

अलंचकारतांवेदिंगंधपुष्पैः समंततः ॥ सुवर्णपालिकाभिश्च छिद्रकुंभैश्चसांकुरैः ॥ २१ ॥ अंकु
राढ्यैः शरावैश्चधूपपात्रैः सधूपकैः ॥ शंखपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्यादिपूजितैः ॥ २२ ॥ लाज
पूर्णैश्चपात्रीभिरक्षतैरपिसंस्कृतैः ॥ दर्भैः समैः समास्तीर्य विधिवन्मंत्रपूर्वकं ॥ २३ ॥ अग्निमाधाय
वेद्यांतु विधिमंत्रपुरस्कृतं ॥ जुहावाग्नौमहातेजावसिष्ठोमुनिसत्तमः ॥ २४ ॥ ततः सीतांसमा
नीयसर्वाभरणभूषितां ॥ समक्षमग्नेः संस्थाप्य राघवाभिमुखेतदा ॥ २५ ॥ अब्रवीज्जनकोरा
जाकौसल्यानंदवर्धनं ॥ इयंसीताममसुतासहधर्मचरीतव ॥ २६ ॥ प्रतीच्छचैनांभद्रंतेपाणिं
गृह्णीष्वपाणिना ॥ पतिव्रतामहाभागाछायेवानुगतासदा ॥ २७ ॥

र्यवेदिमितिशेषः ॥ २३ ॥ विधिनाक
न
ल्पोक्तनंत्रकलापेनमंत्रैश्चपुरस्कृतंहविरितिशेषः विवाहहोमादीनां वरकृत्यत्वात्तत्पुरोहितोव
सिष्ठोजुहाव ॥ २४ ॥ अग्नेः समक्षंराघवाभिमुखेदेशेसंस्थाप्येत्यन्वयः ॥ २५ ॥ इयंत्वद्गुणवीर्यनिर्जि
ताममसुतेत्यभिजात्यसूचनं सहधर्मचरीअनेनकर्तव्यंतदनयासहेतिस्मारितम् ॥ २६ ॥ प्रतीच्छप्रतिगृ
हाण नदुपयोगित्वेनपाणिनापाणिंगृह्णीष्व ॥ पाणिग्रहणंहिसर्वस्यानलिकमणीयेतिएवमुक्तेः का

कन्याशतंसखीत्वेन। तासां राजकुमारीणांप्रत्येकमितिशेषः। दासीदासमिति। गवाश्वत्वादेकत्वं। हिरण्यंर
जतंसुवर्णंहेम। षड्संतानां कोटिपदाध्याहारेणान्वयः। ५। पार्थिवंदशरथं। ६। ७। बलेश्चतुरंगेरथु
गैः किंकरैश्वसहितः। तथागच्छंतंदशरथमितिशेषः। ८। पक्षिणः करटादयः। तत्रपक्षिणांघोरव्याह

ददौकन्याशतंतासांदासीदासमनुत्तमं॥ हिरण्यस्यसुवर्णस्यमुक्तानांविद्रुमस्यच॥५॥ ददौरा
जासुसंहृष्टःकन्याधनमनुत्तमं॥ दत्त्वाबहुविधंराजासमनुज्ञाप्यपार्थिवं॥६॥ प्रविवेशस्व
निलयंमिथिलांमिथिलेश्वरः॥ राजाप्ययोध्याधिपतिःसहपुत्रैर्महात्मभिः॥७॥ ऋषीन्सर्वा
न्पुरस्कृत्यजगामसबलान्वितः॥ गच्छंतंतुनरव्याघ्रंसर्षिसंघंसराघवं॥८॥ घोरास्तुपक्षिणो
वाचोव्याहरंतिसमंततः॥ भौमाश्चैवमृगाःसर्वेगच्छंतिस्मप्रदक्षिणं॥९॥ तान्दृष्ट्वाराजशा
र्दूलोवसिष्ठंपर्यपृच्छत॥ असौम्याःपक्षिणोघोरामृगाश्चापिप्रदक्षिणाः॥१०॥ किमिदंहृदयो
त्कंपिमनोममविषीदति॥ राज्ञोदशरथस्यैतच्छ्रुत्वावाक्यंमहानृषिः॥११॥ उवाचमधुरांवाणींश्रू
यतामस्ययत्फलं॥ उपस्थितंभयंघोरंदिव्यंपक्षिमुखाच्युतम्॥१२॥

रणमादौदुर्निमित्तं। त
तोमृगप्रदक्षिणागमनंसुनिमित्तं। ९। तानशुभाशुभसूचकोत्पातान्। असौम्याः पक्षिणोघोराश्चो
रशब्दाइत्यर्थः। १०। इदंहृदयकंपजनकं किमिदंदुःखोदर्कं सुखोदर्कंवेतिप्रश्नः। अनिश्चया
त्तस्मेमनोविषीदति। ११। दिविखेभवंदिव्यं। पक्षिमुखात्च्युतंवचनंघोरंभयमुपस्थितंप्राप्नमा

तदद्भुतं दुंदुभिनिर्घोषादिसहितं पुष्पवृष्ट्यादि ॥ ३५ ॥ तूर्योणां यदद्भुतघोषस्तन्निनादिते काले त्रिरग्निमित्यु
पसंहारेणापुनर्वादः ॥ ३६ ॥ उपकार्यं शिविरं पश्यन् । वधूवरसंबंधकल्याणं ॥ ४१ ॥ इति श्रीरामाभिरामे श्रीरामी
येरामायणतिलके बालकांडे त्रिसप्ततितमः सर्गः ॥ ७३ ॥ आपृच्छ्य आपृच्छ्य तौ दशरथजनकौ । उत्तर

ननृतुश्चाप्सरः संघा गंधर्वाश्च जगुः कलं ॥ विवाहे रघुमुख्यानां तदद्भुतमदृश्यत ॥ ३६ ॥ ईदृशे
वर्त्तमाने तु तूर्योद्घुष्टनिनादिते ॥ त्रिरग्निं ते परिक्रम्य ऊहुर्भार्यां महौजसः ॥ ३७ ॥ अथोपकार्यं ज
ग्मुस्ते सभार्या रघुनंदनाः ॥ राजाप्यनुययौ पश्यन्सर्षिसंघः सबांधवः ॥ ४१ ॥ इत्यार्षे श्रीरामायणे
बालकांडे त्रिसप्ततितमः सर्गः ॥ ७३ ॥ अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ॥ आपृच्छ्य
तौ च राजानौ जगामोत्तरपर्वतं ॥ १ ॥ विश्वामित्रे गते राजा वैदेहं मिथिलाधिपं ॥ आपृच्छ्यैव ज
गामाशु राजा दशरथः पुरीं ॥ २ ॥ अथ राजा विदेहानां ददौ कन्याधनं बहु ॥ गवां शतसहस्राणि
बहूनि मिथिलेश्वरः ॥ ३ ॥ कंबलानां च मुख्यानां क्षौमान्कोट्यंबराणि च ॥ हस्त्यश्वरथपादातं दि
व्यरूपं स्वलंकृतम् ॥ ४ ॥

पर्वतं कौशिकीतटावच्छिन्नं ॥ १ ॥ जगाम गंतुमुद्यतोभूत् ॥ २ ॥ कन्याधनं
विवाहकाले कन्यायै देयं धनं यौतकाख्यं । तस्यैव प्रपंचो गवामित्यादि ॥ ३ ॥ मुख्यानां कंबलानां नेपा
लादिभवानां कंबलानां बहूनीति संबंधः क्षौमान् बहून् बहूनीति परिणामः । कोट्यंबराणि कोटि
संख्यानि सामान्यवासांसि ॥ ४ ॥

रा·मा·बा· १९०

190

जपहोमपरायणाः असन्निति शेषः यद्यपिहोमोऽग्न्यधिकरणस्तदा पथिचलनसमये बाधितस्तथाप्यपाने
जुह्वति प्राणमित्यादिर्बोध्यः इति केचिन् ॥ जपहोमपरायणत्वमुपलक्षणं ॥ अत एवाग्रे संजजल्पुरिति
संगच्छते ऽन्यथा तादृशहोमादिपरायणानां तो जल्पासंभवादित्याहुः ॥ २० ॥ ऋषीणां परस्परजल्पमा

वि

तं दृष्ट्वा भीमसंकाशं ज्वलंतमिव पावकं ॥ वसिष्ठप्रमुखा विप्रा जपहोमपरायणाः ॥ २० ॥ संग
ता मुनयः सर्वे संजजल्पुरथो मिथः ॥ कच्चित्पितृवधामर्षी क्षत्रं नोत्सादयिष्यति ॥ २१ ॥ पूर्वं
क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः ॥ क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितं ॥ २२ ॥ एव
मुक्त्वार्घ्यमादाय भार्गवं भीमदर्शनं ॥ ऋषयो राम रामेति मधुरं वाक्यमब्रुवन् ॥ २३ ॥ प्रति
गृह्य तु तां पूजामृषिदत्तां प्रतापवान् ॥ रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ २४ ॥
इत्यार्षे श्रीरा० बा० चतुःसप्ततितमः सर्गः ॥ ७४ ॥ राम दाशरथे वीर वीर्यं ते श्रूयतेऽद्भुतं
धनुषो भेदनं चैव निखिलेन मया श्रुतं ॥ १ ॥ तदद्भुतमचिंत्यं च भेदनं धनुषस्तथा ॥ तच्छ्रु
त्वाहमनुप्राप्तो धनुर्गृह्यापरं शुभम् ॥ २ ॥

टी· कच्चिदित्यादि श्लोकद्वयेऽपि नशब्दो नञ्शब्दै
कदेशो नन्वित्यर्थको वितर्के ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वा
लकांडे चतुःसप्ततितमः सर्गः ॥ ७४ ॥ किमभाषतेत्यत्राह· रामेति· निखिलेन कार्त्स्न्येन· चेन नारका
वधादिसमुच्चयः ॥ १ ॥ यत्त्वया तथाऽनायासेन धनुषो भेदनं कृतं तदद्भुतमचिंत्यं चान्येन मनसा

रामः १९०

प्रशमयेति। प्रशमं सूचयंतीत्यर्थः॥ तषां संवदतामित्यस्य पुरइतिशेषः॥१३॥ तमो भस्म चो भयमप्युत्पानजं
१४॥१५॥ ससंज्ञाइवर्ड्ंषत्संज्ञाद्रुत्यर्थः॥ अन्यत्तु बलं निःसंज्ञमेव॥ भस्मछन्ने वाभ्रादितिशेषः॥१६॥ भीम

मृगाः प्रशमयंत्येनेसंतापस्त्वपजपतामयं॥ तेषांसंवदतां तत्र वायुः प्रादुर्बभूवह॥१३॥ कं
पयन्मेदिनीं सर्वां पातयंश्च महाद्रुमान्॥ तमसासंवृतः सूर्यः सर्वेनाविदिषुर्दिशः॥१४॥
भस्मनाचावृतं सर्वं संमूढमिव तत्तबलम्॥ वसिष्ठ ऋषयश्चान्येराजा च ससुतस्तदा॥१५॥
ससंज्ञाइवतत्रासन् सर्वमन्यद्विचेतनम्॥ तस्मिंस्तमसि घोरे तु भस्मछन्नेव सा चमूः॥१६॥
ददर्श भीमसंकाशं जटामंडलधारिणम्॥ भार्गवं जामदग्न्येयं राजाराजविमर्दनम्॥१७॥
कैलासमिवदुर्धर्षं कालाग्निमिवदुःसहम्॥ ज्वलंतमिवतेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः॥१८॥
स्कंधेचासज्यपरशुं धनुर्विद्युद्गणोपमम्॥ प्रगृह्यशरमुग्रंच त्रिपुरघ्नं यथा शिवम्॥१९॥

प

संकाशं भयंकरदर्शनं॥१७॥ कैलासमिवेत्यनेन महाकारत्वं॥ दुर्धर्षमशक्यातिक्रमं॥ पृथग्ज
नः॥ पामरजनः॥१८॥ प्रभातिशयेन विद्युद्गणोपमं॥ धनुरुग्रं शरं च प्रगृह्य॥ त्रिपुरघ्नं शिवमिव
स्थितमित्यर्थः॥१९॥

इमेवक्ष्यमाणलक्षणे ॥ यत्त्वया भग्नं यच्च मयाघतं तेइत्यर्थः ॥ बलवती बलवत्तमे ॥ सुकृते पत्ननिर्मिते ॥११॥
युयुत्सवे त्रिपुरवासिभिरितिशेषः ॥ त्रिपुरघ्नं तद्धननसाधनं ॥१२॥ वैष्णवं विष्णवे दत्तं ॥ तदिदं वैष्ण
वं वैष्णवत्वेन प्रसिद्धं ॥१३॥ रौद्रेण शैवेन शैवस्येदानीमसारत्वमाह तदात्विति ॥१४॥ विष्णोस्त्रिपु
रसंहारे शरत्वेन रुद्रपरिकरान्तर्भावश्रवणात् अयं रुद्राद्दुर्बलः इतसमइत्येवं शितिकंठ

इमे द्वे धनुषी श्रेष्ठे दिव्ये लोकाभिपूजिते ॥ दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥११॥
अनुसृष्टं सुरैरेकं त्र्यंबकाय युयुत्सवे ॥ त्रिपुरघ्नं नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥१२॥
इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः ॥ तदिदं वैष्णवं राम धनुः परपुरंजयं ॥१३॥ समा
नसारं काकुत्स्थ रौद्रेण धनुषा त्विदं ॥ तदा तु देवताः सर्वाः पृच्छंति स्म पितामहं ॥१४॥ शि
तिकंठस्य विष्णोश्च बलाबलनिरीक्षया ॥ अभिप्रायं तु विज्ञाय देवतानां पितामहः ॥१५॥
विरोधं जनयामास तयोः सत्यवतां वरः ॥ विरोधे तु महद्युद्धमभवद्रोमहर्षणम् ॥१६॥

विष्णोर्बलाबलज्ञानाय देवताः पितामहं पृच्छंति स्म सच पितामहस्तेषां देवानां तत्कमभि
प्रायं विज्ञाय ॥१५॥ सत्यवतां वरः सत्यसंकल्पः स्वसंकल्पेन देवानां मोहं निरसितुमेकात्म
नोपि रुद्रविष्णो र्विरोधं जनयामास तावपि तत्संकल्पसिध्यर्थमेव विरोधं चक्रतुः इदं युद्धं
दक्षयज्ञवधेबोध्यं अतः पूर्वेणानविरोधः ॥१६॥

जामदग्न्यं जमदग्नेः स्वपितुरागतं ॰ अत्रार्थे यज्ञ आर्षे शरेणायुक्तं पूरयस्वैव आकर्षयस्व ॥ ३ ॥ अस्यापि
धनुषः पूरणेऽसति वीर्यश्लाघ्यं वीर्यवत् ॰ श्लाघ्यं च ॰ वीर्येण तद्वत्तया श्लाघ्यमित्यन्ये ॥ ४ ॥ तद्वचनं

तदिदं घोरसंकाशं जामदग्न्यं महद्धनुः ॥ पूरयस्व शरेणैव स्वबलं दर्शयस्व च ॥ ३ ॥ तदहं
ते बलं दृष्ट्वा धनुषोऽप्यस्य पूरणे ॥ द्वन्द्वयुद्धं प्रदास्यामि वीर्यश्लाघ्यमहं तव ॥ ४ ॥ तस्य तद्वच
नं श्रुत्वा राजा दशरथस्तदा ॥ विषण्णवदनो दीनः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ५ ॥ क्षत्ररोषात्प्र
शांतस्त्वं ब्राह्मणश्च महातपाः ॥ बालानां मम पुत्राणां अभयं दातुमर्हसि ॥ ६ ॥ भार्गवाणां
कुले जातः स्वाध्यायव्रतशालिनां ॥ सहस्राक्षे प्रतिज्ञाय शस्त्रं प्रक्षिप्तवानसि ॥ ७ ॥ स त्वं धर्म
परो भूत्वा कश्यपाय वसुंधरां ॥ दत्वा वनमुपागम्य महेन्द्रकृतकेतनः ॥ ८ ॥ मम सर्व विनाशाय
संप्राप्तस्त्वं महामुने ॥ न चैकस्मिन् हते रामे सर्वे जीवामहे वयं ॥ ९ ॥ ब्रुवत्येवं दशरथे जाम
दग्न्यः प्रतापवान् ॥ अनादृत्य तु तद्वाक्यं राममेवाभ्यभाषत ॥ १० ॥ राम

द्वन्द्वयुद्धवचनं ॥ ५ ॥ क्षत्ररोषात् तज्जन्यवधात् ॥ ६ ॥ सहस्राक्षे तत्सन्निधौ ॥ प्रतिज्ञाय अतः परं शस्त्रं
न ग्रहीष्यामीत्येवं प्रक्षेपस्त्यागः ॥ ७ ॥ तपसे महेन्द्रकृतकेतनस्त्वं ॥ ८ ॥ त्वं तथा त्यक्तशस्त्रादिर्मम
सर्वविनाशाय कुतः ॥ संप्राप्त इत्यन्वयः ॥ सर्वनाशमेवोपपादयति ॰ न चेत्यादि ॥ ९ ॥ १० ॥

भार्गवे भृगुपुत्रे· सऽन्नरूपो विष्णुः न्यासंप्रादात्·॥ अप्रतिकर्मणः स्वहंतर्यपिशापादिक्रियारहितस्य
२२॥ न्यस्तशास्त्रे· न्यस्ततात्क्तं विष्णुधनुरूपंशास्त्रं येनतथाभूतेतपोबलयुते पिमे पितरि प्राकृतिं बु
द्धिमास्थितोऽर्जुनः कार्तवीर्यः मत्पितुर्मृत्युं विदधे॥२३॥ तमयोग्यंपितुर्वधं श्रुत्वाहं रोषात्तत्रमुत्सा

ऋचीके भार्गवे प्रादाद्विष्णुः सन्यासमुत्तमं॥ ऋचीकस्तुमहातेजाः पुत्रस्याप्रतिकर्मणः॥२२
पितुर्मममददौदिव्यं जमदग्नेर्महात्मनः॥ न्यस्तशास्त्रेपितरिमेतपोबलसमन्विते॥२३॥
अर्जुनोविदधेमृत्युंप्राकृतांबुद्धिमास्थितः॥ वधमप्रतिरूपंतुपितुः श्रुत्वासुदारुणं॥ त्त्र
मुत्सादयंरोषाज्जातंजातमनेकशः॥२४॥ पृथिवीचाखिलांप्राप्यकश्यपायमहात्मने
यज्ञस्यांतेददंरामदक्षिणांपुण्यकर्मणे॥२५॥ दत्वामहेंद्रनिलयस्तपोबलसमन्वितः
श्रुत्वातुधनुषोभेदंततोहं द्रुतमागतः॥२६॥ तदेवंवैष्णवंरामपितृपैतामहंमहत्॥
क्षत्रधर्मंपुरस्कृत्यगृह्णीष्वधनुरुत्तमम्॥२७॥

दयंउत्सादितवान् अडभाव आर्षः॥२४
प्राप्यस्ववल्लेनेतिशेषः॥ पुण्यकर्मणे यज्ञरूपपुण्यसाध्यपुण्यपार्थी॥२५॥ दत्वाभूमिमितिशे
षः॥ महेंद्रो महेंद्रपर्वतः धनुषः शैवस्य॥२६॥ पितृपैतामहं पितृपितामहक्रमागतं· उत्तरप
दवृद्धिरार्षी॰॥ क्षत्रधर्मं महद्वृत्तिंतं मयापूर्वमंगीकृतं क्षत्रधर्मं· नतुब्राह्मणधर्ममाश्रित्यत्य
जेत्यर्थः ब्राह्मणवत्शांतिमास्थायनाहंशक्तइतिमाबुद्धीत्यर्थइतिकतकः॥२७॥

तदाहुंकारेणविष्णुनाशैवंधनुर्जृंभितंभीतंशिथिलंकृतं।महादेवश्चस्तंभितः॥१७॥१८॥ याचिताविति
एतावत्पर्यंतदृष्ट्वाप्रवृत्तनिश्चयैर्दैवैर्युद्धादुपरतियाचितौदेवतानुग्रहायप्रशमंजग्मतुः॥१९॥ विष्णुं
अधिकंश्रेष्ठं।सेव्यत्वेनमेनिरेज्ञातवंतः।वस्तुतस्तु।प्रकृतयुद्धेविष्णोराधिक्यदर्शनात्त्रिपुरवधे
शिवस्याधिक्यदर्शनात्तयोःसाम्यग्रहणमितितात्पर्यं।अधिकमित्यस्यस्वीयपूर्वज्ञानविषयस्व

शितिकंठस्यविष्णोश्चपरस्परजयैषिणोः॥तदातुजंभितंशैवंधनुर्भीमपराक्रमं॥१७॥
हुंकारेणमहादेवःस्तंभितोथत्रिलोचनः॥देवैस्तदासमागम्यसर्षिसंघैःसचारणैः॥१८॥
याचितौप्रशमंतत्रजग्मतुस्तौसुरोत्तमौ॥जंभितंतद्धनुर्दृष्ट्वाशैवंविष्णुपराक्रमैः॥१९॥
अधिकंमेनिरेविष्णुंदेवाःसर्षिगणास्तथा॥धनुरुद्रस्तुसंक्रुद्धोविदेहेषुमहायशाः॥२०॥
देवरातस्यराजर्षेर्ददौहस्तेससायकम्॥इदंचवैष्णवंरामधनुःपरपुरंजयम्॥२१॥

रूपापेक्षयाधिकमित्यर्थः।धनुरुद्रस्त्विति।एवंयुद्धदशायांक्रुद्धः।पश्चाद्देवप्रार्थनयाप्रसन्नःशिवः
देवेभ्योदत्वा।ततःसर्वैर्दैवैःसहयुद्धार्थंधनुरिक्ततोदेवरातस्यददौ।अतएववरुणेनदत्तमितिव
चनप्रमाणेन।रुद्रेणदेवानांदत्तमितिग्रक्तग्रंथेनचनविरोधइत्याहुः॥२०॥एवंचशैवस्यधनुषस्तदा
रंभाशिथिलत्वेनतत्रभंगकृतं।नतुवीर्याधिक्यमितिभार्गवाभिप्रायं।अथस्वधनुषश्चागममाह।

इदंचेत्यादिपरपुरंजयमित्यर्धसंख्यायां॥२१॥

रामा-बा
१९३

कुद्धः प्रागुक्तरूपाऽवमानवचनेन क्रोधादेव तद्धस्तात्स्वयमेव धनुः शरं चात्र भार्गवनिष्ठं वैष्णवं शक्तिं च
जग्राह तदुक्तं प्राक् इत्युक्त्वा देवैर्वैष्णवाशक्तात्ततयासह जग्राह वैष्णवं चापं विनयेन च लीलयेति
अत्रापि अग्रे वक्ष्यति निर्वीर्यो जामदग्न्योऽसौ विति लघुः शीघ्रपराक्रमो यस्य सः ॥४॥ आरोप्य ज्यारोपं कृ
त्वा शरं सज्यं ज्यासंयुक्तं चकार ॥५॥ जमदग्निपुत्रत्वेन ब्राह्मणोऽसीति विश्वामित्रभगिन्याः पौत्रोऽसीति प्र

इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य वरायुधं ॥ शरं च प्रतिसंगृह्य हस्ताल्लघुपराक्रमः ॥४॥ आ
रोप्य स धनू रामः शरं सज्यं चकार ह ॥ जामदग्न्यं ततो रामं रामः क्रुद्धोऽब्रवीदिदं ॥५॥ ब्राह्मणो
ऽसीति पूज्यो मे विश्वामित्रकृतेन च ॥ तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरं ॥६॥ इमां
वा त्वद्गतिं राम तपोबलसमार्जितान् ॥ लोकानप्रतिमान्वापि हनिष्यामीति मे मतिः ॥७॥
न ह्ययं वैष्णवो दिव्यः शरः परपुरंजयः ॥ मोघः पतति वीर्येण बलदर्पविनाशनम् ॥८॥
वरायुधधरं रामं द्रष्टुं सर्षिगणाः सुराः ॥ पितामहं पुरस्कृत्य समेतास्तत्र सर्वशः ॥९॥

193

ज्यस्त्वं मेऽसि । वधानर्होऽसि । अतस्ते प्राणहरं शरं मोक्तुं न शक्तोऽस्मीति शेषः ॥६॥ इमां प्रत्यक्षसिद्धां ग
तिं गतिसाधनपादौ तत्कृतिं चाकाशगमनादिरूपां लोकान् लोकस्य धनप्राप्तिं धर्मं । त्वत्पादक
मलेऽहन्मि ब्रूहितेत्याय वाद्वेषमिति पाद्योक्तेः । वृषो धर्मः ॥ उभयोर्मध्ये यदिच्छसि यत्तवेष्टं तद्वदे
त्यर्थः ॥७॥ कृतावमतत्राह न हीति । वीर्येण स्वशक्त्या शत्रूणां बलदर्पविनाशनः मोघो व्यर्थः ॥८॥ वरा

राम
१९३

शक्नोषिशरस्ययोजनेइतिशेषः॥तावतापिनत्वांत्वस्यामपितुद्वंद्वंदास्यामिद्वंद्वयुद्धंदास्यामित्यर्थः
अन्यथामांशरणांव्रजेतितात्पर्यम्॥२५॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेबाल
कांडेपंचसप्ततितमःसर्गः॥७५॥पितुर्गौरवात् पितृसन्निधिवशात्संयंत्रितानियमिताकथायेनैः

योजयस्वधनुःश्रेष्ठेशरंपरपुरंजय॥यदिशक्नोषिकाकुत्स्थद्वंद्वंदास्यामितेततः॥२५
इतिश्रीरामाभिरामेश्रीइत्यार्षेश्रीरामायणेवाल्मीकीयेबालकांडेपंचसप्ततितमःसर्गः
॥७५॥श्रुत्वातुजामदग्न्यस्यवाक्यंदाशरथिस्तदा॥गौरवाद्यंत्रितकथःपितूराममब्रवी
त्॥१॥श्रुतवानस्मियत्कर्मकृतवानसिभार्गव॥अनुरुध्यामहेब्रह्मन्पितुरानृण्यमा
स्थितम्॥२॥वीर्यहीनमिवाशक्तंक्षत्रधर्मेणभार्गव॥अवजानासिमेतेजः पश्यमेद्यप
राक्रमम्॥३॥

कथनंयेनसः॥१॥पितुरानृण्यंपितृहंतृक्षत्रवधेनपितृवैरशुद्धिमास्थितःसन्यत्कर्मत्रिःस
प्तकृत्वःक्षत्रियवधरूपंकृतवानसितदनुरुध्यामहेंगीकुर्मः॥आनृण्यंवशंपवैरशुद्धेःकर्त
व्यत्वात्॥२॥यन्मांक्षत्रधर्मेणयुक्तंवीर्यहीनमशक्तमिवमन्यमानोवजानासितत्रानुरुध्यामहे
अतोद्यमेतेजःपराभिभवासहनंतन्मूलंमेपराक्रमंचपश्य॥३॥ राम

रामा॰ बा॰
१६४

यदेवमतस्तामिमामित्यादि॰ ॥ नांमङ्ग तिंआकाशगमनसाध्यनौपादौचेन्नह निघ्नसितदामनोजवंपादमास्था
यकाश्यपेनसमुद्रेणाचदत्तंमहेंद्रं गमिष्यामि॰ ॥ अन्यथाप्रतिज्ञाहान्यामहत्तंसंकटंस्यादितिभावः ॥१५
तपसायज्ञादिरूपेण निर्जितात्र्प्रर्जिता॰ ॥ अत्र पुण्यार्जितलोकहनना भ्यनुज्ञयास्वस्यतत्वज्ञत्वंव्यंग्यं
रामस्यलोकदानप्रतिबंधयोःस्वातंत्र्यदर्शनेनपरेशत्वबोधनंच॰ ॥ पाद्मेपि॰ ॥ शतयज्ञकृतंपुण्यंपतद

194

तामिमांमङ्गनिंवीर हंतुंनार्हसिराघव ॥ मनोजवंगमिष्यामिमहेंद्रं पर्वतोत्तमम् ॥१५॥ लो
कास्त्वप्रतिमारामनिर्जितास्तपसामया ॥ जहितांञ्छरमुख्येनमाभूत्कालस्यपर्ययः ॥१६॥ अक्ष
य्यंमधुहंतारंजानामित्वांसुरेश्वरं ॥ धनुषोस्यपरामर्षात्स्वस्तितेस्तुपरंतप ॥१७॥ एनेसुर
गणाःसर्वेनिरीक्षंतेसमागताः ॥ त्वामप्रतिमकर्माणमप्रतिद्वंद्वमाहवे ॥१८॥

स्त्वायन्नक्षेदयदिति ॥१६॥ यलउतामतत्वस्येशानइतिश्रुतिप्रसिद्धमः ब्रह्मैवत्वमित्याह॰ ॥ अक्षयंअना
द्यंतं केनापिपराजयंनेतुमशक्यं॰ ॥ एवंनिश्चयेहेतुर्धनुषइत्यादि॰ ॥ अस्यवैष्णवस्यतरदुरारोपस्य
परामर्षोग्रहणाकर्षणादि ॥१७॥ अप्रतिद्वंद्वंप्रतिभटरहितं ॥१८॥ राम

रामः
१६४

तद्दृष्टुमागता इतिशेषः॥१०॥ वरधनुर्धरे रामेधिकरणे। तस्य भार्गवस्यालोके तेजसि संक्रांते सतीतिशेषः
ततः परशुरामस्य देहान्निर्गत्य वैष्णवं॥ पश्यतां सर्वदेवानां तेजोराममुपागमदितिनरहिंहपुराणान्
पूर्वोक्तपाद्याद्व॥ अनएव भार्गवे जडीकृते सतिनिर्वीर्यः॥ सरामोराममुदैक्षत॥ अद्भुतविस्मृतेजन
स्कमपश्यदित्यर्थः॥११॥ तदेव विवृणोति। तेजोभिरित्यादि। रामसंक्रांतैस्तेजोभिर्हेतुभिः॥ गतवीर्यत

गंधर्वाप्सरसश्चैव सिद्धचारणकिन्नराः॥ यक्षराक्षसनागाश्च तद्दृष्टुं महदद्भुतम्॥१०॥ जडीकृ
तेतदालोके रामेवरधनुर्धरे। निर्वीर्योजामदग्न्यो सौरामोराममुदैक्षत॥११॥ तेजोभिर्गतवीर्यत्वा
ज्जामदग्न्योजडीकृतः॥ रामंकमलपत्राक्षंमंदं मंदमुवाचह॥१२॥ काश्यपायमयादत्ताय
दापूर्वंवसुंधरा॥ विषयेमेनवस्तव्यमितिमांकाश्यपोब्रवीत्॥१३॥ सोहंगुरुवचः कुर्वन्पृ
थिव्यांनवसेनिशां॥ तदाप्रभृतिकाकुत्स्थकृतामेकाश्यपस्यह॥१४॥ राम

याजडीकृतः॥ परशुराम उवाच॥ शरवध्यप्रश्नोत्तरमितिशेषः॥१२॥ विषये देशे। एवमुक्तिश्चक्तत्र
भीत्यादिनिवृत्तये॥१३॥ गुरुवचः काश्यपवचः। निशांरात्रिंनवसे। तदर्थः॥ तदायदादत्तायदाचनव
स्तव्यमित्युक्तं तदाप्रभृतीतिशेषः॥ पृथिव्यांनवसेइत्यर्थः॥ यतोहंप्रसिद्धं काश्यपस्य अग्रेप्रतिज्ञा
कृताइतिशेषः। पृथिव्यांरात्रौनवसामीत्येवंरूपांप्रतिज्ञाकृता॥१४॥ ॥

रामः दाशरथिना ब्राह्मणत्वात् पूजितो नमस्कृतश्च ॥ प्रशस्येऽहेति पाठांतरं ॥ २४ ॥ शरथ्यं प्रदक्षिणीकृत्य ॥ अंत र्यामित्वेन ज्ञानात् प्रदक्षिणाकरणाच्च ॥ तत्रियत्वाच्च तस्य प्रणामकरणां कायेनेति बोध्यं ॥ आत्मगतिं तत्व- ज्ञानं स्वस्थानं च जगामेत्यर्थः ॥ प्रभुरिति ब्रह्मत्वेन सर्वलोकप्रभुत्वं ॥ २४ ॥ इति श्रीरामाभिरामे श्रीरामी

रामं दाशरथिं रामो जामदग्न्यः प्रपूजितः ॥ ततः प्रदक्षिणीकृत्य जगामात्मगतिं प्रभुः ॥ २४ ॥ इत्या र्षे श्रीरामायणे वाल्मीकीये बालकांडे षट्सप्ततितमः सर्गः ॥ ७६ ॥ गते रामे प्रशांतात्मा रामो दा शरथिर्धनुः ॥ वरुणायाप्रमेयाय ददौ हस्ते महायशाः ॥ १ ॥ अभिवाद्य ततो रामो वसिष्ठप्रमुखा नृषीन् ॥ पितरं विकलं दृष्ट्वा प्रोवाच रघुनंदनः ॥ २ ॥ जामदग्न्यो गतो रामः प्रयातु चतुरंगिणी ॥ अयोध्याभिमुखी सेना त्वया नाथेन पालिता ॥ ३ ॥ रामस्य वचनं श्रुत्वा राजा दशरथः सुतं ॥ बा हुभ्यां संपरिष्वज्य मूर्ध्न्युपाघ्राय राघवम् ॥ ४ ॥ गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः ॥ पुनर्जा तं तदा मेने पुत्रमात्मानमेव च ॥ ५ ॥

ये रामायणतिलके बालकांडे षट्सप्ततितमः सर्गः ॥ ७६ ॥

रामे परशुरामे ॥ प्रशांतो गतक्रोधश्चात्मा चित्तं यस्य ॥ हस्ते स्वहस्ते स्थितं धनुर्वरुणाय देवैः सह कौतुकदर्शनार्थमंतरिक्षे स्थिताय ददौ न्यासात्मनेति शेषः ॥ वरुणस्याप्रमेयत्वं भगवत्साक्षाद्ब्र ह्मविद्याप्रदत्वात् ॥ इदं च तैत्तिरीयोपनिषदि स्पष्टं ॥ १ ॥ विकलं परशुरामभयेन ॥ धनुर्दानवृत्तां तस्य मायया तिरोधानमन्यास्मृति ॥ २ ॥ ३ ॥ ४ ॥ हर्षो एवाधिकावस्था प्रमोदः ॥ ५ ॥ ॥

इयं त्वद्विषयेऽशक्तिः व्रीडाव्रीडार्हा तत्र हेतुस्त्वयेत्यादि· विमुखीकृतः स्वशक्तिः॥ स्वास्मिन्योजनेनाशक्तः कृतः। एतेन स्वस्य भगवदंशत्वं रामस्य च पूर्णभगवदवतारत्वं सूचितं·॥ स्वातिरिक्ते न विमुखीकरणे व्रीडा न तु स्वात्मना माययातथाकरणे इति भावः। तत्व्यवहारप्रयोजनं च दंययादशरथ्यादीन्

नचेयं मम काकुत्स्थ व्रीडा भवितुमर्हति॥ त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः॥१९॥ शरम प्रतिमं राम मोक्तुमर्हसि सुव्रत॥ शरमोक्षे गमिष्यामि महेन्द्रं पर्वतोत्तमम्॥२०॥ तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान्॥ रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमम्॥२१॥ सहतान् दृश्य रामेण स्वांल्लोकांस्तपसार्जितान्॥ जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमं॥२२॥ ततो वितिमिराः सर्वा दिशश्चोपदिशस्तथा॥ सुराः सर्षिगणा रामं प्रशशंसुरुदायुधम्॥२३॥

प्रति स्वरूपबोधनं·॥ रामस्य पूर्णतेजोवत्वसंपादनं चेति भाति·। वैष्णवतेजसोंऽशेन नान्यत्र सत्वे रावण वधस्य दुष्करत्वात्·॥ एतदर्थमेव रावणवधे देवगंधर्वादीनां इस्तु मागमनं पूर्वमुक्तं॥१९॥ शरमोक्षे गमिष्यामि·॥ पापस्य तपसा दग्धत्वात्·॥ पुण्यस्य च शरमोक्षेण फलप्रतिवंधे जीवन्मुक्तो भूत्वा गमिष्यामीत्यर्थः॥ अनेन लोकावरोधः स्वेच्छयैवेति दर्शितं॥२०॥२१॥ दृश्य दृष्ट्वा॥२२॥२३॥

देवतायतनानि पुरगृहदेवतायतनानि ॥ ताः सर्वा राजसुताः स्नुषाः सर्वा राजपत्न्यः प्रत्यपूजयन् प्रणा
मयंति स्म अभिवाद्यान् अभिवादार्हान् अभिवादनमस्कार्यं ॥ १३ ॥ कृतास्त्राः लब्धास्त्राः कृतात्राइ ति

देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन् ॥ अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तदा ॥ १३ ॥
रेमिरे मुदिताः सर्वा भर्तृभिर्मुदिता रहः ॥ कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः ॥ १४ ॥
शुश्रूषमाणाः पितरं वर्तयंति नरर्षभाः ॥ कस्यचित्त्वथ कालस्य राजा दशरथः सुतम् ॥ १५ ॥
भरतं कैकयीपुत्रमब्रवीद्रघुनंदनः ॥ अयं केकयराजस्य पुत्रो वसति पुत्रक ॥ १६ ॥ त्वां ने
तुमागतो वीरो युधाजिन्मातुलस्तव ॥ श्रुत्वा दशरथस्यैतद्भरतः कैकयीसुतः ॥ १७ ॥ गम
नायाभिचक्राम शत्रुघ्नसहितस्तदा ॥ आपृच्छ्य पितरं शूरो रामं चाक्लिष्टकारिणं ॥ १८ ॥
मातॄंश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ ॥ युधाजित्प्राप्य भरतं सशत्रुघ्नं प्रहर्षितः ॥ १९ ॥
स्वपुरं प्राविशद्वीरः पिता तस्य तुतोष ह ॥ गते च भरते रामो लक्ष्मणश्च महाबलः ॥ २० ॥

पाठे अनुष्ठितपितृनियोगाः ॥ १४ ॥ वर्तयंति पित्रुक्तं कुर्वंति नरर्षभाः रामादयः कस्यचित्कालस्यात्य
य इति शेषः ॥ १५ ॥ १६ ॥ मातुलस्तवेति अतस्तन्नगरं गत्वा आगच्छेति शेषः ॥ तद्वाक्यं ॥ १७ ॥ अक्लिष्टं क
र्मापिद्रु[?] स्वयथा न भवति तथा कर्तुं शीलमस्य तं रामं ॥ १८ ॥ १९ ॥ २० ॥

तांसेनांप्रथमंक्षुभितांपश्चात्प्राप्ताश्वासांचेत्यर्थः॥ जगाम सैनेनेतिशेषः॥ पताकाध्वजपटः ध्वजोदंडः पताकायुक्ताध्व
जवती। पताकाः स्वाङ्कध्वजाः ध्वजामहांतइत्यन्ये रम्यांस्वभावतः॥ उत्तघुष्टंघोषः॥ ६॥ सिक्तेनराजपथेनश्चा
समंतात्तरम्यां॥ ७॥ ८॥ श्रीमद्भिः दारपरिग्रहादधिकलक्ष्मीवद्भिः पुत्रैः॥ सुधालेपजधावल्यादौन्नत्याच्च

चोदयामासतांसेनांजगामाशुततःपुरीं॥ पताकाध्वजिनींरम्यांतूर्योद्घुष्टनिनादितां॥ ६॥ सिक्ता
राजपथांरम्यांप्रकीर्णकुसुमोत्कराम्॥ राजप्रवेशसुमुखैःपौरैर्मंगलपाणिभिः॥ ७॥ संपूर्णांप्रा
विशद्राजाजनौघैःसमलंकृतां॥ पौरैःप्रत्युद्गतोदूरंद्विजैश्चपुरवासिभिः॥ ८॥ पुत्रैरनुगतःश्रीमा
न् श्रीमद्भिश्चमहायशाः॥ प्रविवेशगृहंराजाहिमवत्सदृशंप्रियं॥ ९॥ ननंदस्वजनैराजागृहे
कामैःसुपूजितः॥ कौशल्याचसुमित्राचकैकयीचसुमध्यमा॥ १०॥ वधूप्रतिग्रहेयुक्तायाश्चा
न्याराजयोषितः॥ ततःसीतांमहाभागामूर्मिलांचयशस्विनीं॥ ११॥ कुशध्वजसुतेचोभेजगृहु
र्नृपयोषितः॥ मंगलालापनैर्होमैःशोभिताःक्षौमवाससः॥ १२॥ राम

हिमवत्सादृश्यंगृहे॥ ९॥ कामैः विषयभोगपरिकरस्रक्चंदनादिभिःसुपूजितः प्राप्तपूजः ननंद
१०॥ वधूनांस्नुषाणांप्रतिग्रहे मंगलाचरणपूर्वकं दर्शनस्पर्शने॥ ११॥ मंगलालापनैर्मंगलार्थमा
लापनैराशीर्वादरूपलक्षिताद्गतिशेषः होमैर्गृहप्रवेशनीयहोमैः प्राप्तशोभनाः॥ १२॥

नैतावदेव· किंतु गुणात् हितकारित्वपातिव्रत्यादिरूपात्· रूपं सौंदर्यं तद्रूपाद्गुणाच्च· भूयोधि
कं रामस्य प्रीतिर्विवर्धते स्म॥ तस्याश्च त्हृदये गुणाद्रूपगुणाच्च· भर्ता द्विगुणं परिवर्तते स्म॥२७॥

गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो विवर्द्धते॥ तस्याश्च भर्ता द्विगुणं हृदये परि
वर्तते॥२७॥ अंतर्गतमपि व्यक्तमाख्याति हृदयं हृदा॥ तस्य भूयो विशेषे
णमैथिली जनकात्मजा॥२८॥ देवताभिः समा रूपे सीता श्रीरिव रूपिणी॥२८॥

तस्य रामस्यांतर्गतं हृदयं हृदयाभिप्रायं मैथिली हृदा स्वहृदयेन भूयोधिकं विशेषेण मैथिली
जनकात्मजा रूपिणी श्रीरिव रूपे देवताभिः समा सीताख्याति जानाति· अतो जायते भर्ता
तत्र हृदयस्थ इति॥२८॥

२१॥ प्रियाणि हितानि हितानि पर्यन्ते इष्टजनकानि पौराणां परममत्यंतं यंत्रितः श्रुतिस्मृतिमर्यादा-
लंघी ॥२२॥ गुरूणां तद्विषये परमयंत्रितः गुरुकार्याणि गुरुसंबंधिशुश्रूषादीनि नैगमा वणिजः
२३॥ विषयवासिनः प्रीता इति शेषः तेषां चतुर्णां पुत्राणां मध्ये सत्यपराक्रमो राम एवातियशाः भूत

पितरं देवसंकाशं पूजयामास सतुस्तदा ॥ पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः ॥२१॥ च-
कार रामः सर्वाणि प्रियाणि च हितानि च ॥ मातृभ्यो मातृकार्याणि कृत्वा परमयंत्रितः ॥२२॥
गुरूणां गुरुकार्याणि काले कालेन्ववेक्षत ॥ एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ॥२३॥
रामस्य शीलवृत्तेन सर्वे विषयवासिनः ॥ तेषामतियशा लोके रामः सत्यपराक्रमः ॥२४॥ स्व-
यंभूरिव भूतानां बभूव गुणवत्तरः ॥ रामश्च सीतया सार्धं विजहार बहूनृतून् ॥२५॥
मनस्वी तद्गतमनास्तस्या हृदि समर्पितः ॥ प्रिया तु सीता रामस्य दाराः पितृकृता इति ॥२६॥

नां मध्ये स्वयंभूरिव गुणवत्तरो बभूवेत्युत्तरेणान्वयः ॥२४॥ बहूनृतून् द्वादशवर्षाणीत्यर्थ इ-
ति बहवः ॥२५॥ मनस्वी अनुकूलमनस्कः ॥ अत एव तद्गतमना नित्यं सीतागतमनाः ॥ तस्या हृदि
समर्पितः ॥ संबंधसामान्ये षष्ठी तयेत्यर्थः ॥ एतेन परस्परानुरागो दर्शितः पितृकृताः ब्राह्मवि-
वाहसदृशविवाहेन पितृदत्ताः स विवाह एव सर्वथा श्लाघ्य इति भावः ॥२६॥ ॥

अभिकामयास्व विषयेच्छावत्या स्वेच्छा विषयाच ॥ समेयिवान् संयुक्तः विभुः प्रभुत्वशक्तिमान् अमरेश्वरो विष्णुः श्रियेव नत्रद्वादशवर्षा ॥ राघवः सहसीतया रमयामासधर्मात्मानाराय णाइव श्रियेतिपाद्मेउक्तं ॥ एकोनषोडशवर्षस्य विश्वामित्रेणानयनात् ॥ पंचदशवर्षसमाप्तौवि वाहइतिबोध्यम् ॥ २७ ॥ इतिश्री रामाभिरामेश्री रामीये रामायण तिलके बालकांडे सप्तसप्तति

तयासराजर्षिसुतोभिकामयासमेयिवानुत्तमराजकन्यया ॥ अतीवरामः शुशुभेमु दान्वितोविभुः श्रियाविष्णुरिवामरेश्वरः ॥ २७ ॥ इत्यार्षेश्री रामायणे वाल्मीकीयेआद काव्ये चतुर्विंशत्सहस्त्रिकायांसंहितायांबालकांडे रामक्रीडाख्यानंनाम सप्तसप्तति तमः सर्गः ॥ ७७ ॥ बालकांडसंपूर्णं ॥

तमः सर्गः ॥ ७७ ॥ बालकांडेतुसर्गाणांकथितासप्तसप्ततिः श्लोकानांद्वे सहस्रेचपंचाशच्छतत्र यं ॥ १ ॥ अयंकंठः कुमारस्तेकुरु रामयथोचितं गवाग्रजन्मनां तातनम्राराघवोवयं ॥ २ ॥ बालेबालेनकल्पेन कृत्वासः रक्षणं कृतो ॥ सीतांकेध्रतायेन सरामः पातुनः सदा ॥ ३ ॥ इतिबालकांडसंपूर्णमस्तु मंगलंलेखकानांचपाठकानांचमंगलं मंगलंसर्वलोकानां भूमौभूपतिमंगलं ॥ १ ॥ ग्रंथसंख्यामूल ॥ २२५० ॥ व्याख्या ॥ १८०० ॥ राम